श्रीनारायणपण्डिताचार्यविरचितसङ्ग्रहरामायणमहाकाव्यस्य युद्धकाण्डसम्बद्धायाः श्रीकाशीश्रीनिवासाचार्यविरचितायाः टीकायास्सम्पादनं, विमर्शात्मकमध्ययनं च

Shreenaaraayanapanditaachaaryavirachitasamgraharaamaayanamaha-akaavyasya yuddhakaandasambaddhaayaah shreekaasheeshreenivaasaachaaryavirachitaayaah teekaayaah sampaadanam vimarshaatmakam adhyayanam cha

कर्नाटकसंस्कृतविश्वविद्यालयस्य

Ph.D 'विद्यावारिधि'नामकोपाध्यर्थं समर्पितः शोधमहाप्रबन्धः

मार्गदर्शकः

विद्वान् डा ॥ एच् के सुरेशाचार्यः

निवृत्तः प्रांशुपालः

एस्.एम्.एस्.पि संस्कृतस्नातक–स्नातकोत्तर–अध्ययनकेन्द्रम्

उडुपिक्षेत्रम्

अनुसन्धाता

श्रीकृष्णाचार्यः श्री कोर्लहळ्ळि

बेङ्गळूरु–६१

कर्नाटक–संस्कृत–विश्वविद्यालयः

पम्पमहाकविमुख्यमार्गः, चामराजपेटे,

बेङ्गळूरु–५६००१८

२०१८

॥ प्रतिज्ञापत्रम् ॥

श्रीनारायणपण्डिताचार्यविरचितसङ्ग्रहरामायणमहाकाव्यस्य युद्धकाण्डसम्बद्धायाः श्रीकाशीश्रीनिवासाचार्यविरचिताया टीकायाः सम्पादनं विमर्शात्मकम् अध्ययनञ्च,

इत्यस्मिन् विषये सङ्कलितोऽयं शोधप्रबन्धः । इतः पूर्वं कस्याप्युपाधेः प्राप्त्यर्थं न क्वापि समर्पितः । प्रबन्धोऽयं इदं प्रथमतः **डा.एच्.के.सुरेशाचार्य –महोदयानां** मार्गदर्शने अपेक्षिताः सकलाः सामग्रीः सम्पाद्य, प्रबन्धं निर्माय, कर्नाटकसंस्कृतविश्वविद्यालयतः **"विद्यावारिधिः" Ph.D** इत्युपाधये समर्प्यत, इति प्रतिजाने ॥

इति भवदीयः विधेयः छात्रः

स्थलम्– बेङ्गळूरु

दिनाङ्कः– **वि.श्रीकृष्णाचार्यः श्री कोर्लहळ्ळि**

Rarest Archiver

कर्नाटक–संस्कृत–विश्वविद्यालयः

पम्पमहाकविमार्गः, बेङ्गळूरु–१८

॥ प्रमाणपत्रम् ॥

श्रीनारायणपण्डिताचार्यविरचितसङ्ग्रहरामायणमहाकाव्यस्य युद्धकाण्डसम्बद्धायाः श्रीकाशीश्रीनिवासाचार्यविरचिताया टीकायाः सम्पादनं विमर्शात्मकम् अध्ययनञ्च,

विषयमिममधिकृत्य, ‘‘**विद्यावारिधिः**’’ **Ph.D** इत्युपाधिप्राप्तये, विद्वान्. **श्रीकृष्णाचार्यः श्री कोर्लहळ्ळि** महोदयेन श्रद्धया सर्वान् ग्रन्थानवलोक्य शोधप्रबन्धोऽयं मम मार्गदर्शने व्यधायि । शोधप्रबन्धोऽयम् उपोद्धातपरिशिष्टाद्यलङ्कृतः कर्नाटकसंस्कृतविश्वविद्यालयतः ‘‘**विद्यावारिधिः**’’ **Ph.D** इत्युपाधि –प्राप्तये समर्पणयोग्यमिति प्रमाणयामि ॥

मार्गदर्शकः

स्थलम्– बेङ्गळूरु **विद्वान्. डा. एच् .के.सुरेशाचार्यः**

दिनाङ्कः–

Rarest Archiver

कर्नाटकसंस्कृतविश्वविद्यालयः
KARNATAKA SANSKRIT UNIVERSITY
Pampa Mahakavi Road, Chamarajpet, Bengaluru

पूर्णप्रज्ञसंशोधनमन्दिरम्
POORNAPRAJNA SAMSHODHANA MANDIRAM
Katriguppa Main Road, Bengaluru

NATIONAL SEMINAR on TEXTUAL CRITICISM

ग्रन्थसम्पादनशास्त्रं तौलनिकमध्ययनं च

4th, 5th & 6th of November 2016

प्रतिभागिताप्रमाणपत्रम्

बेङ्गलूरुनगरस्थ-कर्नाटकसंस्कृतविश्वविद्यालयेन एवं नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानाधीनेन पूर्णप्रज्ञसंशोधनमन्दिरेण च ४.११.२०१६ तः ६.११.२०१६ पर्यन्तं "ग्रन्थसम्पादनशास्त्रं तौलनिकमध्ययनं च" इति विषयमधिकृत्य समायोजितायां राष्ट्रियसङ्गोष्ठ्यां

श्रीमान्/श्रीमती/कुमारी ......श्रीकृष्णाचार्य श्री कोल्ह[illegible]......

स्वीयप्रबन्धविषये शोधपत्रमेकं समर्प्य प्रबन्धं प्रास्तौदिति सामोदं प्रमाणीक्रियते ।

श्रीमती पद्मा शेखरः
कुलपतिः
कर्नाटकसंस्कृतविश्वविद्यालयः

डा. ए.वि. नागसम्पिगे
निदेशकः
पूर्णप्रज्ञसंशोधनमन्दिरम्

Rarest Archiver

KARNATAKA SAMSKRIT UNIVERSITY

Pampa Mahakavi Road, Chamarajpet, Bengaluru, India – 560018

In Association with

Samskrita Bharati
Aksharam, Girinagar,
Bengaluru, India – 560085

Poornaprajna Samshodhana Mandiram
Katriguppe, Bengaluru, India - 560027

Certificate

This is to certify that Prof./Dr./Sri./Smt./Ku. Srikrishnacharya Sri Konlahalli, KSU, Bengaluru has participated in A Three Day International Workshop on **"New Research Frontiers"** from 20th to 22nd November 2017 as a Participant/Resource Person held in Aksharam, Girinagar, Bengaluru.

Dr. Shivani V Convenor	Dr. V. N. Pandurangi Director, KSU	Prof. Padma Shekhar Vice Chancellor, KSU

Rarest Archiver

॥श्रीः॥

॥ श्रीरामो विजयतेतराम् ॥

श्रीमन्मध्वाचार्यकरार्चितः सीतालक्ष्मणमुख्यप्राणसंयुतः भगवान् श्रीरामचन्द्रः

–ःप्रार्थनाः–

कपिकटकधुरीणः कार्मुकन्यस्तबाणः क्षपितदितिजसैन्यः क्षत्रियेष्वग्रगण्यः ।

जलधिरचितसेतुः जानकीतोषहेतुः पथि पथि गुणसान्द्रः पातु मां रामचन्द्रः ॥

वन्दे वन्द्यं विधिभवमहेन्द्रादिवृन्दारकेन्द्रैर्व्यक्तं व्याप्तं स्वगुणगणतो देशतः कालतश्च ।

धूतावद्यं सुखचितिमयैर्मङ्गलैर्युक्तमङ्गैः सानाथ्यं नो विदधदधिकं ब्रह्मनारयणाख्यम् ॥

श्रीरामं हनुमत्सेव्यं श्रीकृष्णं भीमसेवितम् ।

श्रीव्यासं मध्वसंसेव्यं समस्ताऽभिष्टदं भजे ॥

भवति यदनुभावादेडमूकोऽपि वाग्मी जडमतिरपिजन्तुर्जायते प्राज्ञमौलिः ।

सकलवचनचेतो देवता भारती सा मम वचसि निधत्तां सन्निधिं मानसे च ॥

Rarest Archiver

–:कृतज्ञतासमर्पणम्:–

समस्तगुर्वन्तर्गतसकलतत्त्वाभिमानिदेवतान्तर्गतश्रीमुख्यप्राणान्तर्गतसीतापतेः श्रीरामचन्द्रस्य पादारविन्दयोः सभक्तिश्रद्धं अनन्तानन्तसाष्टाङ्गप्रणामान् समर्पयामि ॥

अस्माकं गुरवस्ते न्यायवेदान्तादिशास्त्रनिमग्नासु नित्यमवगाहनल्शीलाः वैदिकधर्मप्रसाराय रक्षणाय च संस्थापितपूर्णप्रज्ञविद्यापीठादि–अशीत्यधिकसंस्थाविशेषाः निरन्तरमशनवसन –पुरस्सरं विद्याप्रदानेन सम्पोषितसहस्राधिकछात्राः भक्तानुग्रहैकदीक्षाकलिताः **डा ॥ श्री श्रीविश्वेशतीर्थश्रीमच्चरणाः** । महाप्रबन्धोऽयं गुरूणामेतेषामनुग्रहविशेषेणैव समाप्तिम् अगादिति । एतैरेव प्राप्तविद्योऽहं महात्मनामेतेषां चरणकञ्जयोः सप्रश्रयं प्रणतिसन्ततिं समर्पयामि ॥

'प्रवचनकेसरी'त्युपाध्यलङ्कृताः, व्यासमध्वसंशोधनाप्रतिष्ठानस्य संस्थापकाः, राष्ट्रपति–प्रशस्तिभाजः **विद्वांसः डा ॥ व्यासनकेरे प्रभञ्जनाचार्याः** काशीश्रीनिवासाचार्यविरचितां युद्धकाण्डसम्बद्धां टीकामातृकां प्रदाय, अनुसन्धानकर्मणि प्रोत्साहितवन्तः । सप्रणामं कृतज्ञतां समर्पयन्नहं तदुपकारं न विस्मरामि ॥

पण्डितप्रकाण्डाः **विद्वांसः पर्कळ श्रीवेङ्कटेशाचार्य बायरिमहाभागाः** मद्गुरवस्ते शुद्ध–पाठस्याविष्करणे महान्तमुपकारं शिष्यवात्सल्येनाकार्षुः । तानहं प्रणमामि सभक्तिश्रद्धम् ॥

श्रीकाशीश्रीनिवासाचार्यकृतायाः सङ्ग्रहरामायणटीकायाः प्रतीकान्तरं प्रददुस्ते द्वैतवेदान्ता –ध्ययनसंशोधनप्रतिष्ठानस्य कोशाध्यक्षाः तथा सहृदयाः **विद्वांसः डा ॥ एस्.आर्. पाण्डुरङ्गि**महोदयाः । तेभ्यः सप्रणामं कृताञ्जलिर्वितीर्यते ॥

अनेकप्रशस्तिपुरस्कृताः **विद्वांसः डा ॥ एच्. के सुरेशाचार्याः** संशोधनकर्मणि मम मार्गदर्शकाः । अनेकशास्त्रनदीष्णवस्ते महाप्रबन्धस्यास्य सङ्कलने प्रतिपदं विमृश्य पूर्णरूपेण मार्गदर्शनम् अकार्षुः । तेषां साहाय्यं विना प्रबन्धोऽयं कदापि पूर्णतां नैव प्राप्नोति । शिष्यकरुणावशंवदानां सरसहृदयानामुपकारं वारं वारं संस्मरन् सप्रणामं कृतज्ञताततिं निवेदयामि ॥

संस्कृतप्रसाराय बद्धादराः कर्नाटकसंस्कृतविश्वविद्यालयस्य कुलपतिस्थानमलङ्कृत–वत्यः **प्रो ॥ श्रीमतीपद्मा शेखर्** महोदयाः । एताभ्यः सादरं कृतज्ञतां समर्पयामि ॥

Rarest Archiver

कर्नाटकसंस्कृतविश्वविद्यालयस्य कुलसचिवस्थानम् अलङ्कृतवत्यः **डा ॥ श्रीमती–शिल्पा .एम्** महोदयाः । ताभ्यः सादरं कृतज्ञतां समर्पयामि ॥

कर्नाटकसंस्कृतविश्वविद्यालयस्य अधिकारिणः सर्वे, तत्रापि **डा.वीरनारायणाचार्यपाण्डुरङ्गिमहोदयप्रमुखाः** महाप्रबन्धस्यास्य प्रत्यर्पणे बहुधोपकारं कृतवन्तः । तेभ्यः सश्रद्धं कृतज्ञताः समर्प्यन्ते ॥

एवं पूर्णप्रज्ञसंशोधनामन्दिरस्य निर्देशकेभ्यः विद्वद्भ्यः **डा.आनन्दतीर्थाचार्यनागसम्पिगे** महाभागेभ्यः सप्रणामं कृतज्ञतां समर्पये ॥

पूर्णप्रज्ञविद्यापीठसंस्कृतमहापाठशालायाः प्राचार्येभ्यः नितराम् उपकृतवद्भ्यः विद्वद्भ्यः **डा ॥ एच्. सत्यनारायाणाचार्यमहोदयेभ्यः** कृतज्ञताः समर्प्यन्ते ॥

हितोपदेशेन माम् अनुगृहीतवद्भ्यः विद्वद्भ्यः **डा ॥ कुलकर्णि तिरुमलाचार्येभ्यः** सादरं कृतज्ञतां समर्पये ॥

संशोधनसमये प्राप्तसन्देहदूरीकरणे उपकृतवद्भ्यः, विद्वद्भ्यः **वंशपल्लिकृष्णाचार्येभ्यः डा.कट्टिरङ्गनाथाचार्येभ्यः, डा.शङ्करनारायणाचार्येभ्यः,** कृतज्ञताः समर्प्यन्ते ॥

सुपथे प्रेरितवद्भ्यः **मातापितृभ्यः** स्मारं स्मारं साष्टाङ्गं नमस्सुमाञ्जलयः समर्प्यन्ते । शोधकार्ये सहकृतवते भ्रात्रे **श्रीकराचार्याय** अपि प्रणाममर्पये ॥

एवं शोधप्रबन्धस्यास्य मुद्रणावसरे गणकयन्त्रसहाय्येन पुटसंयोजनपूर्वकमुपकृतवद्भ्यः **श्रीव्यासाचार्य,श्रीरामण्णाचार्य,श्रीकान्त**महोदयेभ्यश्च सहार्दं कृतज्ञतामर्पये ॥

इति सज्जनविधेयः

श्रीकृष्णाचार्यः श्री कोर्लहळ्ळि

Rarest Archiver

॥ प्रतिज्ञापत्रम् ॥

श्रीनारायणपण्डिताचार्यविरचितसङ्ग्रहरामायणमहाकाव्यस्य युद्धकाण्डसम्बद्धायाः श्रीकाशीश्रीनिवासाचार्यविरचितायाः टीकायाः सम्पादनं, विमर्शात्मकमध्ययनं च

इत्यस्मिन् विषये सम्पादितोऽयं शोधप्रबन्धः । इतः पूर्वं कस्याप्युपाधेः प्राप्त्यर्थं न क्वापि समर्पितः । प्रबन्धोऽयं इदं प्रथमतः **डा.एच्.के.सुरेशाचार्यमहोदयानां** मार्गदर्शने अपेक्षिताः सकलाः सामग्रीः सम्पाद्य, प्रबन्धं निर्माय, कर्नाटकसंस्कृतविश्वविद्यालयस्य **‘‘विद्यावारिधिः’’ Ph.D** इत्युपाधये समर्प्यत, इति प्रतिजाने ॥

इति भवदीयः विधेयः छात्रः

स्थलम्– बेङ्गळूरु

दिनाङ्कः– **श्रीकृष्णाचार्यः श्री कोर्लहळ्ळि**

Rarest Archiver

शोधप्रबन्धेऽस्मिन्

॥ प्रथमः काण्डः ॥

॥ प्रस्तावना ॥

Rarest Archiver

प्रथमः काण्डे
प्रस्तावनाविषयसूचिका

विषयाः	पुटसङ्ख्या
१. मुखपुटम्	II
२. प्रतिज्ञापत्रम्	III
३. प्रमाणपत्रम्	IV
४. प्रमाणपत्रम् (National Seminar- 01)	V
५. प्रमाणपत्रम् (National Seminar- 02)	VI
६. प्रार्थना	VII
७. कृतज्ञतासमर्पणम्	VIII
*** प्रथमः काण्डः**	**1-91**
१. प्रस्तावनाविषयसूचिका	1
२. प्रबन्धावलोकनात् पूर्वं किञ्चित्	4
३. प्रथमकाण्डसम्बद्धं सङ्केताक्षरविवरणम्	6
४. पीठिका, रामायणस्य इतिहासः	7
५. इतिहासपुराणेषु श्रीरामकथा	10
६. वाल्मीकिरामायणमनुसृत्य प्रवृत्तानि रामायणानि	11
७. कृतिकारस्य तद्वंशस्य च परिचितिः	12
८. महाकविः तत्त्वज्ञः श्रीत्रिविक्रमपण्डिताचार्यः	12
९. सङ्ग्रहरामायणकर्ता लिकुचवंशशेखरः	13

Rarest Archiver

१०. श्रीनारायणपण्डिताचार्यस्य सङ्क्षिप्तपरिचयः 13

११. लिकुचवंशवृक्षः 15

१२. श्रीनारायणपण्डिताचार्यस्य स्वतन्त्रकृतयः 16

१३. श्रीनारायणपण्डिताचार्येण रचिताः टीकाकृतयः 16

१४. सङ्ग्रहरामायणस्य टीकासम्पत्तिः 17

१५. सङ्ग्रहरामायणस्य श्रीकाशीआचार्यकृता टीका 18

१६. व्याख्याकारं श्रीकाशीश्रीनिवासाचार्यमधिकृत्य 19

१७. काशीवंशविस्तारः 20

१८. मातृकाणां सम्पादनम् 21

१९. मातृकासङ्केतः 21

२०. सङ्ग्रहरामायणम् अधिकृत्य 22

२१. सङ्गृहकथाम् अधिकृत्य 23

२२. सङ्ग्रहरामायणे युद्धोकाण्डोन्मादः कश्चन विचारः 24

२३. कपिसेनासङ्ख्यास्वारस्यम् 29

२४. युद्धे कः कं केन प्रहरणेन प्रजहार 32

२५. युद्धीयविशेषांशाः 34

२६. श्रीसङ्ग्रहरामायणसम्बद्धानि व्याख्यानानि 50

२७. काशीश्रीनिवासाचार्यव्याख्यानस्य वैशिष्ट्यम् 50

२८. श्रीसङ्ग्रहरामायणमहाकाव्यस्य काण्डकथासंक्षेपः 62

२९. बालकाण्डकथासारः 62

३०. अयोध्याकाण्डकथासारः 63

Rarest Archiver

३१. अरण्यकाण्डकथासारः 67

३२. किष्किन्धाकाण्डकथासारः 70

३३. सुन्दरकाण्डकथासारः 73

३४. युद्धकाण्डसम्बद्धः षोडशसर्गकथासारः 77

३५. उत्तरकाण्डकथासारः 82

३६. ग्रन्थकारैः परित्यक्तः सीतापरित्यागविषयः 90

* द्वितीयः काण्डः 92-341

१. युद्धकाण्डसम्बद्धा विषयानुक्रमणिका 93

२. द्वितीयकाण्डसम्बद्धं सङ्केताक्षरविवरणम् 104

३. अणुमध्वविजयस्थं हनूमत्स्तोत्रम् 105

४. श्रीसङ्ग्रहरामायणे युद्धकाण्डः श्रीकाशीश्रीनिवासाचार्यकृतटीकासहितः 106

* तृतीयः काण्डः 342-426

१. परिशिष्टानुक्रमणिका 343

२. परिशिष्टाः 344 - 425

Rarest Archiver

शोधप्रबन्धेऽस्मिन्

॥ द्वितीयः काण्डः ॥

॥ अथ श्रीसङ्ग्रहरामायणे युद्धकाण्डः ॥

श्रीकाशीश्रीनिवासाचार्यकृतटीकासहितः

Rarest Archiver

द्वितीयः काण्डे
युद्धकाण्डसम्बद्धा विषयानुक्रमणिका

प्रथमः सर्गः पु.सं.१०६–१२१

विषयाः	श्लोकसङ्ख्या
१. श्रीरामकृतहनुमत्प्रसादः, प्रशंसा च	०१–०२
२. अम्बुधेः सेतुबन्धननिश्चयः, लङ्कायानं च	०३–१५
३. दक्षिणसमुद्रतीरे कपिभिः सह वासः	–१६–
४. विश्वेशोऽपि श्रीरामः मार्दवमाश्रित्य सिन्धुमयाचत	–१७–
५. दर्भशय्यायां श्रीरामः	१८–१९
६. रावणेन कृतमन्त्रालोचनम्	२०–२१
७. विभीषणसूक्तिः, प्रहस्तादीनां दुरुक्तिश्च	२३–२९
८. स्त्रीविषये दशमुखेन चतुर्मुखदत्तशापस्मरणम्	३०–३१
९. दशशिरसः आत्मप्रशंसा	३२–३४
१०. विभीषणेन दशाननाय राजनीतीः, हितवचनञ्च	३५–४६
११. शक्रजिते कटुवचनं पितृव्येण	४७–४८
१२. अनुजेन परित्यक्तः दशाननः	४९–५०
१३. विभीषणशराणागतिः	५१–५४

द्वितीयः सर्गः पु.सं.१२२–१३८

१४. विभीषणस्वीकारविषये विभिन्नाभिप्रायः	०१–०९
१५. हनूमता विभीषणसाधुत्वसमर्थनम्	१०–१६
१६. सर्वलोकशरण्येन श्रीरामेण विभीषणस्वीकारः	१७–२२
१७. 'भाविलङ्काधिपतिरिति' विभीषणमभ्यषिञ्चत् श्रीरामः	२३–२५

Rarest Archiver

१८. सेतुबन्धनार्थं विभीषणनिवेदनम् –२६–
१९. शार्दूलप्रेरितेन रावणेन शुकप्रेषणम् २७–३१
२०. कपीन्द्राः शुकपक्षमुदमूलयन् –३२–
२१. दूतशुकाय श्रीरामाभयम् ३३–३४
२२. सुग्रीवेण शुकाय प्रतिसन्देशः –३५–
२३. समुद्रनिग्रहाय श्रीरामकोपः ३६–४१
२४. समुद्रराजेण संस्तुतः श्रीरामः ४२–४६
२५. श्रीरामेण आभीरजन्मनामकदैत्यसंहारः –४७–
२६. श्रीरामप्रसादेन मरुकान्तारनामकवनं फलादिभिः पुष्कलमाप्तम् –४८–
२७. नळस्य सेतुनिर्मितो श्रीरामकृतादेशः –४९–
२८. सेतुबन्धाय कपीनां प्रयत्नः ५०–५१
२९. सेतुं द्रष्टुं देवोपदेवानामागमनम् ५२–५६
३०. सेतुमार्गेण सेनाया लङ्कागमनम् ५७–५८
३१. सुवेलाद्रौ ससैन्येन श्रीरामविश्रान्तिः ५९–६०
३२. देवाः श्रीरामं अभिषिञ्चेयुः –६१–

तृतीयः सर्गः पु.सं.१३९–१५२

३३. शुकस्य रावणं प्रत्यागमनम् ०१–०२
३४. श्रीरामसेनागणनाय शुकसारणप्रेषणम् ०३–०५
३५. शुकसारणयोः श्रीरामेणाभयदानम् ०६–१०
३६. श्रीरामसुग्रीवयोः भयङ्करवचनम् ११–१३
३७. रावणाय कपिसेनायाः सङ्ख्यानिवेदनम् १४–२५
३८. लक्ष्मणाग्रजादीनां पराक्रमनिरूपणम् २६–२८
३९. वचोभिः कुपितो रावणः २९–३०

Rarest Archiver

४०. सीतां प्रति राममायाशिरः प्रदर्शनम् ३१–३२

४१. राक्षसमायेति सरमया सीतासान्त्वनम् ३३–३८

४२. मातामहेन माल्यवता रावणाय बोधनम् ३९–४३

४३. रावणेन स्वसामर्थ्यनिरूपणम् ४४–४५

४४. विभीषणचाराः विभीषणमुपाययुः ४६–४७

४५. युद्धसन्नद्धा श्रीरामसेना ४८–५४

चतुर्थः सर्गः पु.सं.१५३–१६२

४६. राक्षसराजधनीं कपिश्रेष्ठाः प्रापुः ०१–०४

४७. श्रीरामाज्ञया अङ्गददौत्यम् ०५–१२

४८. अङ्गदेन रावणप्रासादभङ्गः १३–१६

४९. रावणेन युद्धाय प्रवर्तनम् –१७–

५०. श्रीरामसेनया आवृता लङ्का १८–२२

५१. श्रीरामसेनाभिः बलप्रदर्शनम् २३–३१

पञ्चमः सर्गः पु.सं.१६३–१७४

५२. चिन्तामग्नः दशाननः –०१–

५३. श्रीरामरावणभृत्यानां द्वन्द्वयुद्धम् ०२–०४

५४. हनुमद्बलज्ञः इन्द्रजित् पराद्रवत् –०५–

५५. सम्पातिकपिः प्रजङ्घं निजघान –०६–

५६. हनुमता जम्बुमालीवधः –०७–

५७. कपिभिः प्रतपनादिसंहारः ०८–१४

५८. रात्रिचरैः रात्रियुद्धम् –१५–

५९. प्रहस्तादिवधः १६–२८

६०. अङ्गदेन हतः वज्रदंष्ट्रः २९–३८

Rarest Archiver

६१. हनुमता धूम्राक्षाकम्पनादिवधः ३९–४५

६२. निशि वानरैः लङ्कादहनम् ४६–४८

६३. 'हा मातः ! हा तात' ! इति लङ्कारोदनम् –४९–

६४. चन्द्रसूर्याग्निवत् श्रीरामचन्द्रः शुशुभे –५०–

षष्ठः सर्गः पु.सं.१७५–१९०

६५. युध्दं प्रति कुम्भनिकुम्भानामागमनम् ०१–०३

६६. अङ्गदेन कम्पनप्रजङ्घयोः वधः ०४–१३

६७. मैन्दविविदाभ्यां यूपाक्षशोणिताक्षौ हतः –१४–

६८. सुग्रीवेण कुम्भवधः १५–२५

६९. हनुमता निकुम्भवधः २६–३७

७०. सुप्तघ्नादीनां श्रीरामेण वधः ३८–४०

७१. रणरङ्गं रावणकुमारैः प्रविष्टम् ४१–४४

७२. वालिनन्दनेन नरान्तकवधः ४५–५१

७३. वायुपुत्रेण देवान्तकवधः ५२–५९

७४. युद्धोन्मत्ताः त्रिशिरसश्च हताः श्रीरामभक्तेन पवनपुत्रेण ६०–६३

सप्तमः सर्गः पु.सं.१९१–१९८

७५. लक्ष्मणेन ब्रह्मास्त्रेणातिकायसंहारः १–२०

७६. श्रीरामेण मकराक्षवधः २१–३०

७७. कपभिः मकराक्षानुगामिनः मारिताः –३१–

७८. देवोपदेवमुनयः श्रीरामं ववन्दिरे –३२–

अष्टमः सर्गः पु.सं.१९९–२११

७९. युधि आगतरावणस्य घोररूपवर्णनम् ०१–०६

८०. रावणेन कपिसेनापलयनम् –०७–

Rarest Archiver

८१. गजादिभिः कपिभिः रावणसेनाहननम् –०८–
८२. कपियूथपैः रावणयुद्धम् ०९–११
८३. मुष्टिप्रहारं दशकाय हनुमता ११–१४
८४. हनुमते रावणेनापि मुष्टिप्रहारः १५–१६
८५. नीलरावणयोः घोरयुद्धम् १७–२०
८६. लक्ष्मणरावणयोर्युद्धम् २०–२३
८७. रावणबाणवरेण अवाप्तमोहः लक्ष्मणः २४–२७
८८. हनुमान् पुनश्च पौलस्त्यपुत्रं प्रजहार –२८–
८९. श्रीरामेण लक्ष्मणोज्जीवनम् २९–३१
९०. दशरथनन्दनेन दशाननपराभवः ३२–३८
९१. श्रीरामेण रावणाय प्राणदानम् ३९–४०
९२. पराजितः रावणः नगरीं प्रति गमनम् ४१–४२
९३. श्रीरामकटाक्षेण विगतोपद्रवाः वानराः –४३–

नवमः सर्गः पु.सं.२१२–२३३

९४. निद्रावशगस्य कुम्भकर्णप्रबोधनमग्रजेन ०१–०७
९५. प्रोत्थितेन कुम्भकर्णेन मांसादिभक्षणम् ०८–०९
९६. सहोदरयोः संवादः १०–१२
९७. विजयाख्येन कुम्भकर्णेन हितोक्तिः १३–१५
९८. रावणेन निष्ठुरवचनम् १६–१८
९९. अग्रजवचनेन युद्धप्रस्थानम् १९–२४
१००. कुम्भकर्णं दृष्ट्वा कपीनां कम्पनम् २५–३२
१०१. 'मा द्रवत' इति अङ्गदवचनम् ३३–३५
१०२. कपिवीराणां तेन मुष्टिघातेन पातनम् ३६–४४

Rarest Archiver

१०३. सुग्रीवकुम्भकर्णयोर्युद्धम् ४५–४८
१०४. मूर्छितं सुग्रीवं गृहीत्वा पुरगमनम् –४९–
१०५. हनुमता सूक्ष्मरूपेण च सुग्रीवसंरक्षणम् ५०–५४
१०६. हनुमत्प्रहारेण कुम्भकर्णस्य पराभवः ५५–५९
१०७. कुम्भकर्णेन पुनर्युद्धम् ६०–६६
१०८. श्रीरामेण कुम्भकर्णस्याङ्गाङ्गछेदनम् ६७–७६
१०९. श्रीरामेण कुम्भकर्णो हतः ७७–७८
११०. देवैः पुष्पवृष्टिः श्रीरामोपरि –८१–

दशमः सर्गः पु.सं.२३४–२४७

१११. रावणः विललाप ०१–०४
११२. इन्द्रजिता आभिचारप्रयोगः ०५–०८
११३. शक्रजिता नागास्त्रप्रयोगः ०९–१२
११४. देवगुह्यानुसारेण गरुडेन नागास्त्रमोचनम् १३–२२
११५. कपिसिंहानां सिंहनादम् –२३–
११६. पुनरपि नागाभोगैर्बन्धनम् २४–२७
११७. आञ्जनेयेन गन्धमादनानयनम् २८–४८
११८. कपिसमूहसंरक्षणम् ४९–५०
११९. त्रिविक्रम इव हनुमान् रराज –५१–
१२०. सौमित्र्यादिभिः अर्चितः, अमरपुष्पपूगैश्च भूषितो श्रीरामभक्तः ५२–५३

एकादशः सर्गः पु.सं.२४८–२६५

१२१. वानरसिंहनादेन लङ्का कम्पिता –०१–
१२२. पुनरिन्द्रजिता नागास्त्रबन्धनम् ०२–०३
१२३. श्रीरामेण लक्ष्मणाय युद्धनीतिः ०४–०८

Rarest Archive

१२४. श्रीराममुक्तज्ञानास्त्रेण कपीनामुद्बोधनम् ०९–१०
१२५. शक्रारिः स्वनिर्मितसीताकृतिं निजघान ११–१२
१२६. सीतापतेः दुखःप्रदर्शनम् –१३–
१२७. इन्द्रजिता निकुम्भिलायां होमः १४–१५
१२८. विभीषणेन तद्वधार्थं चोदना –१६–
१२९. तद्वधाय सविभीषणलक्ष्मणस्य प्रेषणम् श्रीरामेण १७–१८
१३०. कपिभिर्यज्ञध्वंसः १९–२१
१३१. हनुमता इन्द्रजित्पराभवः २२–३०
१३२. इन्द्रजिद्विभषणयोः वाग्युद्धम् ३१–३४
१३३. इन्द्रजिल्लक्ष्मणयोः घोरयुद्धम् ३५–५१
१३४. कपिभिः राक्षससंहारः ५२–५४
१३५. पुनश्च घोरयुद्धम्, इन्द्रजिद्वधश्च लक्ष्मणेन ५५–७०
१३६. हरिप्रबर्हैः पूजितः लक्ष्मणः –७१–
१३७. देवैः संस्तुतो सौमित्रिः श्रीरामं परिरेभे ७२–७३

द्वादशः सर्गः पु.सं. २६६–२७६

१३८. कपीनां मोदः, राक्षसानां शोकश्च –०१–
१३९. दशास्यस्य विलापः ०२–०३
१४०. रावणमूलबलेन महासैन्येन घोरं युद्धम् ०४–०५
१४१. श्रीरामेण लीलया तद्बलनाशः ०६–२१
१४२. श्रीरामेण अनन्तरूपप्रदर्शनम् २२–३२
१४३. रूपाण्यनन्तानि, गुणापरिमितापि श्रीराम एक एव ३३–३४

त्रयोदशः सर्गः पु.सं.२७७–२९७

१४४. जीविताशां तत्याज रावणः ०१–०३

Rarest Archiver

१४५. युद्धसन्नद्धः रावणः पुष्पकमारुरोह ०४–०७
१४६. विरूपाक्षादिभिः आक्रमणम् ०८–१३
१४७. अङ्गदेन महोदरमहापार्श्ववधश्च १४–२०
१४८. सुग्रीवेण यूपाक्षविरूपाक्षयोर्वधः २१–२५
१४९. लक्ष्मणरावणयोर्युद्धम् २६–३२
१५०. लक्ष्मणं प्रति शक्त्यस्त्रमोचनम् ३३–३४
१५१. हनुमता रावणवक्षसि पर्वतपातनम् –३५–
१५२. दशाननेन रक्तवमनम् –३६–
१५३. हनुमता पुनर्गन्धमादनानयनं श्रीरामाज्ञया ३७–४०
१५४. गन्धमादनगन्धेन लक्ष्मणवानराणामुज्जीवनम् ४१–४४
१५५. रावणेन पुनर्युद्धं, द्रष्टुमागमनं देवोपदेवैः ४५–४७
१५६. इन्द्रेण श्रीरामाय स्वर्गस्थरथप्रेषणम् ४८–५०
१५७. गगनसागरसदृशं श्रीरामरावणयोर्युद्धम् ५१–७९
१५८. श्रीरामेण मूर्छितः रावाणः ८०–८१

चतुर्दशः सर्गः पु.सं.२९८–३१२

१५९. गगनादगस्त्यमहर्षेरागमनम् –०१–
१६०. अगस्त्यः सूर्यमण्डलमध्यगं श्रीराममस्तौत् ०२–०४
१६१. श्रीरामरावणयोः पुनश्च घोरयुद्धम् ०५–०८
१६२. श्रीरामेण दशाननहननम् ०९–१६
१६३. अवशिष्टराक्षसाः परादृवन् –१७–
१६४. विभीषणविषादः –१८–
१६५. मण्डोदरीपूर्विकानां रावणमहिलानां विलापः १९–२०
१६६. विभीषणेन अग्रजस्य अपरसंस्कारः २१–२३

Rarest Archiver

१६७. चतुर्मुखप्रमुखैः श्रीरामस्तवनं प्रणामश्च २४–३२
१६८. रणाय रुद्रेण श्रीरामस्याह्वानम् –३३–
१६९. श्रीरामे शुद्धभावेन शिवेन क्षमायाचनम् ३३–३६
१७०. लङ्कायां विभीषणपट्टाभिषेकः –३७–
१७१. श्रीरामसमीपे सीताकृतिः ३८–४१
१७२. श्रीरामानुसृता लोकनीतिः ४२–४३
१७३. सीताकृतेः अग्निप्रवेशः ४४–४७
१७४. कैलासशैलादागता निजसीता –४८–
१७५. सीतारामसमागमेन च सन्तुष्टः सुजनाः ४९–५०

पञ्चदशः सर्गः पु.सं.३१३–३३२

१७६. गन्धमादनगिरेरानयनात् सुषेणः कपीन् निरुजश्चक्रे ०१–०२
१७७. इन्द्रेण सह दशरथागमनम्, अभिनन्दनं, निर्गमनञ्च ०३–०९
१७८. श्रीरामस्य औदार्यम् १०–१२
१७९. विभीषणेन पुष्पकविमानसमर्पणम् १३–१५
१८०. श्रीरामेण कपिराक्षसैः सहायोध्यागमनम् १६–१८
१८१. भरद्वाजाश्रमे मुनिना सपर्याप्तः श्रीरामः –१९–
१८२. भरताय निवेदयितुं हनुमत्प्रेषणम् २०–२१
१८३. हनुमता भरतसंदर्शनम् २२–२४
१८४. आनन्दभरितः भरतः मारुतिं प्रणनाम २५–३०
१८५. भरतेन सीतापतेः स्वागतसम्भ्रमः ३१–३५
१८६. हनुमता वर्णितम् श्रीरामवैभवम् ३६–४२
१८७. भरतेन विभुदर्शनम् ४३–४४
१८८. भक्तिभरितेन भरतेन वन्दनम् ४५–५०

Rarest Archiver

१८९. शत्रुघ्नेनापि श्रीरामवन्दनम् –५१–
१९०. ससीतालक्ष्मणः श्रीरामः मातॄः ववन्दे –५२–
१९१. श्रीरामाय राज्यसमर्पणम् ५३–५५
१९२. श्रीरामेण वसिष्ठमहर्षये गौरवसमर्पणम् –५६–
१९३. पुष्पकविमानसम्प्रेषणम् –५७–
१९४. श्रीरामेण साम्राज्यसिंहासनस्वीकारः –५८–
१९५. सस्त्रीकाः वानराः सर्वाङ्गसुन्दररूपं भेजुः –५९–
१९६. अयोध्यायां श्रीरामपट्टाभिषेकापूर्वमहोत्सवः ६०–८५

षोडशः सर्गः पु.सं.३३३–३४१

१९७. वसिष्ठादिमहर्षिभिः श्रीरामपट्टाभिषेकः ०१–०५
१९८. शुभप्रसङ्गेऽस्मिन् वाद्यानाम् आघोषः –०६–
१९९. गन्धर्ववर्यैः गीतगायनम्, अप्सरसोभिः नर्तनञ्च ०७–०८
२००. वसिष्ठादयः हेमघटैः श्रीराममभिषिञ्चन् –०९–
२०१. शत्रुघ्नः श्वेतच्छत्रं दध्रे, चामरे चालितवन्तौ सुग्रीवविभीषणौ –१०–
२०२. श्रीरामेण सुवर्णरत्नगोवस्त्राभरणान्यभीष्टानि च प्रदत्तानि ११–१५
२०३. हनुमते सीतारामेण मुक्तमालाप्रदानेन परमानुग्रहः १६–२३
२०४. श्रीरामः सर्वसज्जनानां मनोदृशां महोत्सवोऽभूत् –२४–
२०५. दासश्रेष्ठैः श्रीरामे नवविधभक्तिसमर्पणम् –२५–
२०६. परमश्रीरामयारमत श्रीरामदेवः –२६–

Rarest Archive

द्वितीयकाण्डसम्बद्धं सङ्केताक्षरविवरणम्

१. वा.वे– वाळ्वेकर् वेङ्कटेशाचार्यः (लिपिकारस्य नाम)

२. दू.कृ.श्री– दूर्वास कृष्णाचार्यसुतश्रीनिवासाचार्यः (लिपिकारस्य नाम)

३. सं.रा.सु.का.– सङ्ग्रहरामायणे सुन्दरकाण्डः ।

४. श्रीवि.भू.टी.– श्रीविश्वभूषणतीर्थकृता टीका ।

५. अष्टाध्यायी पा.सू– पाणनीयसूत्रम् ।

६. ब.गो– बनञ्जे गोविन्दाचार्यैः सम्पादितं पुस्तकम् ।

७. सं.रा.यु.का.– सङ्ग्रहरामायणे युद्धकाण्डः । (एवमेव काण्ड,सर्गव्यत्यासेन चिन्यम्)

८. ब.गो.सं.का.श्री– **बनञ्जे गोविन्दाचार्यैः सङ्ग्रहिता काशीश्रीनिवासाचार्यव्याख्या । (foot nots) मध्ये**

९. ब.गो.सं.पा– बनञ्जे गोविन्दाचार्यैस्सम्पादितः पाठान्तरः ।

१०. मू.श्लो.पा– मूलश्लोकयुतपाठः । (मूलमातृका)

११. प्र.व्या.– व्यासनकेरे श्रीप्रभञ्जनाचार्यैः सम्पादितं पुस्तकम् ।

१२. श्रीमद्भागवते.९.स्क.८.अ.– श्रीमद्भागवते नवमस्कन्दे अष्टमाध्यायः ।

१३. श्रीविश्व.ती.– श्रीविश्वपतितीर्थकृता टीका ।

१४. वै.सि.कौमुदी– वैय्याकरणसिद्धान्तकौमुदी ।

१५. अ.कोशे.१.का.स्वर्गवर्गे.– अमरकोशे प्रथमकाण्डे वर्गः,श्लोकश्च ।

वि.सू.–एवमेव सर्वत्रापि काण्ड,वर्ग,श्लोकव्यत्यासैः चिन्त्यम् ।

१६. श्री.म.भा.ता.नि– श्रीमन्महाभारततात्पर्यनिर्णयः ।

१७. का.श्री– काशीश्रीश्रीनिवासाचार्यः ।

१८. धा.प्र– धातुप्रदीपे ।

१९. तं.सा.सं.४.अ.– तन्त्रसारसङ्ग्रहे चतुर्थाध्यायः ।

Rarest Archiver

२०. श्रीविश्व.ती.भा.दी– श्रीविश्वपतितीर्थियभावार्थदीपिकाव्याख्यायाम् ।

२१. वै.कोशे– वैजयन्तीकोशे ।

२२. श्री.भ.गीता.९.अ.– श्रीमद्भगवद्गीतायां नवमाध्यायः ।

२३. श्रीब्र.सू.अ.व्या.२.अ.२.पा.– श्रीब्रह्मसूत्रानुव्याख्याने द्वितीयाध्याये द्वितीयपादः ।

२४. स.स्मृ.– श्रीसदाचारस्मृतिः ।

२५. वा.रा.यु.का.– श्रीमद्वाल्मीकिरामायाणे युद्धकाण्डः ।

॥ अणुमध्वविजयस्थं हनूमत्स्तोत्रम् ॥

श्रीनारायणपण्डिताचार्यकृतस्य ग्रन्थस्यास्य प्रमेयनवमालिका इति नामान्तरम्

श्रीशप्रीत्यै प्रजातः सुमहितमहिमा श्रीहनूमान् निदेशा–
द्रामस्योल्लङ्घिताब्धिः सहरिरथगतः सेतुना पिष्टदुष्टः ।
भूभृन्नी रावणारिं पुरगमुरुदयं पूजयित्वा ससीतं
पश्यन् किम्पूरुषे तं सततमपि महाप्राणमुख्योऽवतान्माम् ॥१॥

Rarest Archiver

शोधप्रबन्धेऽस्मिन्

॥ तृतीयः काण्डः ॥

॥ परिशिष्टानि ॥

Rarest Archiver

तृतीये काण्डे
परिशिष्टानुक्रमणिका

परिशिष्टेषु विषयाः	पुटसङ्ख्या
१. श्रीनारयणपण्डिताचार्याणां प्रशस्तिः	380
२. श्रीकाशीआचार्यकृताः सङ्ग्रहरामायणव्याख्यानस्य आद्यन्तश्लोकाः	381
३. युद्धकाण्डीयालङ्कारविशेषाः	382
४. श्रीमन्मध्वाचार्यैः श्रीरामायणपारायणश्रवणादिफलम्	390
५. छन्दोगतिः युद्धकाण्डपद्येषु	391
६. एकश्लोकी रामायणम्	394
७. सप्तर्षिरामायणम् (सङ्क्षिप्तरामायणम्)	395
८. श्रीनारायणपण्डिताचार्यविरचितायां मणिमञ्जर्यां श्रीरामकथा	397
९. श्रीनारायणपण्डिताचार्यविरचितं श्रीरामगीत्यष्टकम्	403
१०. श्रीनारायणपण्डिताचार्यविरचितं श्रीदाशरथ्यष्टकम्	405
११. श्रीराघवेन्द्रयतिरचिता सं.रा.कथासङ्ग्रहरूपा श्रीरामचारित्रमञ्जरी	407
१२. श्रीसङ्ग्रहरामायणे युद्धकाण्डस्थाः सूक्तयः	409
१३. आदित्यहृदयस्तोत्रम् (वाल्मीकिरामायणान्तर्गतम् अगस्त्यमहर्षिणा प्रोक्तम्)	411
१४. सङ्ग्रहरामायणोल्लिखितानां देवानां महर्षिणां चावतारविशेषपरिचयः	414
१५. सङ्ग्रहरामायणोल्लिखितानां राक्षसानामवतारविशेषपरिचयः	416
१६. संशोधनार्थं परामृष्टाः ग्रन्थाः (Bibliography)	418
१७. परामृष्टानि कर्णाटकभाषापुस्तकानि च	423
१८. RELATED RAMAYANA BOOKS	423
१९. प्रबन्धावलोकनानन्तरं किञ्चित्_	424
२०. सङ्ग्रहरामायणस्य युद्धकाण्डसम्बद्धा श्लोकार्द्धानुक्रमणिका	427

Rarest Archiver

॥ अथ प्रथमः सर्गः ॥

वाणीं श्रुत्वा हनुमतो वाणीमाचष्ट राघवः ।

कुर्वन् प्रसादसामग्रीं निर्व्याजां सर्वतोऽधिकाम् ॥१॥

पूर्वसर्गे– “पवनसूनुः[१] अखिलं वृत्तान्तं[२] प्रोवाच”[३] इत्युक्तम् । हनुमद्वाक्यश्रवणानन्तरं रामः किं चकार? इत्यत आह– **वाणीमिति । राघवः**=रामः **हनुमतः वाणीं श्रुत्वा,** हनुमति **सर्वतः**=समस्तात् जीवसमूहात् **अधिकां=**श्रेष्ठां **निर्व्याजां**=निष्कपटाम्, फलो–पाधिरहितां वा **प्रसादसामग्रीं**=अनुग्रहाख्यसामग्रीं[४] मोक्षे आनन्दातिशये, इह सत्यलोका–धिपत्यादौ[५] च साधनभूतम्[६] इति यावत् । **कुर्वन् सन् वाणीं**=वाचम् **आचष्ट**=उवाच । **‘प्रसादसामग्रीं कुर्वन्’** इत्यनेन ‘हनुमते आत्मानमेव प्रादात्’[७] इत्यस्य अभिप्राय उक्तो भवति ॥१॥

पौरुषे पुरुषः कोऽन्यो विद्यते हनुमत्समः ।

रावणं यस्तृणीचक्रे[८] सिन्धुमुल्लङ्घ्य लीलया ॥२॥

रामः हनूमन्तं स्तौति – **पौरुष** इति । **यः**=हनुमान् **लीलया**=अनायासेन **सिन्धुं=**लवणसमुद्रम् **उल्लङ्घ्य**=अतिक्रम्य, लङ्कां प्राप्य **रावणं तृणीचक्रे**=तृणसदृशं चकार । तस्य=हनूमतः **पौरुषे**=पराक्रमविषये **हनुमत्समः अन्यः पुरुषः को विद्यते** ? न कोऽपि इत्यर्थः ॥२॥

इत्युक्त्वा सह सम्मन्त्र्य भगवान् सूर्यसूनुना[९] ।

कपीनां लङ्घनोपायं निश्चिक्ये सेतुमम्बुधेः ॥३॥

---

१. **‘सुतः’** इति दू.कृ.श्री ।
२. **‘च वृत्तम्’** इति वा.वे ।
३. **‘प्रोचे’** इति वा.वे ।
४. **‘प्रसादख्यसामग्रीं’** इति वा.वे ।
५. **‘सत्यलोकाधिपत्ये’** इति दू.कृ.श्री ।
६. **‘साधनभूतमनुग्रहम्’** इति दू.कृ.श्री ।
७. **सं.रा सु.का. .स.६९.श्लोकः** ।
८. **‘यस्तृणीकृत्य’** इति श्रीवि.भू ।
९. **‘वायुसूनुना’** इति वा.वे ।

Rarest Archiver

भगवान्=रामः **इति उक्त्वा, सूर्यसुनुना**=सुग्रीवेण **सह**=साकं **संमन्त्र्य=**आलोच्य, **कपीनां लङ्घनोपायम्**=अतिक्रमणे साधनम् **अम्बुधेः सेतुं निश्चिक्ये**=निश्चितवान् । 'चिञ्=चयने' लिट् । '*विभाषा चेः*'[१] इति अभ्यासात् परस्य कुत्वम् ॥३॥

लङ्कापुरस्य दुर्गत्वं राक्षसानां च तद् बलम् ।

उक्तं श्रुत्वा हनुमता रामः स्मितमुखोऽब्रवीत् ॥४॥

रामः हनुमता उक्तं लङ्कापुरस्य दुर्गत्वं=गन्तुम् अशक्यत्वं, **राक्षसानां तत्=**प्रसिद्धं **बलं**=सेनां सामर्थ्यं च **श्रुत्वा, स्मितमुखः**=मन्दस्मितमुखः सन् **अब्रवीत्** ॥४॥

समूलतूलं धक्ष्यामि रावणारण्यमुल्बणम् ।

उत्तराफल्गुनी ह्यद्य मध्याह्ने गमनं शुभम् ॥५॥

किम् अब्रवीत्? इत्यत आह– **समूलतूलमिति । उल्बणं=**क्रूरं रावणाख्यम् **अरण्यम्,** मूलं च तूलं च मूलतूले । मूलतूलभ्यां सह वर्तत इति **समूलतूलं**, मूलेन च अग्रेण सहितं यथा तथा **समूलतूलं**=सर्वात्मना इत्यर्थः । **धक्ष्यामि**=भस्मीकरिष्यामि 'दह= भस्मीकरणे' लृट् । **अद्य उत्तराफाल्गुनी**[२] नक्षत्रं विद्यते तत्र **मध्याह्ने**=मध्याह्नकाले **गमनं** =प्रयाणं **शुभं**=जयकरं **हि**= प्रसिद्धम् इत्यब्रवीत् ॥५॥

राम उक्त्वेति रविजम् आरुरोहाथ मारुतिम् ।

निशाचरध्वान्तभिदे सवितेवोदयाचलम् ॥६॥

राम इति पूर्वोक्तप्रकारेण **रविजं=**सुग्रीवम् **उक्त्वा, अथ सविता**=सूर्यः **ध्वान्तभिदे**= अन्धकारनाशाय **उदयाचलमिव**=उदयपर्वतं यथा आरोहति तथा **निशाचरध्वान्तभिदे=** राक्षसाख्यान्धकारनाशाय उदयाचलसदृशं **मारुतिं=**हनूमन्तम् **आरुरोह=**आरूढवान् ॥

[३]आरुरोहाथ सौमित्रिरङ्गदं कनकाङ्गदम् ।

रामसुग्रीवयोर्वाक्यात् सर्वसैन्यानि निर्ययुः ॥७॥

---

१. **अष्टाध्यायी पा.सू– ७।३।५८ 'अभ्यासात्परस्य चिञः कुत्वं वा स्यात् सनि लिटि च'** । इति सिद्धान्तकौमुद्यां विवृतम् ।

२. 'हुब्बा' इति कर्णाटकभाषायां नामान्तरम् ।

३. **'आरुरोह च सौमित्रिः'** इति ब.गो ।

Rarest Archiver

अथ=रामस्य हनुमदारोहणानन्तरं **सौमित्रिः**=लक्ष्मणः **कनकाङ्गदं**=सुवर्णमयबाहुभूषण–युक्तम् **अङ्गदं**=वालिसूनुम् **आरुरोह** । **सर्वसैन्यानि**=सर्वाः कपिसेनाः **रामसुग्रीवयोः वाक्यात् निर्ययुः**=जग्मुः ॥७॥

नीलः सेनापतिः सेनाम् आकर्षन्नग्रतो ययौ ।

पार्श्वयोर्यूथनाथौ[१] च ऋषभो गन्धमादनः ॥८॥

'सैन्यानि निर्ययुः'[२] इत्युक्तं, तत्र प्रधानानां गमनप्रकारम् आह– **नील** इति । **सेनापतिः**=कपिसेनानायकः **नीलः**=नीलनामकः कपिः **सेनां**=कपिसेनाम् **आकर्षन्**=आकारयन् सन्, **अग्रतः**=पुरतः **ययौ** । **ऋषभः**=ऋषभनामकः **गन्धमादनः**=तन्नामकश्च इत्येतौ **यूथनाथौ**=कपिसमूहनायकौ अपि सेनायाः **पार्श्वयोः**=उभयभागयोः ययतुः ॥८॥

सुषेणजाम्बवत्पूर्वा रक्षन्तः कुक्षिमव्रजन्[३] ।

सुग्रीवसौमित्रियुतः[४] सेनामध्ये[५] ययौ प्रभुः ॥९॥

सुषेणजाम्बवत्पूर्वाः कपयः सेनायाः **कुक्षिम्**=उदरं मध्यभागम् इति यावत्, **रक्षन्तः**=पाल–यन्तः सन्तः, **अव्रजन्**=अगच्छन् **सुग्रीवसौमित्रियुतः प्रभुः**=रामः **सेनामध्ये ययौ** ॥९॥

पनसाद्या वानरेन्द्रा रामसुग्रीवशासनात् ।

[६]पर्यगुश्चक्रवच्चक्रं परितः[७] परिपालकाः ॥१०॥

पनसाद्याः वानरेन्द्राः रामसुग्रीवशासनात्=रामसुग्रीवयोः आज्ञया **परिपालकाः**=सेना – रक्षकाः सन्तः, **चक्रवत्**=अलातचक्रम् इव[८] **चक्रं परितः**=सेनायाः **परितः**=सर्वतः, सेनां प्रदक्षिणी कृत्य इति यावत् । **पर्यगुः**=अगमन् । 'इण्=गतौ' लुङ् ॥१०॥

---

१. **'पार्श्वतो यूथनाथावपि'** इति वा.वे ।

२. सं.रा.यु.का.१.स.७.श्लोकः ।

३. **'कुक्षिमाव्रजन्'** । **'कुक्षिं मध्यप्रदेशस्य वामकुक्षिप्रदेशं चेत्यर्थः'** इति ब.गो.सं.का.श्री ।

४. **'सुग्रीवलक्ष्मणयुतः'** इति ब.गो.सं.पा ।

५. **'सेनामध्यम्'** इति मू.श्लो.पा ।

६. **'चक्रं कपिसैन्यं परितः प्रादक्षिण्येन पर्यगुः'** इति ब.गो.सं.का.श्री ।

७. **'सर्वतः'** इति मू.श्लो.पा ।

८. **'चक्रमिव**=सुदर्शनमिव, **आलतचक्रमिव इति वा'** इति दू.कृ.श्री ।

Rarest Archiver

[१]जीमूता इव गर्जन्तः सपक्षाः पर्वता इव[२] ।

रामदासाः कपीन्द्रास्ते रेजिरे गमनोत्सवे ॥११॥

गर्जन्तः=ध्वनिं कुर्वन्तः **जीमूता इव=**मेघा इव **सपक्षाः**=पक्षैः सहिताः **सपक्षाः पर्वता इव कपीन्द्राः ते रामदासाः गमनोत्सवे रेजिरे**=दीप्ताः बभूवुः ॥११॥

अदन्तः फलमूलानि पिबन्तो मधुरं मधु ।

गायन्तो राघवगुणान् स्वैरं यान्ति स्म वानराः ॥१२॥

फलमूलानि=कन्दमूलफलानि[३] **अदन्तः**=भक्षयन्तः **मधुरं मधु**=स्वादु क्षौद्रं पिबन्तः **राघवगुणान्**=रामगुणान् **गायन्तः**=वर्णयन्तः **वानराः=**वीराः **स्वैरं**= स्वच्छन्दं यथा तथा **यान्ति स्म**=ययुः ॥१२॥

रामाज्ञावेलया रुद्धः कपिसैन्यमहार्णवः ।

पुरग्रामव्रजादीनि क्षुभितोऽपि न चक्रमे ॥१३॥

रामसेनाया लोकोपद्रवः नाऽसीद् इत्याह– **राम इति ।** वेलया रुद्धः महार्णवः पुरादीनि न नाशयति तथा **रामाज्ञावेलया**=रामाज्ञाख्यतटेन **रुद्धः**=निवारितः **कपिसैन्यमहार्णवः**= कपिसेनाख्यसमुद्रः **क्षुभितः=**मत्तः **अपि पुरग्रामव्रजादीनि पुरं=**धनिनाम् आश्रयः, **ग्रामः** =बहुजनाकीर्णः, **व्रजः**=गोष्ठः, तदादीनि स्थलानि **न चक्रमे**=न लङ्घितवान् । अतिक्रम्य न गतवान् इति यावत् । 'क्रमु=पादविक्षेपे' लिट् ॥१३॥

दक्षिणः स दिशं गच्छन् दक्षिणां लक्ष्मणाग्रजः ।

विन्ध्यं सह्यं चात्यगच्छन्[४] मलयं च महीधरम् ॥१४॥

दक्षिणां=याम्यां **दिशं=**ककुभं **गच्छन्**=प्राप्नुवन् **दक्षिणः**=समर्थः, कुशलः वा **लक्ष्मणा**

---

१. **'जीमूताः=**उदकपूर्णोदरमेघाः । **सपक्षाः इन्द्रेण पक्षच्छेदनात् पूर्वं पर्वता आप्लुत्याऽप्लुत्य, पुरग्रामादिकमबाधयन्निति प्रसिद्दम्'** । इति ब.गो.सं.का.श्री ।

२. **'सपक्षा इव पर्वताः'** इति मू.श्लो.पा ।

३. **'फलानि मूलानि च'** इति दु.कृश्री ।

४. **'चातिगच्छन्'** इति मू.श्लो.पा । वा.वे च ।

Rarest Archiver

–ग्रजः=रामः **विन्ध्यं**=विन्ध्यनामकं **सह्यं**=सह्यनामकं [१]**मलयं च=**मलयनामकं **महीधरं=** पर्वतम् **अत्यगच्छन्**=अतिक्रान्तवान् ॥१४॥

महेन्द्रवन्द्यो माहेन्द्रम् अधिरुह्य महीधरम् ।

प्रत्यनीकमिवापश्यद् वारिधिं सैन्यवारिधेः ॥१५॥

महेन्द्रवन्द्यः=शचीपतिवन्द्यः रामः **माहेन्द्रं**=माहेन्द्रनामकं **महीधरं**=पर्वतम् **अधिरुह्य=** आरुह्य, **सैन्यवारिधेः**=स्वसेनासमुद्रस्य **प्रत्यनीकमिव** स्थितं **वारिधिं**=दक्षिणसमुद्रम् **अपश्यत्** ॥१५॥

वेलां विशालामापेदे माहेन्द्रादवरुह्य सः ।

सेनायास्तत्र सेनान्या रामो वासमकल्पयत् ॥१६॥

सः=रामः **माहेन्द्रात्**=पर्वतात् **अवरुह्य=**अवतीर्य, **विशालां**=विस्तीर्णां[२] **वेलां=**समुद्र–तीरम् **आपेदे**=प्राप **सेनान्या=**सेनानायकेन नीलेन नीलं प्रत्युक्त्वेति यावत् । नीलेन **तत्र** =वेलायां **सेनायाः**=कपिसैन्यस्य **वासं**=स्थितिम् **अकल्पयत्=**समर्थितवान्, 'कृपू= सामर्थ्ये'[३] लङ् ॥१६॥

[४]**प्रार्थयत् किल पन्थानं सिन्धुं सिन्धुशयस्ततः ।**

विश्वेश्वरोऽपि भगवान् मार्दवं धर्ममाश्रितः ॥१७॥

ततः=समुद्रतीरप्राप्त्यनन्तरं **सिन्धुशयः=**समुद्रशयनः **भगवान्**=रामः **विश्वेश्वरोऽपि** सकल –जगत्स्वाम्यपि[५] **मार्दवं**=मृदुत्वरूपं **धर्मम् आश्रितः** सन् **सिन्धुं**=समुद्रं **पन्थानं=**मार्गं **प्रार्थयत्=**अयाचत **किल** 'अर्थ=उपयाञ्चायां'[६] लङ् ॥१७॥

अशेतानन्तशयनो वेलायां दर्भसंस्तरे ।

भुजं भुजङ्गभोगाभम् उपधायाथ दक्षिणम् ॥१८॥

---

१. **'आलयं च=आलयनामकम्'** इति च अपपाठः प्रमादो वा स्यात् वा.वे । २. **'विस्तृताम्'** इति वा.वे ।
३. एवं धात्वर्थः दू.कृ.श्री मातृकायामेव । ४. **'प्रार्थयन् किल'** इति प्र.व्या । ब.गो च । ५. अ) **'सकलजीवस्वाम्यपि'** इति वा.वे । आ) **'सकलनियामकोऽपि'** इति ब.गो.सं.पा.का.श्री । ६. **'अर्थ=याञ्चायाम्'** इति दू.कृ.श्री ।

Rarest Archiver

अथ=मार्गप्रार्थनानन्तरम् **अनन्तशयनः**=शेषशयनः रामः **वेलायां**=समुद्रतीरे **दर्भसंस्तरे** =दर्भमयशय्यायां **भुजङ्गभोगाभं**=शेषदेहसदृशं **दक्षिणं**=सव्येतरं **भुजमुपधाय**=उपधानं* शिरः पीठम् उपबर्हणं कृत्वा, **अशेत**=शिश्ये 'शीङ्=स्वप्ने' लङ् ॥१८॥

[1]तादृशं हनुमद्वीर्यं वीक्ष्य राक्षसपुङ्गवः ।

सभायां मन्त्रिणां मध्ये [2]चिन्तातान्तोऽब्रवीदिदम् ॥१९॥

ग्रन्थकारः रामवृत्तान्तमुक्त्वा हनुमद्गमनानन्तरं लङ्कायां रावणवृत्तान्तमाह– **तादृशमिति । राक्षसपुङ्गवः**=रावणः **तादृशं**=राक्षसनाशपुरदहनादिकं **हनुमद्वीर्यं**=हनुमत्सामर्थ्यं **वीक्ष्य**= दृष्ट्वा, **चिन्तातान्तः**=चिन्तया खिन्नः सन् **सभायां मन्त्रिणां मध्ये इदं** वक्ष्यमाणं वचनम् **अब्रवीत्** ॥१९॥

दृष्टं हि तस्य वीरस्य कपेः पौरुषमद्भुतम् ।

किं वर्णयामो रामस्य यस्यायं किङ्करः किल ॥२०॥

हे मन्त्रिणः ! **वीरस्य तस्य कपेः अद्भुतम्**=आश्चर्यकरं **पौरुषं**=सामर्थ्यं भवद्भिः **दृष्टम्** =अवलोकितं **हि**, **अयं**=कपिः **यस्य**=रामस्य **किङ्करः**=भृत्यः **किल तस्य**=रामस्य **पौरुषं किं वर्णयामः**=किं कथयामः? 'वर्ण=स्तुतौ' लट् ॥२०॥

शोषयन् स्तम्भयन् वाऽपि[3] सिन्धुं सीतापतिस्तरेत् ।

लङ्कायाः सङ्कटं कुर्यात् तत्र नीतिर्विधीयताम् ॥२१॥

समुद्रमध्ये स्थितानाम् अस्माकं किं भयम्? इत्यत आह – **शोषयन्नति । सीतापतिः**= रामः **सिन्धुं**=समुद्रं **शोषयन्**=शुष्कं कुर्वन् सन् **स्तम्भयन्**=जलस्तम्भं कुर्वन् **वाऽपि तरेत्**=सिन्धुम् अतिक्रमेत् । 'तॄ=प्लवनतरणयोः' लिङ् । **लङ्कायाः सङ्कटं**=क्लेशं **कुर्यात् तत्र**=सङ्कटनिवृत्तौ **नीतिः**=युक्तिः **विधीयतां**=भवद्भिः क्रियताम् इत्यब्रवीत् ॥२१॥

---

* **'उपधानं=तलेदिम्बु'** इति कर्णाटकभाषयाम् ।

१. इतः पूर्वमेकः श्लोकोऽधिकः प्र.व्या.सं.पाठे पठ्यते । तद्यथा –

'रावणो मयमाहूय गृहहर्म्याणि पूर्ववत् ।

कारयामास चित्राणि सभां प्राप सभापतिः' ॥

२. **'चिन्ताक्रान्तो'** इति वा.वे ।

३. **'स्तम्भयन् वारि'** इति दू.कृ.श्री ।

Rarest Archiver

[१]इत्युक्तो रावणेनोचे प्राञ्जलिस्स विभीषणः ।

रामायानन्तवीर्याय वैदेही दीयतामिति ॥२२॥

रावणेन इत्युक्तः सः=प्रसिद्धो **विभीषणः प्राञ्जलिः सन् अनन्तवीर्याय**=अपरिमित–सामर्थ्योपेताय **रामाय वैदेही**=सीता त्वया **दीयताम् इत्यूचे** ॥२२॥

[२]ब्रह्मरुद्रादयो देवा यस्य रामस्य किङ्कराः ।

तस्मै रामाय जयिने[३] वैदेही दीयतामिति ॥२३॥

अनन्तवीर्यत्वम् उपपादयति– **ब्रह्मेति ।** यद्वा ननु अस्माकं ब्रह्मरुद्रादीनां वरस्य सत्त्वात् रामेण किं भयम्? इत्यत आह– **ब्रह्मेति । ब्रह्मरुद्रादयः देवाः यस्य रामस्य किङ्कराः**=भृत्याः **तस्मै जयिने**=जयशीलाय **रामाय वैदेही दीयताम् इत्यूचे** ॥२३॥

क ईश्वरः को विजयी मां विना जगदीश्वरम् ।

बालिशैः प्रोच्यते[४] किं न इत्युच्चै रावणोऽब्रवीत् ॥२४॥

जगदीश्वरं=त्रिलोकस्वामिनं **मां विना ईश्वरः**=स्वामी **कः**? न कोऽपीत्यर्थः । **मां विना विजयी**=जयवानपि कः? न कोऽपि । **नः**=अस्माकं **बालिशैः**=बालकसदृशैः, मूर्खैः वा **'वैदेही दीयताम्' इति किं प्रोच्यते** ? किम् उच्यते **इति**=एवंप्रकारेण **रावणः उच्चैः**=स्पष्टम् **अब्रवीत्** ॥२४॥

तं प्रहस्तप्रभृतयः सुपार्श्वाद्यास्तथाऽपरे ।

उच्चैरास्फोट्य गर्जन्तो राजानमिदमब्रुवन् ॥२५॥

रावणमन्त्रिणः 'तत्र नीतिः विधीयताम्'[५] इत्यत्र उत्तरमाहुः इत्याह – **तमिति । प्रहस्त –प्रभृतयः**=प्रहस्तमुखाः **तथाऽपरे सुपार्श्वाद्याश्च आस्फोट्य**=स्वभुजास्फालनं कृत्वा, **उच्चैः**=उन्नततया **गर्जन्तः**=ध्वनिङ्कुर्वन्तः सन्तः 'क ईश्वर'[६] इत्यादि वदन्तं **राजानं**=रावणम् **इदम् अब्रुवन्** ॥२५॥

---

१. **'इत्युक्ते'** इति ब.गो ।
२. सर्वैरपि स्वीकृतः श्लोकोऽयं ब.गो.पाठे नास्ति । तच्चिन्त्यम् ।
३. **'करामलकवद्विश्वं'** श्लोके एवं स्वीकृत्य, अर्थनिरूपणावसरे **'तस्मै रामाय जयिने'** पादस्यास्यार्थः स्वीकृतः । वा.वे ।
४. **'प्रोच्यते बालिशैः'** इति मू.श्लो.पा ।
६. सं.रा.यु.का.१.स.२१.श्लोकः ।
६. सं.रा.यु.का.१.स.२४.श्लोकः ।

Rarest Archiver

लोकपालान् सलोकांस्त्वम् इन्द्रादीन् जितवान् ननु ।

रामः किल भयस्थानं मानवस्तापसस्तव ॥२६॥

हे राजन् ! **त्वं सलोकान्**=भुवनैः सहितान् **इन्द्रादीन् लोकपालान्**=‘अष्टदिक्पालकान्’ **जितवान्** असि **ननु**=निश्चितम् । **तव**=एतादृशसामार्थ्योपेतस्य **तापसः**=ऋषिरूपः **मानवः** =मनुष्यः **रामः भयस्थानं**=भयनिमित्तं **किल,** असम्भावितम् एतत् ॥२६॥

वानराः किं नराहारान् अस्मान् कुर्युः फलाशिनः ।

कथञ्चिज्जीवता यातं कपिना तेन[१] **भूयसा ॥२७॥**

रामस्य मानवत्वेनापि कपयः भयस्थानानि किं न स्युः ? इत्यत आहुः **वानरा इति । फलाशिनः**=फलभक्षकाः **वानराः, नराहारान्**=मनुष्यभक्षकान् राक्षसान् **अस्मान् किं कुर्युः?**=न किमपि कुर्युः । दृष्टं हि तस्य वीरस्य कपेः पौरुषमद्भुतम् इत्यस्य ‘उत्तरमाहुः’– **कथंचिदिति । भूयसा**=बलिष्ठेन बलिष्ठत्वात् एव इति यावत्, **कथञ्चित्**= अत्यन्तप्रयासेन **जीवता**=प्राणधारणं कुर्वता **तेन**=हनुमदाख्येन **कपिना**=वानरेण **यातं**= गतम् । ‘*भावे क्तः*’ ॥२७॥

त्वद्भ्रूविभ्रममात्रेण विभ्रान्तं[२] **भुवनत्रयम् ।**

कथं तापसपत्नीं त्वं बलाद्राजन् न भोक्ष्यसे ॥२८॥

हे राजन् ! भुवनत्रयं=लोकत्रयं **त्वद्भ्रूविभ्रममात्रेण**=त्वद्भ्रूचलनमात्रेण **विभ्रान्तं**=भयं प्राप्तम् । तादृशः **त्वं तापसपत्नीं**=रामपत्नीं सीतां **बलात्**=बलात्कारेण **कथं**=केन प्रकारेण **न भोक्ष्यसे**=नानुभविष्यसि? ‘भुज=पालनाभ्यवहारयोः’ लृटि मध्यमपुरुषे एकवचनम्, इत्यब्रुवन् ॥२८॥

मन्त्रिणां वाक्यमाकर्ण्य सस्मितो रावणोऽब्रवीत् ।

सत्यमेवमिदं किं तु गोप्यं किञ्चिद्वदामि वः ॥२९॥

रावणः मन्त्रिणां=सचिवानां **वाक्यम् आकर्ण्य सस्मितः**=स्मितेन सहितः सन् हे मन्त्रिणः! भवद्भिः उक्तम् **इदं** कथं बलात् न भोक्ष्यसे ? इति वचनं **सत्यमेव** । तर्हि

---

१. **‘कपिनाथेन’** इति वा.वे ।

२. **‘सम्भ्रान्तम्’** इति ब.गो.सं.पा ।

Rarest Archiver

किमर्थं न भोक्ष्यसे? 'इति पृच्छति' **किन्त्विति** । उत्तरमाह– **गोप्यम्** इति । **वः**= युष्माकं **किञ्चित्**=ईषत् **गोप्यं**=रहस्यं **वदामि**=ब्रवीमि तत् शृणुत इत्यब्रवीत् ॥२९॥

मया बलेनोपभुक्ता मञ्जुला पुञ्जकस्थली[१] **।**

पितामहो लोकहितं तदा शापं ददौ हि मे[२] **॥३०॥**

गोप्यं किम्? इत्यत आह– **मयेति** । यदा **मया मञ्जुला**=मनोहरा **पुञ्जकस्थली**= तन्नामिकाऽप्सरस्त्री **बलेन**=बलात्कारेण **उपभुक्ता**=अनुभूता **तदा पितामहः**=चतुर्मुखः **लोकहितं**=कालान्तरे लोकसुखकरं **शापं**=निग्रहं **मे**=मह्यं **ददौ हि** ॥३०॥

बलाच्चेद्भोक्ष्यसे काञ्चिच्छिरः शीर्येत ते तदा ।

शापोऽयं ननु सीतायाः पातिव्रत्यैकपालकः ॥३१॥

हे रावण ! त्वं चेत् यदा **काञ्चित्**=कामपि स्त्रियं **बलात्**=बलात्कारेण **भोक्ष्यसे**= अनुभविष्यसि, **तदा ते**=तव **शिरः शीर्येत**=भिन्नं भवेत् । 'शॄ= हिंसायां' कर्मणि लिङ् । **अयं** ब्रह्मणा दत्तः **शापः**=निग्रहः **सीतायाः पातिव्रत्यैकपालकः**=पतिनियमस्य मुख्य– रक्षकः अभूत् **ननु**=निश्चितम् ॥३१॥

मद्बाहुवननिर्यातान् पत्रिणः प्राणहारिणः ।

न नूनं वेत्ति रामोऽसौ तेन मां प्रति गर्जति ॥३२॥

असौ=प्रसिद्धः **रामः** येन कारणेन **मद्बाहुवननिर्यातान्**='मद्बाह्वाख्यविपिनाद्बहिर्गतान्' **प्राणहारिणः**=प्राणनाशकान् **पत्रिणः**=बाणान् **न वेत्ति**=न जानाति **नूनं**=निश्चितम् । **तेन**= कारणेन **मां प्रति**=मामुद्दिश्य **गर्जति**=ध्वनिं करोति ॥३२॥

कुम्भकर्णेन्द्रजित्पूर्वेष्वेकैकोऽलं रिपोर्वधे ।

न मे दोर्दण्डकण्डूतिं विधिर्नूनं विनाशयेत् ॥३३॥

कुम्भकर्णेन्द्रजित्पूर्वेषु मध्ये **एकैकः** कुम्भकर्णो वा इन्द्रजित् वा अन्यो वा **रिपोः**= रामस्य **वधे**=हननविषये **अलं**=समर्थः । **विधिः**=ब्रह्मा **मे**=मम **दोर्दण्डकण्डूतिं**=दण्डवत्

१. अ) **'पुञ्जकस्थला'** इति प्र.व्या । आ) **'पुञ्जिकस्थला'** इति ब.गो । २. **'शापं हि मे ददौ'** इति वा.वे ।

Rarest Archiver

स्थितभुजकण्डूयनं **न विनाशयेत्**=नष्टं न कुर्यात् **नूनं**=निश्चितम् ।'णश=अदर्शने'लिङ् । इति रावणोऽब्रवीत् ॥३३॥

इत्थं विकत्थनं श्रुत्वा शुद्धबुद्धिर्विभीषणः ।

प्राह[१] स्म प्रहसन् वाक्यम् उदारं हितमच्छलम् ॥३४॥

शुद्धबुद्धिः=दोषरहितज्ञानः **विभीषणः इत्थं**=पूर्वोक्तप्रकारेण **विकत्थनम्**[२]=आभासवचनं **श्रुत्वा प्रहसन्**=हासं कुर्वन् सन् **उदारम्**=उत्कृष्टं, यथार्थमिति यावत् । **हितं**=कालान्तरे सुखसाधनम् **अच्छलं**=निष्कपटं **वाक्यं प्राह स्म**=अब्रवीत् ॥३४॥

अतार्किकान् अशास्त्रज्ञान् अवृद्धोपासकान् खलान् ।

मुखरान् केवलं मूर्खान् वर्जयेन्मन्त्रमण्टपे ॥३५॥

हे राजन् ! **मन्त्रमण्टपे**=आलोचनसभायाम् **अतार्किकान्**=ऊहापोहशक्तिरहितान् **अशास्त्रज्ञान्**=सच्छास्त्राभ्यासरहितान् **अवृद्धोपासकान्**=ज्ञानवृद्धासेवकान् **खलान्**=गूढद्वेषिणः **मुखरान्**=गर्ह्यवचनान् **केवलं**=मुख्यं यथा तथा **मूर्खान्**=ज्ञानरहितान् **वर्जयेत्**=परिहरेत् ॥३५॥

विनीतान् नीतिसम्पनान् धर्माधर्मविचक्षणान् ।

पूर्वापरज्ञान् पुरुषान् मन्त्रिणः प्रति मन्त्रयेत् ॥३६॥

तर्हि पुनः कीदृशान् प्रति विचारयेत्? इत्यत आह– **विनीतान् इति । विनीतान्**=वृद्धैः शिक्षितान् **नीतिसम्पन्नान्**=न्याययुक्तान् **धर्माधर्मविचक्षणान्**=धर्माधर्मनिर्णये कुशलान् **पूर्वापरज्ञान्**=पूर्वोत्तरविषयज्ञानयुक्तान् **मन्त्रिणः**=आलोचनपरान् **पुरुषान् प्रति** उद्दिश्य, **मन्त्रयेत्**=आलोचयेत्[३] ॥३६॥

सिद्ध्युपायगुणाङ्गानि न ये शक्त्युदयान् विदुः ।

न तैर्मन्त्रविधिं कुर्यात् षण्ढैरिव[४] रतिं बुधः ॥३७॥

---

१. **'आह स्म'** इति वा.वे । ब.गो च ।

२. **'विकत्थनं=बडायि'** इति कर्णाटकभाषायाम् ।

३. **'आलोचेत्'** इति दू.कृ.श्री ।

४. **'षण्डेष्विव'** इति विश्व.ती. ।

Rarest Archiver

ये=पुरुषाः **सिद्ध्युपायगुणाङ्गानि**[१] **सिद्धिं**=कार्यसिद्धिं **तस्य उपायान्**= सामादीन् **गुणान्**=सन्ध्यादीन् **अङ्गानि**=राजनीतिज्ञत्वादीनि **न विदुः**=न जानन्ति । तथा **शक्त्यु–दयान्**=आत्मशक्तय एवंविधाः, परशक्तय इदानीम् एवं विधा इति शक्तीः न विदुः, तथा उदयान् कलहेन आत्माभिवृद्धिः परस्य अवृद्धिः इति 'आत्माभ्युदय' परानभ्यु–दयान् **ये न विदुः बुधः**=ज्ञानी **षण्ढैः**=नपुंसकैः **रतिम्**=आसक्तिमिव **तैः**= सिद्ध्युपायाद्यज्ञैः पुरुषैः **मन्त्रविधिम्** =आलोचनव्यापारं **न कुर्यात्** ॥३७॥

मन्त्रिदोषा अशेषाश्च राजन् त्वन्मन्त्रिषु स्थिताः ।

[२]गुणं नैकं च पश्यामि मन्ये ते भयमागतम् ॥३८॥

हे राजन्=रावण ! **अशेषाः**=समस्ताः **मन्त्रिदोषाः**=मन्त्रिणां दोषाः **ते**=तव **मन्त्रिषु**= प्रहस्तादिषु **स्थिताः**=वर्तन्ते । **एकं च**=एकमपि **गुणं न पश्यामि । ते**=तव रामविरोधेन **भयम् आगतं**=प्राप्तम् इति **मन्ये**=जानामि ॥३८॥

पुलस्त्यस्यान्वये जातस्त्वं श्रुतिस्मृतिपारगः ।

परदारपरामर्शं न कुर्याः[३] लोकनिन्दितम्[४] ॥३९॥

हे राजन् ! **पुलस्त्यस्य**=मुनेः **अन्वये**=वंशे **जातः**=उत्पन्नः **श्रुतिस्मृतिपारगः**=कर्तव्या–कर्तव्यप्रतिपादकश्रुत्यादिसकलशास्त्राभिज्ञः[५] **त्वं लोकनिन्दितं**=लोकदूषितं **परदारपरामर्शं** =परस्त्रीसंस्पर्शं **न कुर्याः**=न कुरु ।'डुकृञ्=करणे' लिङि मध्यमपुरुषैकवचनम् ॥३९॥

यदि त्रैलोक्यजैत्रं त्वम् आत्मानं मन्यसे प्रभो[६] ।

कुसुमास्त्रमिमं देवं जय मृत्युं तवाऽगतम् ॥४०॥

---

१. **'सिद्ध्युपायगुणाङ्गानि'– 'सिद्धिः=कार्यसिद्धिः तस्य उपायान् =सन्ध्यादीन् तेषाम् अङ्गानि एवं विधा इति शक्तिः न विदुः उदयानुकूले आत्माभिवृद्धिः परस्य अभिवृद्धिरिति आत्माभ्युदयपराभ्युदयं ये न विदुः'** । इति वा.वे ।

२. **'गुणं चैकं न पश्यामि'** इति ब.गो.सं.पा ।

३. **'न कुर्यात्'** इति वा.वे । प्र.व्या ।

४. **'लोकगर्हितम्'** इति मू.श्लो.पा ।

५. **'कर्तव्यप्रतिपादकश्रुत्यादिसकलशास्त्रभिज्ञः'** इति वा.वे ।

६. **'यदि त्रैलोक्यजेतारम् आत्मानं मन्यसे प्रभो '** इति मू.श्लो.पा ।

Rarest Archiver

'लोकपालान्[१] इन्द्रादीन् जितवान् ननु मद्बाहुवननिर्यातान्'[२] इत्यत्र उत्तरमाह– **यदीति ।** **हे प्रभो**=रावण ! **यदि त्वम् आत्मानं**=स्वं **त्रैलोक्यजैत्रं**=त्रैलोक्यजयशीलं **मन्यसे**= जानासि तर्हि **तव मृत्युं**=मारकम् **आगतं**=प्राप्तं त्वन्नाशाय त्वत्समीपे विद्यमानम् इति यावत्। इमं **तव** प्रत्यक्षसिद्धं **कुसुमास्त्रं**=पुष्पबाणं **देवं**=मन्मथं **जय**=पराभूतं कुरु । 'जि =जये' लोट् मध्यमपुरुषे एकवचनम् । एकं जेतुमसमर्थः त्वं कथं त्रैलोक्यजयवान्? इति मन्यस इति भावः ॥४०॥

[३]शिरीषमालामृदुलां यां त्वं कामयसे सतीम् ।
व्यालीं करालीं तां विद्धि सुप्तां केनापि हेतुना ॥४१॥

हे प्रभो ! त्वं शिरीषमालामृदुलां=शिरीषपुष्पमालिका इव मार्दवयुक्तां **सतीं**=पतिव्रतां सीतां **कामयसे**=अनुभवितुम् इच्छसि, 'कमु=कान्तौ' लटि मध्यमपुरुषे एकवचनम्[४] । **तां**=सीतां **केनापि हेतुना**=कारणेन **सुप्तां**=निद्रायुक्तां रामकीर्त्यर्थं त्वन्नाशं कुर्वन्तीमिति यावत् । **करालीं**=क्रूरां **व्यालीं**=सर्पस्त्रियं **विद्धि**=जानीहि ॥४१॥

अलं विरोधो[५] रामेण प्रणतेषु कृपालुना ।
राजन् [६]बद्धोऽञ्जलिस्तुभ्यं देवी देवाय दीयताम् ॥४२॥

हे राजन्! **प्रणतेषु**=प्रणामकारिषु **कृपालुना**=दयावता **रामेण** साकं **विरोधः**=विद्वेषः **अलं**=माऽस्तु । मया **तुभ्यम् अञ्जलिः**=करसम्पुटः **बद्धः** । **देवाय**=रामाय **देवी**=सीता **दीयताम्** ॥४२॥

बान्धवाः सन्त्यजेयुस्त्वाम् अधर्मेण विनश्वरम् ।
तस्मादधर्मं निर्धूय देवी देवाय दीयताम् ॥४३॥

---

१. **'सलोकान् त्वम्'** इति अधिका विवक्षा दु.कृ.श्री । २. सं.रा.यु.का.१.स.३२.श्लोकः ।

३. **'शिरीषमाला**=बागे मरद हूविन माले इति कर्णाटकभाषयाम् ।

४. लकारपुरुषवचनपुरस्सरं धात्वर्थः अभिहितः दू.कृ.श्री ।

५. **'अलं विरोधे'** दू.कृ.श्री । **'अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा' (अ.सू.३।४।१८)** इति पाणिनिसूत्रात् । **'अलं विरुध्य'** इत्येव साधु पाठः' । इति ब.गो मतम् ।

६. **'बद्धाञ्जलिः'** इति वा.वे ।

Rarest Archiver

यस्माद् **बान्धवाः**=शरीरसंबन्धिनः**अधर्मेण**=पापेन **विनश्वरं**=विनाशशीलं **त्वां सन्त्यजे–युः**=जह्युः । 'त्यज=हानौ' विधिलिङि प्रथमपुरुषे बहुवचनम् । **तस्माद् अधर्मं**=पापं **निर्धूय**=निरस्य[१] त्वया **देवी देवाय दीयताम्** ॥४३॥

रामप्रसादप्रसरः सर्वासां सम्पदां पदम् ।

तस्मै लोकैकनाथाय[२] देवी देवाय दीयताम् ॥४४॥

[३]यस्माद् **रामप्रसादप्रसरः**=रामानुग्रहप्राप्तिः**सर्वासां सम्पदाम्**=ऐहिकपारत्रिकश्रेयसां **पदं**=निमित्तं तस्मात् **तस्मै**=अखिलपुरुषार्थप्रदाय **लौकैकनाथाय**=लोकानां मुख्यस्वामिने **देवाय देवी दीयताम्** ॥४४॥

यावन्न रामसूर्यस्य गावः सत्पद्मबन्धवः ।

हन्यू रक्षस्तमस्तावद् देवी देवाय दीयताम् ॥४५॥

यावत्=यावत्कालं **सत्पद्मबन्धवः**=सज्जनाख्यकमलविकासकराः **रामसूर्यस्य**=रामाख्य–दिवाकरस्य **गाव**=बाणाख्यकिरणाः **रक्षस्तमः**=राक्षसाख्यान्धकारं **न हन्युः**=न नाशयेयुः । 'हन=हिंसागत्योः'लिङ् प्रथमपुरुषे बहुवचनम् । **तावत्** =ततः पूर्वमेव त्वया **देवाय देवी दीयताम्** ॥४५॥

न भयान्न च कार्पण्यान्न डम्भान्न च मोहतः[४] ।

मयेदमुदितं राजंस्तव पथ्यं[५] शृणोषि चेत् ॥४६॥

हे राजन्! मया भयात्=भीतेः[६] **इदं**=वचनं **नोदितं**=नोक्तं **कार्पण्यात् च**=कृपणत्वादपि[७] **इदं नोदितं डम्भात् च**=मम महत्त्वबुद्ध्या इदं नोदितं **मोहतश्च**=मिथ्याज्ञानादपि **इदं नोदितम् ।** किन्तु **हे राजन् ! चेत्**=यदि त्वां यथा [८]**पथ्यं**=हितं त्वं **शृणोषि** तर्हि वदामीति विभीषणः प्राह स्म[९] ॥४६॥

---

१. **'विनाश्य विद्यमानत्वेन'** इति दू.कृ.श्री ।
२. **'त्रैलोक्यनाथाय'** इति ब.गो ।
३. वा.वे इति मातृकायां श्लोकस्याऽस्य व्याख्या एव न दृश्यते ।
४. **'कार्पण्यान्न मोहान्न च डम्भतः'** इति वा.वे ।
५. **'तथ्यं'** इति वा.वे ।
६. **'भीतितः'** इति वा.वे ।
७. **'दैन्यादपि'** इति वा.वे ।
८. **'पथोऽनपेतम्'** इति दू.कृ.श्री ।
९. **'प्राह स्म'** इति भूतकालविवक्षा दू.कृ.श्री ।

Rarest Archiver

विभीषणेनैवमुक्ते क्रुद्धः प्रोवाच शक्रजित् ।

अस्मान् महेन्द्रजयिनो मानवः किं जयेदिति ॥४७॥

एवं=पूर्वोक्तप्रकारेण **विभीषणेन उक्ते सति क्रुद्धः**=कुपितः **शक्रजित्=**इन्द्रजित् **महेन्द्र-जयिनः**=देवेन्द्रं जितवतः **अस्मान् मानवः**=रामः **जयेत् किं**?=पराभूतान् कुर्यात् किं? न जयेदेव **इति** प्रोवाच ॥४७॥

बालोऽयं बालिशो राजन् वध्यस्ते कार्यदूषणः[१] **।**

व्रजाम शरणं रामम् इत्युवाच विभीषणः ॥४८॥

हे राजन् ! ते=तव कार्यं दूषयति=नाशयति इति **कार्यदूषणः**=कर्तव्यनाशकः[२] *"कृत्यल्युटो बहुलम्"*[३] इति कर्तरि ल्युट् । **बालः** अत एव **बालिशः**=मूर्खः **अयम्**=इन्द्रजित् **वध्यः=**वधार्हः वयं **शरणं=**रक्षकं **रामं व्रजाम**=गच्छाम 'व्रज=गतौ' लोट् उत्तमपुरुषे बहुवचनम् । इति **विभीषणः उवाच** ॥४८॥

मित्रवेषममित्रं त्वां नित्यं वेद्मि विभीषण ।

अन्यञ्चेत् त्वादृशं[४] **हन्याम् इत्युवाचाथ रावणः ॥४९॥**

अथ=विभीषणवाक्यानन्तरं **रावणः उवाच- हे विभीषण ! मित्रवेषं**=मित्रालङ्कारयुक्तं मित्रचिह्नयुतम् इति यावत् । **त्वाम् अमित्रं**=शत्रुं **नित्यं**=निरन्तरं **वेद्मि**=जानामि । **त्वादृशं** =त्वत्सदृशम् **अन्यञ्चेत्**=अपरञ्चेत् यद्यन्य एवं ब्रूयात् **इति** यावत्, तं **हन्यां=**हिंस्याम् । 'हन=हिंसागत्योः' लिङि उत्तमपुरुषैकवचनम् । इत्युवाच ॥४९॥

मर्षितं[५] **परुषं वाक्यं ज्येष्ठत्वात् तव रावण ।**

स्वस्ति तेऽस्तु गमिष्यामीत्युक्त्वोत्तस्थौ विभीषणः ॥५०॥

हे रावण ! तव ज्येष्टत्वात्=अग्रजत्वात् **परुषं**=हन्यामिति निष्ठुरं ते **वाक्यं** मया **मर्षितं=**

---

१. **'कार्यदूषकः'** इति वा.वे ।

२. **कार्यदूषणः=कर्तव्यनाशकः कः त्वम् ?'** इति वा.वे ।

३. अष्टाध्यायी ३।३।११३ पा. सूत्रम् ।

४. **'अन्यश्चेत् त्वादृशो'** इति वा.वे ।

५. **'मृषितं'** इति वा.वे ।

Rarest Archiver

क्षान्तं[1] त्वयि मानं कृत्वा इत्यर्थः । **ते**=तुभ्यं **स्वस्ति**=क्षेमः **अस्तु** । अहं रामं **गमिष्यामि इत्युक्त्वा विभीषणः उत्तस्थौ**=उदतिष्ठत् ॥५०॥

[2]चतुर्भिश्चतुरैः सार्धं सचिवैः स गदाधरः ।

मुहूर्तेनाम्बरचरो रामपार्श्वमुपाययौ ॥५१॥

गदाधरः सः=विभीषणः **चतुरैः**=कुशलैः **चतुर्भिः सचिवैः**=प्रधानैः **सार्धं**=साकम् **अम्बरचरः=**आकशचरःसन् **मुहुर्तेन**=कालेन **रामपार्श्वं=**रामसमीपम् **उपाययौ**=प्राप ॥५१।

प्रकाशमान आकाशे संरब्धान् प्रेक्ष्य वानरान् ।

मेघगम्भीरनिर्घोषो बभाषेऽथ विभीषणः ॥५२॥

अथ=रामपार्श्वप्राप्त्यनन्तरम् **आकाशे**=अन्तरिक्षे **प्रकाशमानः**=सर्वैः दृष्टः **विभीषणः संरब्धान्**=स्वस्य बाधनार्थम्[3] उद्युक्तान् **वानरान् प्रेक्ष्य मेघगम्भीरनिर्घोषः=**मेघध्वनिवत् मनोहरध्वनिः सन् **बभाषे** ॥५२॥

रावणस्यानुजं प्राप्तं रावणेनावमानितम् ।

रामभक्त इति त्यक्तं मां मन्यध्वं[4] हरीश्वराः ॥५३॥

हे हरीश्वराः ! यूयं **रावणेन अवमानितम्**=अवमानं प्रापितं **रामभक्तः इति**=हेतोः **त्यक्तं**=रावणेन परित्यक्तम् । रामं **प्राप्तं मां रावणस्यानुजं**=विभीषणं **मन्यध्वं=**जानीध्वम्[5] । 'मनु=अवबोधने' लोट् मध्यमपुरुषे बहुवचनम् ॥५३॥

भवभयवनवह्निभर्जितानां निरुपधिभक्तिरसामृताब्धिभाजाम् ।

शरणमशरणो व्रजामि रामं शरणमहं करुणाकरं मुकुन्दम् ॥५४॥

॥ इति श्रीमत्कविकुलतिलकत्रिक्रमपण्डिताचार्यसुतश्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे प्रथमः सर्गः ॥

---

१. **'मर्षितं=**क्षान्तम् **,क्षमा कृतेत्यर्थः'** इति पदस्य अर्थः । दू.कृ.श्री ।
२. **'चतुर्भिः सचिवैः सार्धं चतुरैः स गदाधरः'** इति वा.वे ।
३. **'वधार्थम्'** इति वा.वे ।
४. **'जानन्तु'** इति मू.श्लो.पा ।
५. **'जानीतः'** इति दू.कृ.श्री ।

Rarest Archiver

ननु रावणस्याधिकसम्पद्युक्तत्वात् तत्परित्यागेन रामप्राप्तौ तव किं फलम्? इत्यत आह– **भवेति । भवभयवनवह्निभर्जितानां**=संसारभयाख्यवनवह्निना[1] **भर्जितानां**=तप्तानां **निरुपधि –भक्तिरसामृताब्धिभाजां निरुपाधिः**=निर्व्याजः यः [2]**भक्तिरसामृताब्धिः**=अमृत समुद्रः तं भजन्तीति अब्धिभाजः तेषां निरुपाधिक भक्तिसहितानाम् इति यावत् । पुरुषाणां **शरणं**=रक्षकं **करुणाकरं**=दयानिधिं **मुकुन्दं**=मोक्षप्रदं **रामम् अशरणः**=रक्षकरहितः **अहं शरणम्**=आश्रयं **व्रजामि** = गच्छामि इति बभाषे ॥५४॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे प्रथमः सर्गः ॥

(युद्धकाण्डसम्बद्धाः आरम्भतः श्लोकाः– ५४)

१. **'संसाराख्यवह्निना'** इति वा.वे ।

२. **'भक्तिरसनामकः अमृताब्धिः'** इत्यधिकं विवृतं दू.कृ.श्री ।

Rarest Archiver

Rarest Archiver

॥ अथ द्वितीयः सर्गः ॥

Rarest Archiver

॥ अथ द्वितीयः सर्गः ॥

इति ब्रुवाणे पौलस्त्ये सूर्यसूनुरमर्षितः ।

अश्रद्दधानस्तद्वाक्यं प्राप्य राममभाषत ॥१॥

पौलस्त्ये=पुलस्त्यपौत्रे विभीषणे **इति 'रावणस्यानुजं प्राप्तम्'*** इत्यादिप्रकारेण **ब्रुवाणे**=वदति सति **तद्वाक्यं**=विभीषणवाक्यम् **अश्रद्दधानः**=अविश्वसन् **अमर्षितः**=कुपितः **सूर्य–सूनुः**=सुग्रीवः **रामं प्राप्य अभाषत** ॥१॥

रावणस्यानुजो नाथ शरणं त्वां किलागतः ।

मायिनां रक्षसामेनां मायां मन्ये स [१]बुध्यताम् ॥२॥

हे नाथ=राम ! **रावणस्यानुजः**=विभीषणः **त्वां शरणं गतः**=प्राप्तः **किल** तथा वदति । अहं **मायिनां**=कपटिनां **रक्षसां**=राक्षसानाम् **एनां** 'शरणं प्राप्त' इत्यादिवाचं **मायां**=कपटं **मन्ये** । त्वया **सः**=विभीषणः **बुध्यतां**=ज्ञायतां, विचार्यतामिति यावत् । इति अभाषत ॥२॥

कपिराजोदितं[२] श्रुत्वा कपीनाभाष्य राघवः ।

ब्रुवन्तु सचिवाः सर्वे नीतिं स्वाम् इत्यभाषत ॥३॥

राघवः=रामः **कपिराजोदितं**=सुग्रीववाक्यं **श्रुत्वा कपीन् आभाष्य**=सम्बोध्य **सर्वे सचिवाः**=प्रधानिनः भवन्तः **स्वां**=स्वकीयां **नीतिं**=विभीषणपरिगृहविषये युक्तिं **ब्रुवन्तु**=वदन्तु **इति अभाषत** ॥३॥

किमस्त्यविदितं देव त्रैलोक्ये सचराचरे ।

वक्ष्यामोऽथ नियोगात् त इत्युक्त्वा ते बभाषिरे ॥४॥

अथ=रामवाक्यश्रवणानन्तरं **हे देव**=ज्ञानादिगुणविशिष्ट राम ! **सचराचरे**=चेतनाचेतनाभ्यां सहिते **त्रैलोक्ये**=लोकत्रये त्वया **अविदितम्**=अज्ञातं **किमस्ति?**=न किमपि, सर्वं ज्ञातम् एव । **अथ** अपि वयं **ते**=तव **नियोगात्**='ब्रुवन्तु' इत्यादेशात् नीतिं **वक्ष्याम इत्युक्त्वा, ते**

---

*. सं.रा.यु.का.१.स.५३.श्लो । १. **'स वध्यताम्'** इति प्र.व्या । ब.गो. च । २. **'कपिराजवचः'** इति प्र.व्या ।

Rarest Archiver

=सचिवाः **बभाषिरे**=ऊचुः ॥४॥

विपक्षवर्गनिर्मुक्ताः सस्नेहाः सफला अपि ।

शरा इव निकृन्तेयुः इति तत्राङ्गदोऽब्रवीत् ॥५॥

तत्र=तस्मिन् समये **अङ्गदः**=वालिसुतः आह– हे राम! **विपक्षवर्गनिर्मुक्ताः**=शत्रुसमूहेन परित्यक्ताः **सस्नेहाः**=तैलसहिताः **सफलाः**=अग्रे अयोविशेषण सहिताः **शरा इव**=बाणा यथा अन्यान् निकृन्तन्ति तथा **विपक्षवर्गनिर्मुक्ताः सस्नेहाः**=शक्तियुक्ताः **सफलाः**= प्रयोजनसहिताः पुरुषाः अन्यान् **निकृन्तेयुः**=छिन्द्युः 'कृती=छेदने' लिङि प्रथमपुरुषे बहुवचनम् । इति अब्रवीत् ॥५॥

स्नेहवान्श्चापरिचितः परिक्ष्यो नाऽशु गृह्यताम् ।

गृहीतो विषवद्धन्याद् इति तं शरभोऽब्रवीत् ॥६॥

स्नेहवान्श्च=अन्तकरणनिष्ठस्नेहयुक्तोऽपि **अपरिचितः**=अनभ्यस्तः **परीक्ष्यः**=विचारं कर्तुं योग्यः **आशु**=शीघ्रं **न गृह्यतां**=न स्वीक्रियताम् । यदि **गृहीतः** तर्हि अपरिचितं सस्नेहं द्रवयुक्तं **विषवत्**=विषं यथा हन्ति तथा **हन्यात्**=हिंस्यात् **इति शरभः**=तन्नामककपिः **तं**=रामम् **अब्रवीत्** ॥६॥

देशकालस्वजातीनां [1]दोषाच्छङ्क्यो हि राक्षसः ।

मन्ये परीक्ष्य एवेति जाम्बवान् व्यक्तमभ्यधात्[2] ॥७॥

राक्षसः देशकालस्वजातीनां दोषात्– देशदोषात्=लङ्कारूपस्थानदोषात्, **कालदोषात्**= युद्धकालदोषात्, **स्वजातिदोषात्**=राक्षसजातिदोषात् **हि**=यस्मात् **शङ्क्यः**=शङ्कितुं योग्यः तस्मात् **परीक्ष्य एव**=परीक्षितुं योग्य एव **इति** अहं **मन्ये**=जानामि । **जाम्बवान् व्यक्तं**= स्पष्टं यथा तथा रामम् **अभ्यधात्**=अवोचत् ॥७॥

आकरैरिङ्गितैर्वाक्यैः सोऽश्रद्धेयः परीक्ष्यताम् ।

औषधैरामयो यद्वद् इति मैन्दोऽभ्यभाषत ॥८॥

---

१. **'देहाच्छङ्क्यो'** इति प्र.व्या ।

२. **'व्यक्तमब्रवीत्'** इति मू.श्लो.पा । ब.गो. च ।

Rarest Archiver

अश्रद्धेयः=विश्वासं कर्तुम् अशक्यः **आमयः**=रोगः **यद्वत्**=यथा स्यात् तथा । 'इङ्गितं हृद्गतो भावो बहिराकार आकृतिः'[1] इत्यभिधानात् । **आकारैः**=रोगिणः शरीराकारैः, शरीर – चेष्टाभिः **इङ्गितैः**=मनोगताभिप्रायैः **वाक्यैः**=रोगिणः मुखवचनैः **औषधैः** च परीक्ष्यः । तथा **अश्रद्धेयः सः**=राक्षसः आकारादिभिः **परीक्ष्यताम् इति मैन्दः**=तन्नामककपिः **अभ्यभाषत** ॥८॥

नीलतारादिभिर्नीत्या निन्द्यमाने विभीषणे ।

प्रतिभाजृम्भितं वाक्यं हनुमान्[2] राममब्रवीत्[3] ॥९॥

नीलतारादिभिः=कर्तृभिः **नीत्या**=करणेन **विभीषणे निन्द्यमाने**=दूष्यमाणे सति **हनुमान् रामं प्रतिभाजृम्भितं**=स्वज्ञानेन प्रकाशितं **वाक्यम् अब्रवीत्** । *'दुह्यादित्वाद् ब्रूञो द्विकर्म – कत्वम्'* ॥९॥

हेयभागाच्च गृह्णन्ति सारं सारविदो जनाः ।

सानुरागमवित्रस्तं मणिं फणिकुलादिव ॥१०॥

अङ्गदाद्युक्तानां क्रमेण उत्तरमाह– '**हेयभागाद्** इत्यादिना । विमलः कमलाकरः इत्यन्तेन **सारविदः**=सारज्ञाः **जनाः हेयभागात्**=त्याज्यभागात्[4] **फणिकुलात्**=सर्पसमूहात् 'त्रासो नाम–महामणेः दुर्धरत्वत्रिकोणत्वादिः कश्चन दोषः'[5] । **अवित्रस्तं**=त्रासाख्यदोषरहितं **सानुरा –गं**=कान्तियुक्तं **मणिमिव**=रत्नमिव यथा **गृह्णन्ति** तथा **हेयभागात्**=त्यक्तुं योग्यादपि राक्षसकुलात् **सानुरागं**=भक्तियुक्तम् **अवित्रस्तं**=कामादिदोषरहितं **सारं**=श्रेष्टं पुरुषं **गृह्णन्ति** =स्वीकुर्वन्ति ॥१०॥

अपरीक्ष्यापरिचितं सारं गृह्णाति सारवित् ।

तत्रोदाहरणं गृह्णन् पौष्पं मधुकरो मधु[6] ॥११॥

---

१. इत्यभिहितः दू.कृ.श्री मातृकायामेव । इति विश्वकोशे ।
२. **'हनूमान्'** इति दू.कृ.श्री ।
३. **'राममभ्यधात्'** इति प्र.व्या ।
४. **'त्यागभागात्'** इति वा.वे ।
५. **'दुर्धरत्वत्रिकोणत्वादिकश्च दोषः'** इति ब.गो.सं.का.श्री ।
६. **'मधुकरो यथा'** इति मू.श्लो.पा ।

Rarest Archiver

सारवित्=श्रेष्ठवस्तुज्ञः **अपरिचितम्=**अनभ्यस्तं **सारं**=श्रेष्ठम् **अपरीक्ष्यापि**=परीक्षाम् अकृत्वाऽपि **गृह्णाति**=स्वीकरोति । **तत्र**=अपरीक्ष्यापरिचितसारवस्तुग्रहणे **पौष्पं=**पुष्प-संबन्धि **मधु=**मकरन्दं **गृह्णन्**=स्वीकुर्वन् **मधुकरः=**भ्रमरः[१] **उदाहरणं=**दृष्टान्तः ॥११॥

देशकालादिदुष्टोऽपि सारः सारेण शुध्यति ।

नानामलेन मलिनं शुद्धं हेमेव वह्निना ॥१२॥

नानामलेन मलिनं=मलयुक्तं **हेम**=सुवर्णं **वह्निना इव=**वह्निना यथा **शुद्धं**=निर्मलं भवति, तथा **देशकालादिदुष्टोऽपि सारः**=श्रेष्ठः पदार्थः **सारेण**=स्वमनसो निर्मलत्वेन **शुध्यति=** निर्दुष्टः भवति ॥१२॥

[२]**अतिमात्रपरीक्षाभिः प्रसन्नः कलुषीभवेत् ।**

प्रकृतिं च त्यजेत् यद्वत् विमलः कमलाकरः ॥१३॥

अतिमात्रपरीक्षाभिः=अत्यन्तपरीक्षाभिः **प्रसन्नः=**निर्मलः पदार्थः **कलुषीभवेत्** =मलयुक्तो भवेत् । **प्रकृतिं च**=स्वपूर्वस्वभावमपि **त्यजेत्=**जह्यात् । तत्र दृष्टान्तः- **यद्वदिति** । **विमलः**=निर्मलः **कमलाकरः**=कमलाश्रयः सरोवरः **यद्वत्**=यथा **अतिमात्रपरीक्षाभिः कलुषीभवेत्** तथेति । 'कमलाकरः तत्र परीक्षा नाम अवगाह्य अत्यन्तविलोडनम्'[३] ॥१३॥

[४]**अविनीतिमतां नीतिं नाहं मानद मानये ।**

सचिवानाममीषां ते मम तावन्मतं शृणु ॥१४॥

हे मानद=बहुमानप्रद राम ! **अविनीतिमतां**=विशिष्टनीतिपरिचयरहितानां **ते**=तव संबन्धि-नाम् **अमीषां=**पुरः स्थितानां सचिवानां **नीतिं=**मतम् **अहं न मानये**=बहुमानयुक्तां न करोमि । किन्तु **तावत् मम मतं शृणु**=आकर्णय ॥१४॥

ऋजुः परपरित्यक्तो धार्मिकः शरणागतः[५] **।**

सर्वलोकशरण्येन त्वया ग्राह्यो विभीषणः ॥१५॥

---

१. **'मधुमक्षिका'** इति स्पष्टार्थः दू.कृ.श्री मातृकायामेव ।
२. **'अनिमात्रं परीक्षाभिः'** इति ब.गो ।
३. श्रीवि.भू. पाठोऽपि ।
४. **'अपि नीतिमतां'** इति ब.गो ।
५. **'शरणं गतः'** ब.गो.सं.पा ।

Rarest Archive

तव मतं किम्? इत्यत आह– **ऋजुरिति । ऋजुः**=मनोवाक्कायकर्मसु एकप्रकारः **परपरित्यक्तः**=शत्रुणा निष्कासितः **धार्मिकः**=सर्वदा धर्मानुष्ठाता **शरणागतः**[1]=त्वां शरणं प्राप्तः **विभीषणः सर्वलोकशरण्येन**=सर्वलोकशरणप्रदेन **त्वया ग्राह्यः**=ग्रहीतुं योग्यः॥१५॥

वीर्यौदार्यं तव ज्ञात्वा राक्षसानां च संक्षयम् ।

साम्राज्यं भोक्तुमाप्तोऽयं पादोपान्तं तव प्रभो ॥१६॥

तर्हि किमर्थम् आगतः? इत्यत आह– **वीर्येति । हे प्रभो**=परमसमर्थ राम ! **अयं**=विभीषणः **तव** वीर्यं च औदार्यं च=वीर्यौदार्यं *'द्वन्द्वैकवद्भावः'* । **वीर्यम्**=अध्यवसयान्त-गामित्वम् **औदार्यं**=मोक्षादिसर्वपुरुषार्थप्रदत्वं **ज्ञात्वा, राक्षसानां**=रावणादीनां **संक्षयं च**=नाशमपि ज्ञात्वा, **साम्राज्यं**=लङ्काधिपत्यं **भोक्तुम्**=प्राप्तुम्, अनुभवितुं वा **तव पादोपान्तं** =पादसमीपम् **आप्तः**=प्राप्तः ॥१६॥

भ्रातृव्यं भ्रातारं हत्वा राज्यमस्मै प्रदीयताम् ।

अनुरक्ताय दासाय सुग्रीवाय यथा पुरा ॥१७॥

मया किं कर्तव्यम्? इत्याह– **भ्रातृव्यमिति । पुरा**=पूर्वं **भ्रातृव्यं**=सुग्रीवशत्रुभूतं **भ्रातरं** =वालिनं **हत्वा, अनुरक्ताय**=स्वभक्ताय **दासाय**=भृत्यभूताय **सुग्रीवाय राज्यं**=कपिराज्यं **यथा** दत्तं तथा **भ्रातृव्यं**=विभीषणशत्रुभूतं **भ्रातरं**=रावणं **हत्वा, अनुरक्ताय दासाय अस्मै**=विभीषणाय **राज्यं**=रावणराज्यं **प्रदीयताम्**=वितीर्यताम् । इति हनुमान् राममब्रवीत् ॥१७॥

इति तन्मारुतेर्वाक्यं लालयन्नब्रवीत् प्रभुः ।

मन्मतप्रतिबिम्बं [2]यन्मतं साधु हनूमतः ॥१८॥

प्रभुः=रामः **इति**=पूर्वोक्तप्रकारेणोक्तं **मारुतेः**=हनुमतः **वाक्यम्** 'अस्मै राज्यं प्रदीयताम्' इत्यादि वाक्यं **लालयन्**=वाचा स्तुवन् सन्, **हनुमतः साधु**=समीचिनं **यन्मतं**=यद् अभिमतं **तत् मन्मतप्रतिबिम्बं**=ममाभिप्रायसदृशम् **इति अब्रवीत्** ॥१८॥

अपरोक्षं परोक्षं वा शरणं मामुपागतम् ।

शत्रुं मित्रमथान्यं वा पालयेयेति मे व्रतम् ॥१९॥

---

१. **'शरणं गतः'** इति वा.वे ।

२. **'तन्मतम्'** इति दू.कृ.श्री । प्र.व्या । ब.गो. च ।

Rarest Archiver

ततः किम्? इत्यत आह– **अपरोक्षमिति । अपरोक्षं**=मत्पुरतः, **परोक्षं वा**=देशान्तरे वा **मां शरणं**=रक्षणम् उद्दिश्य, **उपागतं**=प्राप्तं **शत्रुम्**=अरिं **मित्रं**=स्नेहितम् **अथ**=अनन्तरम् **अन्यम्** उदासीनं वा **पालयेय**=रक्षेय 'पाल=रक्षणे' लिङ् आत्मनेपदिन उत्तमपुरुषे एकवचनम् । **मे**=मम **व्रतं**=नियमः, तस्माद् विभीषणं रक्षेयम् **इति** भावः ॥१९॥

न मे भयं राक्षसतो यद्ययं छद्मसौहृदः ।

मदङ्गुलिं चालयितुं नालं सर्वे सुरासुराः ॥२०॥

हनुमदुक्तिकरणे अङ्गदाद्युक्तीनां का गतिः? इत्यत आह– **नेति । यदि अयं**=विभीषणः **छद्मसौहृदः**=कपटसौहार्दवान्,कपटभक्तिमान् इति यावत् । तथाऽपि **राक्षसतः**=विभीषणात् **मे**=मम **भयं**=भीतिः **न** अस्ति । कुतः? इत्यत आह– **मदिति । सर्वे सुरासुराः मदङ्गुलिं चालयितुं**=**चलितां कर्तुं नालं**=न समर्थाः ॥२०॥

अवगच्छामि च स्वच्छं मम भक्तं विभीषणम् ।

इत्युक्त्वा वानरैरेनम् आह्वयद् भक्तवत्सलः ॥२१॥

किं च **मम भक्तं विभीषणं स्वच्छं**=निर्मलचित्तम् **अवगच्छामि च** जानामि एव । **इत्युक्त्वा भक्तवत्सलः**=रामः **वानरैः**=कपिभिः करणैः **एनं**=विभीषणम् **आह्वयत्** ॥२१॥

आयुधानि नगे न्यस्य शान्तं रूपान्तरं गतः ।

ननाम रामपादाब्जे सह भृत्यैर्विभीषणः ॥२२॥

आह्वानानन्तरं विभीषणः किम् अकरोत्? इत्यत आह– **आयुधानीति । नगे**= कस्मिंश्चित् वृक्षे, पर्वते वा **आयुधानि न्यस्य**=निक्षिप्य **शान्तं**=सौम्यमक्रूरम् इति यावत् । **रूपान्तरम्**=अन्यद्रूपं **गतः**=प्राप्तः **विभीषणः भृत्यैः सह रामपादाब्जे ननाम**=अनमत् ॥२२॥

रावणं सगणं हत्वा देवविप्रापराधिनम् ।

प्राज्यं राक्षसराज्यं ते दास्यामीत्यवदत् प्रभुः ॥२३॥

विभीषणनमनानन्तरं रामः किम् अकरोत्? इत्यत आह– **रावणमिति । प्रभुः**=रामः **देव–विप्रापराधिनं** वाचविभीषणः **सगणं रावणं हत्वा, प्राज्यं**=बहुलं **राक्षसराज्यं**=लङ्काधिपत्यं हे राक्षस ! इति सम्बुध्य **ते**=तुभ्यं **दास्यामि इति अवदत्** ॥२३॥

Rarest Archiver

दास्यं ते दुर्लभं प्राप्तं कैवल्यस्यैककारणम् ।

योत्स्यामि राक्षसैः सार्धम् इत्युवाच विभीषणः ॥२४॥

विभीषणः हे राम ! **कैवल्यस्य**=मोक्षस्य **एककारणं**=मुख्यकारणं **दुर्लभम्**=अन्यैः लब्धुमशक्यं **ते**=तव **दास्यं** मया **प्राप्तं,** यस्मात् लब्धं तस्मात् अहं **राक्षसैः**=मद्भृत्यैः **सार्धं योत्स्यामि**=युद्धं करिष्यामि **इति उवाच** ॥२४॥

[1]**लक्ष्मणेनाऽहृते नाथ रामो वारिधिवारिणा ।**

लङ्काधिपतिरित्युच्चैरभ्यषिञ्चद् विभीषणम् ॥२५॥

अथ=विभीषणवाक्यानन्तरं **नाथः रामः** लक्ष्मणेन=कर्त्रा **आहृतेन**=आनीतेन **वारिधि-वारिणा**=समुद्रोदककरणेन[2] अयं विभीषिणः **लङ्काधिपतिः**=लङ्कास्वामी **इत्युच्चैः** उक्त्वा, **विभीषणम् अभ्यषिञ्चत्**=अभिषेकयुक्तम् अकरोत् ॥२५॥

कपिराजेन सम्पृष्टो निजगाद विभीषणः ।

समुद्रतरणोपायं सेतुबन्धं महामतिः ॥२६॥

कपिराजेन=सुग्रीवेण **समुद्रतरणोपायं सम्पृष्टः**=अनूक्तः **महामतिः विभीषणः सेतुबन्धं निजगाद** ॥२६॥

दृष्ट्वा कपीन्द्रसैन्यं तच्छार्दूलो नाम राक्षसः ।

रावणस्य चरो गत्वा रावणाय न्यवेदयत् ॥२७॥

रावणस्य चरः=गूढपुरुषः **शार्दूल** इति **नाम**=प्रसिद्धः **राक्षसः तत्**=प्रसिद्धं **कपीन्द्रसैन्यं**=**कपिसेनां दृष्ट्वा,** लङ्कां **गत्वा, रावणाय न्यवेदयत्**=अज्ञापयत्[3] ॥२७॥

ध्यात्वा मुहूर्तं निश्वस्य[4] सम्भ्रान्तः स दशाननः ।

शुकं दूतं कपीन्द्राय प्रेषयामास सत्वरः ॥२८॥

सः=प्रसिद्धः **दशाननः**=रावणः शार्दूलवाक्यश्रवणानन्तरं **सम्भ्रान्तः**=मनश्चाञ्चल्ययुक्तः

---

१. **'ब्रह्मजेनाऽहृते नाथ'** इति प्र.व्या ।
२. **'समुद्रोदकेनकरणेन'** इति दू.कृ.श्री ।
३. **'ज्ञापयामास'** इति दू.कृ.श्री ।
४. **निश्वस्य**=निट्टुसिरु इति कर्णाटकभाषयाम् ।

Rarest Archive

सन् **मुहूर्तं**[१] **ध्यात्वा निश्वस्य**=दीर्घश्वासं विसृज्य, **सत्वरः**=वेगयुक्तः सन् **शुकं**=शुक-नामकं **दूतं**=भृत्यं **कपीन्द्राय**=सुग्रीवाय **प्रेषयामास**=गमयामास 'इषु=गतौ' लिट् ॥२८॥

शुको विहङ्गमो भूत्वा निस्तीर्य लवणार्णवम् ।

स्थितो वियति सुग्रीवं रावणस्य वचोऽब्रवीत् ॥२९॥

शुकः=शुकनामकः राक्षसः **विहङ्गमः**=पक्षी **भूत्वा, लवणार्णवं विस्तीर्य**=अतिक्रम्य, कपिसेनां प्राप्य, **वियति**=आकाशे **स्थितः सन् सुग्रीवं रावणस्य वचः अब्रवीत्** । *ब्रूञो द्विकर्मकत्वम्* ॥२९॥

नरेन्द्रस्याहरं भार्यां वानरेन्द्र कृतागसः ।

भवान् मे भ्रातृदेशीयो विरोधं कुरुते कुतः ॥३०॥

हे वानरेन्द्र=सुग्रीव ! अहं **कृतागसः**=शूर्पणखीनासिकाछेदन,खरादिवधाख्यम् अपराधं कृतवतः **नरेन्द्रस्य**=रामस्य **भार्यां**=सीताम् **आहरम्**=अपहृतवान् अभवम् । 'हृञ्=हरणे' लङि उत्तमपुरुषैकवचनम् । भ्रातृसमो **भ्रातृदेशीयः**– *'ईषदसमाप्तौकल्पब्देश्यदेशीयरः'*[२] इति भ्रातृशब्दाद् देशीयः प्रत्ययः । मम भ्रातृतुल्यो **भवान् मे**=मम **कुतः**=कस्माद् हेतोः **विरोधं**=वैरं **कुरुते**=करोति । *'शेषे प्रथमः'*[३] ॥३०॥

सुरासुरैरप्रधृष्या लङ्का वानरदुर्गमा ।

तस्मात् ते विग्रहो मा भूत् किष्किन्धां कुशली व्रज ॥३१॥

यस्मात् **लङ्का सुरासुरैः**=देवासुरैरपि **अप्रधृष्या**=निराकर्तुम् अशक्या, प्रवेष्टुम् अशक्या इति यावत् । **वानरदुर्गमा**=वानरैः दुर्गमा=गन्तुम् अशक्येति किं वक्तव्यं? **तस्मात्**=लङ्का-वानरदुर्गमत्वात् **ते**=तव **विग्रहः**=कलहः **मा भूत्**=मास्तु । हे सुग्रीव ! **कुशली**=क्षेमवान् सन् त्वं **किष्किन्धां व्रज**=गच्छ इति रावणस्य वचोऽब्रवीत् ॥३१॥

इति ब्रुवाणं तं दृष्ट्वा कपीन्द्रा अङ्गदादयः ।

खमुत्पत्य निपात्याधः पक्षं तस्योदमूलयन् ॥३२॥

---

१. **'मुहुः तं ध्यात्वा'** इति पदच्छेदं कृत्वा अन्वेति । वा.वे ।
२. अष्टाध्यायी–५।३।६७॥ पा.सूत्रम् ।
३. अष्टाध्यायी–१।४।१०८॥ पा.सूत्रम् ।

Rarest Archiver

अङ्गदादयः कपीन्द्राः इति 'नरेन्द्रस्य'* इत्यादिप्रकारेण **ब्रुवाणं=**वदन्तं विहङ्गमरूपं शुकं **दृष्ट्वा, खम्=**आकाशं प्रति **उत्पात्य=**प्लवनं कृत्वा, **तं**=शुकम् **अधः**=भूमौ **निपात्य**= पातयित्वा, **तस्य**=शुकस्य **पक्षम् उदमूलयन्**=उत्पाटयामासुः । *'सुब्धातुरयम्'* ॥३२॥

***लोड्यमानो धरापृष्ठे ताड्यमानश्च वानरैः ।**

हा राम राजधर्मज्ञ दूतं पाहीति सोऽवदत्[१] ॥३३॥

धरापृष्ठे=भूतले **लोड्यमानः**=अङ्गपरिवर्तनं कुर्वन् **वानरैः ताड्यमानश्च सः**=शुकः **हा राम राजधर्मज्ञ दूतं पाहि**=रक्ष **इति अवदत्** ॥३३॥

न दूतश्चोर एवायं चार इत्यङ्गदोऽब्रवीत् ।

मा घानि दूतम्मन्योऽसावित्यूचे सस्मितं प्रभुः ॥३४॥

अङ्गदः अयं=शुकः **न दूतः** किन्तु **चोरः=**तस्करः **चार एव**=गूढपुरुष एव **इति अब्रवीत्** । **प्रभुः=**रामः **'दूतम्मन्य'** इत्येकं पदम् । *'आत्ममाने खश्च'*[२] इति 'खश्' आत्मानं दूतम् 'मन्यते=जानाति इति' **दूतम्मन्यः**=दूतोऽहम् इति भाषमाणश्च **असौ=**शुकः भवद्भिः **मा घानि**=न हन्यताम् । 'हन=हिंसागत्योः' कर्मणि माङ्योगे लोडर्थे लुङ् । *'चिण् भावकर्मणोः'*[३] इति च्लेः चिणि कृते, *'हो हन्तेः'*[४] इति कुत्वे, *'अत उपधायाः'*[५] इति उपधावृद्धौ, *'चिणो लुक्'*[६] इति प्रत्ययस्य लुकि सति, *'न माङ्योगे'*[७] इत्यडभावे 'मा घानि' इति रूपम् । **सस्मितं=**स्मितेन सहितं यथा तथा **ऊचे** ॥३४॥

न मे मित्रममित्रोऽयं रामामित्रो दशाननः ।

गच्छेद्यमपुरीमित्थं सुग्रीवः शुकमब्रवीत् ॥३५॥

सुग्रीवः **'भवान् मे भ्रातृदेशीयः'**[८] इति रावणवाक्यस्य प्रत्युत्तरमाह– **नेति** । **रामामित्रः** =रामशत्रुः **अयं=दशाननः मे=**मम **न मित्रं**=न स्नेहितः । किन्तु **अमित्रः**=शत्रुरेव ।

---

*. सं.रा.यु.का.२.स.३०.श्लोकः । *. **लोड्यमानः=होरळाडु** इति कर्णाटकभाषयाम् ।

१. अ) **'सोऽरुदत्'** इति वा.वे । आ) **'सोऽब्रवीत्'** इति मू.श्लो.पा ।

२. अष्टाध्यायी (३।२।८३) । ३. अष्टाध्यायी (३।१।६६) । ४.अष्टाध्यायी (७।३।५४) । ५. अष्टाध्यायी (७।२।११६) ।

६. अष्टाध्यायी(६।४।१०४) । ७. अष्टाध्यायी (६।४।७४) इति च पाणिनिसूत्राणि ॥ ८. सं.रा.यु.का.२.स.३०.श्लोकः ।

Rarest Archiver

'किष्किन्धां कुशली व्रजेत्'[१] इत्यस्य उत्तरमाह– **गच्छेदिति** । **अयं**=दशाननः **यमपुरीं गच्छेत्**=प्राप्नोतु । **इत्थं सुग्रीवः शुकम् अब्रवीत्** ॥३५॥

प्रतीक्षमाणो भगवान् त्रिरात्रं च क्षमापरः ।

चुक्रोधानभियाताय वीर्याब्धिर्लवणाब्धये ॥३६॥

भगवान् मार्दवं धर्मम् आश्रितः अशेत इत्युक्तम् । ततः किम् अकरोत् ? इत्यत आह– **प्रतीक्षमाण इति** । **वीर्याब्धिः**=वीर्यसमुद्रः [२]**क्षमापरः**=दयासक्तः **भगवान्**=रामः **त्रिरात्रं च**=रात्रित्रयमपि **प्रतीक्षमाणः**='मार्गं दातुं समुद्रः स्वयमेव आगमिष्यति' इति विचारं कुर्वाणः सन् **अनभियाताय=**अभ्यागमनम् अकृत्वा स्थिताय **लवणाब्धये=**वरुणाय **चुक्रोध=**चुकोप 'क्रुधद्रुह्'[३] इत्यादिना चतुर्थी ॥३६॥

मन्यते क्षमिणं क्षामं नीचो दण्डेन तृप्यति ।

इत्युक्त्वाऽऽदत्त भगवान् बाणं बाणासनं च सः ॥३७॥

भगवान्=रामः लोके **नीचः=**अधमः पुरुषः **क्षमिणं**=क्षमावन्तं, क्षमां कृत्वा स्थितं पुरुषं **क्षामम्**=अशक्यं **मन्यते**=जानाति **दण्डेन**=शिक्षया **तृप्यति**=प्रीणाति, दण्डेन स्वाधीनो भवतीति यावत् । **इत्युक्त्वा बाणासनं**=चापं **बाणं**=शरमपि **आदत्त**=जग्राह ॥३७॥

आकर्षतो राघवस्य बाहुना बाणमुल्बणम्[४] **।**

निसर्गरक्तो नेत्रान्तो रक्तत्वमभजत् पुनः ॥३८॥

बाहुना=हस्तेन **उल्बणं**=क्रूरं **बाणं=**शरम् **आकर्षतः**=आकृष्टं कुर्वतः **राघवस्य**=रामस्य **निसर्गरक्तः**=स्वभावतो रक्तवर्णः **नेत्रान्तः**=कटाक्षः **पुनः**=अतिशयेन **रक्तत्वं=**रक्तवर्णोपेत –त्वम् **अभजत्=**प्राप ॥३८॥

रामापाङ्गानलज्वालजालालीढो महोदधिः ।

सर्पिः कलशदेशीयो भृशं तातप्यते पुरा ॥३९॥

---

१. सं.रा.यु.का.२.स.३१.श्लोकः ।
२. इदं वाक्यमेव विक्षिप्तम् । वा.वे ।
३.**'क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः'** (१।४।३७) इति च पा.सूत्रम् ।
४.**'बाणमुत्तमम्'** इति मू.श्लो.पा ।

Rarest Archiver

ततः किम् अभूत्? इत्यत आह– **रामेति** । **रामस्य अपाङ्गः**=कटाक्षः रामापाङ्गेन उत्थितः **अनलः**=वह्निः रामापाङ्गानलः । अनलस्य ज्वालाः, तासां जालं= समूहः, तेन **आलीढः=**आस्वादितः संस्पृष्ट इति यावत्, **रामापाङ्गानलज्वालजालालीढः**[१] । **महोदधिः**= समुद्रः सर्पिषः=घृतस्य कलशः=घटः **सर्पिःकलशः**=सर्पिःकलशतुल्यः **सर्पिः कलश–देशीयः** तुल्यार्थे कलशशब्दात् देशीयप्रत्ययः । घृतघटसमानः सन् **भृशम्=**अत्यन्तं **तातप्यते=**पुनः पुनः सन्तप्तोऽभूत् । 'तप=सन्तापे' '*यावत्पुरानिपातयोर्लट्*'[२] पुरायोगे भूते कर्मणि लट् ॥३९॥

शुष्यत्यम्भोनिधौ मङ्क्षु क्षुभ्यत्यस्मिन् जगत्त्रये ।

प्रसीद लोकनाथेति देवाः समुनयोऽब्रुवन् ॥४०॥

अम्भोनिधौ=समुद्रे **मङ्क्षु**=शीघ्रं **शुष्यति=**शोषं प्राप्नुवति सति **अस्मिन्**=प्रसिद्धे **जगत्त्रये**=लोकत्रये **क्षुभ्यति**=मनःक्षोभं प्राप्नुवति सति **समुनयः=**मुनिभिः सहिताः **देवाः** हे **लोकनाथ=**राम ! **प्रसीद** =प्रसन्नो भव **इति अब्रुवन्** ॥४०॥

कोपो विश्वस्य विपदे प्रसादः सम्पदे तव ।

क्षमस्वार्येति धनुषि व्याललम्बे स लक्ष्मणः[३] **॥४१॥**

सः=प्रसिद्धः **लक्ष्मणः हे आर्य**=पूज्य राम ! **तव कोपः विश्वस्य=**जगतः **विपदे=** नाशाय भवति । **तव प्रसादः विश्वस्य सम्पदे=**श्रेयसे भवति । तस्मात् त्वं **क्षमस्व** =सहस्व इत्युक्त्वा, **धनुषि**=चापे **व्याललम्बे**=आश्रितोऽभूत्, हस्तेन धनुः गृहीतवान् इति यावत् । 'लम्ब=आलम्बने'[४] लिट् ॥४१॥

सम्भ्राम्यन्नक्रचक्रादिः सम्भ्राम्यन्नम्बुधिः स्वयम् ।

अर्हणं शिरसा बिभ्रद् रूपवान् प्रत्यदृश्यत[५] **॥४२॥**

---

१. अस्य पदस्यार्थः नास्ति । वा.वे ।

२. **अष्टाध्यायी (३।३।४)** इति पाणिनिसूत्रम् । काशिकावृत्तौ– 'भविष्यति इत्येव । यावत्पुराशब्दयोः निपातयोः उपपदयोः भविष्यति काले धातोः लट् प्रत्ययः भवति' । इति

३. **'व्याललम्बेऽथ लक्ष्मणः'** इति मू.श्लो.पा ।

४. यद्यपि 'लबि=अवस्रंसने च' इति वैयाकरणसिद्धान्तकौमुद्यां धात्वर्थ उक्तः । एष एव साधुरिति भाति ।

५. **'रूपवान् समदृश्यत'** इति ब.गो ।

Rarest Archiver

सम्भ्राम्यन्नक्रचक्रादिः=परिवर्तमानग्रहसमूहादिप्राणिराशियुक्तः[१] **स्वयं सम्भ्राम्यन्**=मनः क्षोभयुक्तः, भययुक्तः इति यावत् । **अम्बुधिः**=समुद्राभिमानी वरुणः **अर्हणं**=पूजासाधन-द्रव्यम्,उपायनम् इति यावत् । स्वयमेव **शिरसा बिभ्रद्**=दधानः सन् **रूपवान् प्रत्यदृश्यत** =रामेण दृष्टोऽभूत् । दृशेः कर्मणि लङ् ॥४२॥

वैडूर्यमणिसङ्काशो नानामणिविभूषितः ।

गङ्गादिभिर्वृतो दारै रामं नत्वाऽभ्यभाषत ॥४३॥

वैडुर्यमणिसङ्काशः=वैडूर्यरत्नतुल्यदेहः **नानामणिविभूषितः**=नानारत्नैरलङ्कृतः **गङ्गादिभिः** =भागीरथ्यादिभिः **दारैः**=भार्यादिभिः **वृतः**=युक्तः अम्बुधिः **रामं नत्वा अभ्यभाषत** ॥४३॥

न वेदाहं जडमतिः त्वां विश्वाधीश्वराधुना ।

त्रिगुणैस्त्रिजगन्ति त्वं सृजस्यत्सि च पास्यसि[२] ॥४४॥

"तं त्वां वयं जडधियो न विदाम भूमन् कूटस्थमादिपुरुषं जगतामधीशम् ।

त्वं सत्त्वतः सुरगणान् [३]रजसो मनुष्यान् तार्तीयतो सुरगणाभितस्तथास्त्राः ॥"[४]

इति भागवतश्लोकम् अर्थतः अनुवदति- **नेति । हे विश्वाधीश्वर**=जगतः मुख्यस्वामिन् राम ! **जडमतिः**=मन्दबुद्धिः **अहं** यः **त्वं त्रिगुणैः**=सत्त्वरजस्तमोगुणैः **त्रिजगन्ति**= लोकत्रयं **सृजसि**=रजोगुणेन उत्पन्नं करोषि । सत्त्वगुणेन **पास्यसि**=रक्षसि, रक्षिष्यसि च तमोगुणेन **अत्सि**=संहरिष्यसि तं **त्वाम् अधुना न वेद**=न जानामि ॥४४॥

[५]यशःसमुद्रसेतुस्ते मयि सेतुर्विधीयताम् ।

तेन रावणमासाद्य सूदयाऽनय जानकीम् ॥४५॥

"कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीरपत्नीम् ।

बन्धी हि सेतुमिह ते यशसो वितत्यै गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥"

---

१. **'परिवर्तमानप्राणिराशिसमूहयुक्तः'** इति वा.वे ।

२. अ) **'सृजस्यवसि चात्स्यसि'** इति मू.श्लो.पा । आ) **'सृजस्यत्सि च पासि च'** इति ब.गो ।

३. **श्रीमद्भागवते-९.स्क.८.अ.९६.श्लोकः ।**

४. श्लोकेऽस्मिन् अन्तिमपादे - **"रजसः प्रजेशान् मन्योश्च भूतपतयः स भवान् गुणेशः"॥** इति पाठन्तरोऽपि वा स्यात् ॥

५. **यशःसमुद्रहेतुस्ते'** इति प्र.व्या ।

५. **श्रीमद्भागवते ९.स्क.८.अ.९७श्लोकः ।**

Rarest Archiver

इति श्लोकार्थम् अनुवदति– **यशेति** । हे राम ! त्वया **मयि यशः समुद्रसेतुः**=कीर्तिनाम–कसमुद्रस्य **सेतुः** इव स्थितः सेतुजलाधारबन्धः **विधीयतां**=क्रियतां त्वं **तेन**=सेतुना लङ्काम् **आसाद्य**=प्राप्य, **रावणं सूदय**=नाशय । 'सूद=नाशने' लोट् **जानकीं**=सीताम् **आनय**=स्वसमीपं प्रापय ॥४५॥

[1]मम कुक्षौ दुकूलाख्ये मरुदेशे महासुरान् ।

निसूदयेदयं[2] देव शरो मोघेतरस्तव ॥४६॥

तर्हि करधृतशरस्य का गतिः? इत्यत आह– **ममेति** । **हे देव**=राम! **मोघेतरः=**अमोघः **अयं तव** हस्ते स्थितः **शरः**=बाणः **दुकूलाख्ये**=दुकुलनामके **मम कुक्षौ**=मध्यभागे **मरुदेशे**=उषरभूतप्रदेशे 'समानौमरुधन्वानौ'[3] इत्यमरः । स्थितान् **महासुरान् निसूदयेत्**= नाशयेद् इति अभाषत ॥४६॥

इत्यर्थितः सागरेण सगरान्वयशेखरः ।

आभीरजन्मनो दैत्यानवधीत् तेन पत्रिणा ॥४७॥

इति=पूर्वोक्तप्रकारेण **सागरेण**=समुद्रेण **अर्थितः**=प्रार्थितः **सगरान्वयशेखरः=**सगरनामक–वंशोत्पन्नानां राज्ञां चूडामणिभूतः रामः **तेन=**पूर्वोक्तेन **पत्रिणा**=बाणेन **आभीरजन्मनः**– [4]**आभीरेभ्यः**=महाशूद्रेभ्यः **जन्मनः**=जातान् 'आभीरजन्मनामकान्' इति केचित् । **दैत्यान् अवधीत्**=जघान 'वध=हिंसायां' लुङ् । हनो वधादेशो वा ॥४७॥

सीताकान्तप्रसादेन मरुकान्तारनामकम् ।

वनं तदभवत् पुण्यं फलमूलाम्बुपुष्कलम्[5] ॥४८॥

सीताकान्तप्रसादेन=सीतापत्यनुग्रहेण **मरुकान्तारनामकम्**=उषराडटवीनामकं **तत्**=प्रसिद्धं समुद्रतीरस्थं[6] **वनं पुण्यं**=पुण्यकरं[7] **फलमूलाम्बुभिः पुष्कलं**=पूर्णम् अभवत् ॥४८॥

---

१. प्र.व्या.पाठेऽस्मिन्नेव– इतः पूर्वं श्लोकत्रमधिकमुक्तम् । यथा–

उक्तोऽहं मुनिना पूर्वं नलस्य कपिकर्मतः । पीतेन मां कुम्भजेन भविष्यत्कार्यवेदिना ॥

नलविक्षिपितं सर्वं न गलेरिति शोभन । तेन कार्यमिदं सेतुबन्धनं भवदाज्ञया ॥

अगस्त्यस्य वरादेव नलो मत्सेतुबन्धकः । भवेदागो मम स्वामिन् क्षम्यतां भक्तवत्सल ॥

२.'**निषूदयेदयम्** इति मू.श्लो.पा । परन्तु मूर्धन्यपाठः प्रामादिकः व्याकरणरीत्या । ३.**अ.कोशे–२.का.भूमिवर्गे ३१३.श्लोकः** ।

४. एवमर्थः वा.वे मातृकायामेव ।

५. '**पुष्पकम्**' इति प्र.व्या ।

६. '**समुद्रतीरे स्थितं**' इति दु.कृ.श्री ।

७. '**पुण्यनामकं**' इति वा.वे ।

Rarest Archiver

विश्वकर्मसुतं वीरं विश्वकर्मविशारदम् ।

आदिदेश नलं देवः सेतुं कर्तुं महार्णवे ॥४९॥

सागरेण **'मयि सेतुः विधीयताम्'**[1] इत्युक्तम् । तत्कारणप्रकारमाह–**विश्वेति । देवः**=रामः **विश्वकर्मविशारदं**=सर्वकर्मकुशलं **वीरं विश्वकर्मसुतं**=विश्वकर्माख्यतक्ष्णः पुत्रं **नलं**=नल –नामकं कपिं **महार्णवे सेतुं कर्तुम् आदिदेश**=आदिशत् ॥४९॥

शैलेन्द्रान् गण्डशैलांश्च तृणस्तम्बांश्च पादपान् ।

आजह्रुः कपियूथानि शतशोऽथ सहस्रशः ॥५०॥

अथ=रामाज्ञानन्तरं **शतशः**=शतसंख्याकानि **सहस्रशः**=सहस्रसंख्यकानि **कपियूथानि**= कपिसमूहाः **शैलेन्द्रान्**=पर्वतश्रेष्टान् **गण्डशैलांश्च**=स्थूलपाषाणान् अपि **पादपान्**=स्थूल – वृक्षान् **तृणस्तम्बांश्च**=तृणानि,स्तम्बनामकक्षुद्रवृक्षानपि **आजह्रुः**=आनीतवन्ति ॥५०॥

केचित् सूत्राणि जगृहुर्दण्डैः स्म मिमतेऽपरे ।

[2]**आपूरयन् परे वृक्षैर्वानरा नलशासनात् ॥५१॥**

केचित्=कपयः **नलशासनात् सूत्राणि**=तन्तून् **जगृहुः**=गृहीतवन्तः **केचित्**=कपयः **दण्डैः**=यष्टिभिः **मिमते स्म**=मानं चक्रुः । मिमीते मिमाते मिमते । 'माङ्=माने' स्मयोगे भूते लटि प्रथमपुरुषे बहुवचनम् । '*भृञामित्*'[3] इति अभ्यासस्य इकारः' । **अपरे वानराः वृक्षैः** समुद्रम् **आपूरयन्**=पूर्णं चक्रुः 'पॄ=पालनपूरणयोः'[4] लङ् ॥५१॥

देवोपदेवा देवीभिः साकमाकाशमागमन् ।

इदमत्यद्भुतं द्रष्टुं रामदासविचेष्टितम् ॥५२॥

देवोपदेवाः=देवा उपदेवा गन्धर्वाश्च **देवीभिः**=स्वस्वस्त्रीभिः **साकं**=सार्धं **रामदासस्य**= नलस्य **इदं**=प्रत्यक्षसिद्धं समुद्रसेतुबन्धनरूपं वा **अत्यद्भुतं**=द्रष्टॄणाम् अत्यन्ताश्चर्यकरं **विचेष्टितं**=व्यापारं **द्रष्टुम् आकाशम्**=अन्तरिक्षम् **आगमन्**=प्रापुः ॥५२॥

---

१. सं.रा.यु.का.द्वि.अ.४५.श्लोकः ।
२. **'अपूरयन्** इति मू.श्लो.पा । ब.गो ।
३. **अष्टाध्यायी– ७।४।७६ पा.सूत्रम् ।**
४. **'पूरी=आप्यायने'** इत्यस्यापि रूपमेवम् ।

Rarest Archiver

[१]नगानादाय पततां नगार्थं पततां द्रुतम् ।

बध्नतां चान्तरं तेषां वेगिनां न व्यदृश्यत ॥५३॥

नगान्=शैलान्, वृक्षान् वा **आदाय**=गृहीत्वा, **दुतं** यथा तथा **पततां**=समुद्रसमीपं प्रत्यागच्छतां **नगार्थं**=शैलादिकम् आनेतुं **पततां**=गच्छतां **बध्नतां**=बन्धनं कुर्वतां **वेगिनां** =वेगवतां **तेषां**=कपीनाम् **अन्तरे**=व्यवधानं **न व्यदृश्यत**=न दृष्टम् । 'निरवकाशेन स्वस्व –व्यापरं चक्रुः' इति भावः ॥५३॥

क्षुभ्यतः कपिसैन्यस्य क्ष्युभ्यतो वारिधेरपि ।

उपमानपदं नाऽसीद् विनाऽन्योन्यं जगत्त्रये ॥५४॥

क्षुभ्यतः=कलिलस्य **कपिसैन्यस्य क्षुभ्यतो वारिधेरपि जगत्त्रये अन्योन्यं**=परस्परं **विना** ऋते **उपमानपदं**=दृष्टान्तस्थलं **नाऽसीत्**=नाभूत् । **सैन्यस्य**=अभिवृद्धकपिसैन्यस्य समुद्र एव दृष्टान्तः । तथा **वारिधेरपि कपिसैन्यं** दृष्टान्त इति भावः ॥५४॥

परस्परं स्पर्धयेव प्रवृद्धौ सेतुवारिधी ।

मध्यस्थो भगवान् नूनं तयोर्वैरमवारयत् ॥५५॥

भगवान्=रामः **परस्परम्**=अन्योन्यं **स्पर्धयेव**=असूयेव **प्रवृद्धौ**=अभिवृद्धौ **सेतुवारिधी**= सेतुबन्धसमुद्रौ कर्म स्वयं **मध्यस्थः**=मध्ये विद्यमानः, पक्षपातरहितः सन् **तयोः**=सेतु–वारिध्योः **वैरं**=विरोधम् **अवारयत्**=परिहृतवान् **नूनं**=निश्चितम् ॥५५॥

दशयोजनविस्तीर्णं [२]शतयोजनमायतम् ।

सेतुं पञ्चाहतश्चक्रे नलिनाक्षप्रियो नलः ॥५६॥

---

१. एतत्पूर्वं पञ्चश्लोकाः प्र.व्या. पाठे पठ्यन्ते । यथा–

कैलासमङ्गदो गत्वा गृहीत्वा तत्र शूलिना । मानितो रामदासोऽस्मीत्युपपर्वतमाहरत् ॥
हिमवन्तं मैन्द एत्य गृहीत्वा तत्र तेन सः । मानितो रामदासोऽस्मीत्युपपर्वतमाहरत् ॥
मेरुमुन्मूलयन् देवो हनूमान् ब्रह्मणा ततः । सम्भावितः स्ववीर्येण ह्युपपर्वतमाहरत् ॥
माहेन्द्रं जाम्बवानेत्य गृहीत्वा तत्र दैवतैः । मानितो रामदासोऽस्मीत्युपपर्वतमाहरत् ॥
सर्वैस्स्वस्थानसंस्थैश्च मानिताः सर्ववानराः । देवर्षिभिः परान् शैलानाहरन्नमितविक्रमाः ॥

२. **'ततो दशगुणायतम्'** इति मू.श्लो.पा ।

Rarest Archiver

नलिनाक्षप्रियः=कमलाक्षस्य रामस्य प्रीतिविषयः **नलः**=विश्वकर्मसुतः **दशयोजनविस्तीर्णं** =दशयोजनविशालं **शतयोजनं** यथा तथा **आयतं**=दीर्घं **सेतुं पञ्चाहतः**=पञ्चभिरहोभिः **चक्रे** ॥५६॥

श्रीमता सेतुना तेन समेन विमलेन च ।

कपिकोटिसहस्राणि सहसाऽब्धिमथातरन्[१] **॥५७॥**

अथ=सेतुकरणानन्तरं **कपिकोटिसहस्राणि श्रीमता**=कान्तियुक्तेन **समेन**=समस्थलवता **विमलेन**=निर्मलेन **तेन**=नलकृतेन **सेतुना च**=सेतुना एव **सहसा**=शीघ्रम् **अतरन्**=अतिक्रान्ता अभूवन् ॥५७॥

विभीषणो गदापाणिरग्रतः सचिवैर्ययौ ।

राघवौ च ससुग्रीवौ वायुजाङ्गदवाहनौ ॥५८॥

गदापाणिः विभीषणः सचिवैः=प्रधानिभिः साकम् **अग्रतः**=पुरतः **ययौ** । **वायुजाङ्गदवाहनौ**=हनुमदङ्गदवाहनौ **ससुग्रीवौ राघवौ च**=रामलक्ष्मणावपि विभीषणानन्तरं ययतुः॥५८॥

कोसलेन्द्रः सुवेलाद्रिं समारुह्य सलक्ष्मणः ।

सेनाया विश्रमं चक्रे सुग्रीवेणाभिनन्दितः[२] **॥५९॥**

सलक्ष्मणः कोसलेन्द्रः=रामः **सुवेलाद्रिं**=सुवेलनामकपर्वतं **समारुह्य, सुग्रीवेणाभिनन्दितः** =सन्तोषं प्रापितःसन् **सेनायाः**=कपिसैन्यस्य **विश्रमं**=श्रमराहित्यं **चक्रे**=कारयामास ॥५९॥

दशमुखनगरीं विलोक्य लङ्कां शरमथ पाणिगतं निरीक्षमाणः ।

दयितहनुमदंससक्तहस्तो गिरिशिखरे विरराज वीरराजः ॥६०॥

वीरराजः=वीराणाम् अधिपतिः रामः **दशमुखनगरीं**=रावणपुरीं **लङ्कां विलोक्य, अथ**= अनन्तरं **पाणिगतं**=स्वहस्ते स्थितं **शरं**=बाणं **निरीक्षमाणः सन्**=पश्यन् **दयितहनुमदंससक्तहस्तः दयितः**=प्रियः हनुमान्,तस्य **अंसे**=भुजे **ससक्तः**=निक्षिप्तः **हस्तः**=वामहस्तः यस्य सः तथोक्तः सन् **गिरिशिखरे विरराज**=विरेजे ॥६०॥

---

१. **'सहसाब्धिमतारयन्'** इति प्र.व्या । ब.गो. च ।

२. **'अभिवन्दितः'** मू.श्लो.पा ।

Rarest Archiver

अम्भोधिशोषणमशेषसुरारिनाशं

सेतोश्च बन्धनमवेक्ष्य परस्य वीर्यम् ।

देवोपदेवमुनयो मुदिता उपेत्य

रामस्य चक्रुरथ तत्र महाभिषेकम्[1] ॥६१॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे द्वितीयः सर्गः ॥

देवोपदेवमुनयः=देवाः,उपदेवाः=गन्धर्वाः,मुनयः च **अम्भोधेः शोषणं**=शुष्कत्वं यस्मात् तत्=**अम्भोधिशोषणम्** । **अशेषसुरारिनाशम्**=अशेषसुरारीणां समुद्रस्थितान्तम् आभीर-जन्मनां नाशः यस्मात् तत्=**अशेषसुरारिनाशम्** । **सेतोः बन्धनं च** बन्धनहेतुं **परस्य** =सर्वोत्तमस्य रामस्य **वीर्यं**=सामर्थ्यम् **अवेक्ष्य**=दृष्ट्वा, **अथ**=अनन्तरं **मुदिताः**=सन्तुष्टाः सन्तः **तत्र**= पर्वते राममुपेत्य, **रामस्य महाभिषेकं**=पुण्याभिषेकं **चक्रुः** ॥६१॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे द्वितीयः सर्गः ॥

आरम्भतः श्लोकाः– ५४+६१=११५

१. अ) **'पुष्पमहाभिषेकम्'** इति मू.श्लो.पा । आ) **'तस्य महाभिषेकम्'** इति प्र.व्या ।

Rarest Archiver

Rarest Archiver

॥ अथ तृतीयः सर्गः ॥

Rarest Archives

॥ अथ तृतीयः सर्गः॥

विधाय व्यूहविस्तारं रामः सुग्रीवसंयुतः ।

शुकमेव मुमोचाथ तं दूतं रावणान्तिकम् ॥१॥

पूर्वसर्गे **'मा घानि दूतं मन्योऽसावित्यूचे सस्मितं प्रभुः'**[१] इत्यत्र रामः कपिभ्यः शुकं मोचितवान् इत्युक्तम् । अनन्तरं शुकं किम् अकरोत्? इत्यत आह– **विधायेति । अथ**= सुवेलाद्रिप्राप्त्यनन्तरं **सुग्रीवसंयुतः रामः व्यूहविस्तारं**=कपीनां समूहस्य विस्तारं, मण्डलाकारेण स्थितत्वं **विधाय**=कृत्वा, **तं**=पूर्वं स्वेन मोचितं **दूतं शुकमेव**=शुकनामक –राक्षसमेव **रावणान्तिकं**=रावणसमीपं **मुमोच**=मोचयामास ॥१॥

कपिभिर्मुष्टिपिष्टाङ्गो लुप्तपक्षस्तथा शुकः ।

जीवन् कथञ्चिद्वृत्तान्तं रावणाय न्यवेदयत् ॥२॥

कपिभिः=वानरैः **मुष्टिपिष्टाङ्गः**=मुष्टिभिः चूर्णिकृतावयवः **तथा लुप्तपक्षः**=छिन्नपक्षः **कथञ्चित्**=अत्यन्तप्रयासेन **जीवन्**=प्राणधारणं कुर्वन्, शुकनाम राक्षसः **रावणाय वृत्तान्तम्**=अम्भोधिशोषणादिव्यापारं **न्यवेदयत्**= ज्ञापयामास ॥२॥

विकत्थनपरः पापो रावणः शुकसारणौ ।

रामसेनां गणयितुं चारौ प्रेषितवान् पुनः[२] ॥३॥

विकत्थनपरः=आभासवचनासक्तः **पापो रावणः रामसेनां गणयितुं**=संख्यानं कर्तुं **चारौ** =गूढपुरुषौ **शुकसारणौ**=तन्नामकराक्षसौ कर्म **पुनः प्रेषितवान्** ॥३॥

कपिरूपधरौ चारौ चरन्तौ राक्षसेश्वरौ[३] ।

इतस्ततो गणयितुम् अयतेतां प्रभोश्चमूम् ॥४॥

---

१. श्रीसं.रा.यु.का.द्वि..स.३४.श्लोकः ।

२. **'प्रेषितवान्दूतम्'** इति मू.श्लो.पा ।

३. **'राक्षसौ च तौ'** इति प्र.व्या । ब.गो. च ।

Rarest Archiver

कपिरूपधरौ रावणस्य **चारौ** रामसेनायाः **इतस्ततः चरन्तौ**=सञ्चारं कुर्वन्तौ **राक्षसेश्वरौ**=शुकसारणौ **प्रभोः**=रामस्य **चमूं**=सेनां **गणयितुं**=संख्यानं कर्तुम् **अयतेतां**=प्रयत्नं चक्रतुः । अयतत अयतेतां अयतन्त । 'यती=प्रयत्ने' लङि प्रथमपुरुषे द्विवचनम् ॥४॥

पारेऽस्मिन् परपारे च सेतावद्रौ वने जले ।

शयितानासितान् यातान् ऐक्षतां तौ कपिव्रजान् ॥५॥

तौ=शुकसारणौ **अस्मिन् पारे**=लङ्कासमीपस्थतटे **परपारे च**=सेतूपक्रमस्थलेऽपि **अद्रौ**=पर्वते **वने जले च शयितान्**=शयनं कुर्वतः **आसितान्**=उपविष्टान् **'अशितान्'** इति पाठे –फलादिभक्षणं कुर्वन्तः **यातान्**=इतस्ततः गच्छतः **कपिव्रजान्**=वानरसमूहान् **ऐक्षतां**=ददृशतुः । 'ईक्ष=दर्शनाङ्कनयोः' लङि प्रथमपुरुषे द्विवचनम् ॥५॥

ज्ञात्वा विभीषणः प्रोचे तौ चोरौ छलवानरौ ।

सुवृत्ताविव दुर्वृत्तौ [१]प्रोत्पतन्तावितस्ततः ॥६॥

विभीषणः चोरौ=तस्करौ अतः एव **छलवानरौ**=कपटवानरवेषौ **दुर्वृत्तौ**=दुष्टाचारवन्तौ अपि **सुवृत्ताविव**=शोभनाचारवन्तौ यथा तथा स्थितौ, **इतस्ततः** तत्र तत्र **प्रोत्पतन्तौ**=सञ्चारं कुर्वन्तौ, प्लवनकुर्वन्तौ वा **तौ**=शुकसारणौ कर्म **ज्ञात्वा**=विदित्वा, वानरान् प्रति एतौ गूढपुरुषौ इति **प्रोचे** ॥६॥

महाबलैर्हन्यमानौ कपिभिः क्रूरविक्रमैः ।

क्षीणप्राणावथाऽक्रन्दं चक्राते तौ जिजीविषू ॥७॥

क्रूरविक्रमैः=भयङ्करपराक्रमैः **महाबलैः कपिभिः हन्यमानौ**=ताड्यमानौ **क्षीणप्राणौ**=नष्ट–चेष्टौ **अथ जिजीविषू**=जीवितुकामौ **तौ**=शुकसारणौ **आक्रन्दम्**=आर्तस्वरं **चक्राते** ॥७॥

रावणस्य चरावावां त्वत्सेनायाः परीक्षकौ ।

बद्धोऽञ्जलिरयं राम क्षमस्व जय धार्मिक ॥८॥

हे राम ! त्वत्सेनायाः परीक्षकौ=संख्यानं कर्तुम् आगतौ **रावणस्य चारौ आवां**=गूढ–

---

१. **'दुर्वृत्तौ प्राप्तवन्तौ'** इति वा.वे ।

Rarest Archiver

पुरुषौ आवाभ्यां तुभ्यम् **अञ्जलिर्बद्धः** । **हे धार्मिक=**धर्मिष्ट ! शत्रून् **जय=**तिरस्कुरु, अस्मद्व्यापारं **क्षमस्व** इति ऊचतुः ॥८॥

इत्युक्त ऊचे भगवान् प्रहसन् शुकसारणौ ।

मा भयं रामभृत्येभ्यो युवयोर्न्यस्तशस्त्रयोः ॥९॥

इति='बद्धाञ्जलिः' इत्यादिप्रकारेण ताभ्याम् **उक्तः भगवान्**=रामः **प्रहसन् न्यस्त–शस्त्रयोः**=परित्यक्तायुधयोः **युवयोः रामभृत्येभ्यः**=कपिभ्यः **भयं**=भीतिः मा अस्तु, इति **शुकसारणौ** कर्म **ऊचे** ॥९॥

संख्यातं चेदिदं सैन्यं गम्यतां स्वामिनोऽन्तिकम् ।

नो चेत् पुनश्च संख्येयं सहायोऽस्तु विभीषणः ॥१०॥

हे शुकसारणौ ! युवाभ्याम् **इदं सैन्यं चेत्**=यदि **संख्यातं**=परिगणितं तर्हि भवद्भ्यां **स्वामिनः**=रावणस्य **अन्तिकं**=समीपं **गम्यतां**=प्राप्यताम् । **चेत्**=यदि **नो संख्यातं** तर्हि **पुनश्च=**पुनरपि **संख्येयं**=संख्यातं कर्तव्यम् । तत्र युवयोः **विभीषणः सहायः**=सहकारी **अस्तु=**भवतु ॥१०॥

अनङ्गबाणक्षुभितं हृदयं रावणस्य तत्[१] **।**

अङ्गवन्तो वयं बाणैर्भेत्स्याम इति चोच्यताम् ॥११॥

हे शुकसारणौ ! **अनङ्गबाणक्षुभितं**=मन्मथकुसुमास्त्रेण लोडितं **रावणस्य तत्**=प्रसिद्धं **हृदयम्, अङ्गवन्तः**=शरीरवन्तः **वयं बाणैः**=अयोमयैः शरैः **भेत्स्यामः**=विदारयिष्यामः **इति=**वचनं **च** रावणसमीपे युवाभ्याम् **'उच्यताम्'** इति ऊचे ॥११॥

एवं रामेण गदिते सुग्रीवः कुपितोऽब्रवीत् ।

[२]**इदं च वचनं वाच्यं भवद्भ्यां स्वामिसन्निधौ ॥१२॥**

एवं=पूर्वोक्तप्रकारेण **रामेण गदिते**=उक्ते सति **कुपितः सुग्रीवः स्वामिसन्निधौ=**रावण–

---

१. **'रावणस्य यत्'** इति ब.गो ।

२. **'इदं मम वचो वाच्यम्'** इति विश्व.ती ।

Rarest Archiver

समीपे **भवद्भ्याम्=**युवाभ्याम् **इदं**=मम वक्ष्यमाणं **वचनं च वाच्यं**=वक्तव्यम्[१]इति **अब्रवीत्** ॥१२॥

बाणबर्हिःपरिस्तीर्णे वानरर्त्विक्समीडिते ।

रावणाख्यपशोर्होमो रामाग्नौ समुपस्थितः ॥१३॥

तत्किम्? इत्यत आह– **बाणेति । बाणबर्हिभिः**=बाणाख्यदर्भैः **परिस्तीर्णे=**परिवेष्टिते **वानरर्त्विक्समीडिते**=वानराख्यैः ऋत्विग्भिः संस्तुते **रामाग्नौ=**रामाख्याग्नौ **रावणाख्यपशोः** =छागस्य **होमः**=प्रक्षेपः **समुपस्थितः**=समीपे प्राप्तः इत्यब्रवीत् ॥१३॥

[२]इत्युक्तौ राक्षसावेतौ निर्मुक्तौ च भयातुरौ ।

प्रासादशिखरारूढं प्राप्य रावणमूचतुः ॥१४॥

इति=पूर्वोक्तप्रकारेण **उक्तौ** सुग्रीवेण **निर्मुक्तौ भयातुरौ**=भयेन आर्तौ **राक्षसावेतौ=**शुक – सारणौ **प्रासादशिखरारूढं रावणं प्राप्य ऊचतुः** ॥१४॥

राघवोऽपि सुवेलाद्रेर्लङ्काभिमुखमाययौ ।

सानुजो मुदितः सार्धम् ऋक्षराक्षसवानरैः ॥१५॥

शुकसारणगमनानन्तरं रामः किम् अकरोत्? इत्यत आह– **राघव** इति । **मुदितः=**सन्तुष्टः **सानुजः राघवः=**रामोऽपि सुवेलाद्रेः अवरुह्य,[३] **ऋक्षराक्षसवानरैः=**जाम्बवद्विभीषणसुग्रीवा –दिभिः **सार्धं लङ्काभिमुखं** यथा तथा **आययौ** ॥१५॥

नीलाङ्गदनलश्वेतकुमुदान् कपियूथपान् ।

पनसं शरभं रम्भं ताववर्णयतां पृथक् ॥१६॥

रावणसमीपं गतौ शुकसारणौ किं चक्रतुः? इत्यत आह– **नीले**ति । **तौ**=शुकसारणौ **नीलादिकपियूथपान् पनसादींश्च पृथक्**=प्रत्येकम् **अवर्णयतां**=स्तुतवन्तौ । लङ् प्रथम–पुरुषे द्विवचनम् ॥१६॥

---

१. **'वाच्यतां'** इति वा.वे ।

२. **'इत्युक्त्वा'** इति दु.कृश्री । प्र.व्या. च ।

३. **'सुवेलाद्रिम्'** इति वा.वे ।

Rarest Archiver

तारं धूम्रं जाम्बवन्तं विनतं कत्थनं तथा ।

केसर्याख्यं शतबलिं प्रमाथिगजपूर्वकान् ॥१७॥

तौ **तारादीन् गजपूर्वकान्** च कपीन् पनसादींश्च[१] **प्रथक् अवर्णयताम्** ॥१७॥

खर्वार्बुदाधिपत्यं च तेषां राज्ञश्च[२] विक्रमम् ।

निगद्य विस्तरेणैव रावणं पुनरूचतुः ॥१८॥

तौ **तेषां**=नीलादीनां **खर्वार्बुदाधिपत्यं**=खर्वार्बुधसंख्याककपिस्वामित्वं **राज्ञः**=सुग्रीवस्य रामस्य **च विक्रमं**=पराक्रमं **विस्तरेणैव**=वचनाधिक्येन एव **निगद्य**=उक्त्वा **रावणं पुनः ऊचतुः** ॥१८॥

प्राहुर्लक्षशतं कोटिं तल्लक्षं शङ्कुनामकम् ।

शङ्कुलक्षं महाशङ्कुं तल्लक्षं वृन्दमुत्तमाः[३] ॥१९॥

उत्तमाः=संख्यास्वरूपं जानन्तः श्रेष्ठपुरुषाः **लक्षशतं कोटिं प्राहुः**=वदन्ति । **तल्लक्षं** =तासां कोटीनां लक्षं, एकलक्षं **शङ्कुनामकं**=संख्याविशेषम् आहुः । **शङ्कुलक्षं**=शङ्कू –नाम् एकलक्षं महाशङ्कुं संख्याविशेषम् **प्राहुः** । **तल्लक्षं**=तेषां महाशङ्कूनाम् एकलक्षं **वृन्दं**=वृन्दनामकं संख्याविशेषं **प्राहुः**=आहुः ॥१९॥

वृन्दलक्षं महावृन्दं तल्लक्षं पद्ममप्युत ।

पद्मलक्षं महापद्मं तल्लक्षं खर्वमभ्यधुः[४] ॥२०॥

उत्तमाः[५] **वृन्दलक्षं**=वृन्दानामेकलक्षं **महावृन्दमभ्यधुः** अवोचन् । **उत**=अनन्तरं **तल्लक्षं** =महावृन्दानामेकलक्षं **पद्मं**=पद्मनामकं संख्याविशेषमपि **अभ्यधुः** । **पद्मलक्षं**=पद्मानाम् एकलक्षं **महापद्मम् अभ्यधुः** । **तल्लक्षं**=महापद्मानाम् एकलक्षं **खर्वं**=खर्वनामकसंख्या– विशेषम् **अभ्यधुः** । धाञो लुङः प्रथमपुरुषे बहुवचनम् ॥२०॥

---

१. **'पनसादींश्च'** इति पूर्वश्लोकेण सह सम्बन्धः इति वा.वे ।

२. **'राज्यं च'** इति प्र.व्या । ब.गो. च ।

३. **'वृन्दनामकम्'** इति मू.श्लो.पा ।

४. **'खर्वमभ्यगुः'** इति मू.श्लो.पा ।

५. पूर्वश्लोकेण चान्वेति ।

Rarest Archiver

खर्वलक्षं महाखर्वं तल्लक्षं धूलिमप्युत ।

धूलिलक्षं महाधूलिं तल्लक्षं हि समुद्रकम् ॥२१॥

खर्वलक्षं=खर्वाणाम् एकलक्षं **महाखर्वम्** अभ्यधुः । **उत**=अनन्तरं **तल्लक्षं**=महाखर्वाणाम् एकलक्षं **धूलिं**=धूलिनामकसंख्याविशेषम् अभ्यधुः । **धूलिलक्षं**=धूलीनामेकलक्षं **महाधूलिम्** अभ्यधुः । **तल्लक्षं**=महाधूलीनाम् एकलक्षं **समुद्रकं**=समुद्रनामकसंख्याविशेषम् अभ्यधुः **हि** । *गणितशास्त्रे प्रसिद्धम् एतत् ॥२१॥

समुद्रलक्षं कवयो महौघं कीर्तयन्ति हि ।

पश्य राजन्निमां संख्याम्[1] अस्मिन् वानरमण्डले[2] ॥२२॥

कवयः=ज्ञानिनः **समुद्रलक्षं**=समुद्राणाम् एकलक्षं **महौघं**=महौघनामकसंख्याविशेषं **कीर्तयन्ति**=वदन्ति हि । **हे राजन्**=रावण ! अस्मिन् पुरतः स्थिते **वानरमण्डले इमां**=पूर्वोक्तां संख्यागणनां **पश्य**=जानीहि ॥२२॥

अवेध्यनामवध्यानां[3] हरीणां वातरंहसाम् ।

हन्त कोटिसहस्रेण तेषां शङ्कुशतेन च ॥२३॥

अस्तु एवं संख्या प्रकृते किम्? इत्यत आह– **अवेध्याना**मिति । विभीषणस्य सखा **विभीषणसखः**=विभीषणस्य मित्रं **ससुग्रीवो रामः अवध्यानां**=हन्तुम् अशक्यानाम् **अवेध्यानां**=भेत्तुम् अशक्यानां **वातरंहसां**=वायुवेगवतां **हरीणां**=कपीनां **कोटिसहस्रेण तेषां**=हरीणां **शङ्कुशतेन च संवृतः**=युक्तः **हन्त** । हर्षेण **विजृम्भते**=प्रकाशते । [4]इत्युत्तरेण संबन्धः ॥२३॥

महावृन्दसहस्रेण तथा पद्मशतेन च ।

महापद्मसहस्रेण तेषां खर्वशतेन च ॥२४॥

तथा तेषां=हरीणां **महावृन्दसहस्रेण तथा, तेषां पद्मशतेन च, तथा तेषां महापद्मसहस्रेण, खर्वशतेन च संवृतः विजृम्भते ॥२४॥**

---

*.अधिकं तु पुठसंख्या–३९.पश्यन्तु । १.**'पश्य सङ्ख्यामिमां राजन्** इति प्र.व्या । २.**'स्वामिन् वानरमण्डले'** इति प्र.व्या । ३. अ)**'अवध्यानामवेध्यानाम्'** इति ब.गो । आ) **'अवध्यनामभेध्यानाम्'** इति प्र.व्या । ४. सं.रा.यु.का.३.सर्गे.२५.श्लोकः ।

Rarest Archiver

तेषां कोटिमहौघेन समुद्रेण च संवृतः ।

रामो विभीषणसखः ससुग्रीवो विजृम्भते ॥२५॥

तेषां=कपीनां **कोटिमहौघेन,** तथा **तेषां समुद्रेण**=समुद्रनामकसंख्याविशेषेण **च संवृत्तः** =युक्तो **रामः विजृम्भते ।** 'जृम्भ=प्रकाशे'[१] लट् ॥२५॥

कपिकोटिमहौघेभ्यो महौघगुणवीर्यवान् ।

एको हनूमान्नो नूनं[२] नाशायालं दशानन ॥२६॥

एवं रामस्य कपिसमूहयुक्तत्वम् उक्त्वा, हनुमतः सामर्थ्यम् आहतुः– **कपीति । हे दशानन ! कपिकोटिमहौघेभ्यः**=कपीनां कोटिमहौघेभ्यः **महौघगुणवीर्यवान्**=महौघ– संख्याकगुणवान् वीर्यवान् च **हनुमानेक** एव **नः=**अस्माकं **नाशाय**=नाशकरणाय **अलं**= समर्थः **नूनं=**निश्चितम् ॥२६॥

रामानुजो लक्ष्मणोऽयं सुग्रीवो वालिनोऽनुजः ।

तेन तर्क्यं तयोर्वीर्यं क्षेमायाशु प्रयत्यताम्[३] ॥२७॥

एवं हनूमतः सामर्थ्यम् उक्त्वा, लक्ष्मणसुग्रीवयोः सामर्थ्यम् ऊहनीयम् इति आहतुः– **रामेति** । येन कारणेन **अयं**=प्रसिद्धः **लक्ष्मणः रामानुजः**=रामस्य अनन्तरं जातः, तथा **सुग्रीवः वालिनोऽनुजः तेन**=लक्ष्मणस्य रामानुजत्वेन, सुग्रीवस्य वाल्यनुजत्वेन च **तयोः**=लक्ष्मणसुग्रीवयोः **वीर्यं=**सामर्थ्यं **तर्क्यम्**=ऊहनीयम् । **क्षेमाय**=कुशलाय त्वया **आशु** =शीघ्रं **प्रयत्यतां**=प्रयत्नः क्रियताम् । 'यती=प्रयत्ने' कर्मणि लोट् ॥२७॥

रामस्त्रिलोकीं संहर्तुम् एक एव किलेश्वरः ।

अलं राजन् विरोधेन दीयतामाशु मैथिली ॥२८॥

अस्त्वेवं कपिसेनायाम् । का वार्ता? इत्यत आहतुः– **राम** इति **। एक एव रामस्त्रिलोकीं** =लोकत्रयं **संहर्तुं=**नाशयितुम् **ईश्वरः**=समर्थः **किल** । तथा वार्ता सम्भावितं चेदं तर्हि

१.'जृभि=गात्रविनामे' इति वै.सि.कौमुदी ।

२.**'एको हनूमान् नूनं नो'** इति मू.श्लो.पा । प्र.व्या । ब.गो. च ।

३.**'विचिन्त्यताम्'** इति मू.श्लो.पा ।

Rarest Archiver

मया किं कर्तव्यम्? इत्यत आहतुः– **अलम्** इति । **हे राजन्**=रावण! राम**विरोधेन अलं** =पूर्णं विरोधः मास्तु इति यावत् । **त्वया मैथिली**=सीता रामाय **आशु दीयताम्** इति आहतुः ॥२८॥

श्रुत्वा तयोरिदं वाक्यं दृष्ट्वा रामचमूं च ताम् ।

रावणोऽतिविषण्णोऽपि मानी तावाक्षिपत् क्रुधा ॥२९॥

मानी=अभिमानवान्, अहङ्कारयुक्त इति यावत् । **रावणः तयोः**=शुकसारणयोः **इदं**= पूर्वोक्तं वाक्यं **श्रुत्वा, तां**=प्रसिद्धां **रामचमूं**=रामसेनां **च दृष्ट्वा, अतिविषण्णः**=अत्यन्त-भीतियुक्तः **अपि क्रुधा**=कोपेन **तौ**=शुकसारणौ कर्म **आक्षिपत्**=वाचा निराकरोत् ॥२९॥

पुनश्च प्रेषितास्तेन चाराः शार्दूलपूर्वकाः ।

वानरैः पीडिता मुक्ताः प्राप्योदन्तं न्यवेदयन् ॥३०॥

तेन=रावणेन **पुनश्च**=पुनरपि **प्रेषिताः**=प्रेरिताः **शार्दूलपूर्वकाः चाराः**=गूढपुरुषाः **वानरैः पीडिताः**=ताडिताः **मुक्ताः**=त्यक्ताः सन्तः रावणं **प्राप्य, उदन्तं**=शुकसारिणा उक्तं वृत्तान्तं **न्यवेदयन्**=ज्ञापयामासुः ॥३०॥

सम्मन्त्र्य मन्त्रिभिः सार्धम्[१] **अशोकवनिकां गतः ।**

मायी स रावणस्तन्वीं रामस्यापायमभ्यधात् ॥३१॥

मायी=कपटी छद्मवान् इति यावत् । **सः**=रावणः **मन्त्रिभिः सार्धं संमन्त्र्य**=आलोच्य, **अशोकवनिकां**=अशोकवनं **गतः**=प्राप्तः सन् **तन्वीं**=सीतां प्रति **रामस्यापायं**=नाशम् **अभ्यधात्** =उवाच । 'धाञ्' धातोः लुङ् ॥३१॥

विद्युज्जिह्वोऽथ मायावी रावणेन प्रचोदितः ।

रामस्येदं शिर इति शिरः किञ्चिदिहाऽनयत् ॥३२॥

अथ=रावणवाक्यानन्तरं **मायावी**=मायावान् **रावणेन प्रचोदितः**=प्रेरितः **विद्युज्जिह्वः**= तन्नामकराक्षसः **इदं शिरः रामस्य** रामसंबन्धीत्युक्त्वा **किञ्चित्**=किमपि **शिरः** कर्म **इह** =सीतासमीपे **आनयत्**=प्रक्षिप्तवान् ॥३२॥

---

१. '**मन्त्रिभिः साकम्**' इति मू.श्लो.पा ।

Rarest Archiver

माययाऽप्यकृतार्थेऽथ रावणे निर्गते वनात् ।

करुणं विलपन्तीं तां सरमोपययौ सतीम् ॥३३॥

मायया=वञ्चनया **अकृतार्थे**=अकृतकृत्ये **रावणे** वनात् **निर्गते सति**[१] **अथ**=अनन्तरं **करुणं** यथा तथा **विलपन्तीं**=प्रलापं कुर्वन्तीं **सतीं तां=**सीतां **सरमा** =विभीषणभार्या **उपययौ**[२]**=**प्राप ॥३३॥

रक्षणाय नियुक्ताऽपि राक्षसेन्द्रेण राक्षसी ।

मायासीतां भक्तियुक्ता विदितार्थेदमब्रवीत् ॥३४॥

राक्षसेन्द्रेण=रावणेन सीता **रक्षणाय नियुक्ता**=प्रेरिता **अपि** सीतायां **भक्तियुक्ता विदितार्था** =ज्ञातप्रमेया[३] **राक्षसी**=सरमा **मायासीतां**=छलजानकीम् **इदं=**वचनम् **अब्रवीत्** ॥३४॥

मा याया रक्षसां भद्रे मायायाः सति सङ्कटम् ।

सबलस्ते सुवेलाद्रौ सबलः क्रीडते पतिः ॥३५॥

हे भद्रे सति=सीते ! **रक्षसां मायायाः** इति पञ्चमी,=कपटात् त्वं **सङ्कटं मा यायाः**=न प्राप्नुहि । यायाः यायातं यायात । 'या=प्रापणे' लिङ् मध्यमपुरुषे एकवचनम् । **सबलः =**बाहुबलसहितः **सबलः**=सर्वसैन्ययुक्तः **ते**=तव **पतिः सुवेलाद्रौ=**सुवेलनामकपर्वते **क्रीडते**=रमते ॥३५॥

चारा वानरनिष्पिष्टाः श्वासमात्रावशेषिणः ।

[४]**रामस्य तद् बलौदार्यं वदन्तो वीक्षिता मया ॥३६॥**

'सुवेलाद्रौ मम पतिः क्रीडते' इति त्वं कथं जानासि? इत्यत आह– **चारा** इति **। वानर –निष्पिष्टाः=**वानरैः ताडिताः **श्वासमात्रावशेषिणः**=उर्वरितश्वाससमात्राः रावणसमीपे **रामस्य तत्**=प्रसिद्धं **बलौदार्यं**=बलाधिक्यं **वदन्तः**=ब्रुवाणाः रावणस्य **चाराः=**गूढपुरुषाः **मया वीक्षिताः**=दृष्टाः इति हेतोः **सङ्कटं मा यायाः** ॥३६॥

---

१. **'अभिगते सति'** इति वावे ।
२. **'उपाययौ'** इति वा.वे ।
३. **'ज्ञातापनेया'** इति वा.वे ।
४. **'रामस्यैतद् बलौदार्यम्'** इति मू.श्लो.पा ।

Rarest Archiver

रावणो बोध्यमानोऽपि मात्रा वृद्धैश्च मन्त्रिभिः ।

न त्वां मुञ्चति रम्भोरु हतो रामेण शेष्यते ॥३७॥

मात्रा=कैकसीनामिकया **वृद्धैश्च मन्त्रिभिरपि** 'सीतां मुञ्च' इति **बोध्यमानः**=प्रेर्यमाणोऽपि **रावणः त्वां न मुञ्चति**=न त्यजति, तर्हि इतः परं किं भविष्यति? इत्यत आह– **हतेति । हे रम्भोरु**=रम्भास्तम्भवद् ऊरुप्रदेशोपेते सीते ! **रामेण हतः** रावणः **शेष्यते**=शयनं करिष्यति, मरिष्यति इति यावत् । 'शीङ्=स्वप्ने' लृट् । यद्यपि शीङः सेट्त्वात् 'शयिष्य –ते' इति वाच्यम् । तथाऽपि 'चिक्रंसया' इत्यादिप्रयोगात् आगमशासनस्य अनित्यत्वात् 'शेष्यते' इत्युक्तम् ॥३७॥

एवमुक्ता सरमया सा रामा मोदमाददे ।

शुश्राव रामसैन्यानां नादं वाद्यस्वनोर्जितम् ॥३८॥

सरमया=विभीषणभार्यया **एवं**=पूर्वोक्तप्रकारेण **उक्ता रामा**=सुन्दरी **सा**=सीता **मोदं**= सन्तोषम् **आददे**=प्राप । **रामसैन्यानां वाद्यस्वनोर्जितं**=वाद्यशब्देन अभिवृद्धं **नादं**=ध्वनिं **शुश्राव**=अशृणोत् ॥३८॥

मातामहो माल्यवांस्तं वृद्धो रावणमब्रवीत् ।

शृणु वत्स हितं वाक्यं विदुषा भाष्यते[१] मया ॥३९॥

सीतावृतान्तम् उक्त्वा, रावणोदन्तम् आह– **मातामह** इति । **वृद्धः**=वयसाऽधिकः रावणस्य **मातामहः**=मातुः पिता **माल्यवान्**=तन्नामकराक्षसः **हे वत्स**=बालक रावण ! **विदुषा**=पूर्वोत्तरज्ञानवता **मया हितं**=कालान्तरे सुखकरं यद् **वाक्यं भाष्यते**=उच्यते तद्वाक्यं **शृणु**=आकार्णय, इति **तं रावणम् अब्रवीत्** ॥३९॥

धर्मपक्षस्थिता देवा वयं चाधर्मपक्षिणः ।

पुरा जयो[२] ह्यधर्मस्य धर्मो विजयतेऽधुना ॥४०॥

तत्किम्? इत्यत आह– **धर्मेति । देवाः**=इन्द्रादयः **धर्मपक्षस्थिताः**=धर्मसहायाः । **वयं**

---

१. **'वाच्यते'** इति मू.श्लो.पा ।

२. **'पराजयो'** इति मू.श्लो.पा । प्र.व्या । विश्व.ती च ।

Rarest Archiver

तु **अधर्मपक्षिणः**=अधर्मसहायाः । **पुरा**=पूर्वम् **अधर्मस्य जयः**=उत्कर्षः । **अधुना धर्मः** =पुण्यम् अधर्मं कर्म **विजयते**=तिरस्करोति । *'विपराभ्यां जेः'*[१] इत्यात्मने पदम् ॥४०॥

पालितो धर्मपक्षोऽयं विष्णुना प्रभविष्णुना ।

मन्ये विष्णुमिमं जातं रामं तेजोभिरीदृशैः ॥४१॥

अस्तु धर्माधर्मयोः स्वरूपम् । ततः किम्? इत्यत आह– **पालिते**ति । **अयं**=प्रसिद्धः **धर्मपक्षः**=धर्मसहायः **प्रभविष्णुना**=समर्थेन **विष्णुना**=हरिणा **पालितः**=रक्षितः । **ईदृशैः**= सेतुबन्धादिभिः **तेजोभिः**=सामर्थ्यैः **इमं रामं** भूमौ **जातं विष्णुं मन्ये**=जानामि ॥४१॥

सन्धीयतां राघवेण दीयतां तात मैथीली ।

इति तेनोदितं श्रुत्वा क्रुद्धः प्रोवाच रावणः ॥४२॥

मया किं कर्तव्यम्? इत्यत आह– **सन्धीयताम**िति । **हे तात**=रावण ! त्वया **राघवेण**= रामेण साकं **सन्धीयतां**=सन्धिः क्रियताम् । धाञः कर्मणि लोट् । *'घुमास्था'*[२] इति ईत्वम् । **मैथिली**=जानकी रामाय **दीयतां**=प्रतिपाद्यताम् **इति तेन**=माल्यवता **उदितम्**=उक्तं वाक्यं **रावणः श्रुत्वा क्रुध्दः** सन् **प्रोवाच** ॥४२॥

नानुरूप इति त्यक्तः पित्रा दीनो वनं गतः ।

जेता किं मानवो रामः क्षुद्रैः शाखामृगैर्वृतः ॥४३॥

'इमं रामं विष्णुं मन्ये' इत्यस्य उत्तरम् आह– **नेति** । **पित्रा**=दशरथेन **अनुरूपः**= अनुकूलो **न** भवति इति **त्यक्तः**=परित्यक्तोऽयं **रामः दीनः**=दैन्योपेतः सन् **वनं गतः क्षुद्रैः**=अल्पैः **शाखामृगैः**=कपिभिः **वृतः मानवः रामः** अस्मान् **जेता किं?**=जेष्यति किं? न जेता । 'जि=जये'[३] लुट् ॥४३॥

एक एव क्षिपेद्रामं जम्भारिस्तम्भनो भुजः ।

भुजैरेकोनविंशद्भिः कृत्यं नैवोपलक्ष्यते ॥४४॥

---

१. अष्टाध्यायी १।३।१९ पा.सूत्रम् ।

२. **'घुमास्थागापाजहातिसां हलि'** इति तु सूत्रम् । अष्टाध्यायी ६।४।६६ पा.सूत्रम् ।

३. 'जि=अभिभवे' इति वै.सि.कौमुदी ।

Rarest Archiver

रावणः रामं दूषयित्वा, स्वसामर्थ्यम् आह– **एकेति** । **जम्भारिस्तम्भनः**=इन्द्रनिरोधकः **एक एव भुजः रामं क्षिपेत्**=निराकुर्यात् 'क्षिपु=निरसने'[१] लिङ् । **एकोनविंशद्भिः** मे **भुजैः कृत्यं**=प्रयोजनं **नैव उपलभ्यते**=न प्राप्यते एव ॥४४॥

मन्त्रैरलमलं हन्त प्रहस्त प्रतिगम्यताम् ।

सन्नह्यतां प्रतिद्वारं स्थीयतां बलिभिर्युधे ॥४५॥

हे प्रहस्त ! मन्त्रैः आलोचनम् अलमलं=पर्याप्तं, पर्याप्तम् । **हन्त** हर्षः त्वया **प्रति–गम्यतां** 'गम्लृ=गतौ' भावे लोट् । **प्रतिद्वारं**=चतुर्षु द्वारेषु **सन्नह्यतां**=युद्धसन्नाहः क्रियतां 'णह=बन्धने' कर्मणि लोट् । भावे वा । **युधे**=युद्धार्थं **बलिभिः**=बलिष्ठैः द्वारेषु **स्थीयतां** =स्थातव्यं 'ष्ठा=गतिनिवृत्तौ' भावे लोट् । इति प्रोवाच ॥४५॥

इति ब्रुवाणमालोक्य राक्षसं पक्षिरूपिणः ।

चारा विभीषणस्याथ विभीषणमुपाययुः ॥४६॥

पक्षिरूपिणः विभीषणस्य चाराः इति='नानुरूपः' इत्यादिप्रकारेण **ब्रुवाणं**=वदन्तं **राक्षसं**= रावणम् **आलोक्य**=दृष्ट्वा, **अथ**=अनन्तरं **विभीषणम् उपाययुः**=प्रापुः ॥४६॥

[२]**अनलानिलसम्पातिहर्याख्यैः सचिवैर्निजैः ।**

उदितं पुरि वृत्तान्तं राममूचे विभीषणः ॥४७॥

विभीषणस्य चाराः के? इत्यत आह– **अनलेति** । अनलः अनिलः सम्पातिः हरि इति आख्या येषां ते, तैः **अनलानीलसम्पातिहर्याख्यैः निजैः**=स्वकीयैः **सचिवैः**=प्रधानिभिः **उदितम्**=उक्तं **पुरि**=लङ्कायां जातं **वृत्तान्तं** 'संमन्त्र्य, मन्त्रिभिः सार्धम् अशोकवनिकां गतः' इत्यादिवार्ताम् **विभीषणः रामम् ऊचे** ॥४७॥

भगवान्श्च प्रतिद्वारं योद्धुं सङ्कल्प्य वानरान् ।

श्वः प्रभाते रणमिति सुवेलमधिरूढवान् ॥४८॥

---

१. 'क्षिप=प्रेरणे' इति वै.सि.कौमुदी ।

२. **'अनलश्च अनिलश्च सम्पातिश्च हरिश्च इति आख्या येषां ते'** इति विश्व.ती पाठः ।

Rarest Archiver

'सन्नह्यतां प्रतिद्वारम्'[१] इति रावणवाक्यश्रवणानन्तरं **भगवांश्च**=रामोऽपि **प्रतिद्वारं योद्धुं वानरान् सङ्कल्प्य**=समर्थ्य, **श्वः**=परेद्युः **प्रभाते=**प्रातःकाले **रणं**=युद्धं कुरुत इत्युक्त्वा, **सुवेलं**=सुवेलाद्रिम् **अधिरूढवान्**=आरुरोह ॥४८॥

ससुग्रीवौ राघवौ तौ हरयः सविभीषणाः ।

उपासत सुवेलाग्रे सूर्यश्चास्तङ्गतस्तदा ॥४९॥

यदा **सुवेलाग्रे**=सुवेलपर्वतस्य उपरि **सविभीषणाः हरयः**=कपयः **ससुग्रीवौ=**सुग्रीवेण – सहितौ **तौ राघवौ**=रामलक्ष्मणौ कर्म **उपासत**=असेवन्त । उपास्त उपासातां उपासत । 'आस=उपवेशने' लङि प्रथमपुरुषे बहुवचनम् । **तदा सूर्यश्च**=सूर्योऽपि **अस्तम्**= अदर्शनं **गतः**=प्राप्तः ॥४९॥

सुग्रीवः सहितः प्रातर्देवेनाऽनन्दमूर्तिना ।

तुङ्गे शृङ्गे त्रिकूटस्य तां लङ्कामथ दृष्टवान् ॥५०॥

अथ=सूर्ये उदिते सति **प्रातः**=प्रातःकाले **आनन्दमूर्तिना**=सुखमयशरीरवता **देवेन**= रामेण **सहितः सुग्रीवः त्रिकूटस्य**=त्रिकूटनामकपर्वतस्य **तुङ्गे=**उन्नते **शृङ्गे**=शिखरे विद्यमानां **तां** =प्रसिद्धां **लङ्कां दृष्टवान्**=ददर्श ॥५०॥

प्राकारगृहहर्म्याढ्यां सर्वसम्पत्समन्विताम् ।

तां दृष्ट्वा विस्मयं भेजे पुरन्दरपुरीमिव ॥५१॥

सुग्रीवः **प्राकारैः**=आवरणैः **गृहैः हर्म्यैः=**प्रासादैः **आढ्यां**=युक्तां **प्राकारगृहहर्म्याढ्यां सर्वसम्पत्समन्वितां तां**=लङ्कां **पुरन्दरपुरीमिव**=देवेन्द्रपुरीमिव स्थितां **दृष्ट्वा, विस्मयम्**= आश्चर्यं **भेजे** =प्राप ॥५१॥

तत्र प्रासादशिखरे चारुचामरवीजितम् ।

रावणं प्रैक्षत कपिः सर्वभूषणभूषितम् ॥५२॥

---

१. श्री.सं.रा.यु.का.३.स.४५.श्लोकः ।

Rarest Archiver

कपिः=सुग्रीवः **तत्र**=लङ्कायां **प्रासादशिखरे**=प्रासादस्य उपरि चारुभ्यां चामराभ्यां वीजितं=**चारुचामरवीजितं सर्वभूषणभूषितम्**=अलङ्कृतं **रावणं प्रैक्षत=**अपश्यत् ॥५२॥

स्वामिनो दारचोरो मे सोऽयमास्ते खलः सुखम् ।

इति संरम्भसम्भिन्नश्चुक्षोभ रविनन्दनः ॥५३॥

रविनन्दनः=सुग्रीवः **मे**=मम **स्वामिनः**=रामस्य **दारचोरः**=स्त्रीयाः अपहारी **खलः**=दुष्टः **सोऽयं=**रावणः **सुखं** यथा तथा **आस्ते=**तिष्ठति **इति**=एवंप्रकारेण **संरम्भसम्भिन्नः** =कोपयुक्तः सन् **चुक्षोभ**=दुःखं प्राप । 'क्षुभ=क्षोभे'[१] लिट् ॥५३॥

मरकतमणिवर्णं मत्तमातङ्गलीलं मधुकरपरिघुष्टां वैजयन्तीं वहन्तम् ।

हरिपरिषदि रामं सस्मितं वीक्षमाणं हरिपतिरथ नत्वा चोदयामास सेनाम् ॥५४॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे तृतीयः सर्गः ॥

अथ=रावणदर्शनानन्तरं **हरिपतिः=**सुग्रीवः **मरतकमणिवर्णं**=मरतकमणिवत् श्यामवर्णं **मत्तमातङ्गलीलं**=मत्तमहागजलीलासदृशलीलायुक्तं **मधुकरपरिघुष्टां=**मधुकरैः=भ्रमरैः कुतू–हलेन आकुलीकृतां **वैजयन्तीं**=मालां **वहन्तं, हरिपरिषदि**=कपिसभायां **वीक्षमाणं सस्मितं**=स्मितेन सहितं **रामं नत्वा,** कपि**सेनां चोदयामास**=युद्धार्थं प्रेरयामास 'चुद= प्रेरणे'[२] लिट् ॥५४॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे तृतीयः सर्गः ॥

आरम्भतः श्लोकाः–११५+५४=१६९

१. 'क्षुभ=सञ्चलने' इति वै.सि.कौमुदी ।
२. 'चुद=सञ्चोदने' इति वै.सि.कौमुदी ।

Rarest Archiver

Rarest Archiver

॥ अथ चतुर्थः सर्गः ॥

Rarest Archiver

॥ अथ चतुर्थः सर्गः ॥

रामानुजो रामनियोगतोऽथ मधूनि मूलानि फलानि चाऽशु ।
यथेष्टमत्र व्यभजत् कपिभ्यो महायुयुत्सोत्सवदर्पवद्भ्यः ॥१॥

अथ=सुग्रीवेण युद्धार्थं कपिसेनाप्रेरणानन्तरं **रामानुजः**=लक्ष्मणः **रामनियोगतः**= रामादेशात् **अत्र**=युद्धकाले, योद्धुम् इच्छा युयुत्सा । युयुत्सा एव उत्सवः । महांश्चासौ युयुत्सोत्सवश्च महायुयुत्सोत्सवः । महायुयुत्सोत्सवे दर्पः महायुयुत्सोत्सवदर्पः । स एषामस्तीति महायुयुत्सोत्सवदर्पवन्तः तेभ्यः **महायुयुत्सोत्सवदर्पवद्भ्यः**=महासन्तोष–रूपदर्पयुक्तेभ्यः इति चतुर्थी बहुवचनम् । [१]यद्वा– महायुयुत्सोत्सवश्च दर्पश्च महायुयुत्सो–त्सवदर्पौ, तौ एषां स्त इति **महायुयुत्सोत्सवदर्पवन्तः तेभ्यः**=कपिभ्यः **मधूनि=** क्षौद्राणि **मूलानि=**कन्दादीनि **फलानि**=नारिकेलपनसफलादीनि आशु **यथेष्टम्**=इष्टम् अनतिक्रम्य, **व्यभजत्**=विभज्य दत्तवान् । 'भज=सेवायां' लङ् ॥१॥

रामोऽथ बाणासनबाणपाणिः सलक्ष्मणो व्यूह्य बलं समस्तम् ।
लङ्कामलङ्कारवतीमवाप प्रस्फारविस्फारविनादिताशः ॥२॥

अथ=मध्वादिदानानन्तरं **प्रस्फारस्य**=धनुषः टङ्कारः तस्य **विस्फारेण**=ध्वनिना **विनादि–ताः=**नादयुक्ताः,प्रतिध्वनियुक्ताः **आशाः**=दिशः यस्य सः **प्रस्फारविस्फारविनादिताशः** । यद्वा **प्रस्फारः**=धनुष्टङ्कार एव **विस्फारः**=ध्वनिः तेन **विनादिताशः** । **सलक्ष्मणः** 'बाणाः अस्यन्ते=क्षिप्यन्ते अनेन इति **बाणासनं**=धनुश्च रामबाणश्च बाणासनबाणौ तौ पाण्योः यस्य सः **बाणासनबाणपाणिः रामः समस्तं बलं=**सेनां **व्यूह्य**=राशीकृत्य, **अलङ्कारवतीं लङ्काम् अवाप=**प्राप ॥२॥

तमन्वगच्छन्नरिमर्दनाय सौमित्रिसुग्रीवविभीषणाश्च ।
ते [२]सत्यमैक्यं प्रययुस्ततो हि तेषां त्रयाणां च विभीषणत्वम् ॥३॥

---

१. **'यद्वा'** इति पक्षान्तर एव वा.वे मातृकायां भागशः लुप्तः ।
२. **'तेचैकमत्यम्'** इति मू.श्लो.पा ।

Rarest Archiver

अरीणां=शत्रूणां राक्षसानां **मर्दनाय**=नाशं कर्तुम् **अरिमर्दनाय सौमित्रिसुग्रीवविभीषणाश्च** =लक्ष्मणादयोऽपि **तं**=रामम् **अन्वगच्छन्**=अनुसृत्य गतवन्तः । **हि**=यस्मात् **ते**=लक्ष्मणा –द्याः त्रयः **ऐक्यम्**=ऐकमत्यम्, एकार्थविषयकबुद्धिमत्त्वं **प्रययुः**=प्रापुः । **ततः तेषाम्** ऐकमत्यस्य प्राप्तत्वात् **त्रयाणां च**=सौमित्रिसुग्रीवविभीषणानाम् अपि **विभीषणत्वं**=शत्रु–भयङ्करत्वं **सत्यं**=याथार्थ्यम् । एतेन ग्रन्थान्तरे– 'त्रय विभीषणाः रामम् अनुजग्मुः' इति वचनस्याभिप्राय उक्तो भवति ॥३॥

हरिप्रबर्हा हनुमत्पुरोगाः शिला विशाला दधतः कराग्रैः ।

अभ्यापतन् राक्षसराजधानीं पक्षक्षयात् प्रागिव पर्वतेन्द्राः ॥४॥

विशालाः=विस्तीर्णाः **शिलाः**=पाषाणान् **कराग्रैः दधतः**=दधानाः *'नाभ्यस्ताच्छतुः'*[१] इति अनुभावम् । **हनुमत्पुरोगाः हरिप्रबर्हाः**=कपिश्रेष्ठाः **पक्षक्षयात्**=इन्द्रेण पक्षनाशात् **प्राक्**=पूर्वं **पर्वतेन्द्राः इव**=सपक्षाः पर्वतश्रेष्ठाः यथा तथा **राक्षसराजधानीं**=रावणपुरीम् **अभ्यापतन्** =प्रापुः ॥४॥

स राजधर्मं भुवनैकराजो रामो विधातुं किल वालिसूनुम् ।

विभीषणस्यानुमतेन दूतं प्रस्थापयामास दशास्यपार्श्वम् ॥५॥

भुवनैकराजः=चतुर्दशलोकानां मुख्यस्वामी **स रामः राजधर्मम्**='अग्रे मार्दवप्रदर्शनं कर्तव्यम्' इति राजनीतिं **विधातुं**=कर्तुं **विभीषणस्य अनुमतेन**=सम्मत्या **वालिसूनुम्**= अङ्गदं **दूतं दशाननस्य पार्श्वं**=समीपं **प्रस्थापयामास**=प्रापयामास **किल**=सम्भावितम् एतत् ॥५॥

अथाङ्गदो वह्निरिव प्रदीप्तः प्राकारमुल्लङ्घ्य पुरं[२] प्रविश्य ।

[३]तन्मन्दिरं सुन्दरमावसन्तं दशाननं मन्त्रपरं ददर्श ॥६॥

अथ=रामाज्ञानन्तरं **वह्निरिव**=वैश्वानरः यथा तथा **प्रदीप्तः**=तेजसा युक्तः **अङ्गदः**= वालिसूनुः **प्राकारं**=लङ्कायाः आवरणम् **उल्लङ्घ्य**=अतिक्रम्य, **पुरं**=लङ्कां **प्रविश्य, तत्**=प्रसिद्धं **सुन्दरं**=मनोहरं **मन्दिरम्**=गृहम् **आवसन्तं** मन्दिरे विद्यमानम् इति यावत् ।

---

१. अष्टाध्यायी ७।१।७८ पा.सूत्रम् ।   २. **'पुरीं प्रविश्य'** इति मू.श्लो.पा ।   ३. **'तं मन्दिरम्'** इति मू.श्लो.पा ।

Rarest Archiver

'उपान्वध्याङ्वसः'[1]इति मन्दिरस्य कर्मत्वम् । **मन्त्रपरम्**=आलोचनासक्तं 'तं मन्दिरम्' इति पाठे **तं**=प्रसिद्धं **दशाननं ददर्श** ॥६॥

[2]विवक्षतो रूक्षमुखस्य किञ्चिद् दशाननस्याङ्गद आबभाषे ।

मां वालिनः सूनुमवैहि राजन् किं सौम्य वाली भवता न बुद्धः[3] ॥७॥

रूक्षमुखस्य=क्रूरमुखस्य **दशाननस्य किञ्चित्**=वचनं **विवक्षतः**=वक्तुम् इच्छतः सत इति *'विषयषष्ठी'* । **अङ्गदः हे राजन्**=दशानन ! **मां वालिनः सूनुं**=वालिपुत्रम् अङ्गदम् **अवैहि**=जानीहि । **हे सौम्य**=शान्त रावण ! **भवता** वाली **न बुद्धः किं**=न ज्ञातः किम् ? इति **आबभाषे** ॥७॥

भ्रूविभ्रमस्तम्भितवारिराशेः सीतापतेर्विद्धि वचोहरं माम् ।

श्रेणीं शराणां विदधाति देवो वाणीमपीमां रुचिरां[4] वृणीहि ॥८॥

तर्हि किमर्थम् अत्रागतः? इत्यत आह– **भ्रूविभ्रमे**ति । **भ्रूविभ्रमेण**=भ्रूचलनमात्रेण **स्तम्भितः**=निरुद्धः **वारिराशिः**=समुद्रः येन तस्य **भ्रूविभ्रमस्तम्भितवारिराशेः सीतापतेः वचोहरं**=दूतं **मां विद्धि** । स **देवः**=रामः **शराणां श्रेणीं**=पङ्क्तिं **विदधाति**=बिभर्ति । **इमां**=वक्ष्यमाणां **वाणीं**=वाचम् **अपि** दधाति=वक्ति । त्वं तयोः मध्ये **रुचिराम्**=इष्टां **श्रेणीं वाणीं** वा **वृणीहि**=वरय । 'वृञ्=वरणे' लोट् मध्यमपुरुषे एकवचनम् ॥८॥

गुरुद्रोहो ब्राह्मणसूदनस्य व्रतच्छिदः सत्यकुलाङ्गनानाम्[5] ।

देवद्विषस्ते फलति प्रवृद्धो नूनं महापातकपादपोऽयम् ॥९॥

वाणी का? इत्यत आह– **गुर्वि**ति । **गुरुद्रुहः**=गुरुद्रोहं कृतवतः **ब्राह्मणसूदनस्य**= ब्राह्मणहिंसकस्य 'सत्याश्च ताः कुलाङ्गनाश्च तासां' **सत्यकुलाङ्गनानां**=सत्य,रक्षो,मनुजा हि दैत्य,गन्धर्व,नारीःसह दानवीभिः इत्युक्तसप्तकुलस्त्रीणां **व्रतछिदः**=पातिव्रत्यनाशकस्य

---

१. अष्टाध्यायी १।४।४८ पा.सूत्रम् ।

२. इतः परं अन्यः श्लोकः प्र.व्या.सं.पाठे पठ्यते–

'सिंहासनस्योपरि तं च दृष्ट्वा तदुन्नते बालवरे निषण्णम् ।

दृष्ट्वा बभाषे दशकन्धरः कपे कः कस्य सूनुः कुत आगतस्त्वम् ॥'

३. **'भवताऽवबुद्धः'** इति मू.श्लो.पा । वा.वे । प्र.व्या च ।

४. **'रुचिताम्'** इति दू.कृ.श्री । ब.गो. च ।

५. अ) **'सप्तकुलाङ्गनानाम्'** इति मू.श्लो.पा । वा.वे च ।
आ) **'सत्कुलजाङ्गनानाम्'** इति ब.गो ।

Rarest Archiver

देवद्विषः=देवशत्रोः **ते**=तव संबन्धी **प्रवृद्धः**=अभिवृद्ध **अयं=**प्रमाणप्रमितः 'महापात–कानि एव पादपः' **महापातकपादपः**=वृक्षः **नूनम्**=ईदानीं **फलति**=फलं ददाति 'फल= निष्पत्तौ' लट् । **नूनं**=निश्चितम् इति वा ॥९॥

अचूचुरस्त्वं महिषीमसार[१] वने परोक्षं पुरुषोत्तमस्य ।

तन्मृष्यते त्वं प्रतिदाय देवीं देवं शरण्यं शरणं व्रजेश्चेत् ॥१०॥

हे असार=दुर्बल रावण! 'सारो बले स्थिरांसे च' इत्यभिधानम् । **त्वं वने=**दण्डकारण्ये **पुरुषोत्तमस्य**=रामस्य **महिषीं**=सीतां **परोक्षं**=रामस्य अप्रत्यक्षं यथा तथा **अचूचुरः**= अपहृतवान् । 'चुर=स्तेये' लुङि मध्यमपुरुषे एकवचनम् । अपहृतवानभूः इति यत् **तत्**=चोरीकरणं **त्वं** रामाय **देवीं**=सीतां **प्रतिदाय=**पुनः दत्त्वा, **शरण्यं**= शरणं प्राप्तुं योग्यं **देवं**=रामं **शरणं**=रक्षणं **चेत्=**यदि **व्रजेः**=प्राप्नुयाः । 'व्रज=गतौ' लिङि मध्यम–पुरुषे एकवचनम् । तर्हि रामेण **मृष्यते**=क्षम्यते 'मृष=तितिक्षायां' कर्मणि लट् आत्मने –पदम् ॥१०॥

नो चेत् प्रियार्थानुपभुङ्क्ष्व शीघ्रं कृत्येषु मा भूत्तव सम्प्रमादः ।

विदारणं दारुणरामबाणैः सम्प्राप्य शीघ्रं ननु शेष्यसे त्वम् ॥११॥

हे रावण ! **चेत्=**यदि त्वया देवी रामाय न दीयते, तर्हि त्वं **शीघ्रं प्रियार्थान्=**प्रीति–विषयान् स्रक्चन्दनवनिताद्यर्थान् **उपभुङ्क्ष्व**=अनुभवस्व । 'भुज=पालनाभ्यवहारयोः' लोटि मध्यमपुरुषे एकवचनम् । **तव कृत्येषु**=कर्तव्येषु **सम्प्रमादः=**अनवधानता **मा भूत्** =न भवेत् । कुतः? इत्यत आह– **विदारणमिति । त्वं दारुणरामबाणैः**=क्रूररामशरैः **विदारणं=**भेदनं, छिन्नत्वमिति यावत् । **सम्प्राप्य=**लब्ध्वा **शीघ्रं शेष्यसे**=रणरङ्गे शयनं करिष्यसि । इति अङ्गद आबभाषे ॥११॥

उक्तं निशम्येति निशाचरेन्द्रः क्रोधारुणाक्षः सचिवानुवाच ।

प्रगृह्यतामाशु निगृह्यतां च शाखामृगो दुर्वचनोऽयमित्थम् ॥१२॥

निशाचरेन्द्रः=रावणः इति **'भ्रूविभ्रम'**[२] इत्यादिप्रकारेण अङ्गदेन **उक्तं**=वचनं **निशम्य**=

---

१. **'महिषीमसारो वने'** इति मू.श्लो.पा । प्र.व्या । ब.गो. च ।

२. श्रीसं.रा.यु.का.४.सर्गे.९.श्लोकः ।

Rarest Archiver

श्रुत्वा **क्रोधारुणाक्षः**=कोपेन रक्तनेत्रः सन् **इत्थं**=पूर्वोक्तप्रकारेण **दुर्वचनः**=दुष्टवाक्यः **अयं**=पुरतः स्थितः **शाखामृगः**=कपिः भवद्भिः **आशु प्रगृह्यताम्**=उपादीयतां, बध्यताम् इति यावत् । तथा **निगृह्यतां च**=निग्रहयुक्तः क्रियताम् । उभयत्रापि 'ग्रह=उपादाने' कर्मणि लोट् । **इति सचिवान् उवाच** ॥१२॥

तमुग्रवेगा जगृहुर्नराशाः स तान् समादाय खमुत्पपात ।

ते तेन मुक्ता भुवि पेतुरार्ताः प्रासादभङ्गं विदधेऽङ्गदोऽथ ॥१३॥

उग्रवेगाः=क्रूरवेगाः **नराशाः**=राक्षसाः **तम्**=अङ्गदं **जगृहुः**=अगृह्णन् । **सः**=अङ्गदः **तान्** =नराशान् **समादाय**=सम्यक् गृहीत्वा, **खम्**=आकाशं प्रति **उत्पपात**=उत्पतितवान् । **तेन**=अङ्गदेन **मुक्ताः**=त्यक्ताः **ते नराशाः आर्ताः**=दुःखिताः सन्तः **भुवि**=भूम्यां **पेतुः**= अपतन् । पपात पेततुः पेतुः । 'पत्ऌ=गतौ' लिट् । **अथ**=राक्षसपतनानन्तरम् **अङ्गदः प्रासादभङ्गं** =हर्म्यनाशं **विदधे**=चकार ॥१३॥

प्रासादभङ्गादथ रावणस्य प्रसादभङ्गो नितरां बभूव ।

प्रसादभङ्गाद् द्विषतो मुकुन्दप्रसादमुन्मेषितवान् हरीन्द्रः ॥१४॥

अथ=अनन्तरं **प्रासादभङ्गात्**=सौधनाशात् **रावणस्य प्रसादभङ्गः**=मनःप्रसन्नतानाशः, दुःखमिति यावत्, **नितराम्**=अत्यन्तं **बभूव** । **हरीन्द्रः**=अङ्गदः **द्विषतो रावणस्य प्रसादभङ्गात्**=मनःप्रसन्नतानाशात् **मुकुन्दप्रसादं**=स्वस्मिन् रामानुग्रहम् **उन्मेषितवान्** =विकसितम् अकरोत् ॥१४॥

दोषेषु तत्र प्रतिजृम्भितेषु[1] द्वाराणि देवो न्यरुणत् पुरस्य ।

आयासनिश्वासपरं पुरं तत् पर्याकुलं मङ्क्षु बभूव शोच्यम् ॥१५॥

तत्र=रावणे **दोषेषु**=महापातकादिषु **प्रतिजृम्भितेषु**=अभिवृद्धेषु सत्सु, फलोन्मुखीभूतेषु सत्सु इति वा **देवः**=रामः **पुरस्य**=लङ्कायाः **द्वाराणि**=प्रतीहारान् **न्यरुणत्**=रुरोध । 'रुधिर् =आवरणे' लङ् । **आयासनिश्वासपरं**=क्लेशनिश्वासयोः आसक्तं **पर्याकुलं**=परितः दुःख –युक्तं **तत्**=लङ्कापुरं **मङ्क्षु**=शीघ्रं **शोच्यं**=शोकार्हं **बभूव** ॥१५॥

१. **'प्रविजृम्भितेषु'** इति मू.श्लो.पा । ब.गो. च ।

Rarest Archiver

महाशिलाशैलनगायुधानाम् अहो[१] महौघैः कपिकुञ्जराणाम् ।
आक्रम्यमाणा नगरी स्थिराऽपि महोदवाहैरिव नौश्चकम्पे ॥१६॥

शिलाः=पाषाणाः **शैलाः**=पर्वताः **नगाः**=वृक्षाः महाशिलाशैलनगा एव आयुधानि येषां ते तेषां **महाशिलाशैलनगायुधानां कपिकुञ्जराणां**=कपिश्रेष्ठानां **महौघैः**=महौघनामक-संख्याविशेषैः **आक्रम्यमाणा**=व्याप्यमाना **स्थिराऽपि=**दृढाऽपि **नगरी=**लङ्का **महोदवाहैः**=महामेघैः,**'महोदवातैः'** इति क्वचित्पाठः । तदा **महोदवातैः=**प्रलयोदककालस्थितवायुभिः इत्यर्थः । **आक्रम्यमाणा नौरिव=**जलयानं यथा तथा **चकम्पे**=चचाल । 'कपि=कम्पने'[२] लिट् । **अहो=**आश्चर्यम् ॥१६॥

समादिदेशाथ दिशि प्रतीच्याम् आयोधनायेन्द्रजितं दशास्यः ।
प्राच्यां प्रहस्तं दिशि वज्रदंष्ट्रं याम्यां स्वयं चागमदुत्तरस्याम् ॥१७॥

अथ=रामेण द्वारनिरोधनानन्तरं **दशास्यः प्रतीच्यां=**पश्चिमायां **दिशि आयोधनाय**=युद्धाय **इन्द्रजितं समादिदेश**=आदिशत् । **प्राच्यां**=पूर्वस्यां **दिशि प्रहस्तं**=प्रहस्तनामकमन्त्रिणं **आयोधनाय दिदेश । याम्यां=**दक्षिणस्यां **दिशि वज्रदंष्ट्रम् आयोधनाय दिदेश । उत्तरस्यां दिशि स्वयं च**=दशाननः स्वयमेव **आगमत्**=प्राप्तः । गमेर्लङ् ॥१७॥

प्रभुः प्रतीच्यां दिशि योधनाय प्रभुं हनूमन्तमथाऽदिदेश ।
प्राच्यां च नीलं दिशि वालिसूनुं याम्यां स्वयं चावसदुत्तरस्याम्[३] ॥१८॥

अथ=रावणाज्ञानन्तरं **प्रभुः**=रामः **प्रतीच्यां=**पश्चिमायां **दिशि योधनाय**=युद्धं कर्तुं **प्रभुं हनूमन्तम् आदिदेश । प्राच्यां**=पूर्वस्यां **दिशि योधनाय नीलं**=कपिम् **आदिदेश । याम्यां =**दक्षिणस्यां **दिशि योधनाय वालिसूनुम्**=अङ्गदम् **आदिदेश । उत्तरस्यां**=दिशि **स्वयं च** =रामः स्वयमेव **अवसत्**=अतिष्ठत् । 'वस=निवासे' लङ् ॥१८॥

नीलानुगामी विविदः समैन्दो गजादयश्चाङ्गदमन्वगच्छन् ।
सम्प्रेक्षको वायुसुतं प्रमाथी तस्थुः परे सूर्यसुतस्य पार्श्वे ॥१९॥

---

१. **'महामहोघैः'** इति मू.श्लो.पा । विश्व.ती च ।
२. 'कपि=चलने' इति वै.क.सि.कौमुद्याम् ।
३. **'चागमदुत्तरस्याम्'** इति प्र.व्या । ब.गो. च ।

Rarest Archiver

समैन्दः=मैन्देन सहितः **विविदः** प्राच्यां **नीलानुगामी=**नीलम् अनुसृतः सन् अगच्छत् । **गजादयः**=कपयः याम्यां दिशि **अङ्गदमन्वगच्छन्** । **प्रमाथी=**प्रमाथिनामवानरयूथपः **संप्रेक्षकः**=वायुसुतस्य अङ्गरक्षकः सन् **वायुसुतमन्वगच्छत्** । **परे=**अन्ये कपयः **सूर्य–सुतस्य**=सुग्रीवस्य **पार्श्वे**=समीपे **तस्थुः=**अतिष्ठन् ॥१९॥

यूथान्विता वानरयूथनाथाः प्रत्येकमुच्चैर्बहुकोटिसंख्याः ।

द्वारेष्ववर्तन्त सुषेणपूर्वाः पुरीं परीयुर्हरिचक्रकल्पाः ॥२०॥

यूथान्विताः=समूहेन युक्ताः **प्रत्येकं**=पृथक् यथा तथा **बहुकोटिसंख्याः=**बहुकोटि–संख्याकाः **वानरयूथनाथाः**=वानरसमूहनायकाः केचन **उच्चैः=**उन्नतेषु **द्वारेषु**=लङ्काद्वारेषु **अवर्तन्त**=अतिष्ठन् । **हरिचक्रकल्पाः**=नारयणसुदर्शनतुल्याः **सुषेणपूर्वाः**=केचन **पुरीं=** लङ्कां **परीयुः=**पर्यावृत्य तस्थुः ॥२०॥

कोव्योऽथ षट्त्रिंशदतिप्रसिद्धा यूथाधिनाथा निजयूथयुक्ताः ।

सुग्रीवमारात् परिवार्य तस्थुः काकुत्स्थयोः पश्चिमतो निषण्णम् ॥२१॥

अथ=अनन्तरं **निजयूथयुक्ताः**=स्वसमूहसहिताः **षट्त्रिंशत्**=षट्त्रिंशत्संख्याकाः **कोव्यः** =कोटयः **अतिप्रसिद्धाः=**अत्यन्तप्रसिद्धाः **यूथाधिनाथाः**=यूथस्वामिनः **काकुत्स्थयोः=** रामलक्ष्मणयोः **पश्चिमतः=**पृष्ठभागे **निषण्णं**=स्थितं **सुग्रीवं परिवार्य**=परिवृत्य, **आरात्=** समीपे **तस्थुः**=अतिष्ठन् ॥२१॥

प्राकारमध्यारुरुहुः कपीन्द्राः प्रासादमन्येऽथ परे गृहाणि ।

अन्येऽवकाशानवलोक्य पूर्णान् आकाशमापूरितवन्त आशु ॥२२॥

केचित् **कपीन्द्राः प्राकारं**=लङ्कावरणम् **अध्यारुरुहुः=**आरूढाः । **अन्ये प्रासादं=**सौधम् **आरुरुहुः । अथ परे गृहाणि आरुरुहुः** । पुनः **अन्ये पूर्णान्**=कपिभिः पूरितान् **अवका–शान्** स्थलानि **अवलोक्य, आकाशम्**=अन्तरिक्षम् **आशु आपूरितवन्तः**=अपूरयन् ॥२२॥

पुनस्त्रिकूटाद्रितटेषु पूर्णाः सुवेलशैलं परिपूरयन्तः ।

व्याप्ता महाब्धेश्च तटे कपीन्द्रा निशाचराणां विदधुर्विषादम् ॥२३॥

Rarest Archiver

पुनश्च=पुनरपि केचन **त्रिकूटाद्रितटेषु**=त्रिकूटपर्वतस्य उपरिभागेषु **पूर्णाः**=व्याप्ताः **सुवेल –शैलं**=सुवेलाद्रिं **परिपूरयन्तः**=पूर्णं कुर्वन्तः **महाब्धेः**=समुद्रस्य **तटे च**=तीरेऽपि **व्याप्ताः पूर्णाः** कपीन्द्राः **निशाचराणां विषादं भयं विदधुः**=चक्रुः । विदधौ विदधतुः विदधुः । धाञो लिट् ॥२३॥

केचिद्गजानां शततुल्यवीर्याः सहस्रवीर्या अपि लक्षवीर्याः ।

समुद्रवीर्याश्च महौघवीर्याः केचिन्महान्तोऽपरिमेयवीर्याः ॥२४॥

केचित्=कपयः **गजानां शततुल्यवीर्याः**=शतसदृशपराक्रमाः आसन् । **केचित् गजानां सहस्रवीर्याः,** अपरे **गजानां लक्षवीर्याः अपि** आसन् । अन्ये **गजानां समुद्रवीर्याः** =समुद्रनामकसंख्याविशेषयुक्तगजतुल्यवीर्याः, **केचित् गजानां महौघवीर्याः=**महौघसदृश –वीर्याः, **केचित् महान्तः**=पूज्याः **अपरिमेयवीर्याः=**ज्ञातुमशक्यपराक्रमाः आसन् ॥२४॥

ऋक्षाश्च रूक्षा बहुकोटयो गोलाङ्गूलकोव्यश्च कटुस्वभावाः ।

पृथक् पृथक् पर्वतसन्निभाङ्गा भङ्गं निनीषन्ति पुरा परांस्ते[१] **॥२५॥**

ऋक्षाः=क्रूराः **बहुकोटयः**=बहुकोटिसंख्याकाः **रूक्षाश्च**=भल्लूका अपि **कटुस्वभावाः=** क्रूरस्वभावाः **गोलाङ्गूलम् गोः** इव **लाङ्गूलं**=पुच्छं येषां ते **गोलाङ्गूलाः** कृष्णमुखाः, शुक्लशरीराः तेषां **कोव्यश्च गोलाङ्गूलकोट्योऽपि पर्वतसन्निभाङ्गाः**=पर्वतसदृशदेहाः **ते** =ऋक्षादयः **परान्**=शत्रून् **पृथक् पृथक्**=प्रत्येकं प्रत्येकं **भङ्गं=**नाशं **निनीषन्ति पुरा** नेतुं=प्रापयितुम् ऐच्छन् । *'पुरा योगे भूते लट्'* ॥२५॥

विश्वेशितुः कार्मुकबाणपाणेरेकत्र पार्श्वेऽवरजो[२] **रराज ।**

अन्यत्र चित्राङ्गदवान् गदावान् विभीषणः शत्रुविभीषणोऽभूत् ॥२६॥

कार्मुकबाणौ पाण्योः यस्य तस्य=**कार्मुकबाणपाणेः विश्वेशितुः**=रामस्य **एकत्र पार्श्वे अवरजः**=लक्ष्मणः **रराज**=दीप्तोऽभूत् । **अन्यत्र पार्श्वे चित्राङ्गदवान्**=विचित्रबाहुभूषण–युक्तः **गदावान् विभीषणः शत्रुविभीषणः**=शत्रूणां भयङ्करः **अभूत्**=स्थितोऽभूत् ॥२६॥

१. अ) **'पुरा परांश्च'** इति प्र.व्या । आ) **'पुरा विपक्षान्** इति ब.गो ।
२. **'पार्श्वे रविजो रराज'** इति प्र.व्या ।

Rarest Archiver

दन्तान् नखानप्यशनिप्रकाशान् प्रकाशयन्तः प्रतिघारुणाक्षाः ।

तुच्छेतरं पुच्छमथो क्षिपन्तः तिर्यङ् निरैक्षन्त रिपून् कपीन्द्राः ॥२७॥

अशनिप्रकाशान्=वज्रसदृशान् **दन्तान्**=नखान् अपि **प्रकाशयन्तः**=प्रदर्शयन्तः **प्रतिघा – रुणाक्षाः प्रतिघेन**=कोपेन **अरुणाक्षाः**=रक्तनेत्राः **कपीन्द्राः तुच्छेतरं**=महत् **पुच्छं क्षिपन्तः**=निरस्यन्तः सन्तः, **अथ**=अनन्तरं **रिपून्**=राक्षसान् **तिर्यक्=**वक्रदृष्ट्या **निरैक्षन्त** =अपश्यन् ॥२७॥

यन्त्राण्यकृन्तन् परिखा अपूरयन् वप्राण्यभिन्दंश्च वनान्यखण्डयन् ।

प्रासादमालाः सकला असादयन् युद्धोद्धताः कोसलनाथकिङ्कराः ॥२८॥

युद्धोद्धताः=युद्धे दर्पवन्तः **कोसलनाथकिङ्कराः**=रामभृत्याः **यन्त्राणि**=अयोविकारभाण्डानि **अकृन्तन्**=चिच्छिदुः । 'कृती=छेदने' लङ् । परितः खाताः **परिखाः**=प्राकारबहिर्भागे विद्यमानजलाशयान् **अपूरयन्**=पाषाणादिभिः पूरितवन्तः, **वप्राणि**=प्राकारान् **अभिन्दन्=** विदारितवन्तः । 'भिदिर्=विदारणे' लङ् । **वनानि अखण्डयन्**=चिच्छिदुः । **सकलाः प्रासादमालाः**=सौधपङ्क्तीः **असादयन्**=अनाशयन् । 'षद्लृ=विशरणगत्यवसादनेषु' णिजन्तात् लङ् ॥२८॥

अन्योन्यतः पाणिपुटावपीडयन्नताडयन् स्वोरुमथ प्लवङ्गमाः ।

साटोपमास्फोट्य गभीरनिस्वना उच्चैरुदारामपि[1] गामुदाहरन् ॥२९॥

अथ=अनन्तरं **प्लवङ्गमाः अन्योन्यतः**=परस्परं **पाणिपुटौ=**पाणितले **अपीडयन्=**पीडित –वन्तः । **स्वोरुं**=स्वेषाम् ऊरुम् **अताडयन्**=हस्तेन स्फालितवन्तः । **अथ गम्भीरस्वनाः =**गम्भीरध्वनयः कपयः **साटोपं**=ससम्भ्रमं यथा तथा **आस्फोट्य**=हस्तेन भुजास्फालनं कृत्वा, **उदाराम्**=उत्कृष्टां **गां=**वाचम् अपि **उच्चैः**=उन्नतध्वनिना **उदाहरन्**=ऊचुः ॥२९॥

जयति जगति रामो रावणक्रोष्टुसिंहो जयति ननु हनूमान् रामपादाब्जभृङ्गः ।

जयति जगदधीशस्यानुजो लक्ष्मणोऽयं जयति रवितनूजः सार्धमृद्धैः स्वसैन्यैः[2] ॥३०॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे चतुर्थः सर्गः ॥

---

१. **'उच्चैरुदारामिति'** इति ब.गो ।

२. **'मृद्धैश्च सैन्यश्च'** इति प्र.व्या ।

Rarest Archiver

रावणक्रोष्टुसिंहः=रावणाख्यजम्बुकहनने सिंहसदृशः **रामः जगति**=लोके **जयति=** उत्कृष्टः वर्तते । **रामपादाब्जभृङ्गः हनूमान् जयति ननु**=निश्चितम् । **जगदधीशस्य**=जगन्मुख्यस्वामिनः रामस्य **अनुजः अयं**=प्रसिद्धः **लक्ष्मणः जयति** । **रवितनूजः**=सुग्रीवः **ऋद्धैः**=अभिवृद्धैः **स्वसैन्यैः**=स्वसेनाभिः **सार्धं**=साकं **जयति । इति गामुदाहरन्**[१] ॥३०॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे चतुर्थः सर्गः ॥

आरम्भतः श्लोकाः–१६९+३०=१९९

१. इति पूर्वश्लोकेन अन्वयः ।

Rarest Archiver

Rarest Archiver

॥ अथ पञ्चमः सर्गः ॥

Rarest Archiver

॥ अथ पञ्चमः सर्गः ॥

कोपाटोपं कपीन्द्राणां वीर्यौदार्यं च सर्वशः[१] ।

दृष्ट्वा मुहूर्तं दध्यौ स रावणो लोकरावणः ॥१॥

लोकान् रावति=कूजयति इति **लोकरावणः स रावणः सर्वशः**=सर्वेषां **कपीन्द्राणां कोपाटोपं**=कोपाधिक्यं **वीर्यौदार्यं**=पराक्रमाधिक्यं **च दृष्ट्वा, मुहूर्तं**=मुहूर्तकालं **दध्यौ** =चिन्तयामास ॥१॥

धैर्यमालम्ब्य सङ्क्रुद्ध उत्तिष्ठन् हेमपीठतः ।

प्रबलं राक्षसबलं नगरान्निरयापयत्[२] ॥२॥

धैर्यं=मनः स्थिरत्वम् **आलम्ब्य**=आश्रित्य, **क्रुद्धः**=स रावणः **हेमपीठतः**=सुवर्णपीठतः **उत्तिष्ठन्** सन् **प्रबलं**=प्रकृष्टशक्त्युपेतं **राक्षसबलं**=राक्षससेनां **नगरात् निरयापयत्**=बहिः गमयामास । 'या=प्रापणे' णिजन्तात् लङ् ॥२॥

नानायुधधरा वीरा राक्षसा रणकोविदाः ।

प्रत्येकं प्रत्यगच्छंस्ते कपीन् कम्पितपादपान् ॥३॥

रणकोविदाः=युद्धकुशलाः **नानायुधधराः**=नानायुधानि बिभ्राणाः **वीराः ते**=रावणप्रेरिताः **राक्षसाः कम्पितपादपान्**=चालितवृक्षहस्तान् **कपीन् प्रति प्रत्येकं** यथा तथा**अगच्छन्** ॥३

रामरावणभृत्यानां द्वन्द्वयुद्धमभून्मिथः ।

तीव्राणां पुण्यपापानां यथैव पुरसन्निधौ ॥४॥

तीव्राणां=तीक्ष्णानां **पुण्यपापानां**=पुण्यपापाभिमानिनां **पुरसन्निधौ**=देहसन्निधौ **यथैव**=येन प्रकारेण **द्वन्द्वयुद्धं** भवति, तथा **रामरावणभृत्यानां मिथः**=परस्परं **द्वन्द्वयुद्धं**=द्विषो द्विषः युद्धम् **अभूत्** ॥४॥

---

१. **'वीर्यौदार्यं च शार्ङ्गिणः'** इति मू.श्लो.पा । प्र.व्या । ब.गो. च ।

२. **'निरयातयत्'** इति वा.वे ।

Rarest Archiver

मुख्यप्राणसुतो मुख्यो युयोधेन्द्रजिता भृशम्[1] ।

परादवत् तद्बलज्ञो हस्तप्राप्त इवेन्द्रजित् ॥५॥

द्वन्द्वयुद्धम् एव आह– **मुख्येति । मुख्यप्राणसुतः मुख्यः**=प्रधानः हनूमान् **इन्द्रजिता** सह **भृशं युयोध । हस्तप्राप्त इव**=हनूमता हस्तगृहीत इव स्थितः **तद्बलज्ञः**=हनुमद्बलं जानन् **इन्द्रजित् परादवत्**=प्रदुद्राव ॥५॥

सम्पातिने प्रजङ्घोऽथ बाणांस्त्रीन् मुक्तवान् रणे ।

आश्वेव सोऽश्वकर्णेन प्रजङ्घं निजघान च ॥६॥

अथ=इन्द्रजित्परादवणानन्तरं **प्रजङ्घः**=तन्नामकराक्षसः **सम्पातिने**=कपये **रणे**=युद्धे **त्रीन् बाणान् मुक्तवान्**=मुमोच । सम्पातिः कपिः **अश्वकर्णेन**=तन्नामकवृक्षविशेषेण **आश्वेव**=शीघ्रम् एव **प्रजङ्घं**=राक्षसं **निजघान च**=अवधीत् एव ॥६॥

मुमोच लोहजां शक्तिं जम्बुमाली हनूमते ।

हनूमत्तलचूर्णाङ्गो मुमोचाथ शरीरजाम् ॥७॥

जम्बुमाली=प्रहस्तपुत्रात् अन्यः राक्षसः **हनूमते लोहजां**=लोहेन जन्यां **शक्तिम्**=आयुधविशेषं **मुमोच । अथ**=अनन्तरं **हनूमत्तलचूर्णाङ्गः जम्बुमाली शरीरजां शक्तिं**=सामर्थ्यं **मुमोच** । ममार इत्यर्थः ॥७॥

नलः प्रतपनस्योग्रः[2] पातयामास चक्षुषी ।

गजोऽद्रिशृङ्गमुष्टिभ्यां तापनं निरपातयत् ॥८॥

उग्रः=क्रूरः **नलः** कपिः **प्रतपनस्य** राक्षसस्य **चक्षुषी** कर्म मुष्टिघातेन **पातयामास**=पातितवान् । **गजः** कपिः **अद्रिशृङ्गमुष्टिभ्यां**=पर्वतशृङ्गमुष्टिप्रहाराभ्यां **तापनं**=तन्नामक–राक्षसं **निरपातयत्**=नाशयामास ॥८॥

मित्रघ्नेन शरैर्विद्धस्तं जघान विभीषणः ।

शरवर्षं विरूपाक्षं शरेणैव च लक्ष्मणः ॥९॥

---

१. **'समम्'** इति मू.श्लो.पा ।

२. **'प्रकम्पनस्योग्रः'** इति मू.श्लो.पा ।

Rarest Archiver

मित्रघ्नेन=राक्षसेन कर्त्रा **शरैः=**करणैः **विद्धः**=ताडितः **विभीषणः तं**=मित्रघ्नं **जघान**=हिंसितवान् । लक्ष्मणः शरवर्षम् अस्य अस्ति इति **शरवर्षं**=बाणवर्षयुक्तं **विरूपाक्षं =**राक्षसं **शरेणैव जघान** ॥९॥

प्रहस्तं सप्तपर्णेन सुग्रीवो न्यहनद् बली ।

मैन्दस्य मुष्टिनिष्पिष्टो वज्रमुष्टिरुतापतत् ॥१०॥

बली=बलवान् **सुग्रीवः प्रहस्तं=**रावणसचिवाद् अन्यं राक्षसं **सप्तपर्णेन**=वृक्षविशेषेण **न्यहनत्**=नाशयामास । **मैन्दस्य**=कपेः **मुष्टिनिष्पिष्टः**=मुष्टिना चूर्णीकृतः **वज्रमुष्टिः**=राक्षसः **उत**=अनन्तरम् **अपतत्**=ममार ॥१०॥

निकुम्भेन शरैर्विद्धो नीलो नीलाञ्जनप्रभः ।

तस्यैव रथचक्रेण निकुम्भस्याहरच्छिरः ॥११॥

नीलाञ्जनप्रभः=नीलाञ्जनकान्तिः **नीलः**=कपिः **निकुम्भेन**=कुम्भकर्णपुत्राद् अन्येन निकुम्भनामकेन राक्षसेन **शरैः विद्धः**=ताडितः सन् **तस्य**=निकुम्भस्य **रथचक्रेणैव निकुम्भस्य शिरः** कर्म **अहरत्**=अच्छिनत् ॥११॥

शरानशनिसङ्काशान् किरन्तमशनिप्रभम् ।

विदग्धो विविदस्तत्र सालेन न्यहनद् रणे ॥१२॥

तत्र=युद्धकाले **विदग्धः**=कुशलः **विविदः=**कपिः **अशनिसङ्काशान्=**दम्भोलितुल्यान्, वज्रसदृशान् इति यावत् । 'दम्भोलिरशनिर्द्वयोः'[१] इत्यमरः । **शरान्**=बाणान् **किरन्तं=**विक्षिपन्तम् **अशनिप्रभं** राक्षसं **रणे सालेन**=सालवृक्षेण **न्यहनत्**=जघान ॥१२॥

सुषेणोऽथ रथं भित्त्वा विद्युन्मालिनमाहवे ।

गदया ताडितस्तेन शिलया तममारयत् ॥१३॥

अथ=अनन्तरं **तेन**=विद्युन्मालिना राक्षसेन **गदया ताडितः**=विद्धः **सुषेणः**=कपिः **शिलया** तस्य **रथं भित्त्वा**=विदार्य, **आहवे=**युद्धे **तं**=प्रसिद्धं **विद्युन्मालिनं** राक्षसम् **अमारयत्**=प्राणत्यागयुक्तम् अकरोत् ॥१३॥

---

१. अ.कोशे.१.काण्डे.स्वर्गवर्गे५५.श्लोकः ।

Rarest Archiver

अन्यैश्च वानरैर्वीरै राक्षसा विविधायुधाः ।

नखदन्तायुधैर्भग्नाः शिलासालायुधैरपि ॥१४॥

द्वन्द्वयुद्धम् उक्त्वा उपसंहरति– **अन्यैरिति । वीरैः अन्यैश्च वानरैः विविधायुधाः राक्षसाः नखदन्तायुधैः शिलासालायुधैरपि भग्नाः**=मर्दिताः, नाशिताः इत्यर्थः ॥१४॥

अथ रात्रिचरैस्तेषां रात्रियुद्धमवर्तत ।

यत्र सुस्रुवुरत्युष्णा बहवः शोणितापगाः ॥१५॥

अथ=सायङ्कालानन्तरं **तेषां**=कपीनां **रात्रिचरैः**=राक्षसैः साकं **रात्रियुद्धम् अवर्तत**= अभूत् । **यत्र**=रात्रियुद्धे **अत्युष्णाः**=अत्यन्तोष्णस्पर्शोपेताः **बहवः**=अनेकाः **शोणितापगाः** =रक्तनद्यः **सुस्रुवुः=**अगमन् । 'स्रु=गतौ' लिट् ॥१५॥

चापहस्त प्रहस्त त्वं स्वस्ति द्रावय तान् कपीन् ।

मानवौसूदयेत्यूचे *प्रहस्तं स दशाननः ॥१६॥

हे चापहस्त=धनुष्पाणे ! **हे प्रहस्त=**सचिव ! ते **स्वस्ति**=अस्तु । **त्वं तान्**=प्रसिद्धान् **कपीन् द्रावय**=पुरात् निर्गमय । **मानवौ**=रामलक्ष्मणौ कर्म **सूदय**=नाशय **इति दशाननः प्रहस्तम् ऊचे** ॥१६॥

रामेण युद्धं विपदे सन्धानं सम्पदे प्रभो ।

आस्तां हि मन्त्रो योत्स्याम[१] इति मन्त्री तमब्रवीत् ॥१७॥

हे प्रभो=रावण **! रामेण** साकं **युद्धं विपदे=**अनर्थाय भवति, **रामेण सन्धानं**=सन्धिः **सम्पदे**=श्रेयसे भवति, इति वृद्धैः उच्यमानः **मन्त्रः**=आलोचनम् **आस्तां=**तिष्ठतु । 'आस =उपवेशने' लोट् । वयं **योत्स्यामः=**शत्रून् प्रहरिष्यामः । 'युध=सम्प्रहरे' लृट् । **इति** =एवं प्रकारेण **मन्त्री**=प्रहस्तः **तं**=रावणम् **अब्रवीत्** ॥१७॥

प्रहस्तो रथमारुह्य प्राच्यद्वारेण निर्ययौ ।

उत्पातान् मृतिदान् पश्यन् वृतो विपुलसेनया ॥१८॥

---

* **'प्रहस्तं तं दशाननः'** इति ब.गो । विश्व.ती च ।

१. **'योत्स्यामि'** इति प्र.व्या ।

Rarest Archiver

विपुलसेनया=बहुलसेनया **वृतः**=युक्तः **प्रहस्तः रथमारुह्य, मृतिदान्**=मरणसूचकान् **उत्पातान्**=दुश्शकुनानि[१] **पश्यन्** अपि तान् अनादृत्य, **प्राच्यद्वारेण**=पूर्वद्वारेण **निर्ययौ**= बहिः निर्गतः ॥१८॥

युद्धं प्रवृद्धमत्रासीद् वानराणां नराशिभिः ।

बलिष्ठं हतभूयिष्ठं वानरै रक्षसां बलम् ॥१९॥

अत्र=प्रहस्तागमनसमये **वानराणां नराशिभिः**=राक्षसैः सार्धं **प्रवृद्धम्**=अभिवृद्धं **युद्धम् आसीत्** । **बलिष्ठम्**=अतिशयेन बलोपेतं **रक्षसां बलं**=सैन्यं **वानरैः हतभूयिष्ठं**=नाशित–बाहुल्योपेतम्[२] **आसीत्** ॥१९॥

[३]अद्रावयन् कपीन् वीराः[४] प्रहस्तसचिवास्तदा ।

अभ्यधावन्नतिकृद्धा विविदाद्याः क्षणेन तान् ॥२०॥

अथ=स्वबलनाशानन्तरं **वीराः प्रहस्तसचिवाः**=प्रहस्तमन्त्रिणः **कपीन्** यदा **अद्रावयन्**= द्रावयामासुः, **तदा अतिक्रुद्धाः विविदाद्याः क्षणेन तान्**=प्रहस्तसचिवान् **अभ्यधावन्**= शीघ्रं प्राप्ताः ॥२०॥

विविदो गिरिशृङ्गेण धुरन्धरममारयत् ।

समुन्नतेन वृक्षेण दुर्मुखश्च[५] समुन्नतम् ॥२१॥

विविदः=कपिः **गिरिशृङ्गेण धुरन्धरं**=तन्नामकराक्षसम् **अमारयत्**=गतप्राणम् अकरोत् । **दुर्मुखश्च**=कपिः **समुन्नतेन**=अत्यन्तोन्नतेन **वृक्षेण समुन्नतं**=समुन्नतनामकं राक्षसम् **अमारयत्** ॥२१॥

सूदयामास शिलया महानादं च जाम्बवान् ।

तलेन तरसा तारो निन्ये कुम्भहनुं क्षयम् ॥२२॥

जाम्बवान् शिलया महानादं सूदयामास=नाशयामास । **तारः**=कपिः **तरसा**=वेगेन तल – प्रहारेण **कुम्भहनुं** राक्षसं **क्षयं**=नाशं **निन्ये**=प्रापयामास । *द्विकर्मकत्वम्* ॥२२॥

---

१. **'अपशकुनानि'** इति ब.गो ।
२. **'नाशितबहुलोपेतम्'** इति दू.कृ.श्री ।
३. **'व्यद्रावयन्'** इति मू.श्लो.पा । दू.कृ.श्री च ।
४. अ) **'कपीन् शूराः'** इति मू.श्लो.पा ।
आ) **'कपीन् क्रूराः'** इति ब.गो ।
५. **'दुर्मुखं च'** इति प्र.व्या ।

Rarest Archiver

चापहस्तः प्रहस्तोऽथ ववर्षामर्षितः शरान् ।

शरीराणि कपीन्द्राणाम् उदारोऽदारयन् मुहुः ॥२३॥

अथ=स्वसैन्यनाशानन्तरं **अमर्षितः**=कुपितः **चापहस्तः प्रहस्तः** मन्त्री **शरान् ववर्ष**=अकिरत् । 'वृष=सेचने' लिट् । **उदारः प्रहस्तः कपीन्द्राणां शरीराणि मुहुः**=पुनः **अदारयत्=**विददार । 'दॄ=विदारणे' लङ् ॥२३॥

सेनानीरथ सेनान्यं प्रहस्तं नील आपतत् ।

प्रहस्तेन शरैर्विद्धस्तरुणा तमताडयत् ॥२४॥

अथ सेनानीः=कपिसेनानायकः **नीलः सेनान्यं**=राक्षससेनानायकं **प्रहस्तं=**राक्षसम् **आपतत्=**प्राप । **प्रहस्तेन शरैः विद्धः**=ताडितः **नीलः तरुणा**=वृक्षेण **तं**=प्रहस्तम् **अताडयत्=**तताड ॥२४॥

नीलो निमीलिताक्षोऽरेः[१] शरवर्षसहो बली[२] ।

सालेनास्य जघानाश्वान् मुसली सोऽत्यजद्रथम् ॥२५॥

बली=बलवान् **अरेः=**शत्रोः प्रहस्तस्य **शरवर्षसहः**=बाणवृष्टिं सहमानः **निमीलिताक्षः=**मुकुलितनेत्रः**नीलः** प्रहस्तरथमासाद्य, **सालेन** वृक्षेण **अस्य**=प्रहस्तस्य **अश्वान् जघान** । **मुसली**=मुसलवान् **सः**=प्रहस्तः **रथम् अत्यजत्**=जहौ । 'त्यज=हानौ' लङ् ॥ २५॥

शिरो बिभेद नीलस्य प्रहस्तो मुसलेन सः ।

तरुणाऽताडयन्नीलः प्रहस्तोऽभ्यपतत्[३] पुनः ॥२६॥

स प्रहस्तः मुसलेन नीलस्य शिरो बिभेद=विददार । **नीलः** अपि प्रहस्तं **तरुणा अताडयत्** । **प्रहस्तः** अपि **पुनः** नीलम् **अभ्यपतत्=**प्राप ॥२६॥

ज्ञात्वा तं नीलदुर्द्धर्षं शक्तिं प्रास्यद् विभीषणः ।

नीलः शिलां प्रहस्ताय ताभ्यां भग्नो ममार सः ॥२७॥

---

१. **'निमीलिताक्षोऽथ'** इति ब.गो । २. **'शरवर्षासहो बली'** इति प्र.व्या ।
३. **'अभ्यापतत्'** इति मू.श्लो.पा । ब.गो. च ।

Rarest Archiver

विभीषणः तं=प्रहस्तं **नीलदुर्द्धर्षं**=नीलेन धर्षयितुं जेतुम् अशक्यं **ज्ञात्वा, प्रहस्ताय शक्तिम्**=आयुधविशेषं **प्रास्यत्**=प्राक्षिपत् । 'असु=क्षेपणे' लङ् । **नीलः प्रहस्ताय शिलां प्रास्यत्** । **ताभ्यां**=शक्तिशिलाभ्यां **भग्नः**=मर्दितः **सः**=प्रहस्तः **ममार**=प्राणांस्तत्याज । 'मृङ्=प्राणत्यागे' लिट् ॥२७॥

प्रहस्ते निहते तस्मिन् राक्षसेन्द्रनियोगतः ।

वज्रदंष्ट्रो ययौ योद्धुं ससैन्यो दक्षिणां दिशम् ॥२८॥

तस्मिन्=प्रसिद्धे **प्रहस्ते**=मन्त्रिणि **निहते**=मृते सति **राक्षसेन्द्रनियोगतः**=रावणादेशात् **ससैन्यः**=वज्रदंष्ट्रः राक्षसः **योद्धुं**=युद्धं कर्तुं **दक्षिणां दिशं ययौ** ॥२८॥

निशाचरचमूं भीमां विविधायुधधारिणीम् ।

शैलैः सालैर्नखैश्चोग्रा कपिसेना न्यसूदयत् ॥२९॥

भीमाम्=भयङ्करां **विविधायुधधारिणीं**=नानायुधधरां **निशाचरचमूं**=वज्रदंष्ट्रसेनाम् **उग्रा**=क्रूरा **कपिसेना शैलैः**=पर्वतैः **सालैः**=वृक्षैः **नखैश्च न्यसूदयत्**=अनाशयत् । 'सूद= नाशे'[1] लङ् ॥२९॥

वज्रदंष्ट्रोऽधिकं क्रुद्धो वीक्ष्य तं रक्षसां क्षयम् ।

शरैः शरीरान्तकरैर्दारयामास वानरान् ॥३०॥

वज्रदंष्ट्रः=राक्षसः **रक्षसां तं**=कपिसेनया कृतं **क्षयं**=नाशं **वीक्ष्य, अधिकं** यथा तथा **क्रुद्धः** सन् **शरीरान्तकरैः**=शरीरनाशकैः **शरैः वानरान् दारयामास**=विददार । 'दॄ=विदा – रणे' लिट् ॥३०॥

पातितान् दारितान् कांश्चिद् द्रावितानपि तान् हरीन् ।

युवराजोऽङ्गदो दृष्ट्वा वज्रदंष्ट्रमुपाद्रवत् ॥३१॥

युवराजः अङ्गदः वज्रदंष्ट्रेण **कांश्चित् पातितान्**=पतनं प्रापितान् **दारितान्**=भिन्नान् **कांश्चित् द्रावितान्**=शीघ्रगतिं प्रापितान् **अपि तान् हरीन्**=कपीन् **दृष्ट्वा, वज्रदंष्ट्रम् उपाद्रवत्**=प्राप ॥३१॥

---

१. **'षूद=क्षरणे'** इति वै.सि.कौमुदी ।

Rarest Archiver

अङ्गदो वज्रदंष्ट्रेऽथ पातयामास पादपम् ।

शरैस्तं शकलीचक्रे वज्रदंष्ट्रो हसन्निव ॥३२॥

अथ=वज्रदंष्ट्रसमीपप्राप्त्यनन्तरम् **अङ्गदः पादपं**=वृक्षं **वज्रदंष्ट्रे पातयामास**=चिक्षेप । **हसन्निव**=हासं कुर्वन्निव स्थितः **वज्रदंष्ट्रः तं**=पादपं **शरैः शकलीचक्रे**=खण्डशः कृतवान् ॥३२॥

शैलमुत्पाट्य चिक्षेप बलवान् वालिनन्दनः ।

अपासर्पद्वज्रदंष्ट्रो गिरिणा चूर्णितो रथः ॥३३॥

बलवान् वालिनन्दनः=अङ्गदः **शैलं**=गिरिम् **उत्पाट्य** वज्रदंष्ट्रे **चिक्षेप**=निरास । 'क्षिपु=निरसने'[1] लिट् । **वज्रदंष्ट्रः अपासर्पत्**=रथाद् बहिः गतः । 'सृप्लृ=गतौ' लङ् । **रथः**=वज्रदंष्ट्रयानं **गिरिणा**=अङ्गदक्षिप्तेन शैलेन **चूर्णितः**=चूर्णीकृतः ॥३३॥

गदापाणिमसम्भ्रान्तं वज्रदंष्ट्रमवेक्ष्य सः ।

शिरः शैलेन तस्याथ ताडयन् मोहमानयत् ॥३४॥

सः=अङ्गदः **गदापाणिम् असम्भ्रान्तं**=भयरहितं **वज्रदंष्ट्रम् अवेक्ष्य, अथ शैलेन**=केनचित् गिरिणा **तस्य**=वज्रदंष्ट्रस्य **शिरः**=मस्तकं **ताडयन्**=विध्यन् सन् वज्रदंष्ट्रं **मोहं**=मूर्छाम् **आनयत्**=प्रापयामास ॥३४॥

लब्धसंज्ञो निशिचरः सोऽङ्गदं गदयाऽहनत् ।

धृष्टयोः स्पष्टमनयोर्मुष्टियुद्धमवर्तत ॥३५॥

लब्धसंज्ञः=प्राप्तस्मृतिः **निशिचरः**=राक्षसः **सः**=वज्रदंष्ट्रः **गदया अङ्गदम् अहनत्**=तताड । **धृष्टयोः**=धैर्योपेतयोः **अनयोः**=अङ्गदवज्रदंष्ट्रयोः **स्पष्टं**=स्फुटं यथा तथा **मुष्टियुद्धम् अवर्तत**=अभवत् ॥३५॥

वानरो वृक्षमादत्त राक्षसः खड्गचर्मणी ।

चिरं चित्रं रणं कृत्वा जानुभ्यां तौ धरां गतौ ॥३६॥

---

१. 'क्षिप=प्रेरणे' इति वै.सि.कौमुदी ।

Rarest Archiver

वानरः=अङ्गदः **वृक्षमादत्त**=जग्राह । **राक्षसः**=वज्रदंष्ट्रः **खड्गचर्मणी** कर्म आदत्त । **तौ=** अङ्गदवज्रदंष्ट्रौ **चिरं=**बहुकालं **चित्रम्**=आश्चर्यकरं **रणं**=युद्धं **कृत्वा, जानुभ्यां धरां**=भूमिं **गतौ=**प्राप्तौ ॥३६॥

अङ्गदः सहसोत्थाय तं निपात्य निशाचरम् ।

यमक्षयं निनायास्य शीरोमर्दननिर्दयः ॥३७॥

अङ्गदः सहसा=वज्रदंष्ट्रापेक्षया शीघ्रम् **उत्थाय, निशाचरं**=राक्षसं वज्रदंष्ट्रं **निपात्य=** भूमौ पातयित्वा, **अस्य**=वज्रदंष्ट्रस्य **शिरोमर्दननिर्दयः**=शिरोनाशे दयारहितः सन् **तं**=वज्र –दंष्ट्रं **यमक्षयं**=यमगृहं **निनाय**=प्रापयामास । 'निवेशः शरणं क्षयः'[१] इत्यमरः ॥३७॥

तेजसाऽङ्गदचन्द्रस्य विष्णोःपदमुपेयुषः ।

ध्वस्तं नक्तञ्चरतमः कपिचक्राब्धिरुद्धतः ॥३८॥

विष्णोः पदम्=आकाशम् **उपेयुषः**=प्राप्तस्य **चन्द्रस्य तेजसा**=कान्त्या यथा **तमः=** अन्धकारः **ध्वस्तं**=नष्टं भवति **अब्धिः=**समुद्रश्च **उद्धतः**=अभिवृद्धः भवति । तथा **विष्णोः=**रामस्य **पदं**=स्वरूपम् **उपेयुषः**=प्राप्तस्य **अङ्गदचन्द्रस्य**=अङ्गदाख्यचन्द्रमसः **तेजसा**=सामर्थ्येन **नक्तञ्चरतमः**=राक्षसाख्यतिमिरं **ध्वस्तं**=नष्टम् । **कपिचक्राब्धिः**=कपि –समूहाख्यसमुद्रः **उद्धतः**=हृष्टः अभूत् ॥३८॥

धूम्राक्षः पश्चिमद्वारात् निरगाद्रावणाज्ञया ।

खरैः सिंहमुखैर्युक्ते रथे तिष्ठन् बलैर्वृतः ॥३९॥

सिंहमुखैः खरैः=गर्दभैः **युक्ते रथे तिष्टन्=**उपविष्टः **बलैः**=सेनाभिः **वृतः**=युक्तः **धूम्राक्षः** =राक्षसः **रावणाज्ञया पश्चिमद्वारात् निरगात्=**बहिर्गतः ॥३९॥

राक्षसान् वानरैर्भग्नान् दृष्ट्वा बाणान् ववर्ष सः ।

धूम्राक्षः क्रोधधूम्राक्षो धुन्वानश्चापमुत्तमम् ॥४०॥

उत्तमं=श्रेष्ठं **चापं=**धनुः **धुन्वानः=**कम्पयन् **क्रोधताम्राक्षः=**कोपेन रक्तनेत्रः **सः** रावणा

---

१. अ.कोशे.२.काण्डे.पुरवर्गे.२६.श्लोकः ।

Rarest Archiver

–ज्ञया बहिः गतः । **धूम्राक्षः**=राक्षसः **वानरैर्भग्नान्**=नाशितान् **राक्षसान्**=स्वभृत्यान् **दृष्ट्वा, बाणान् ववर्ष**=व्यकिरत् ॥४०॥

स्वां चमूं चञ्चलां दृष्ट्वा मारुतिर्मारुतोपमः ।

शिलयाऽथो विपुलया धूम्राक्षरथमक्षिणोत् ॥४१॥

मारुतोपमः=मुख्यप्राणसदृशः **मारुतिः**=हनूमान् **चञ्चलां**=चपलां **स्वां चमूं**=कपिसेनां **दृष्ट्वा, अथ**=अनन्तरं **विपुलया**=विशालया **शिलया**=दृषदा **धूम्राक्षरथम् अक्षिणोत्**= अनाशयत् । 'क्षिणु=हिंसायाम्' लङ् ॥४१॥

गदया ताडितस्तेन हनुमांस्तदचिन्तयन् ।

गिरिशृङ्गेण धूम्राक्षं चूर्णयामास लीलया ॥४२॥

तेन=धूम्राक्षेण **गदया ताडितः**=विद्धः **हनूमान् तत्**=ताडनम् **अचिन्तयन्** सन् **लीलया**= अनायासेन **गिरिशृङ्गेण**=पर्वतकूटेन **धूम्राक्षं चूर्णयामास**=पिष्टम् अकरोत् ॥४२॥

गर्ववान् शर्ववरतो रावणेन प्रचोदितः ।

अकम्पनः कपिवरान् द्रावयामास[1] सायकैः ॥४३॥

शर्ववरतः=रुद्रानुग्रहात् **गर्ववान्**=अहङ्कारेण युक्तः **रावणेन प्रचोदितः**=प्रेरितः **अकम्पन** इति राक्षसः **सायकैः कपिवरान् द्रावयामास**=पलायितान् चकार ॥४३॥

पर्वतादभ्रकायोऽथ पर्वतान् पादपानपि ।

हनूमानाक्षिपत्[2] तस्मै स शरैस्तानखण्डयत् ॥४४॥

अथ=अनन्तरं **पर्वतादभ्रकायः**=पर्वतवत् स्थूलशरीरः **हनूमान् पर्वतान्**=गिरीन् **पादपानपि** =वृक्षान् **तस्मै**=अकम्पनाय **आक्षिपत्**=चिक्षेप । **सः**=अङ्कपनः **शरैः तान्**=पर्वतादीन् **अखण्डयत्**=अच्छिनत् ॥४४॥

पावमानिरथोत्पाट्य पादपं प्रहसन्निव ।

जघानाकम्पनं तेन चक्रेणेवाहितं हरिः ॥४५॥

---

१. **'वारयामास'** इति मू.श्लो.पा । २. **'हनूमानक्षिपत्'** इति मू.श्लो.पा ।

Rarest Archiver

अथ पावमानिः=हनुमान् **प्रहसन्निव पादपं**=वृक्षम् **उत्पाट्य**=मूलतः छित्त्वा, **हरिः अहितं**=शत्रुं **चक्रेणेव**=चक्रेण यथा हन्ति तथा **तेन**=उत्पाटितवृक्षेण **अकम्पनं**=राक्षसं **जघान**=मारयामास ॥४५॥

रामाज्ञया ततो लङ्काम् अदहन् निशि वानराः ।

उच्चावचाः प्रगर्जन्त उच्चैरुल्मुकपाणयः ॥४६॥

ततः=अकम्पननाशानन्तरं **रामाज्ञया उल्मुकपाणयः**=अग्न्यलातहस्ताः **उच्चैः**=उन्नतत्वेन **प्रगर्जन्तः**=शब्दं कुर्वन्तः **उच्चावचाः**=प्रबलदुर्बलाश्च **वानराः निशि**=रात्रौ **लङ्काम् अदहन्**=भस्मीचक्रुः ॥४६॥

जाज्वल्यमानज्वलनैरलातैरस्त्रमन्त्रितैः ।

विकीर्यमाणैः कपिभिर्लङ्का सर्वाऽप्यदह्यत ॥४७॥

कपिभिः विकीर्यमाणैः=विक्षिप्यमाणैः **अस्त्रमन्त्रितैः**=मन्त्रैः अभिमन्त्रितैः **जाज्वल्यमान –ज्वलनैः**=पुनः पुनः अतिशयेन दीप्यमानवह्नियुक्तैः **अलातैः**=उल्मुकैः **सर्वा**=समस्ताः **अपि लङ्का अदह्यत**=दग्धाऽभवत् । 'दह=भस्मीकरणे' कर्मणि लङ् ॥४७॥

बालानामबलानां च प्रबलानां च रक्षसाम् ।

सीताहेलनदोषेण विनाशोऽभूदचिन्तितः ॥४८॥

बालानां=शिशूनाम् **अबलानां च**=स्त्रीणामपि 'स्त्री योषिदबला योषा'[1] इत्यमरः। **प्रबलानां च**=समर्थानाम् अपि **रक्षसां सीताहेलनदोषेण**=सीतानिन्दाख्यदोषेण **अचिन्तितः**= अतर्कितः **विनाशोऽभूत्** ॥४८॥

हा पुत्र मातस्तातेति कान्ते कान्तेति चाऽसकृत्[2] ।

अश्रूयन्तात्र दग्धानां प्रजानां करुणारवाः ॥४९॥

अत्र=लङ्कायां **दग्धानां**=भस्मीभूतानां सम्बन्धिनीनां **प्रजानां**=जनानां **हा पुत्र ! हा मातः! हा तात ! इति हा कान्ते**=हे स्त्री ! **हा कान्त**=हा पते ! **इति** च **करुणाः**=श्रोतॄणां

---

१. अ.कोशे.२.काण्डे.मनुष्यवर्गे.२६७.श्लोकः ।

२. **'वाऽसकृत्'** इति प्र.व्या ।

Rarest Archiver

दयोत्पादकाः **रवाः**=ध्वनयः **असकृत्**=बहुवारम् **अश्रूयन्त**=श्रुताः । 'श्रु=श्रवणे' कर्मणि लङ् ॥४९॥

कपिकुलकमलप्रोज्जृम्भणे तिग्मभानु–

र्जनकदुहितृचेतःकैरवश्वेतभानुः ।

निशिचरचयसत्रध्वंसने चित्रभानु–

र्व्यजयत[1] जगदेको रामनेत्रान्तभानुः ॥५०॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे पञ्चमः सर्गः ॥

'कपिकुलान्येव कमलानि तेषां' प्रोजृम्भणे तिग्मभानुः=सूर्य इव स्थितः **जनकदुहितृ – चेतःकैरवश्वेतभानुः**=सीतास्वान्ताख्योत्पलोद्बोधने **श्वेतभानुः**=चन्द्रः **निशिचरचयसत्र–ध्वंसने**=राक्षससमूहाख्यवनविनाशे **चित्रभानुः**=अग्निवत् स्थितः **रामनेत्रान्तभानुः**= रामकटाक्षकिरणः जगत् कर्म **व्यजयत**=जितवान् । 'जि=जये' लङ् । 'विपराभ्यां जेः'[2] इति आत्मनेपदम् । 'सत्रम् आच्छादने यज्ञे सदा दाने वनेऽपि च'[3] इत्यमरः ॥५०॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे पञ्चमः सर्गः ॥

आरम्भतः श्लोकाः–१९९+५०=२४९

१. **'विजयति'** इति मू.श्लो.पा ।

२. अष्टाध्यायी १।३।१९। पा.सूत्रम् ।

३. अ.कोशे.३.काण्डे.नानार्थवर्गे.३३६.श्लोकः ।

Rarest Archiver

Rarest Archiver

॥ अथ षष्ठः सर्गः ॥

Rarest Archiver

॥ अथ षष्ठः सर्गः ॥

ततो निकुम्भः कुम्भश्च कुम्भकर्णसुतावुभौ ।

वानरानुल्मकधरान् प्रापतुः रावणाज्ञया ॥१॥

ततः=निशि वानरैः पुरदहनानन्तरं[१] **निकुम्भः कुम्भश्च** इति **उभौ**=द्वौ **कुम्भकर्णसुतौ रावणाज्ञया उल्मुकधरान्**=अलातहस्तान् **वानरान् प्रापतुः**=ययतुः[२]। 'आप्लृ=व्याप्तौ' लिट् प्रथमपुरुषे द्विवचनम् ॥१॥

यूपाक्षः शोणिताक्षश्च प्रजङ्घः कम्पनस्तथा ।

निर्ययुः कौम्भकर्णाभ्यां[३] सार्धं नानायुधा युधे ॥२॥

नानायुधाः=नानायुधधराः **यूपाक्षा**दयः=चत्वारः **कौम्भकर्णाभ्यां**=कुम्भकर्णसुताभ्यां कुम्भ –निकुम्भाभ्यां **सार्धं युधे**=युद्धाय *'धकारान्तोऽयं'* **निर्ययुः**=कपीन् प्रापुः ॥२॥

वानरा राक्षसान् जघ्नुः पादपोपलपर्वतैः ।

आयुधैर्वानरांस्तेऽपि बभौ युद्धं तदद्भुतम् ॥३॥

वानराः पादपोपलपर्वतैः=वृक्षपाषाणगिरिभिः **राक्षसान् जघ्नुः**=हिंसितवन्तः, **ते**= राक्षसाः **अपि आयुधैर्वानरान्** जघ्नुः । **अद्भुतं**=द्रष्टॄणाम् आश्चार्यकरं **तत्**=वानरराक्षस– सम्बन्धि **युद्धं बभौ**=चकाशे ॥३॥

अङ्गदो गदया गुर्व्या कम्पनेनाभिताडितः ।

जघान गिरिशृङ्गेण कम्पनं लोककम्पनः[४] ॥४॥

कम्पनेन=राक्षसेन कर्त्रा **गुर्व्या**=भारयुक्तया[५] **गदया**=करणेन **अभिताडितः**=विद्धः **लोक –कम्पनः**=राक्षसभयङ्करः **अङ्गदः कम्पनं**=राक्षसं **गिरिशृङ्गेण जघान** ॥४॥

---

१. **'पुरदाहानन्तरम्'** इति दू.कृश्री ।
२. **'आपुः'** इति वा.वे ।
३. **'कौम्भकर्णिभ्याम्'** इति मू.श्लो.पा । ब.गो ।
४. **कोपकम्पितः** इति मू.श्लो.पा । वा.वे । प्र.व्या. । ब.गो. च ।
५. **'भारवत्या'** इति वा.वे ।

Rarest Archiver

क्षुरार्धचन्द्रनाराचान् वत्सदन्तान् शिलीमुखान् ।

कर्णिशल्यविपाठांश्च[१] शोणिताक्षोऽङ्गदेऽकिरत्[२] ॥५॥

कम्पननाशानन्तरं **शोणिताक्षः**=राक्षसः **अङ्गदे**=वालिसुते **च क्षुरार्धचन्द्रनाराचान्**=क्षुरा – दिनामकान् **शिली–मुखान्**=बाणान् '–स्वलिबाणौ शिलीमुखौ'[३] इत्यमरः । **अकिरत्** =चिक्षेप । 'कॄ=विक्षेपे'[४] लङ् ॥५॥

अनादृत्याङ्गदो वेधं धनुर्बाणधरानथ ।

अचूर्णयद् रक्षसोऽस्य सोऽपि खड्गी खमापतत् ॥६॥

अङ्गदः वेधं=शोणिताक्षकृतताडनम् **अनादृत्य**=अगणय्य **अस्य**=पूर्वोक्तस्य रक्षसः शोणिताक्षस्य सम्बन्धिनः **धनुर्बाणधरान्**=राक्षसान् **अचूर्णयत्**=चूर्णयामास । **अथ**= स्वसंबन्धिराक्षसनाशानन्तरं **सोऽपि**=शोणिताक्षोऽपि **खड्गी**=खड्गधरःसन् **खम्**=आकाशम् **आपतत्**=प्राप ॥६॥

अङ्गदः खड्गमाच्छिद्य छित्त्वांऽसं तस्य रक्षसः ।

तेनैव सिंहनादोग्रः खड्गेनाखण्डयत् परान् ॥७॥

अङ्गदः स्वयमपि आकाशम् उत्प्लुत्य[५], शोणिताक्षहस्ते स्थितं **खड्गम्**=त्सरुम् **आच्छिद्य** =अपहृत्य, **तस्य रक्षसः**=शोणिताक्षस्य **अंसं**=भुजं **छित्त्वा**=द्विधा कृत्वा, **सिंहानादोग्रः** =सिंहनादेन शत्रुभयङ्करः सन् येन **खड्गेन** शोणिताक्षम् अच्छिनत् **तेनैव खड्गेन परान्** =अन्यान् शत्रून् **अखण्डयत्** ॥७॥

प्रजङ्घयूपाक्षयुतः शोणिताक्षोऽभ्ययाद् गदी ।

अङ्गदो वारयामास तान् मैन्दविविदान्वितः ॥८॥

प्रजङ्घयूपाक्षाभ्यां युतः शोणिताक्षः गदी=गदावान् अङ्गदम् **अभ्ययात् । मैन्दविन्दाभ्याम् अन्वितः**=युक्तः **अङ्गदः तान्**=प्रजङ्घयूपाक्षशोणिताक्षान् **वारयामास**=रुरोध । 'वृञ्=आव –रणे' लिट् ॥८॥

---

१. **'विपाजांश्च'** इति ब.गो.सं.पा ।
२. **'अक्षिपत्'** इति ब.गो.सं.पा ।
३. अ.कोशे.३.काण्डे.नानार्थवर्गे.१७४.श्लोकः ।
४. **'कृती=छेदने' लङ्** इति वा.वे । परन्तु अस्य धातोः लङ्लकारे 'अकृन्तत्' इति रूपं भवति । तथा च प्रामादिकः ।
५. **'उपसृत्य'** इति वा.वे ।

Rarest Archiver

उत्पाट्योत्पाट्य विक्षिप्तान् वनौकोभिरनौकहान् ।

गदाखड्गशरैराशु चिच्छिदुस्ते निशाचराः ॥९॥

ते=पूर्वोक्ताः **निशाचराः**=शोणिताक्षादयः त्रयः राक्षसाः वनमोकः स्थानं येषां तैः **वनौकोभिः**=अङ्गदादिभिः त्रिभिः **उत्पाट्योत्पाट्य**=उधृत्योधृत्य, **विक्षिप्तान्**=निरस्तान् **अनौकहान्**=वृक्षान् **गदाखड्गशरैः आशु चिच्छिदुः** ॥९॥

अश्वकर्णेन सन्ताड्य मुष्टिपातेन[१] **चाङ्गदः ।**

प्रजङ्घस्य करात् खड्गम् आच्छिद्य प्राहरच्च तम् ॥१०॥

अङ्गदः अश्वकर्णेन=वृक्षविशेषेण **मुष्टिपातेन**=मुष्टिप्रहारेण **च** प्रजङ्घं **सन्ताड्य**=ताडयित्वा, **प्रजङ्घस्य करात्**=खड्गम् **आच्छिद्य**=अपहृत्य, **तं**=प्रजङ्घं **प्राहरत्**=प्रजहार ॥१०॥

प्रजङ्घो मुष्टिघातेन तं तारेयममोहयत् ।

लब्धसंज्ञो मुहूर्तेन वालिजोऽस्य शिरोऽहरत् ॥११॥

प्रजङ्घः=राक्षसः **मुष्टिघातेन**=मुष्टिप्रहारेण **तारेयं**=तारापुत्रं **तम्**=अङ्गदम् **अमोहयत्**=मूर्छां प्रापितवान् । **मुहुर्तेन** कालेन **लब्धसंज्ञः**=प्राप्तबाह्यज्ञानः[२] **वालिजः**=अङ्गदः **अस्य**= प्रजङ्घस्य **शिरः**=शीर्षम् **अहरत्**=अच्छिनत् ॥११॥

यूपाक्षं विविदोऽरौत्सीद् युवराजाभिगामिनम् ।

उरस्याहत्य तं दोर्भ्यां जग्राह च महाबलः ॥१२॥

विविदः कपिः **युवराजाभिगामिनम्**=अङ्गदस्य आभिमुख्येन गच्छन्तं **यूपाक्षमरौत्सीत्**= रुरोध । अरौत्सीत् अरौद्धाम् अरौत्सुः । 'रुधिर्=आवरणे' लुङ् । **महाबलः विविदः** यूपा –क्षस्य **उरसि**=वक्षसि **आहत्य**=घातयित्वा[३] **दोर्भ्यां तं**=यूपाक्षं **जग्राह**=उपादत्त च॥१२॥

भ्रातरं मोचयन् वीरो गदयोरस्यताडयत् ।

शोणिताक्षोऽथ विविदं तां गदां विविदोऽग्रहीत् ॥१३॥

---

१. **'मुष्टिघातेन'** इति मू.श्लो.पा । ब.गो. च ।
२. **'प्राप्तबाह्यसंज्ञः'** इति वा.वे ।
३. **'घटयित्वा'** इति दू.कृश्री ।

Rarest Archiver

भ्रातरं=यूपाक्षं विविदात् **मोचयन् वीरः शोणिताक्षः उरसि गदया विविदम् अताडयत् । अथ विविदः तां**=शोणिताक्षहस्ते स्थितां **गदाम् अग्रहीत्** ॥१३॥

नखैर्मुखं परिक्षिण्वन् विविदो भुवि पातयन् ।

पिपेष शोणिताक्षं तं मैन्दो यूपाक्षमक्षिणोत् ॥१४॥

विविदः नखैः शोणिताक्षस्य **मुखं परिक्षिण्वन्**=विदारयन् **तं शोणिताक्षं भुवि पातयन्** सन् **पिपेष**=पिष्टम् अकरोत् । 'पिष=पिष्टौ'[१] लिट् । विविदस्य भ्राता **मैन्दः**=कपिः शोणि–ताक्षस्य भ्रातरं **यूपाक्षम् अक्षिणोत्**=जघान ॥१४॥

काल्यमानां कपिवरैः कुम्भो दृष्ट्वा निजां चमूम् ।

अभिधावन् शरेणाशु विविदं भुव्यपातयत् ॥१५॥

कुम्भकर्णसुतः **कुम्भः कपिवरैः काल्यमानां**=हन्यमानां **निजां चमूं**=स्वां सेनां **दृष्ट्वा अभिधावन्**=शीघ्रम् आगच्छन् सन् **शरेण विविदम् आशु भुवि**=भूमौ **अपातयत्=** पातयामास ॥१५॥

अथाऽपतन्तं मैन्दं च शरेणापातयत् क्षितौ ।

मातुलौ मोहितौ दृष्ट्वा तमभ्यद्रवदङ्गदः ॥१६॥

स एव कुम्भः **अथ**=विविदपातानन्तरम् **आपतन्तं**=स्वसमीपम् आगच्छन्तं **मैन्दं च शरेण क्षितौ अपातयत्** । **अङ्गदः मातुलौ**=मैन्दविविदौ **मोहितौ**=मूर्छां प्राप्तौ **दृष्ट्वा, तं** =कुम्भम् **अभ्यद्रवत्=**प्राप ॥१६॥

विध्यमानः शरैस्तीक्ष्णैर्बलवान् वालिनन्दनः ।

ववर्षाथ शिलासालान् कुम्भस्तानच्छिनच्छरैः ॥१७॥

कुम्भेन **तीक्ष्णैः शरैः विध्यमानः**=ताड्यमानः **बलवान् वालिनन्दनः**=अङ्गदः **शिलासालान्** **=**पाषाणान् वृक्षांश्च **ववर्ष=**कुम्भस्य उपरि अवाकिरत् । **अथ**=अनन्तरं **कुम्भः तान् शरैः अच्छिनत्** ॥१७॥

---

१. 'पिषॢ=सञ्चूर्णने' इति वै.सि.कौमुदी ।

Rarest Archiver

अङ्गदस्याभिपततो[1] भ्रुवोर्बाणौ स मुक्तवान् ।

रुधिरव्याकुलाक्षोऽपि वृक्षं चिक्षेप सोऽङ्गदः ॥१८॥

सः=कुम्भः **अभिपततः**=स्वाभिमुख्येन आगच्छन्तः **अङ्गदस्य भ्रुवो**रिति *'सप्तमी द्विवचनम्'* । **बाणौ**=शरौ **मुक्तवान्**=मुमोच । **रुधिरव्याकुलाक्षोऽपि**=रक्तयुक्तनेत्रोऽपि **सः अङ्गदः वृक्षं चिक्षेप** ॥१८॥

कुम्भो वृक्षं शरैः छित्त्वा युवराजममोहयत् ।

हाहाकारो महानासीत् तदा वानरमण्डले ॥१९॥

कुम्भः अङ्गदक्षिप्तं **वृक्षं शरैः छित्त्वा,** यदा **युवराजम्**=अङ्गदम् **अमोहयत्**=मूर्छां प्रापितवान्, **तदा वानरमण्डले**=कपिसमूहे **महान्**=उच्चः **हाहाकारः आसीत्** ॥१९॥

सुषेणो जाम्बवान् नीलो नलस्तारादयस्तथा ।

अभ्यद्रवन् शिलाहस्ताः कुम्भस्तानजयच्छरैः ॥२०॥

शिलाहस्ताः=पाषाणपाणयः **सुषेणादयश्चत्वारः तथा तारादयः** कुम्भम् **अभ्यद्रवन्**=प्रापुः । **कुम्भः शरैः तान्**=सुषेणादीन् **अजयत्**=पराभूतान् अकरोत् ॥२०॥

भ्रातृजं पतितं दृष्ट्वा वानरेन्द्रांश्च विद्रुतान् ।

[2]क्रुद्धो हि द्रुमवर्षेण सुग्रीवः कुम्भमाद्रवत् ॥२१॥

सुग्रीवः भ्रातृजं=वालिसूनुम् अङ्गदं **पतितं**=मूर्छया भुवं प्राप्तं **विद्रुतान्**=पलायितान् **वानरेन्द्रान्**=सुषेणादीन् **च दृष्ट्वा, क्रुद्धः** सन् **द्रुमवर्षेण**=वृक्षवृष्ट्या साकं **कुम्भम् आद्रवत्**=प्राप **हि** ॥२१॥

शीर्यमाणान् रिपुशरैः शिलावृक्षान् विलोक्य सः ।

कुम्भस्य धनुराच्छिद्य चिच्छेदेक्षुमिव द्विपः ॥२२॥

सः=सुग्रीवः स्वेन क्षिप्तान् **शिलावृक्षान् रिपुशरैः**=कुम्भशरैः **शीर्यमाणान्**=खण्ड्य–

---

१. **'अङ्गदस्यापि पततो भ्रुवोर्बाणान् स'** इति मू.श्लो.पा ।   २. **'क्रुद्धोऽद्रिद्रुमवर्षेण'** इति मू.श्लो.पा । विश्व.ती च ।

Rarest Archiver

मानान् दृष्ट्वा, **कुम्भस्य धनुः**=चापम् **आच्छिद्य**=अपहृत्य, द्वाभ्यां पिबति इति **द्विपः=** गजः **इक्षुमिव**=इक्षुदण्डं यथा अनायासेन छिनत्ति तथा **चिच्छेद=**द्विधा कृतवान् ॥२२॥

जितकाशी भवान् कुम्भ पौरुषं पश्य मेऽधुना ।

इत्युक्त्वा जगृहे राजा कुम्भं संरम्भसंवृतः[१] ॥२३॥

संरम्भसंवृतः=कोपयुक्तः 'संरम्भसम्भृत' इति पाठे कोपसम्पूर्णः **राजा**=सुग्रीवः हे **कुम्भ ! भवान् जितकाशी**=जयेन शोभमानः, जितयुद्ध इति वा 'जयकाशीति'[२] क्वचित्पाठः । **अधुना मे**=मम **पौरुषं**=पराक्रमं **पश्य इत्युक्त्वा कुम्भं जगृहे** ॥२३॥

नियुद्धं वीरयोरासीच्चिरं चित्रं समं तयोः ।

कुम्भमम्भोनिधौ प्रास्यात् कपीन्द्राब्धिस्तदोद्धतः[३] ॥२४॥

वीरयोः तयोः=कुम्भसुग्रीवयोः **चित्रम्**=आश्चर्यकरं **नियुद्धं**=बाहुयुद्धं **चिरं**=बहुकालं **समं=**तुल्यं यथा तथा आसीत् । सुग्रीवः **कुम्भं** यदा **अम्भोनिधौ**=समुद्रे **प्रास्यात्** =चिक्षेप **तदा कपीन्द्राब्धिः**=कपिश्रेष्ठसमुद्रः **उध्दतः=**हर्षेण अभिवृद्धोऽभूत् ॥२४॥

अर्णवात् तूर्णमुत्पत्य स सुग्रीवमताडयत् ।

सुग्रीवो मुष्टिघातेन तं निनाय यमालयम्[४] ॥२५॥

सः=कुम्भः **अर्णवात्**=समुद्रात् **तूर्णं**=शीघ्रं यथा तथा **उत्पत्य**=आगत्य **सुग्रीवम् अताडयत्=**मुष्टिना जघान । **सुग्रीवः मुष्टिघातेन**=मुष्टिप्रहारेण **तं**=कुम्भं **यमालयं**=यमगृहं नरकम् इति यावत् **निनाय**=प्रापयामास ॥२५॥

कुम्भं तं निहतं दृष्ट्वा निकुम्भो भानुनन्दनम् ।

संरम्भारुणताम्राक्षो गम्भीरः प्रैक्षत ज्वलन् ॥२६॥

गम्भीरः=अगाधबलः **निकुम्भः** सुग्रीवेण **निहतं**=नाशितं **तं**=प्रसिद्धं **कुम्भं=**स्वभ्रातरं

---

१. अ) **'संरम्भसंयुतः'** इति वा.वे । आ) **'संरम्भसम्भृतः'** इति ब.गो ।

२. **'जयकाशी'** इति क्वचित्पाठोऽपि प्रदर्शितः । अत्र क्वचित् पदेन– ग्रन्थस्यास्य अन्याश्च व्याख्याः स्युरिति सूचितम् ।

३. **'कपीन्द्रोऽब्धिस्तदोद्धतः'** इति प्र.व्या । ब.गो. च ।

४. **'यमक्षयम्'** इति मू.श्लो.पा । ब.गो. च ।

Rarest Archiver

दृष्ट्वा, संरम्भारुणताम्राक्षः[१]=कोपेन 'अरुणं ताम्रम् इव अक्षिणी यस्य सः' **ज्वलन्=** दीप्यमानः सन् **भानुनन्दनं=**सुग्रीवं **प्रैक्षत**=अपश्यत् ॥२६॥

धनुश्शतमितं देशं पुप्लुवे प्लवगेश्वरः ।

पश्यन् निकुम्भसंरम्भं किमुतान्ये प्लवङ्गमाः ॥२७॥

निकुम्भसंरम्भं पश्यन्=ईक्षमाणः **प्लवगेश्वरः**=सुग्रीवः **धनुश्शतमितं देशम्** '*अत्यन्त-संयोगे द्वितीया*' । धनुश्शतपरिमितदेशे **पुप्लवे**=पृष्टतः प्लवनम् अकरोत् । 'प्लुङ्=गतौ' लिट् । [२]**अन्ये**=सुग्रीवात्परे **प्लवङ्गमाः** पुप्लुविरे इति **किमुत=किं** वक्तव्यम्? ॥२७॥

परिघं प्रतिघोन्नद्धः सुरवारणदारणम् ।

अबिभ्रमन्निकुम्भोऽथ दण्डं दण्डधरो यथा ॥२८॥

अथ=सुग्रीवादिपलायनानन्तरं **प्रतिघोन्नद्धः**=कोपेन उद्रिक्तः 'प्रतिघः रुट्क्रुधौ स्त्रियाम्'[३] इत्यमरः । **निकुम्भः सुरवारणदारणं सुराणां**=देवानां **वारणान्**=गजान् **दारयति**=भिनत्ति इति तथोक्तं, देवश्रेष्ठविदारकं वा **परिघम्**=अयोदण्डं **दण्डधरः=**यमः दण्डं यथा भ्राम्यति तथा **अबिभ्रमत्**=भ्रामयामास । 'भ्रमु=चलने' णिजन्तात् लुङ् ॥८॥

[४]**परिघभ्रमणेनास्य सम्भ्रान्तं भुवनत्रयम् ।**

विषसाद लये यद्वत् ससुरासुरमानवम् ॥२९॥

ससुरासुरमानवं=देवासुरमनुष्यसहितम् **अस्य**=निकुम्भस्य **परिघभ्रमणेन**=परिघावर्तनेन **सम्भ्रान्तं**=सम्यक् भ्रामितं, चालितमिति यावत् । **भुवनत्रयं=**लोकत्रयं **लये**=प्रलये **यद्वत्=** यथा तथा **विषसाद**=भयं प्राप । 'षद्लृ=विशरणगत्यवसादनेषु' लिट् । '*सदेः परस्य लिटि*'[५] इत्यनभ्यासस्य न षत्वम् ॥२९॥

अवध्यः शङ्करवराद् अवध्याता च नाकिनाम् ।

जाज्वल्यते स्म तस्मिन् स कालेकालानलोपमः ॥३०॥

---

१. **'कोपसंरक्तनेत्रः'** इति दु.कृश्री । २. **'अन्ये=सुग्रीवात् परे पुप्लुविरे इति किं वक्तव्यम् ?** इति वा.वे ।
३. **'प्रतिघः'** इति अकरान्तः पुंल्लिङ्गः शब्दः । ४. **'परिघभ्रामणेनास्य'** इति ब.गो.सं.पा ।
५. अष्टाध्यायी ८।३।११८ पा.सूत्रम् ।

Rarest Archiver

शङ्करवरात्=रुद्रप्रसादात्[1] हन्तुम् अशक्यः **अवध्यः नाकिनां च**=सुराणामपि **अवध्याता** =अवज्ञाकर्ता **कालानलोपमः**=प्रलयाग्निसदृशः **सः**=निकुम्भः **तस्मिन् काले**=परिघ–भ्रामणकाले पुनःपुनरपि **जाज्वल्यते स्म**=पुनः पुनरतिशयेन ज्वलितोऽभूत्[2] । 'ज्वल= ज्वलने' *'स्म योगे भूते लट्'* ॥३०॥

विषादं वीक्ष्य हनुमान् विश्वस्य समुपस्थितम्[3] ।

निकुम्भाग्रत आप्लुत्य विशालं वक्ष ऐक्षयत्[4] ॥३१॥

हनुमान् निकुम्भेन **समुपस्थितं**=प्राप्तं **विश्वस्य**=भुवनत्रयस्य **विषादं वीक्ष्य**=आलोच्य, साक्षिणा विषयीकृत्य वा **निकुम्भाग्रतः**=निकुम्भपुरतः **आप्लुत्य**=प्लवनं कृत्वा, **विशालं** =विस्तीर्णं स्वस्य **वक्षः**=उरस्थलम् **ऐक्षयत्**=दर्शयामास ॥३१॥

अभीरो वीर किं कृत्यं भीरुभिर्विद्रुतैस्तव ।

अत्र प्रहर ते हेतिम् इत्यूचे हनुमानिमम् ॥३२॥

हनुमान् हे अभीर=भयरहित ! **हे वीर** निकुम्भ ! **विद्रुतैः**=पलायितैः **भीरुभिः**=भयं प्राप्तैः कपिभिः **तव किं कृत्यं**=किं प्रयोजनं? **ते**=तव **हेतिं**=परिघरूपायुधम् **अत्र**=मम वक्षसि **प्रहर**=निक्षिप, **इति इमं**=निकुम्भं प्रति **ऊचे** ॥३२॥

अमोघं परिघं घोरम् उद्भ्राम्य प्रजहार सः ।

हनूमति स मोघोऽभूत् पतत्रीन्द्रे पविर्यथा ॥३३॥

सः=निकुम्भः **अमोघम्**=इतरत्र अनिष्फलं **घोरं**=भयङ्करं **परिघम् उद्भ्राम्य**=भ्रामयित्वा, हनुमद्वक्षसि **प्रजहार**=तताड । **पक्षीन्द्रे**=गरुडे **पविः**=वज्रं **यथा मोघः**=व्यर्थः **अभूत्** तथा **सः**=परिघः **हनूमति मोघः**=निष्फलम् **अभूत्** ॥३३॥

मारुतेर्मुष्टिपिष्टोऽथ मूर्छितः कुम्भसोदरः ।

आश्वस्तस्तं हनूमन्तम् अंसे न्यस्याद्रवद् द्रुतम् ॥३४॥

---

१. **'रुद्रवरात्'** इति वा.वे ।

२. **'जाज्वल्यते स्म=ज्वलितोऽभूत्'** इति वा.वे । **'ज्वल=दीप्तौ'** इति वै.सि.कौमुदी ।

३. **'तमुपस्थितम्'** इति प्र.व्या । ब.गो. च ।

४. **'ऐक्षत'** इति प्रामादिकः स्यात् । वा.वे ।

Rarest Archiver

अथ=परिघनाशानन्तरं **मारुतेः**=हनुमतः **मुष्टिपिष्टः**=मुष्टिना ताडितः **मूर्छितः**=मूर्छां प्राप्तः **कुम्भसोदरः**=कुम्भानुजः निकुम्भः **आश्वस्तः**=प्राप्तसंज्ञः सन् **तं हनुमन्तम् अंसे**=भुजे **न्यस्य**=निक्षिप्य, **द्रुतं** यथा तथा **अद्रवत्**=दुद्राव ॥३४॥

नीते हनूमत्यारब्धं क्रन्दितं कपिमण्डलैः ।

जातं सपदि हासान्तं पातितेऽस्मिन् हनूमता ॥३५॥

हनुमति निकुम्भेन स्थलान्तरं **नीते**=प्रापिते सति **कपिमण्डलैः**=कपिसमूहैः **क्रन्दितम्**=आर्तस्वरः **आरब्धम्**=उपक्रान्तम् । **हनुमता तस्मिन्**=निकुम्भे **पतिते**=नाशिते सति **हासान्तं**=‘हासः सन्तोषजन्यः अट्टहासः अन्ते यस्य तत्’ **हासान्तं क्रन्दितं**=ध्वनिः **जातम्**=अभूत् ॥३५॥

महासंख्यमखे तस्मिन् प्रमथ्याविक्षतं[1] हरिः ।

तं निकुम्भपशुं कृत्वा[2] यज्ञेश्वरमतोषयत् ॥३६॥

हरिः=हनुमान् **तस्मिन्**=प्रसिद्धे **महासंख्यमखे**=महायुद्धाख्ये यज्ञे **अविक्षतम्**=इतरैः अनिहतं **तं**=प्रसिद्धं **निकुम्भं पशुं कृत्वा**, **प्रमथ्य**=प्रकर्षेण मथितं कृत्वा, **यज्ञेश्वरं**=रामम् **अतोषयत्**=तोषयामास ॥३६॥

कुम्भकर्णात्मजे तस्मिन् कुम्भकर्णोपमे हते ।

नन्दितं [3]नाकिलोकेऽभूत् क्रन्दितं रक्षसां पुरे ॥३७॥

कुम्भकर्णोपमे=कुम्भकर्णसदृशे **कुम्भकर्णात्मजे तस्मिन्**=निकुम्भे **हते**=मृते सति **नाकिलोके**=देवसमूहे **नन्दितं**=सन्तोषः[4] *‘भावे क्तः’* **अभूत्** । **रक्षसां पुरे**=लङ्कायां **क्रन्दितं**=विलापोऽभूत् ॥३७॥

ससुप्तघ्नो यज्ञकोपो रश्मिकेत्वग्निकेतवः ।

प्रेषिता रावणेनाऽजौ क्षणाद् रामेण सूदिताः ॥३८॥

---

१. **‘प्रमथ्याविजितम्’** इति मू.श्लो.पा ।

२. **‘निकुम्भपशुं तत्र’** इति प्र.व्या । ब.गो. च ।

३. **‘नाकलोके’** इति प्र.व्या ।

४. **‘सन्तोषितम्’** इति वा.वे ।

Rarest Archiver

सुप्तघेन सह वर्तत इति **ससुप्तघ्नः** यज्ञकोपः 'रश्मिकेतवश्च अग्निकेतवश्च' **रश्मि–केत्वग्निकेतवः**=तन्नामकराक्षसाः **रावणेन प्रेषिताः** सन्तः **आजौ=**युद्धे 'समित्याजि समि–द्युधः'[१] इत्यमरः । **रामेण क्षणात् सूदिताः**=नाशिताः ॥३८॥

यमशत्रुश्च दुर्धर्षो महापार्श्वो महोदरः ।

वज्रदंष्ट्रो महाकायः तौ चोभौ शुकसारणौ ॥३९॥

ससैन्या रावणादिष्टा हता रामेण लीलया ।

उदारविक्रमेणाऽजौ मृगेन्द्रेण मृगा इव ॥४०॥

यमशत्र्वादयः राक्षसाः **तौ** पूर्वं रामसेनां गणयितुं प्राप्तौ **उभौ**=द्वौ **शुकसारणौ**=राक्षसौ **रावणादिष्टाः**=रावणेन प्रेरिताः **ससैन्याः**=सेनया सहिताः सन्तः **मृगेन्द्रेण**=सिंहेन **मृगा इव उदारविक्रमेण**=उत्कृष्टपराक्रमेण **रामेण आजौ लीलया**=अनायासेन **हताः**=नाशिताः ॥३९॥ ॥४०॥

निकुम्भादीन् हतान् श्रुत्वा विलपन्तं दशाननम् ।

आश्वास्य निर्ययुर्योद्धुं कुमारास्तदनुज्ञया[२] ॥४१॥

तान् मृतान् **निकुम्भादीन् श्रुत्वा**, **विलपन्तं**=प्रलापं कुर्वन्तं **दशाननं**=रावणम् **आश्वास्य**= अनुनीय, **कुमाराः**=रावणपुत्राः **तदनुज्ञया**=रावणाज्ञया **योद्धुं**=कपिभिः युद्धं कर्तुं **निर्ययुः** =पुराद् बहिः निर्गताः ॥४१॥

त्रिशिरा अतिकायश्च देवान्तकनरान्तकौ ।

ते मत्तयुद्धोन्मत्ताभ्यां पितृव्याभ्यां समं ययुः ॥४२॥

त्रिशर आदयः चत्वारः ते रावणकुमाराः **पितृव्याभ्यां** रावणमातृष्वसृपुत्राभ्यां **मत्तयुद्धो–न्मत्ताभ्यां समं**=साकं **ययुः**=निर्ययुः ॥४२॥

उग्रा तदग्रगा सेना वानरान् पर्यपीडयत् ।

नानाहेतिमतीं दीप्तां तां कपीन्द्रा न्यवारयन् ॥४३॥

---

१. अ.कोशे.२.काण्डे.क्षत्रियवर्गे.५७१.श्लोकः ।

२. **'कुमारास्ते तदाज्ञया'** इति मू.श्लो.पा ।

Rarest Archiver

उग्रा=क्रूरा **तदग्रगा**='तेषाम् अग्रे गच्छति' **सेना वानरान् पर्यपीडयत्**=पीडितवती । **कपीन्द्राः दीप्तां**=क्रूरां **नानाहेतिमतीं**=नानायुधाढ्यां **तां**=सेनां **न्यवारयन्**=निवारितवन्तः ॥४३॥

वानरा वारणैर्भग्नैर्वारणांश्च हयैर्हयान् ।

रथै रथान् राक्षसांश्च राक्षसैः समसूदयन् ॥४४॥

वानराः=कपयः **भग्नैः**=मृतैः गजैः **वारणैः समसूदयन्**=अनाशयन् एव । **हयैः**=अश्वैः **हयान्** असूदयन् **रथैः रथान्** असूदयन् **राक्षसैः राक्षसांश्च**=असूदयन् ॥४४॥

नरान्तकोऽन्तकनिभः क्रुद्धो वाजिवरे स्थितः ।

कपिसप्तशतान्येकः प्रासेनादारयत् क्षणात् ॥४५॥

वाजिवरे=अश्वश्रेष्ठे **स्थितः**=उपविष्टः **क्रुद्धः अन्तकनिभः**=यमसदृशः **नरान्तकः**=राक्षसः **एक** एव **प्रासेन**=भल्लेन **कपिसप्तशतानि**=सप्तशतसंख्याककपीन् **क्षणात् अदारयत्**= अभिनत् ॥४५॥

दीनं दूनं कुमारेण हरिचक्रं विलोकयन् ।

नरान्तकं प्रति ययौ सुग्रीवप्रेषितोऽङ्गदः ॥४६॥

कुमारेण=रावणपुत्रेण नरान्तकेन **दीनं**=क्षयं प्रापितं **दूनं**=परितप्तं, दुखं प्राप्तम् इति यावत् । **हरिचक्रं**=कपिसमूहं **विलोकयन्**=पश्यन् **सुग्रीवप्रेषितः**=सुग्रीवेण गच्छ इत्युक्तः **अङ्गदः नरान्तकं प्रति ययौ**=जगाम ॥४६॥

तिष्ठ किं प्राकृतैरेतैः प्रासं मे प्रहरोरसि ।

इत्यङ्गदस्य ब्रुवतः प्रासं प्रास्यत् स वक्षसि ॥४७॥

हे नरान्तक ! मत्पुरतः **तिष्ठ** । **प्राकृतैः**=बलरहितैः **एतैः**=कपिभिः तव **किं** कृत्यं? तव **प्रासं**=आयुधं **मे**=मम **उरसि**=वक्षसि **प्रहर**=निक्षिप, **इति**=एवंप्रकारेण **अङ्गदस्य ब्रुवतः**=वदतः सतः **अङ्गदस्य वक्षसि सः**=नरान्तकः **प्रासं प्रास्यत्**=चिक्षेप । 'असु= क्षेपणे' लङ् ॥४७॥

Rarest Archiver

अङ्गदोरसि स प्रासः पतितः[१] खण्डितोऽपतत् ।

तारेयस्तरसा तस्य तलेनाश्वमताडयत् ॥४८॥

अङ्गदोरसि पतितः=पन्नः **सः**=नरान्तकेन क्षिप्तः **प्रासः खण्डितः**=द्विधा भूतः सन् **अपतत्=**भूमौ पपात । **तारेयः**=तारापुत्रोऽङ्गदः **तरसा**=वेगेन **तस्य**=नरान्तकस्य **अश्वं**= वाजिनं **तलेन अताडयत्**=प्रजहार ॥४८॥

ताडितादश्ववदनान्नयने भुवि पेततुः ।

तारके[२] इव मेघाग्रात् स पपात ममार च ॥४९॥

अङ्गदेन **ताडितात्=**प्रहारं प्राप्तात् **अश्ववदनात्**=तुरगमुखात् **मेघाग्रात् तारके=**नक्षत्रे **इव** 'तारकाऽपि उडु वा स्त्रियाम्' इत्यमरः । **नयने**=नेत्रे **भुवि पेततुः=**पतितौ **सः=** नरान्तकाश्वः **भुवि पपात**=पतितः । अथ **ममार च**=मृतोप्यऽभूत् ॥४९॥

दुष्टधीः पातयामास मुष्टिमङ्गदमुर्ध्नि सः[३] ।

मूर्च्छितः प्राप संज्ञां स रक्तो रुधिरधारया ॥५०॥

दुष्टधीः=दुष्टबुद्धिः **सः**=नरान्तकः **अङ्गदमूर्ध्नि=**अङ्गदशिरसि **मुष्टिं**=प्रहारं **पातयामास=** पातितवान् । **रुधिरधारया=**संरक्तसम्पातेन 'धारा सम्पात आसारः' इत्यमरः[४] । **रक्तः**= आर्द्रः **सः**=अङ्गदः **मूर्छितः सन्** क्षणात् **संज्ञां**=बाह्यस्मृतिं **प्राप=**जगाम ॥५०॥

तन्मुष्टिपीडितः क्रुद्धो दध्रे खड्गं नरान्तकः ।

खड्गमाच्छिद्य तेनैनम् अङ्गदो भङ्गमानयत् ॥५१॥

तन्मुष्टिपीडितः=अङ्गदमुष्टिना ताडितः **क्रुद्धः नरान्तकः खड्गं दध्रे**=जग्राह । **अङ्गदः खड्गम् आच्छिद्य**=अपहृत्य, **तेनै**व=खड्गेन **एनं=**नरान्तकं **भङ्गं**=नाशम् **आनयत्=**प्राप- यामास ॥५१॥

नरान्तके निपतिते क्रुद्धो देवान्तकोऽभ्ययात् ।

जाम्बवत्पूर्वकाः[५] सर्वे तं दृष्ट्वैव परादवन् ॥५२॥

---

१. **'प्रासः पातितः'** इति मू.श्लो.पा । प्र.व्या । ब.गो च । २.**'तारिके इव'** इति वा.वे । ३.**'मुष्टिमङ्गदमूर्धनि'** मू.श्लो.पा । ४. **'धारासम्पातः'** इति समस्तपदं कोशे । 'अतिवृष्टिः' इत्यर्थः । ५. **'जाम्बवत्प्रमुखाः'** इति मू.श्लो.पा । ब.गो. च ।

Rarest Archive

नरान्तके निपातिते=नाशिते सति **क्रुद्धः देवान्तकः**=राक्षसः **अभ्ययात्**=कपीन् प्राप । **जाम्बवत्पूर्वकाः सर्वे**=कपयः **तं**=देवान्तकं **दृष्ट्वा**=अवलोक्यैव **पराद्रवन्**=दुद्रुवुः ॥५२॥

देवान्तकाय चिक्षेप वृक्षान् वालिसुतो बहून् ।

स तांश्छित्त्वा शरेणाऽशु वालिसूनुममोहयत् ॥५३॥

वालिसुतः=अङ्गदः **बहून् वृक्षान् देवान्तकाय चिक्षेप**=प्रक्षिप्तवान् । **सः**=देवान्तकः **शरेण तान्**=वृक्षान् **आशु**=शीघ्रं **छित्त्वा**=द्विधा कृत्वा, **शरेण वालिसूनुम्**=अङ्गदम् **अमोहयत्**=मूर्च्छां प्रापयामास ॥५३॥

[1]**अथ तिग्मांशुतनयः शैलं प्रचलपादपम् ।**

अभिदुद्राव सङ्गृह्य चिक्षेप च निशाचरे ॥५४॥

ग्रन्थकारः स्वग्रन्थस्य अपि मूलं दर्शयितुं निर्णयश्लोकम् एव पठति- **अथेति** । **अथ**=अङ्गदस्य मूर्छाप्राप्त्यनन्तरं **तिग्माः**=तीक्ष्णाः **अंशवः**=किरणाः यस्य तस्य **तनयः**= पुत्रः **तिग्मांशुतनयः**=सूर्यसूनुः [2]सुग्रीवः '**प्रचलाः**=चञ्चलाः **पादपाः**=वृक्षाः यस्मिन् तं' **प्रचलपादपं शैलं**=गिरिं **सङ्गृह्य**=गृहीत्वा, **अभिदुद्राव**=देवान्तकाभिमुख्येन जगाम । **निशाचरे**=देवान्तके शैलं **चिक्षेप च**=प्रक्षिप्तवानपि ॥५४॥

स शैलं शकलीकृत्य शरैर्देवान्तको बली ।

हृदि विद्ध्वा शरं घोरं कपिराजं व्यमोहयत् ॥५५॥

बली स देवान्तकः शरैः शैलं=गिरिं **शकलीकृत्य**=खण्डशः कृत्वा, कपिराजस्य **हृदि** =वक्षसि **घोरं**=भयङ्करं **शरं**=बाणं **विद्ध्वा**=प्रक्षिप्य, **कपिराजं**=सुग्रीवं **व्यमोहयत्**= वैचित्त्यं[3] प्रापयामास ॥५५॥

[4]**बलमप्रतिमं वीक्ष्य सुरशत्रोस्तु मारुतिः ।**

[5]**तमाह्वास्ताहवायाशु केशवः कैटभं यथा ॥५६॥**

---

१. श्रीम.भा.ता.नि.८.अ.४६.मूलश्लोकः ।

२. '**सूर्यसूनुः**' इति विशेषणं नास्ति, '**सुग्रीवः**' इत्येव वा.वे ।

३. '**वेधित्वम्**' इति वा.वे ।

४. श्रीम.भा.ता.नि.८.अ.४९.मूलश्लोकः ।

५. अ) '**आह्वयामास तं योद्धुं**' इति मू.श्लो.पा । आ) '**तमाहवायाऽह्वयत**' इति विश्व.ती । प्र.व्या. च ।

Rarest Archive

तत्र निर्णयस्थम् एवार्थं[१] पठति– **बलमिति । मारुतिः**=हनुमान् **सुरशत्रोः**=देवान्तकस्य **अप्रतिमम्**=असदृशं **बलं**=सामर्थ्यं **वीक्ष्य**=दृष्ट्वा, **केशवः**=हरिः **कैटभं**=दैत्यं युद्धाय **यथा** तथा **आह्वास्त**=आहूतवान् इति यावत् । आह्वास्त आह्वासातां आह्वसत । ‘ह्वेञ्=स्पर्धायां शब्दे च’ लुङ् । आत्मनेपदि प्रथमपुरुषे एकवचनम् ॥५६॥

तस्यापतत एवाशु रथं सहयसारथिम् ।

चूर्णयित्वा धनुश्चास्य चिच्छेदाऽच्छिद्य मारुतिः ॥५७॥

मारुतिः=हनुमान् **आपततः**=आभिमुख्येनागच्छतः **तस्य**=देवान्तकस्य ‘हयसारथिभिः सहितं’ **सहयसारथिं रथं**=यानम् **आशु चूर्णयित्वा**=विनाश्यैव, **अस्य**=देवान्तकस्य **धनुश्च**=चापम् अपि **आच्छिद्य**=बलाद् गृहीत्वा, **चिच्छेद**=द्विधा अकरोत् ॥५७॥

अथ खड्गिनमायान्तं पातयित्वा स पावनिः ।

शिरः पादेन निष्पिष्य जघानामरवैरिणम्[२] ॥५८॥

अथ=रथनाशानन्तरं **स पावनिः**=वायुपुत्रः हनुमान् **खड्गिनं**=असिहस्तम् **आयान्तं**=स्व–समीपम् आगच्छन्तम् **अमरवैरिणं**=देवान्तकं भूमौ **पातयित्वा**=निपात्य, तस्य **शिरः** स्व**पादेन निष्पिष्य**=पिष्टं कृत्वा, तं **जघान**=हिंसितवान् ॥५८॥

सुवर्णसुन्दरैरेष मारुतिः प्रत्यपूज्यत ।

अमराणां कपीनां च स्तवनैर्नयनैरपि ॥५९॥

एष मारुतिः=हनूमान् **सुवर्णसुन्दरैः**[३]=‘शोभमानाः वर्णाः=अक्षराणि तैः’ **सुवर्णैः**=शोभ–मानाक्षरैः **सुन्दरैः**=मनोहरैः **अमराणां**=देवानां **स्तवनैः**=स्तोत्रैः **सुवर्णसुन्दरैः**=शोभन –नीलपीतादिवर्णैः **रूपैः**=सुन्दरैः **कपीनां नयनैः**=नेत्रैः अपि **अपूज्यत**=पूजितोऽभूत् । देवाः अस्तुवन् । कपयः सन्तोषविकसितैः नेत्रैः अपश्यन् इति यावत् । ‘वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाऽक्षरे’[४] इत्यभिधानम् ॥५९॥

---

१. **‘निर्णयस्थमेवार्थं’** इत्यस्य ‘श्रीमहाभारततात्पर्यनिर्णयः’ श्रीमध्वग्रन्थः ।
२. अ) **‘निष्पीड्य’** इति वा.वे । आ) **‘निष्पिष्य जघान सुरवैरिणम्’** इति मू.श्लो.पा ।
३. विग्रहप्रदर्शनपुरस्सरं यावदर्थौ अभिहितौ, तौ दू.कृश्री. मातृकायां न स्तः ।
४. अ.कोशे.३.काण्डे.नानार्थवर्गे.२०४.श्लोकः ।

Rarest Archives

युद्धोन्मत्तं च मत्तं च वीरावन्वर्थनामकौ ।

जघान मुष्टिघातेन[१] मारुतिः क्षिप्तवानरौ ॥६०॥

मारुतिः=हनुमान् **क्षिप्ताः**=निरस्ताः वानराः याभ्यां तौ **क्षिप्तवानरौ वीरौ अन्वर्थे=** अर्थम् अनुसृजते नामनी ययोः तौ **अन्वर्थनामकौ युद्धोन्मत्तं मत्तं च** इति एतौ राक्षसौ कर्म **मुष्टिघातेन**=मुष्टिप्रहारेण **जघान=**ममार ॥६०॥

अङ्गदादीन् प्लवङ्गेन्द्रान् द्रावयन्तं शरोत्तमैः[२] ।

प्राप्तं[३] त्रिशिरसं तस्य हनूमान् [४]यानमक्षिणोत् ॥६१॥

अङ्गदादीन्=हरीन्द्रान् **शरोत्तमैः द्रावयन्तं**=पलायितान् कुर्वन्तं स्वसमीपं **प्राप्तं त्रिशिरसं** दृष्ट्वा, **हनुमान् तस्य**=त्रिशिरसः **यानम्=**रथम् **अक्षिणोत्**=अनाशयत् ॥६१॥

सञ्छिद्य चापखड्गौ च [५]तलेन बलचुञ्चुना ।

त्रिमूर्धानममूर्धानं चक्रे चक्रायुधप्रियः ॥६२॥

चक्रायुधप्रियः=रामप्रियः हनुमान् **तस्य**=त्रिशिरसः **चापखड्गौ च सञ्छिद्य**=सम्यक् छित्त्वा, 'बलेन वित्तं=प्रसिद्धं बलचुञ्चु, तेन' **बलचुञ्चुना** '*तेन वित्तश्चुञ्चुप्चणपौ*'[७] इति चुञ्चुप् प्रत्ययः । **तलेन=**तलप्रहारेण **त्रिमूर्धानं=**त्रिशिरसम् **अमूर्धानं**=गतशिरस्कं[८] **चक्रे** ॥६२॥

परमपरमहिष्टं मानयन्तं नयन्तं जयमखिलकपीन्द्रान्[९] राममत्राभिनन्दन् ।

रणरणरणिकायां वर्तमानोऽसमानो मुहुरपि मिहिरश्रीः श्रीहनूमान् जगर्ज ॥६३॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे षष्टः सर्गः ॥

---

१. **'मुष्टिपातेन'** इति मू.श्लो.पा । २. **'शरोत्करैः'** इति मू.श्लो.पा । ब.गो. च ।
३. **'प्राप्य त्रिशिरसम्'** इति प्र.व्या । ब.गो. च । ४. **'रथमक्षिणोत्** इति मू.श्लो.पा । दू.कृ.श्री च ।
५. अ) **'तलेन बलचञ्चुना'** इति मू.श्लो.पा । आ) **'बलेन बलचुञ्चुना'** इति प्र.व्या । इ) **'बलचुञ्चुना'** इति विश्व.ती ।
६. वा.वे मातृकायां सूत्रसम्बद्धोऽयं विषयः प्रमादितः ।
७. अष्टाध्यायी ५।२।२६ पा.सूत्रम् ।
८. **'गतिशिरसम्'** इति वा.वे ।
९. **'कपींस्तान् राम'** इति ब.गो ।

Rarest Archive

अखिलकपीन् मानयन्तं=बहुमानयुक्तान् कुर्वन्तं तथा तान् अखिलकपीन् **जयं**=शत्रुजयं **नयन्तं**=प्रापयन्तं, *'नयतेः द्विकर्मकत्वम्'* । 'परमाणां मध्ये **पराः=**उत्तमाः **परमपराः=** अत्युत्तमाः, तेषाम् अपि अतिशयेन पूज्यं' **परमपरमहिष्टं रामम् अत्र**=युद्धसमये दृष्ट्वा, **अभिनन्दन्**=सन्तुष्यन् **रणे=**युद्धे रणरणिका=उत्कण्ठा तस्यां **रणरणिकायां वर्तमानः** अत्यन्तं युद्धकाङ्क्षावान् इत्यर्थः । अत एव **असमानः**=असदृशः '**मिहरस्य=**सूर्यस्य श्रीरिव श्रीः=कान्तिः यस्य सः' **मिहिरश्रीः**=सूर्यवद्भासमान[१] इत्यर्थः । मिहिरारुण पूषणः'[२] इत्यमरः । 'शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिति गीयते'[३] इति चाभिधानम् । **श्रीहनूमान् मुहुरपि=** पुनरपि **जगर्ज**=सिंहनादम् अकरोत् । 'गर्ज=शब्दे' लिट् ॥६३॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे षष्टः सर्गः ॥

आरम्भतः श्लोकाः–२४९+६३=३१२

१. **'सूर्यसमूहवद्भासमानः'** इति दू.कृश्री ।
२. अ.कोशे.१.काण्डे.दिग्वर्गे.११५.श्लोकः ।
३. दृष्टव्यम् ।

Rarest Archiver

Rarest Archiver

॥ अथ सप्तमः सर्गः ॥

Rarest Archiver

॥ अथ सप्तमः सर्गः ॥

[१]अद्रिकायोऽतिकायोऽथ सन्तप्तो भ्रातृमारणात् ।
रथं स्वयम्भुवा दत्तम् आरुरोहार्कभास्वरम् ॥१॥

अथ=त्रिशिरादिनाशानन्तरं **भ्रातृमरणात्**=भ्रातॄणां नाशात् **सन्तप्तः**=दुःखितः **अद्रिरिव**= पर्वत इव **कायो**=देहो यस्य सः **अद्रिकायः** **अतिकायः**=अतिकायनामकः रावणसुतः **अर्कभास्वरं**=सूर्यवत् प्रकाशमानं **स्वयम्भुवा**=ब्रह्मणा **दत्तं** **रथमारुरोह**=आरूढवान् ॥१॥

ब्रह्मणो वरदृप्तोऽसौ ब्रह्महा देवदारणः[२] ।
विष्फारयन् महच्चापं[३] कोपाटोपमुपाययौ ॥२॥

ब्रह्मणश्च=चतुर्मुखस्य **वरतः**=अनुग्रहात् **दृप्तः**=मत्तः **ब्रह्महा**=ब्राह्मणानां हन्ता **देवदारणः** =देवानां नाशकः **असौ**=अतिकायः **महच्चापं** **विष्फारयन्**=शब्दयुक्तं कुर्वन् सन् **कोपा-टोपं**=कोपाधिक्यम् **उपाययौ**=प्राप ॥२॥

कुमुदं विविदं मैन्दं जित्वा नीलादिकान् शरैः ।
विजित्याङ्गदसुग्रीवौ लीलया प्राप राघवम्[४] ॥३॥

सः=अतिकायः **शरैः**=बाणैः **कुमुदादीन्**=कपीन् **जित्वा**, तथा **नीलादिकान्** **अङ्गद-सुग्रीवौ** कर्म **लीलया**=अनायासेन **विजित्य**=पराभूतान् कृत्वा, **राघवं**=रामं **प्राप** ॥३॥

[५]विपक्षवक्षो नावेक्षे [६]मच्छरा नैव पृष्ठगाः ।
निवर्तिष्ये निराशोऽहम् इत्यूचे रावणात्मजः ॥४॥

रावणात्मजः अतिकायः **विपक्षवक्षः**=शत्रुवक्षस्थलं **नावेक्षे**=न द्रक्ष्यामि । 'कोऽपि शत्रुः मत्पुरतः न तिष्ठति' इति भावः ।'तर्हि पृष्ठभागे शराः क्षिप्यन्ताम्'? इत्यत आह- **मदिति** । **मच्छराः**=मद्बाणाः **पृष्ठगाः**=शत्रुदेहचरमभागस्पर्शिनः **नैव** भवन्ति, तस्मात् **निराशः**=युद्ध-

१. **'अतिकायोऽद्रिकायोऽथ'** इति मू.श्लो.पा ।
२. **'देवदारुणः'** इति प्र.व्या । ब.गो च ।
३. **'महाचापम्'** इति दु.कृ.श्री ।
४. **'प्राप स प्रभुम्'** इति मू.श्लो.पा । ब.गो च ।
५. **'विपक्षवक्षान्नावेक्षे'** इति प्र.व्या ।
६. **'मच्छरानेव पृष्ठगान्'** इति ब.गो ।

Rarest Archiver

इच्छारहितः **अहं निवर्तिष्ये**=पुनः पुरं यास्यामि **इत्यूचे** ॥४॥

मानेनासहमानेन तत्र सौमित्रिणा क्षणात् ।

[1]वार्षकेण शरान् घोरान् अतिकायोऽभ्यपद्यत ॥५॥

तत्र=अतिकायोक्तिसमये **मानेन**=अभिमानेन 'गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः'[2] इत्यमरः । चित्तसमुन्नत्या चित्तोत्सेकेन वा निमित्तेन **असहमानेन** 'विपक्षवक्ष' इत्याद्यतिकायोक्तिं श्रुत्वा सोढुमशक्तेन **घोरान् शरान् वार्षकेण**=वर्षणशीलवता **सौमित्रिणा**=लक्ष्मणेन **रणे**=युद्धे **अतिकायः अभ्यपद्यत**=प्राप्तः । 'पद=गतौ' कर्मणि लङ् ॥५॥

ननु बालोऽसि सौमित्रे न बली नापि चास्त्रवित् ।

गच्छ तिष्ठ मुमूर्षुश्चेदिति रावणिरभ्यधात् ॥६॥

लक्ष्मणं दृष्ट्वा, अतिकायः किम् अकरोत्? इत्यत आह– **नन्विति** । **हे सौमित्रे**= लक्ष्मण ! त्वं **बालः**=बाल्यवयस्कः **असि**=भवसि **ननु**=निश्चितम् । **बली**=बलवान् **न** असि, **अस्त्रविदपि**=अस्त्रज्ञोऽपि यतो **न** भवसि, तस्माद् **गच्छ** मम पुरतः अन्यत्र याहि । **चेद्**=यदि त्वं **मुमूर्षुः**=मर्त्तुकामोऽसि तर्हि मत्पुरतः **तिष्ठ**=वर्तस्व । **इति रावणिः**= अतिकायः **अभ्यधात्**=अवोचत् ॥६॥

बालस्य किमवद्यं मे बालो हि प्राक् त्रिविक्रमः ।

विक्रमस्व पुरा मृत्योः इत्यूचे लक्ष्मणो रिपुम् ॥७॥

लक्ष्मणः प्रत्युत्तरम् आह– **बालस्ये**ति । हे अतिकाय ! **बालस्य मे**=मम **अवद्यं**=दोषः **किं?** न किमपि । **प्राक्**=पूर्वं **त्रिविक्रमः**=वामनः **बालो हि**=बालो ननु । त्वं तु **मृत्योः**=मरणात् **पुरा**=पूर्वं **विक्रमस्व**=पराक्रमं कुरुष्व । **इति लक्ष्मणः रिपुम्**=अतिकायम् **ऊचे**=अब्रवीत् ॥७॥

रणं द्रष्टुं नभो भेजुः तयोर्वीरकुमारयोः ।

पक्षपाते परिक्षिप्ता उभयेऽपि सुरासुराः ॥८॥

---

१. अ) **'वार्षिकेण'** इति मू.श्लो.पा । आ) **'वर्षकेण'** इति ब.गो । २. अ.कोशे.१.काण्डे.नाट्यवर्गे.२२५.श्लोकः ।

Rarest Archiver

पक्षपातेन=सहायत्वेन **परिक्षिप्ताः**=आकृष्टाः, यद्वा **पक्षपातेन**=बलप्रदत्वेन **परिक्षिप्ताः**=उद्युक्ताः 'पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु'[१] इत्यमरः । **उभयेऽपि**=द्विप्रकाराः **सुरासुराः**=सुराः असुराश्च, वीरौ च तौ कुमारौ च तयोः **वीरकुमारयोः**=लक्ष्मणातिकाययोः **रणं**=युद्धं **द्रष्टुं नभः**=अन्तरिक्षं **भेजुः**=प्रापुः ॥८॥

एकं पञ्च च चिक्षेप सोऽतिकायः शरोत्तमान् ।

[२]तान् प्राप्तान् शरैस्तीक्ष्णैः चिच्छेद भरताग्रजः ॥९॥

सः=अतिकायः **प्रथमम्**=एकं शरं **चिक्षेप** । अनन्तरं **पञ्च शरोत्तमांश्च चिक्षेप** । **भरताग्रजः**=लक्ष्मणः **प्राप्तान्**=स्वसमीपमाप्तान् **तान्**=शरोत्तमान् **तीक्ष्णैः**=शरैः **चिच्छेद** =द्विधा कृतवान् ॥९॥

आकर्णपूर्णमाकृष्य लक्ष्मणो मुक्तवान् शरम् ।

ललाटं पाटयामास रिपोः सादं च सोऽकरोत् ॥१०॥

लक्ष्मणः आकर्णपूर्णं=कर्णपर्यन्तं यथा तथा ज्याम् **आकृष्य, शरं मुक्तवान्**=मुमोच । **सः**=शरः **रिपोः**=अतिकायस्य **ललाटं**=फालं **पाटयामास**=विददार । 'पट=विदारणे'लिट् । **स** एव शरः **रिपोः**=अतिकायस्य **सादं च**=मूर्छामपि **अकरोत्**=चकार ॥१०॥

आश्वास्य रावणिर्वीरो वीरोऽसीति ब्रुवन् परम् ।

एकं त्रीन् पञ्च सप्तेति लक्ष्मणायाक्षिपच्छरान् ॥११॥

वीरः रावणिः=अतिकायः **आश्वास्य**=संज्ञां प्राप्य, हे लक्ष्मण ! त्वं **वीरोऽसि इति परं**=लक्ष्मणम् **ब्रुवन्**=वदन् सन् प्रथमम् **एकम्,** अनन्तरं **त्रीन्,** अथ **पञ्च,** पश्चात् **सप्त, इति**=एवं प्रकारेण **शरान् लक्ष्मणाय अक्षिपत्**=चिक्षेप ॥११॥

चिच्छेद तांश्च सौमित्रिः परोऽमुञ्चन्महाशरम् ।

शरेण तेन भिन्नोरा ववर्षेषून्[३] स लक्ष्मणः ॥१२॥

---

१. **'इत्यमरः'** इत्युक्त व्याख्याकारैः । परन्तु अमरकोशे नोपलभ्यते ।

२. **'तानप्राप्तान्'** इति प्र.व्या । ब.गो च ।

३. **'ववर्षेषूः'** इति ब.गो ।

Rarest Archiver

सौमित्रिः तांश्च=शरानपि **चिच्छेद** । **परः** अतिकायः **महाशरम् अमुञ्चत्**=अमुचत् । **तेन**=महता शरेण **भिन्नोराः**=विदारितवक्षस्थलः **सः**=लक्ष्मणः **इषून्**=बाणान् **ववर्ष**= असिञ्चत् । 'वृष=सेचने' लिट् ॥१२॥

[1]असङ्ख्यान् तदिषून् दृष्ट्वा मुमोचेषून्[2] प्रकोपितः ।

असङ्ख्यान् अतिकायश्च नभ आसीत् तमोमयम् ॥१३॥

असंख्यान्=संख्यारहितान् **तदिषून्**=लक्ष्मणबाणान् **दृष्ट्वा**=अवलोक्य, **प्रकोपितः**= सञ्जातकोपः **अतिकायश्च**=अतिकायोऽपि **असंख्यान्**=इषून् **मुमोच**=ववर्ष । **नभः**=अन्त –रिक्षं **तमोमयम्**=अन्धकारेण आवृतम् **आसीत्** ॥१३॥

साम्यं नसहमानोऽथ सौमित्रिर्बाणमन्त्रितम् ।

आग्नेयमस्त्रम् असृजत्[3] तत् सौरेणाक्षिपत् परः ॥१४॥

साम्यम्=तुल्यम् अतिकायेन **नसहमानः**=सोढुम् अक्षमः, नसमासोऽयम् । **सौमित्रिः अथ बाणमन्त्रितं**=बाणे अभिमन्त्रितम् **आग्नेयम्**=अग्निदेवताकम् **अस्त्रम् असृजत्**= विससर्ज । **परः**=अतिकायः **तत् आग्नेयम् अस्त्रं सौरेण**=सूर्यदेवताकेन अस्त्रेण **अक्षिपत्**=निरास ॥१४॥

मुमोच रावणिर्याम्यं वायव्येन निरस्य तत् ।

चिच्छेद तच्छिरो बाणैः बाहू च भरताग्रजः ॥१५॥

रावणिः=अतिकायः **याम्यं**=यमदेवताकम् अस्त्रं **मुमोच** । **भरताग्रजः**=लक्ष्मणः **वायव्येन** =वायुदेवताकेन अस्त्रेण **तत्**=याम्यं **निरस्य**=निराकृत्य, **तच्छिरः**=अतिकायमस्तकं तस्य **बाहू च**=भुजावपि **बाणैः चिच्छेद** ॥१५॥

द्विशिराः स चतुर्बाहुः अतिकायो व्यदृश्यत ।

चिच्छेद तानि चाङ्गानि[4] लाघवाद् राघवानुजः ॥१६॥

---

१. **'असङ्ख्यास्तदिषूर्दृष्ट्वा मुमोचेषूः प्रकोपितः । असङ्ख्या अतिकायश्च'** इति ब.गो ।

२. **'ववर्षेषून्'** इति मू.श्लो.पा ।

३. **'व्यसृजत्'** इति मू.श्लो.पा । ब.गो च ।

४. **'तानि जातानि'** इति वा.वे । प्र.व्या च ।

Rarest Archiver

सः=अतिकायः **द्विशिराः**=शीर्षद्वयवान्[१] **चतुर्बाहुः**=बाहुचतुष्टययुक्तः सन् सर्वैः **व्यदृश्यत** =दृष्टः । **राघवानुजः**=लक्ष्मणः **लाघवात्**=लघुत्वात्, शीघ्रम् इति यावत् । **तानि**=शिर आदीनि **अङ्गानि**=अवयवान् **चिच्छेद** ॥१६॥

[२]द्विगुणास्योऽभवत् सोऽथ छिन्नश्छिन्नः पुनः पुनः ।

तं विषण्णं विवर्णास्यं सौमित्रिं वायुरब्रवीत् ॥१७॥

अथ=अङ्गच्छेदनान्तरं **पुनः पुनः छिन्नः छिन्नः** सन् **द्विगुणास्यः**=द्विगुणीकृतवक्त्रः, द्विगुणबाहुश्च अभवत् । **विवर्णास्यं**=विगतकान्तियुक्तमुखं **विषण्णं**=भयं प्राप्तं **तं सौमित्रिं** =लक्ष्मणं **वायुः**=मुख्यवायुः 'अतिकायस्य अदृश्यः सन्, अतिकायः यथा न शृणोति तथा' **अब्रवीत्** । अत एवोक्तं– 'रक्षः सुतस्याश्रवणीयम्'[३] इति ॥१७॥

ब्राह्मेणास्त्रेण वध्योऽयं तात नैवापरैरिति ।

तद् दिव्यं वचनं[४] श्रुत्वा विरिञ्चास्त्रं स सन्दधे ॥१८॥

हे तात=बालक लक्ष्मण ! **अयम्**=अतिकायः **ब्राह्मेण**=ब्रह्मदेवकेन अस्त्रेण **वध्यः**=हन्तुं योग्यः । **अपरैः**=अस्त्रैः **नैव वध्य इति** अब्रवीत् । लक्ष्मणः **दिव्यं**=दिवि भवम्, अलौकि–कं वा **तत्**=वायुना उक्तं **वचनं श्रुत्वा, विरिञ्चास्त्रं**=ब्रह्मास्त्रं **सन्दधे**=जग्राह ॥१८॥

मुमोच ब्राह्ममस्त्रं तत् स ब्रह्मजनकानुजः ।

ससूताश्वरथं तूर्णम् अतिकायं ददाह तत् ॥१९॥

ब्रह्मजनकानुजः=चतुर्मुखपितृरामानुजः[५] **सः**=**लक्ष्मणः तत्**=प्रसिद्धं **ब्राह्मम् अस्त्रं मुमोच** । **तत्**=ब्रह्मास्त्रं कर्तृ **ससूताश्वरथं**=सारथि,वाजि,रथसहितम् **अतिकायं** कर्म **तूर्णं** =शीघ्रं यथा तथा **ददाह**=भस्मीचकार ॥१९॥

निहत्य वैरिणं वीरो रामं रामानुजोऽव्रजत् ।

प्रणतं प्रणयेनेशः परिरेभेऽथ लक्ष्मणम् ॥२०॥

---

१. **'द्विशीर्षवान्'** इति वा.वे ।
२. **'द्विगुणाङ्गोऽभवत्'** इति मू.श्लो.पा । ब.गो. च ।
३. श्रीम.भा.ता.नि.८.अ.६१.श्लो ।
४. अ) **'तस्यैवं वचनं श्रुत्वा'** इति मू.श्लो.पा ।
आ) **'तद् दिव्यवचनं'** इति प्र.व्या । ब.गो च ।
५. **'चतुर्मुखब्रह्मजनकानुजः लक्ष्मणः'** इति वा.वे ।

Rarest Archiver

वीरः=रामानुजो लक्ष्मणः **वैरिणम्**=अतिकायं **निहत्य**=हत्वा, **रामम् अव्रजत्**=प्राप । **अथ ईशः**=रामः **प्रणतं**=नमस्कृतं लक्ष्मणं **प्रणयेन**=स्नेहेन **परिरेभे**=आलिलिङ्गे ॥२०॥

रावणं पुत्रशोकार्तं विलप्य क्रोधमाश्रितम् ।

प्रयाणाभिमुखं[1] प्रेक्ष्य खरपुत्रोऽभ्यभाषत ॥२१॥

पुत्रशोकार्तं=पुत्रनाशजन्यशोकेन दुःखितं **विलप्य**=प्रलापं कृत्वा, **क्रोधं**=कोपम् **आश्रितं प्रयाणाभिमुखं=**युद्धाय गन्तुमुद्युक्तं **रावणं प्रेक्ष्य**=दृष्ट्वा, **खरपुत्रः**=जनस्थाने हतखर–सूनुः **अभ्यभाषत**=उवाच ॥२१॥

राजन् नियोजनीयोऽहं रणार्थं रणपण्डितः ।

निहत्य मत्पितृरिपुं सबलं त्वां प्रसादये ॥२२॥

हे राजन्=रावण ! **रणपण्डितः**=युद्धकुशलः **अहं रणार्थं**=युद्धार्थं **नियोजनीयः**=प्रेष–णीयः अस्मि । गत्वा किं करिष्यसि? इत्यत आह– **निहत्ये**ति । **सबलं=**सेनया सहितं **मत्पितृरिपुं**=मम पितुः खरस्य हन्तारं रामं **निहत्य**=नाशयित्वा **त्वां प्रसादये**=तोषये ॥२२॥

इत्युक्त्वा मन्युरक्ताक्षो मकराक्षो महाबलः ।

रावणेन समादिष्टो रथी धन्वी च निर्ययौ[2] ॥२३॥

मन्युरक्ताक्षः=कोपेन रक्तनेत्रः **महाबलः मकराक्षः**=तन्नामखरपुत्रः **इति=**पूर्वोक्तप्रकारेण रावणम् **उक्त्वा, रावणेन समादिष्टः**=आज्ञप्तः सन् **रथी**=रथवान् **धन्वी**=धनुष्मान् सन् **निर्ययौ**=पुरात् निर्गतः ॥२३॥

राक्षसान् मकराक्षस्य पुरोगान् कपिपुङ्गवाः[3] ।

नानाविधायुधान्[4] सङ्ख्ये निजघ्नुः सशिलानगाः ॥२४॥

सशिलानगाः=शिलापर्वतादिभिर्युक्ताः **कपिपुङ्गवाः**=कपिश्रेष्ठाः **नानाविधायुधान् मकरा – क्षस्य पुरोगान्**=पुरतो गन्तॄन् **राक्षसान् संख्ये**=युद्धे **निजघ्नुः**=हिंसितवन्तः ॥२४॥

१. ***'निर्याणाभिमुखम्'*** *इति प्र.व्या ।* ब.गो.च । २. **'धन्वी विनिर्ययौ'** इति दू.कृ.श्री । ब.गो.च ।
३. **'कपिकुञ्जराः'** इति मू.श्लो.पा । ४. **'नानाविधायुधाः'** इति मू.श्लो.पा ।

Rarest Archiver

नीलाङ्गदादीन् सुग्रीवं शरैर्विद्राव्य वीर्यवान् ।

लक्ष्मणेषूनगणयन्[1] रामं प्राप खरात्मजः ॥२५॥

वीर्यवान् खरात्मजः=मकराक्षः **नीलाङ्गदादीन्**=कपीन् **सुग्रीवं** च **शरैः विद्राव्य**=द्रावयित्वा, **लक्ष्मणेषून्**=लक्ष्मणबाणान् **अगणयन्**=अपरिगणयन् सन् **रामं प्राप** ॥२५॥

पश्यामि राम देव त्वां मत्पितृघ्नमकिञ्चनम् ।

करिष्ये निष्क्रियामित्थं मकराक्षोऽब्रवीत् प्रभुम् ॥२६॥

हे राम=देव ! न विद्यते किञ्चन यस्य सः तम् **अकिञ्चनं**=दरिद्रं **त्वां पश्यामि** । अहं **मत्पितृघ्नं**=मम पितरं खरं हतवन्तं त्वां निहत्य, **निष्क्रियां**=प्रतीकारं **करिष्ये** । **इत्थम्**=एवं –प्रकारेण **मकराक्षः प्रभुं**=रामम् **अब्रवीत्** ॥२६॥

[2]मत्कङ्कपत्रैर्निहतः कङ्कानां निष्क्रियां[3] भवान् ।

करिष्यते निजैर्मांसैः इति रामस्तमब्रवीत् ॥२७॥

हे मकराक्ष ! मत्कङ्कपत्रैः=मम बाणैः **निहतः**=मृतः **भवान् निजैः**=स्वीयैः **मांसैः**=आमिषैः **कङ्कानां**=कङ्कनामकानां पक्षिणां, तदुपलक्षितसृगालादीनामपि **निष्क्रियां** =प्रतीकारं **करिष्यते** । 'शेषे प्रथमः' । **इति रामः तं**=मकराक्षम् **अब्रवीत्** ॥२७॥

ववर्ष बाणान् दुष्टोऽसौ[4] रामश्चिच्छेद तान् शरैः ।

ववर्ष रामश्च शरान् अस्त्रैः अस्त्राण्यवारयत् ॥२८॥

दुष्टः=मदोन्मत्तः, गर्ववान् इति यावत् । **असौ**=मकराक्षः **बाणान् ववर्ष** । **रामः शरैः तान्**=बाणान् **चिच्छेद** । **रामश्च शरान् ववर्ष** । मकराक्षः **अस्त्रैः** रामास्त्राणि **अवारयत्**=निवारितवान् ॥२८॥

रामः स्मितमुखो बाणैः सरथं सारथिं क्षणात् ।

उदारो दारयामास स शूली च खमाप्लुतः ॥२९॥

---

१. **'लक्ष्मणेषूरगणयन्'** इति प्र.व्या । ब.गो.च ।
२. ***'मत्कङ्कपत्रैर्विहतः'*** इति वा.वे । प्र.व्या च ।
३. **'निष्कृतिं'** इति मू.श्लो.पा ।
४. **'दुप्तोऽसौ'** इति वा.वे ।

Rarest Archiver

स्मितमुखः=स्मितयुक्तास्यः **उदारः**=उत्कृष्टः **रामः बाणैः सरथं**=रथेन सहितं **सारथिं**=सूतं **च क्षणाद् दारयामास**=विदारितवान् । **शूली**=शूलधरः **सः**=मकराक्षः **खम्**=आकाशम् **आप्लुतः**=प्राप्तः ॥२९॥

चिक्षेप राक्षसः शूलं रामश्चिच्छेद तच्छरैः ।

चिच्छेद च शरेणास्य शिरः कुण्डलमण्डितम् ॥३०॥

राक्षसः=मकराक्षः **शूलं** रामे **चिक्षेप**=निरास । **रामः तत् शूलं शरैः चिच्छेद** । अनन्तरं **रामः कुण्डलमण्डितं**=कुण्डलाभ्याम् अलङ्कृतम् **अस्य**=मकराक्षस्य **शिरश्च**=शीर्षमपि **चिच्छेद** ॥३०॥

निकरा राक्षसानां ते मकराक्षानुगामिनः ।

परेताः कपिभिः शैलैः परे च प्राद्रवन् पुरीम् ॥३१॥

मकराक्षानुगामिनः=मकराक्षमनुसृत्य अनुगताः **ते**=प्रसिद्धाः **राक्षसानां निकराः**=समूहाः **कपिभिः** कर्तृभिः **शैलैः**=पर्वतैः करणैः **परेताः**=मारिताः । **परे च**=मृतेभ्यः अन्ये राक्षसाश्च **पुरीं**=लङ्कां **प्राद्रवन्**=प्रापुः ॥३१॥

विक्रान्तकान्तकरकाशितकार्मुकं तं रामं रमारमणमेवमवेक्षमाणाः ।

देवोपदेवमुनयो मुदिता मुकुन्दं देवारिवारदमनं प्रववन्दिरेऽत्र ॥३२॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे सप्तमः सर्गः ॥

देवोपदेवमुनयः=देवाः,उपदेवाः,गन्धर्वाः,मुनयश्च **विक्रान्तेन**=पराक्रमेण **कान्ते**=मनोहरे **करे** =हस्ते **काशितं**=शोभमानं कार्मुकं यस्य तम् **विक्रान्तकान्तकरकाशितकार्मुकम्** । [१]यद्वा विक्रान्ते कान्ते करे काशितं कार्मुकं यस्य तम् । अथवा विक्रान्तश्चासौ कान्तकरकाशित–कार्मुकश्च तम् । **रमारमणं**=लक्ष्मीपतिं **रामम् एवं**=पूर्वोक्तप्रकारेण **अवेक्षमाणाः** देवादयः **मुदिताः**=सन्तुष्टाः सन्तः **देवारीणां**=राक्षसानां **वारं**=समूहं **दमयति**=नाशयतीति **देवारि–वारदमनं मुकुन्दं रामं अत्र**=युद्धसमये **ववन्दिरे**=स्तुत्वा नेमुः ॥३२॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे सप्तमः सर्गः ॥

आरम्भतः श्लोकाः–३१२+३२=३४४

---

१. **'यद्वा'** इति पक्षः दू.कृ.श्री मातृकायाम् प्रमादितः ।

Rarest Archiver

Rarest Archiver

॥ अथ अष्टमः सर्गः ॥

Rarest Archiver

॥ अथ अष्टमः सर्गः ॥

निशम्य सम्यङ्मकराक्षमृत्युं सशोककोपाकुलितो दशास्यः ।

सन्नाहयन्नाहवशोभिनीं स्वां सेनां रणायाऽऽशु विनिर्जगाम ॥१॥

मकराक्षमृत्युं=मकराक्षनाशं **सम्यक् निशम्य**=श्रुत्वा **शोककोपाभ्याम् आकुलितः**= व्याकुलीभूतः **सः दशास्यः आहवशोभिनीं**=युद्धे शोभमानां **स्वां**=स्वीयां **सेनां रणाय**= युद्धाय **सन्नाहयन्**=सन्नद्धां कुर्वन् सन्, कारयन् वा **आशु निर्जगाम**=पुराद् बहिर्गतः॥१॥

स कुण्डली भूषणभूषिताङ्गो देदीप्यमानं रथमारुरोह ।

तस्याऽऽतपत्रं सितचामरे च नीलाभ्रभासः परभागभाञ्जि ॥२॥

कुण्डली=कर्णाभरणवान् **भूषणभूषिताङ्गः**=किरीटादिभूषणैः अलङ्कृतावयवः **सः**=रावणः **देदीप्यमानं=**पुनः पुनः अतिशयेन प्रकाशमानं **रथम् आरुरोह**=रथे उपविष्टः । **नीलाभ्र–भासः**=नीलमेघवत् श्यामलस्य **तस्य**=रावणस्य **आतपत्रं**=श्वेतछत्रं **सितचामरे च**=श्वेत –बालव्यजने चेति त्रीणि **परभागभाञ्जि**=वर्णोत्कर्षकराणि बभूवुः । **तस्य=**नीलाभ्रवर्ण –स्य सितातपत्रादिसंबन्धात् शोभाविशेषोऽभूदिति भावः ॥२॥

[1]ते वानरास्तत्र नराशिनाथं नराशिराशिप्रकरैः परीतम् ।

सबाणबाणासनमुल्बणास्यम् आयान्तमालोक्य विदुद्रुवुस्ते ॥३॥

ते वानराः तत्र=युद्धभूमौ **नराशिनाथं नराशिराशिप्रकरैः=**मनुष्याहारैः राक्षसयूथसमूहैः **परीतं**=परिवारितं बाणबाणासनाभ्यां सह वर्तत इति **सबाणबाणासनः तं**, **उल्बणानि** =क्रूराणि **आस्यानि=**लपनानि यस्य तम् **उल्बणास्यम्** 'आननं लपनं मुखम्'[2] इत्यमरः । **आयान्तं**=युद्धाय आगच्छन्तं **तं**=रावणम् **आलोक्य=**दृष्ट्वा **विदुद्रुवुः=**पलायितवन्तः ॥३॥

विंशद्दशास्यस्य विलोचनानि रक्तानि दृष्ट्वा मदमन्युमन्ति ।

भुजांश्च विंशद् भुजगप्रकाशान्[3] कुतूहलं प्राप कुलं कपीनाम् ॥४॥

१.'**तं वानरास्तत्र**' मू.श्लो.पा । ब.गो । २.अ.कोशे.२.का.मनुष्यवर्गे.३५५.श्लोकः । ३.'**भुजगप्रकारान्**' इति प्र.व्या. । ब.गो ।

Rarest Archiver

कपीनां कुलं=समूहः कर्तृ **दशास्यस्य=**रावणस्य **मदमन्युमन्ति मदेन**=अहङ्कारेण **मन्युना**=कोपेन च युक्तानि, मदमन्युज्ञापकानि इति यावत् । **रक्तानि**=रक्तवर्णानि **विंशद्** 'विंशतिशब्दपर्यायोऽयं विशंत् शब्दः'=विंशतिसङ्ख्याकानि **विलोचनानि**=नेत्राणि कर्म तथा **भुजगप्रकाशान्**=सर्पनिभान् **विंशद्=**विंशत्संख्याकान् **भुजांश्च**=भुजानपि **दृष्ट्वा, कुतूहलम्**=आश्चर्यं **प्राप**=ययौ ॥४॥

दंष्ट्राकटूनां मुखकोटराणां महाञ्जनाद्रेरिव कन्दराणाम् ।

लोलाहिजिह्वादशकं चकाशे दिशो दशेव ग्रसितुं सुरारेः ॥५॥

सुरारेः=देवशत्रोः रावणस्य **महाञ्जनाद्रेः**=महाञ्जनपर्वतस्य **कन्दराणामिव=**गुहानामिव स्थितानां **दंष्ट्राणां कटूनां**=दंष्ट्राभिः क्रूराणां **मुखकोटराणां**=मुखाख्यबिलानां सम्बन्धि **लोलाहिजिह्वादशकम्**=अतिचञ्चलसर्पसदृशजिह्वानां[१] 'रसज्ञा रसना जिह्वा'[२] इत्यमरः । **दशकं दश=**दशसंख्याकाः **दिशः**=ककुभः कर्म **ग्रसितुमिव**=अत्तुमिव स्थितं **चकाशे**=अशोभत । 'काशृ=दीप्तौ' लिट् ॥५॥

किं पौरुषं तत् पुरुषादभर्तुः संवर्णनीयं कविभिर्विविच्य[३] ।

कालानलस्येव न यस्य शान्तिः विनेशितुर्वीर्यलयोदवाहम् ॥६॥

पुराषादभर्तुः=राक्षसाधिपतेः रावणस्य **तत्=**प्रसिद्धं **पौरुषं** सामर्थ्यं **कविभिः**=कवीश्वरैः **विविच्य**=विवेकं कृत्वा, **संवर्णनीयं किं**?=न वर्णनीयं, वर्णयितुम् अशक्यमिति यावत् । **कालानलस्य**=प्रलयकालाग्नेः **लयोदवाहं=**प्रलयकालसमुद्रं **विनेव**=विना यथा **शान्तिः** नास्ति तथा **यस्य=**रावणस्य, तत्पौरुषस्य वा **ईशितुः**=समर्थस्य रामस्य **वीर्यलयोदवाहं=** वीर्याख्यलयजलप्रवाहं विना **शान्तिः**=नाशः नास्ति । **तत्पौरुषमिति** पूर्वेण सम्बन्धः ॥६॥

सेनान्य एनं बहुसैन्यवन्तो वीराः सहस्रायुतकोटिसङ्ख्याः ।

नानायुधाढ्याः परिवारयन्तो व्यद्रावयंस्तत्[४] कपिचक्रमाशु ॥७॥

बहुसैन्यवन्तः=बहुसेनायुक्ताः **सहस्रायुतकोटिसंख्याः**=सहस्रायुतकोटिसंख्याकाः **एनं=**

---

१. **'अतिचञ्चलसर्पसमानजिह्वानाम्'** इति दू.कृ.श्री ।
२. अ.कोशे.२.काण्डे.मनुष्यवर्गे.३५७ श्लोकः ।
३. **'विचिन्त्य'** इति मू.श्लो.पा ।
४. **'व्यद्रावयंस्ते'** इति च मू.श्लो.पा ।

Rarest Archiver

रावणं **परिवारयन्तः**=परिवेष्टयन्तः **नानायुधाढ्याः=**नानायुधधराः **वीराः सेनान्यः**=सेनानाय–काः **तत्=**प्रसिद्धं **कपिचक्रं**=कपिसमूहम् **आशु व्यद्रावयन्=**पलायनयुक्तमकुर्वन् ॥७॥

गजो गवाक्षो गवयो वृषश्च सगन्धमादाः सह कत्थनेन ।

रक्षश्चमूं जघ्नुरिमे कपीन्द्राः षड्भिः शरैस्तानतुदद् दशास्यः ॥८॥

सगन्धमादाः=गन्धमादेन सहिताः, गजादयश्चत्वारः कपयः **कत्थनेन**=कुबेरावतारेण कत्थनाख्येन स्वपित्रा सह **इमे**=पूर्वोक्ताः **कपीन्द्राः रक्षश्चमूं=**रावणसेनां **जघ्नुः=** विनाशयामासुः। **दशास्यः तान्**=गजादीन् षट् कपीन्द्रान् **षड्भिः शरैः अतुदत्=**व्यथां प्रापयामास । 'तुद=व्यथने' लङ् ॥८॥

नासत्यसूनू स च शम्भुसूनुः शैलैः प्रजह्रुः कुपिता दशास्यम् ।

शरैः स शैलाञ्छकलीचकार त्रिभिस्त्रिभिः पातितवानिमांश्च ॥९॥

नासत्यसूनू=अश्विनपुत्रौ मैन्दविविदौ **सः=**प्रसिद्धः **शम्भुसूनुः**=ब्रह्मपुत्रो जाम्बवान् इति त्रयः **कुपिताः** सन्तः त्रिभिः **शैलैः दशास्यं प्रजह्रुः**=प्रहृतवन्तः । **स च**=सोऽपि **दशास्यः त्रिभिः शरैः** त्रीन् **शैलान् शकलीचकार**=चूर्णितवान् । **त्रिभिः शरैः इमांश्च** =विविदादीन् त्रीनपि **पातितवान्**=पातयामास ॥९॥

अथाङ्गदोऽङ्गीकृतगण्डशैलः प्रचण्डवेगोऽभिपपात रोषात् ।

उदारवीर्यः प्रविदार्य तूर्णं तं रावणः पातितवाञ्छरेण ॥१०॥

अथ=विविदादिपातानन्तरं **प्रचण्डवेगः**=क्रूरवेगः **अङ्गीकृतगण्डशैलः=**गृहीतपाषाणः **अङ्गदः रोषात्**=कोपात् **अभिपपात=**रावणाभिमुख्येन जगाम । **उदारवीर्यः=**उत्कृष्टपराक्रमः **रावणः तम्=**अङ्गदं **तूर्णं=**शीघ्रं **शरेण विदार्य**=भित्त्वा **पातितवान्**=पातयामास ॥१०॥

उग्रं दशग्रीवमथाभ्यरौत्सीत्[१] सुग्रीव उच्चैः प्रगृहीतवृक्षः ।

छित्वा तरुं तस्य विदार्य कण्ठं शरेण तं पातितवान् दशास्यः ॥११॥

अथ=अङ्गदपातानन्तरं **प्रगृहीतवृक्षः सुग्रीवः उग्रं**=क्रूरं **दशग्रीवम् उच्चैः**=स्पष्टं **अभ्य–**

---

१. '**अभ्युरौत्सीत्**' इति । दू.कृ.श्री । प्र.व्या च ।

Rarest Archiver

रौत्सीत्=संरुरोध । 'रुधिर्=आवरणे' लुङ् । **दशास्यः शरेण तरुं**=सुग्रीवहस्ते स्थितं वृक्षं **छित्त्वा, तस्य**=सुग्रीवस्य **कण्ठं**=गलं **शरेण विदार्य, तं=**सुग्रीवं **पातितवान्=** पातयामास ॥११॥

भुजं भुजङ्गाभमथोन्नमय्य तं रावणं ताडितवान्[१] हनूमान् ।

सर्वाननेभ्योऽथ[२] जगाल रक्तं धातुद्रवोऽद्रेरिव कन्दरेभ्यः ॥१२॥

अथ=सुग्रीवपातानन्तरं **हनुमान् भुजङ्गाभं=**सर्पसदृशं स्वभुजम् **उन्नमय्य**=उद्धृत्य **तं रावणं** यदा **ताडितवान्**=तताड तदा **अद्रेः=**पर्वतस्य **कन्दरेभ्यः=**गुहाभ्यः **धातुद्रव इव** =धातुशिलारसो यथा तथा रावणस्य **सर्वाननेभ्यः=**दशेभ्यः मुखेभ्यः **रक्तं**=क्षतजं 'रक्त क्षतजशोणितम्'[३] इत्यमरः । **जगाल**=निस्सृतमभूत् । [४]'गॄ=निगरणे' लिट् । *'अचि विभा –षा'*[५] इति लत्वम् । 'गल=उद्गमने' इति केचित्[६] ॥१२॥

स मूर्च्छितस्तत्र मुहूर्तमुग्रः सञ्ज्ञां गतो विस्मित आबभाषे ।

न पौरुषे स्यात् पुरुषो भवादृक् को मोहयेन्मां भुवनेऽन्य एवम् ॥१३॥

तत्र=तस्मिन् समये **उग्रः**=क्रूरः **सः**=रावणः **मुहूर्तं=**मुहूर्तकालं **मूर्च्छितः**=मूर्च्छां प्राप्तः अनन्तरं **सञ्ज्ञां**=स्मृतिं **गतः विस्मितः**=आश्चर्यं प्राप्तः सन् हे हनूमन् ! **पौरुषे=** परक्रामविषये **भवादृक्=**त्वत्सदृशः **पुरुषः न स्यात्**=न भवेदेव । **भुवने=**लोके **अन्यः=** त्वदन्यः **कः पुरुषः एवं** प्रकारेण **मां मोहयेत्**=मूर्छां प्रापयेत्, **न** कोऽपि । इति **आबभाषे** =उवाच ॥१३॥

लीलाप्रहारोऽयमरे नराश तस्मात् पुनर्जीवसि दुर्जन त्वम् ।

त्वां नन्वहं शोणितपङ्कपेषं न पिष्टवानित्यवदद्धनूमान् ॥१४॥

हनूमान् अरे=नीच ! 'अरे इति नीचसम्बोधनं' **हे दुर्जन ! हे नराश**=राक्षस रावण !

---

१. **'पातितवान्'** इति मू.श्लो.पा ।
२. **'सर्वाननेभ्योऽस्य'** इति दू.कृ.श्री । प्र.व्या । ब.गो च ।
३. अ.कोशे.२.काण्डे.मनुष्यवर्गे.३२९.श्लोकः ।
४. **'गॄ'** इत्यत आरभ्य **'केचित्'** पर्यन्तं वा.वे मातृकायां प्रमादितः लुप्तो वा स्यात् ।
५. अष्टाध्यायी ८।२।२। पा.सूत्रम् ।
६. अत्र **'केचित्'** इति श्रीवि.भू.टीकां, श्रीवि.ती.टीकां च कटाक्षयतीव । अथापि निगरणमिति गिलनमुच्यते । कथमुद्गमनार्थतेति चिन्त्यम् । इति तु– ब.गो.मतम् ।

Rarest Archiver

अयं=मया दत्तः प्रहारः **लीलाप्रहारः**=सर्वशक्त्या प्रहारः न कृत इति यावत् । यस्मात् **तस्मात् त्वं पुनः जीवसि**=प्राणधारणङ्करोषि **अहं त्वां शोणितपङ्कपेषं**=रक्तपङ्कपेषणं यथा भवति तथा **न पिष्टवान्**=न चूर्णितवान् **ननु**=खलु रावणमवदत् ॥१४॥

मत्तोऽसि मत्तोऽपि गृहाण वीर मुष्टिप्रहारं त्वमथेत्युदीर्य ।

सर्वौजसा सर्वजयी दशास्यः सन्ताडयामास समीरसूनुम् ॥१५॥

सर्वजयी=सर्वलोकान् जितवान् **दशास्यः**=रावणः **अथ**=हनूमद्वाक्यानन्तरं हे हनूमन् ! **वीर ! त्वं मत्तः**=मदोन्मत्तः **असि**=भवसि **मत्तोऽपि**=मम सकाशादपि **मुष्टिप्रहारं गृहाण**=स्वीकुरु **इत्युदीर्य=**उक्त्वा **सर्वौजसा=**समस्तबलेन **समीरसूनुं=**हनूमन्तं **सन्ताडयामास**=प्रजहार ॥१५॥

मरुत्सुते विह्वलवन्निषण्णे मा याहि चोरेति मुहुर्ब्रुवाणे ।

लब्धान्तरोऽस्मीति ययौ विचिन्त्य किरन् शरान् नीलसमीपमेषः ॥१६॥

मरुत्सुते हनुमति **विह्वलवत्=**अज्ञजनवञ्चनार्थं किञ्चित् परवशवत् **निषण्णे**=उपविष्टे सति **हे चोर=**रावण ! **मा याहि**=न गच्छेति **मुहुः** मुहुः=पुनः पुनः **ब्रुवाणे=**वदति सति **एषः**=रावणः तत्र **लब्धान्तरः**=लब्धावकाशः **अस्मीति विचिन्त्य**=विचार्य **शरान्=**बाणान् **किरन्**=क्षिपन् सन् **'नीलसनीलं, नीलसनीडं'** क्वचित्, **'नीलसमीपम्'** इति पाठः[१] **नीलसमीपं=**नीलस्य कपेःसमीपं **ययौ** । ॥१६॥

[२]**अप्यात्ममुक्तेषु विदारितेषु नगेषु नीलो ध्वजमारुरोह ।**

दशाननस्याथ धनूरथाश्वान् आचक्रमे तस्य शिरांसि चाऽशु ॥१७॥

नीलः=कपिसेनानायकः **आत्ममुक्तेषु आत्मना=**स्वेन **मुक्तेषु=**क्षिप्तेष्वपि **नगेषु**=वृक्षेषु, पर्वतेषु वा रावणेन **विदारितेषु**=चूर्णीकृतेषु सत्सु **अथ**=अनन्तरं **दशाननस्य ध्वजम् आरुरोह** । **धनूरथाश्वान् धनुः=**चापं **रथं अश्वांश्च तस्य**=रावणस्य **शिरांसि च आशु**=शीघ्रम् **आचक्रमे**=आक्रमणं कृतवान् । 'क्रमु=पादविक्षेपे' लिट् । 'सर्वत्र पादविक्षेपं – कृतवान्' इति यावत् ॥१७॥

---

१. पाठान्तरम् अभिहितम् टीकाकारेण । उपलब्धासु मातृकासु **'नीलसमीपम्'** इत्येव ।

२. **'अथात्ममुक्तेषु'** इति मू.श्लो.पा । प्र.व्या च ।

Rarest Archiver

निरीक्ष्य तं राक्षसराट् चुकोप ननाद नीलोऽथ च कोपयंस्तम् ।

जडीकृतस्तेन स रावणोऽलं[1] सराघवास्ते हरयोऽहसंश्च[2] ॥१८॥

राक्षसराट्=राक्षसश्रेष्ठो रावणः **तं**=नीलं **निरीक्ष्य**=दृष्ट्वा, **चुकोप**=कोपं कृतवान् । **अथ नीलः तं**=रावणं **च कोपयन्**=पुनरपि कोपं प्रापयन्सन् **ननाद**=सिंहनादं चकार । **अलम्**=अत्यन्तं **तेन**=नीलेन **जडीकृतः**=जडवत्कृतः **सः**=रावणः अभूत् । तदा **सराघवाः**= रामेण सहिताः **ते हरयः**=कपयः **च अहसन्**=हासमकुर्वन् । 'हसे=हसने' लङ् ॥१८॥

मा गाः कपे कौतकमात्मलौल्यात् मद्विद्धमात्मानमव प्रभुश्चेत् ।

इत्थं ब्रुवाणो धनदानुजोऽयम् आग्नेयमस्त्रं विमुमोच तस्मै ॥१९॥

हे कपे=नील ! **आत्मलौल्यात् आत्मनः**=स्वस्य **लौल्यात्**=चञ्चलत्वाद् 'अहं चञ्च – लोऽस्मीति' **कौतुकम्**=आश्चर्यबुद्धिं **मा गाः**=न आप्नुहि । माङ्योगे *'इणो गा लुङि'*[3] त्वं **चेत्**=यदि **प्रभुः**=समर्थः तर्हि **मद्विद्धं**=मया ताडितम् **आत्मानं**=तव देहं **अव**=रक्ष । **इत्थं**=पूर्वोक्तप्रकारेण **ब्रुवाणः**=वदन् **धनदानुजः**=कुबेरानुजोऽयं रावणः **तस्मै**= नीलाय **आग्नेयास्त्रं विमुमोच** ॥१९॥

अग्नेस्तनूजः स्वयमग्निभावान्ममार नास्त्रेण पतंश्च भूमौ ।

तं रावणं राममभिद्रवन्तं रुरोध सौमित्रिरमित्रहन्ता ॥२०॥

अग्नेस्तनूजः=अग्निपुत्रो नीलः स्वयं **स्वस्याग्निभावात्**=अग्निस्वरूपत्वात् **भूमौ पतंश्च** पतितोऽपि **अस्त्रेण** आग्नेयास्त्रेण **न ममार**=मृतो न अभूत् । **अमित्रहन्ता**=शत्रुनाशकः **सौमित्रिः**=लक्ष्मणः **रामम् अभिद्रवन्तं**=रामाभिमुख्येन गच्छन्तं **तं रावणं रुरोध**= निवारितवान् । 'रुधिर्=आवरणे' लिट् ॥२०॥

दिष्ट्याऽसि दृष्टो विगतायुरद्य मर्त्येति मर्त्याशननाथ ऊचे ।

शूरा न गर्जन्ति निशाचरेति धुन्वन् धनुर्लक्ष्मण आचचक्षे ॥२१॥

---

१. **'राक्षसोऽलम्'** इति प्र.व्या ।

२. **'हरयोऽहसन् स्म'** इति मू.श्लो.पा ।

३. अष्टाध्यायी २।४।४५ पा.सूत्रम् ।

Rarest Archiver

मर्त्याशननाथः=मनुष्यभक्षकराक्षसानां स्वामी रावणः **हे मर्त्य=**मरणशील लक्ष्मण ! **विगतायुः**=आसन्नमरणः त्वं **अद्य=**ईदानीं **दिष्ट्या=**दैवयोगात्[1] मया **दृष्टोऽसि**=मद्दृष्टिविषयो भवसि इति **ऊचे** । **धनुः**=चापं **धुन्वन्**=कम्पयन् सन् **लक्ष्मणः हे निशाचर=**दिवा-सञ्चाररहित, तस्कर इति यावत्, रावण ! **शूराः न गर्जन्ति**=दिष्ट्येत्यादिप्रकारेण न भाषन्ते इति **आचचक्षे**=उवाच ॥२१॥

सप्तार्चिराभानथ सप्त बाणान् निशाचरेशो निशितान् मुमोच ।

चिच्छेद रामावरजः शरैस्तान् शरानमुञ्चच्च दशाननाय ॥२२॥

अथ=लक्ष्मणवाक्यानन्तरं **निशाचरेशः**=रावणः **सप्तार्चिराभान्=**वह्नितुल्यान् [2]**निशितान्** =शाणोल्लीढान् **सप्त बाणान् मुमोच** । **रामावरजः तान्** रावणमुक्तान् **शरान् शरैः चिच्छेद** । **दशाननाय शरान् अमुञ्चच्च** ॥२२॥

तान् रावणश्चाच्छिनदाशु बाणैः [3]अमुञ्चतां तावपि बाणसङ्घान् ।

धनुर्धराणां प्रवरौ धरण्यां जिगीषया लक्ष्मणराक्षसेन्द्रौ ॥२३॥

रावणः तान्=लक्ष्मणमुक्तान् बाणान् **बाणैः आशु अच्छिनत्** । अथ **धरण्यां**=भूमौ स्थितानां **धनुर्धराणां** मध्ये **प्रवरौ**=श्रेष्ठौ **तौ**=प्रसिद्धौ **लक्ष्मणराक्षसेन्द्रौ बाणसङ्घान् अमुञ्चताम्=**परस्परं मुक्तवन्तौ । 'मुचेः'[4] लङि प्रथमपुरुषे द्विवचनम् ॥२३॥

स्वयम्भुवा दत्तममोघमुग्रं स रावणो बाणवरं मुमोच ।

स लक्ष्मणस्यादलयल्ललाटं पपात सौमित्रिरवाप्तमोहः ॥२४॥

सः रावणः स्वयम्भुवा=चतुराननेन **दत्तम् उग्रं**=क्रूरम् **अमोघं**=सफलं **बाणवरं**=शरश्रेष्ठं लक्ष्मणाय **मुमोच** । **सः**=रावणमुक्तः शरः **लक्ष्मणस्य ललाटं**=फालम् **अदलयत्**= विददार । 'दल=विदारणे'[5] लङ् । **अवाप्तमोहः=**आप्तमूर्छः **सौमित्रिः**=लक्ष्मणः भूमौ **पपात** ॥२४॥

---

१. **'दैववशात्'** इति दू.कृ.श्री ।

२. **'निशितान्'** इत्यतः **'रामावरजः'** पर्यन्तं वा.वे मातृकायां लुप्तः ।

३. **'ववर्षतुस्तावथ बाणसङ्घान्'** इति मू.श्लो.पा ।

४. **'मुचेः** इतिधातोः 'मुचॢ=मोक्षणे इत्यर्थः । वै.सि.कौमुद्याम् ।

५. **'दल=विदारणे'** धातुरयं चुरादिषु पठ्यते । तस्य लङि रूपम्-अदालयदिति । तस्माद् भ्वादेर्दलतेरिदं रूपमिति ब.गो ।

Rarest Archiver

रथादवप्लुत्य स रावणोऽपि क्षणादभिद्रुत्य बलाच्चकर्ष ।

यावत् स तावत् स्मरति स्म रूपं शेषं निजं शेषशयानुजन्मना ॥२५॥

स रावणोऽपि रथाद् अवप्लुत्य=अवतीर्य **क्षणादभिद्रुत्य**=लक्ष्मणसमीपं प्राप्य **बलात् यावत्**=यदा **चकर्ष तावत्**=तदा **शेषशयानुजन्मा** शेषशयस्य=अनन्तशयनस्य रामस्य **अनुजन्मा**=अनुजो लक्ष्मणः **शेषं**=साक्षात् शेषात्मकं **निजरूपं**=स्वमूलरूपं **स्मरति स्म** =अस्मरत् ॥२५॥

विंशद्भिरप्यात्मभुजैः प्रगृह्य दुष्टेन कृष्टोऽपि चचाल नायम् ।

गिरिस्तनी सप्तसमुद्रवस्त्रा मही चकम्पे महिलेव भीता ॥२६॥

दुष्टेन=दोषयुक्तेन रावणेन **विंशद्भिः**=विंशतिसंख्याकैरपि **आत्मभुजैः**=स्वबाहुभिः **प्रगृह्य** =गृहीत्वा **कृष्टोऽपि अयं**=लक्ष्मणः **न चचाल**=चलितो न बभूव । किन्तु **गिरिस्तनी**= पर्वताख्यस्तनवती **सप्तसमुद्रवस्त्रा**=सप्तसमुद्राख्यवसनवती **मही**=भूमिः **भीता**=भयं प्राप्ता **महिलेव**=योषिदिव **चकम्पे**=चचाल । 'कपि=कम्पने'[१] लिट् ॥२६॥

भूमण्डलं सर्षपकल्पमल्पं विभाति पातालसमेतमेतत् ।

सहस्रमुर्ध्नोऽस्य बतैकमूर्ध्नि प्रसह्य को नाम हरेत् तमेनम् ॥२७॥

पूर्वश्लोके 'मही चकम्पे लक्ष्मणो न चचाल' इत्युक्तम् । तस्य सामर्थ्यम् आह– **भूमण्डलम्** इति । **सहस्रमूर्ध्नः**=सहस्रशिरसः **अस्य**=लक्ष्मणमूलरूपस्य शेषस्य **एकमूर्ध्नि**=एकस्मिन् शिरसि **पातालसमेतम्**=अतलादिपातालान्तैः अधस्तलसप्तलोकैः युक्तं **एतत्**=प्रत्यक्षादिप्रमाणसिद्धं **भूमण्डलं**=भूगोलं **सर्षपकल्पं**=तुन्दुभतुल्यं सत् **अल्पं**=स्वल्पं यथा तथा **विभाति**=शोभते **तं**=तादृशं शेषात्मकम् **एनं**=लक्ष्मणं **को नाम**= कः प्रसिद्धः पुरुषः? **प्रसह्य**=बलात्कृत्य **हरेत्**=अपहरेत्? न कोऽपीत्यर्थः ॥२७॥

क्रुद्धो विनिष्पत्य[२] मरुत्तनूजः प्रोद्यम्य मुष्टिं प्रजहार घोरम्[३] ।

सर्वैर्मुखैः शोणितमुद्गिरन् स पौलस्त्यपुत्रो मृतवत् पपात ॥२८॥

१. **'कपि=चलने'** इत्यपि स्यात् । वै.क.सि.कौमुदी ।
२. **'क्रुद्धोऽभिनिष्पित्य'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।
३. **'चोग्रम्'** इति प्र.व्या ।

Rarest Archiver

मरुत्तनूजः=हनूमान् **क्रुद्धः सन् विनिष्पत्य**=रावणसमीपम् आगत्य **मुष्टिम् उद्यम्य=** उन्नमय्य **घोरं**=भयङ्करं रावणं यदा **प्रजहार**=तताड तदा **पौलस्त्यपुत्रः पौलस्त्यस्य**= पुलस्त्यपुत्रस्य विश्रवसः **पुत्रः**=रावणः **सर्वैः**=दशभिः **मुखैः**=लपनैः **शोणितं=**क्षतजम् **उद्गिरन्**=वमन् सन् **मृतवत्=**मृत इव **पपात** ॥२८॥

सौमित्रिमार्तं पतितं विलोक्य प्रेमाकुलात्मा प्रतिगृह्य दोर्भ्याम् ।

निन्ये हनूमान् परमोपकण्ठं मातेव तोकं[१] जनकोपकण्ठम् ॥२९॥

[२]**प्रेमाकुलात्मा=**दयया व्याप्तमनाः **हनुमान् आर्तं=**प्राप्तमुर्च्छा भूमौ **पतितं सौमित्रिं**= लक्ष्मणं **विलोक्य**=दृष्ट्वा, **दोर्भ्यां**=हस्ताभ्यां **प्रतिगृह्य, माता**=जननी **जनकोपकण्ठम्=** पितृसमीपं **तोकमिव=**शिशुं यथा नयति तथा **सौमित्रिं परमोपकण्ठं**=परमस्य रामस्य समीपं **निन्ये**=प्रापयामास ॥२९॥

स्पृष्ट्वा कराभ्यां करुणाकरस्तं मग्नं ललाटे शरमुज्जहार ।

स राहुमुक्तेन्दुरिवाऽर्तिमुक्तो रराज सौमित्रिरुदारकान्तिः ॥३०॥

करुणाकरः रामः **कराभ्यां**=पाणिभ्यां **तं=**लक्ष्मणं **स्पृष्ट्वा**=परिमृज्य, **ललाटे मग्नं शरम् उज्जहार**=उत्पाटयामास । **आर्तिमुक्तः**=दुःखान्मुक्तः **उदारकान्तिः**=उत्कृष्टकान्तिः **सः सौमित्रिः राहुमुक्तेन्दुरिव**=राहुणा मुक्तो चन्द्रो यथा तथा **रराज**=बभौ ॥३०॥

अवाप्य संज्ञामवलम्ब्य धैर्यं स रावणो राघवमाससाद ।

मदप्रमादप्रविमुष्ट[३] दृष्टिः मतङ्गजः सिंहमिवाप्रसह्यम् ॥३१॥

स रावणः संज्ञां अवाप्य=प्राप्य **धैर्यं**=मनश्चाञ्चल्यराहित्यम् **अवलम्ब्य=**आश्रित्य, **मदेन** जातः यः **प्रमादः=**अनवधानता तेन **मदप्रमादेन प्रविमुष्टा**=अपहृता **दृष्टिः**=ज्ञानं यस्य सः **मदप्रमादप्रविमुष्टदृष्टिः** सन् **मतङ्गजः** करी **अप्रसह्यं=**सोढुम् अशक्यं **सिंहमिव**=सिंहं यथा प्राप्नोति तथा **अप्रसह्यं राघवं=**रामम् **आससाद**=प्राप ॥३१॥

---

१. **'मातेव पोतम्'** इति ब.गो ।

२. **'करुणाकुलात्मा'** इति दू.कृ.श्री ।

३. **'प्रतिमुष्ट'** इति प्र.व्या । ब.गो च ।

Rarest Archiver

भोगीन्द्रभोगप्रतिमं प्रदीप्तं सन्धाय विस्फार्य[1] धनुर्धुनानः ।

अविस्मितः स[2] स्मितवानदीनां जगाद वाणीं जगदेकनाथः ॥३२॥

भोगीन्द्रभोगप्रतिमं=शेषदेहसदृशं **प्रदीप्तम्**=अत्यन्तप्रकाशमानं **धनुः**=चापं **सन्धाय**= गुणेन संयोज्य **विस्फार्य**=धनुषः ज्याध्वनिं कृत्वा, **धनुः धुनानः**=कम्पयन् **अविस्मितः** =आश्चर्यरहितः **स्मितवान्**=मन्दस्मितयुक्तः **जगदेकनाथः=**जगतो मुख्यस्वामी **सः**=रामः **अदीनां**=दैन्यरहितां प्रौढां **वाणीं**=वाचं **जगाद**=उवाच ॥३२॥

स्वयम्भुवं वा भुवनाभिपूज्यं स्वयं भवं वा शरणं गतस्त्वम्[3] ।

न मोक्ष्यसे राक्षस सर्वथाऽपि कृतापराधः समरोद्यमी स्याः ॥३३॥

हे राक्षस=रावण ! **भुवनाभिपूज्यं**=लोकैः पूजनीयं **स्वयम्भुवं वा**=चतुर्मुखं वा **शरणं=** रक्षणमुद्दिश्य **गतः=**प्राप्तः । **स्वयं**=साक्षात् **भवं** वा=शिवं वा शरणं गतः=प्राप्तः । **कृतापराधः त्वं सर्वथाऽपि=**सर्वप्रकारेणापि **न मोक्ष्यसे=**मया मुक्तो न भविष्यसि । तस्मात् **समरोद्यमी**=युद्धार्थं यत्नवान् **स्याः**=भव इति **जगाद** ॥३३॥

एवं ब्रुवाणं भुवनप्रभुं तं प्राभञ्जनिः प्राञ्जलिराबभाषे ।

शत्रौ रथस्थे सति नाथ भूमौ न तिष्ठ शीघ्रं मयि तिष्ठ हीति ॥३४॥

प्राभञ्जनिः=हनूमान् **प्राञ्जलिः** सन् **एवं**=पूर्वोक्तप्रकारेण **ब्रुवाणं=**वदन्तं **भुवनप्रभुं=** लोकनाथं **तं=**रामं **हे नाथ**=स्वामिन् ! **शत्रौ**=रावणे **रथस्थे**=रथे तिष्ठति सति त्वं **भूमौ न तिष्ठ**=स्थितिं न कुरु । किन्तु **मयि शीघ्रं तिष्ठ हि=**निश्चितम् **इति आबभाषे** ॥३४॥

ओमित्यथोक्त्वा पुरुषः पुराणः स मारुतिं मंक्षु समारुरोह ।

स रावणो राघवमाप्य बाणैः दिशो दश द्राक् तिमिरंचकार[4] ॥३५॥

पुराणः=पुरातनः **पुरुषः**=पूर्णषड्गुणः **सः=**रामः **अथ**=हनुमद्वाक्यानन्तरम् **'ॐ' इत्युक्त्वा, मारुतिं=**हनुमन्तं **मंक्षु**=शीघ्रं **समारुरोह** । **सः**=रावणोऽपि **राघवं**=रामम् **आप्य बाणैः दश दिशः** कर्म **द्राक्**=शीघ्रं **तिमिरंचकार** तिमिरेण=अन्धकारेण आवृताः चकार ॥३५॥

---

१. अ) **'सन्धाय विष्फार्य'** इति ब.गो । आ) **'सन्धार्य विस्फार्य'** इति प्र.व्या । २. **'सुस्मितवानदीनाम्'** मू.श्लो.पा । ३. **'शरणागतस्त्वम्'** । इति मू.श्लो.पा । प्र.व्या च । ४. **'तिमिरीचकार'** इति मू.श्लो.पा । दू.कृश्री च ।

Rarest Archiver

सरम्भसम्भिन्नमना दशास्यः शरान् मुमोचानिलनन्दनाय ।

हनूमतोऽवर्धत तैः स्वतेजः[१] प्राज्यैरिवाऽज्यैर्ज्वलतो महाग्नेः ॥३६॥

संरम्भसम्भिन्नमनाः=कोपयुक्तचित्तः, कोपेन विदारितचित्तो वा **दशास्यः अनिलनन्दनाय** =वायुसन्तोषकराय हनूमते **शरान् मुमोच । तैः**=रावणमुक्तशरैः **प्राज्यैः**=बहुलैः **आज्यैः** =घृतैः **ज्वलतः**=ज्वालायुक्तस्य **महाग्नेः**=तेज इव 'ज्वाला यथा वर्धते तथा' **हनूमतः स्वतेजः**=स्वरूपभूतं सामर्थ्यम् **अवर्धत=**अभिवृद्धमभूत् ॥३६॥

प्रहस्य रामः प्रदरप्रवेकैः सप्तींश्च सूतं च निहत्य सद्यः[२] ।

ध्वजं रथं छत्रमुतातिचित्रं चिच्छेद हेतीश्च दशाननस्य ॥३७॥

रामः प्रहस्य=अपहासं कृत्वा, **प्रदरप्रवेकैः**=शरोत्तोमैः 'प्रवेकशब्दः उत्तमवाची' यथोक्तम्– **'उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः'**[३] इति । **सद्यः**=तत्क्षण एव **दशाननस्य सप्तींश्च**=तुरगानपि 'हयसैन्धवसप्तय'[४] इत्यमरः । **सूतं**=सारथिं **च निहत्य**, **उत**=अनन्तरं **ध्वजं**=केतुम्[५] **अतिचित्रं**=अत्यन्ताश्चर्यकरं **छत्रम्=**आतपत्रं **रथं हेतीश्च**= आयुधानि च **चिच्छेद** ॥३७॥

शरेण विद्ध्वा विवशं[६] विधाय शरीरयष्टिं शतमन्युशत्रोः[७] ।

चकर्त कार्तस्वरभास्वरं स रत्नं किरीटं सुरकीर्त्यकीर्तिः ॥३८॥

सुरैः कीर्त्या=कीर्तयितुं योग्या **कीर्तिः** यस्य असौ **सुरकीर्त्यकीर्तिः सः**=रामः **शतमन्युशत्रोः शतमन्योः**=शतक्रतोः इन्द्रस्य **शत्रोः**=रावणस्य **शरीरयष्टिं** यष्टिवत्=दण्ड इव स्थितं **शरीरं शरेण विद्ध्वा**=ताडयित्वा रावणं **विवशं**=परवशं **विधाय**=कृत्वा, **कार्तस्वरभास्वरं**=सुवर्णवत् शोभमानं, सुवर्णमयं वा अत एव शोभमानं **रत्नं**=नवरत्नैः निर्मितं, रत्नखचितम् इति यावत् । **किरीटं**=मुकुटं '*जात्येकवचनं*' **चकर्त**=चिच्छेद ॥३८॥

---

१. **'सुतेजः'** इति मू.श्लो.पा ।
२. **'सप्तीश्च सूतं च निषूद्य सद्यः'** इति मू.श्लो.पा ।
३. श्रीमद्भागवते.२.स्क.९.अ.११.श्लोकः ।
४. अ.कोशे.२.काण्डे.क्षत्रियवर्गे.५०९.श्लोकः ।
५. **'केतनम्'** इति दू.कृश्री ।
६. **'विवशाम्'** इति ब.गो ।
७. **'शतमन्युशत्रोः**=शक्रशत्रोः रावणस्य**'** इति वा.वे ।

Rarest Archiver

तं निर्विषाशीविषवद् विषण्णं कर्तव्यमूढं भगवान् बभाषे ।

अनुज्ञया मे पुरमज्ञ याहि शराहतो नन्वधुना हि राजन्[१] **॥३९॥**

भगवान्=रामः **निर्विषाशीविषवत्**=निर्गतं विषं यस्मात् सः । निर्विषश्चासौ आशीविषः =सर्पश्च स इव **विषण्णं**=भयं प्राप्तं, गतसारं वा । अत एव **कर्तव्यमूढं=**कर्तव्यज्ञान–रहितं **तं**=रावणं **हे राजन्! हि=**यस्मात् **अधुना**=इदानीं **शराहतः**=बाणताडितः **ननु**=खलु तस्मात् **अज्ञः**=मूढः त्वं **मे**=मम **अनुज्ञया पुरं**=लङ्कां **याहि**=गच्छ इति **आबभाषे** ॥३९॥

[२]**भोगानशेषाननुभुङ्क्ष्व शीघ्रं प्रेष्टं जनं तोषय तोषणीयम् ।**

अप्यप्रमत्तः कुरु सर्वकृत्यं रणाय शीघ्रं मरणाय चैहि ॥४०॥

गत्वा किं करोमि ? इत्यत आह– **भोगानि**ति । हे राजन्=रावण ! त्वं भुज्यन्ते= अनुभूयन्त इति **भोगाः**=विषयाः,**अशेषान्**=समस्तान् **भोगान्**=विषयान् **शीघ्रं अनुभुङ्क्ष्व** =विषयानुभवं कुरु । **प्रेष्टम्**=अतिशयेन प्रीतिविषयं **तोषणीयं=**सन्तोषयितुं योग्यं **जनं=** बन्धुवर्गं **तोषय=**सन्तोषयुक्तं कुरु । **अप्रमत्तोऽपि**=प्रमादरहितोऽपि **सर्वकृत्यं**=सर्वकर्तव्यं **कुरु** । **शीघ्रं रणाय**=युद्धाय **मरणाय च**=मरणं निश्चित्यैव **एहि**=आगच्छेति बभाषे ॥४०॥

वाणीमुदारामिति राघवस्य निशम्य यातो नगरीं दशास्यः ।

स्मरन्नसह्यान् रघुनाथबाणान् चिन्तामनन्तां मनसा जगाम ॥४१॥

राघवस्य इति=पूर्वोक्तप्रकारेणोक्तां ताम् **उदाराम्=**उत्कृष्टां **वाणीं=**वाचं **निशम्य**=श्रुत्वा, **नगरीं**=लङ्कां **यातः**=प्राप्तः **दशास्यः असह्यान्**=सोढुमशक्यान् **रघुनाथबाणन्**=रामशरान् **स्मरन्=**चिन्तयन् सन् **अनन्तां**=बहुलां **चिन्तां**=ध्यानं **मनसा=**चित्तेन **जगाम**=प्राप ॥४१॥

स वायसो हंसमिवातिमूढो मत्तो महासिंहमिवेभराजः ।

अहिर्विहङ्गेन्द्रमिवाभियुध्यन्[३] **देवं दशास्यः परितापमाप ॥४२॥**

हंसं=हंसपक्षिणं **अभियुध्यन् वायस इव**=काको यथा **परितापम्** एति । **सिंहमभियुध्यन्**

---

१. **'अनुज्ञया मे पुरमद्य याहि शरार्दितो नन्वधुनाऽसि राजन्'** इति मू.श्लो.पा ।

२. अ) **'यथेष्टभोगाननुभुङ्क्ष्व'** इति ब.गो.सं.पा । आ) **'अशेषभोगाननुभुङ्क्ष्व'** इति च प्र.व्या ।

३. **'अभियुद्ध्य'** इति मू.श्लो.पा । ब.गो च ।

Rarest Archiver

मत्तः=मदोन्मत्तः **इभराजः**=गजश्रेष्ट इव, **विहङ्गेन्द्रं**=गरुडं **अभियुध्यन् अहिरिव**=सर्पो यथा तथा, **देवं**=रामं **अभियुध्यन् अतिमूढः**=अत्यन्ताज्ञः **स दशास्यः परितापम्**= सन्तापम् **आप** =प्राप । 'अधमाद्यपेक्षया दृष्टान्तत्रयम्' इति ज्ञेयम् ॥४२॥

दशमुखविशिखैः शिखिप्रकाशैरपरशरैरपि पातितान् प्लवङ्गान् ।

प्रभुरमृतमयैरपाङ्गपातैरकृत निरस्तरुजः स रामदेवः ॥४३॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे अष्टमः सर्गः ॥

प्रभुः=समर्थः **सः रामदेवः शिखिप्रकाशैः**=वह्निसमानैः **दशमुखविशिखैः**=रावणस्य बाणैः **अपरशरैः**=अपरेषां राक्षसानां बाणैः **अपि पातितान्**=मूर्छादिकं प्रापितान् **प्लवङ्गान् अमृतमयैः**=सुधापूर्णैः **अपाङ्गपातैः**=कटाक्षवीक्षणैः **निरस्तरुजः**=विगतरोगान्, विगतोपद्र–वान् इति यावत् । **अकृत**=चकार । करोतेर्लुङ् ।*'उश्च'*[1] इति सिचः कित्त्वेन गुणाभावे, *'ह्रस्वादङ्गात्'*[2] इति सिचो लुक् ॥४३॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे अष्टमः सर्गः ॥

आरम्भतः श्लोकाः–३४४+४३=३८७

१. अष्टाध्यायी १।२।१२ पा.सूत्रम् ।
२. अष्टाध्यायी ८।२।२७ पा.सूत्रम् ।

Rarest Archiver

Rarest Archiver

॥ अथ नवमः सर्गः ॥

Rarest Archiver

॥ अथ नवमः सर्गः ॥

कुम्भकर्णाग्रजः क्रुद्धः कुम्भकर्णप्रबोधने ।

रक्षसामयुतं भीमम् आदिदेश बलीयसाम् ॥१॥

पूर्वोक्तसर्गान्ते **'नगरीं यातो दशास्यः चिन्तां जगाम'**[1] इत्युक्तम् । ततः किं चकार ? इत्यत आह– **कुम्भे**ति । **क्रुद्धः कुम्भकर्णाग्रजः**=रावणः **कुम्भकर्णप्रबोधने**=कुम्भ–कर्णस्य सुप्तेः उत्थानाय **बलीयसाम्**=अतिशयेन बलवतां **रक्षसां**=राक्षसानां **भीमं**=भयङ्करम् **अयुतं**=दशसहस्रम् **आदिदेश**=आज्ञापयामास ॥१॥

भेरिशङ्खादिवाद्यानां भूरीणां भूरिभिः स्वनैः[2] **।**

ते सन्नादैश्च युगपत् न शेकुस्तत्प्रबोधने ॥२॥

ते=रावणप्रेषिताः[3] राक्षसाः **भूरीणां**=बहुलानां **भेरिशङ्खादिवाद्यानां भूरिभिः**=बहुलैः **स्वनैः** =ध्वनिभिः **युगपत्**=सकृदेव कृतैः **सन्नादैश्च**=सिंहनादैरपि **तत्प्रबोधने**=कुम्भकर्णप्रबोधने **न शेकुः**=समर्था न बभूवुः । 'शक्लृ=शक्तौ' लिट् ॥२॥

श्वासवेगैः पतन्तोऽस्य कृच्छ्रेणान्तिकमागताः ।

शैलैः खड्गाद्यायुधैश्च जघ्नुस्ते रावणानुजम् ॥३॥

अस्य=कुम्भकर्णस्य **श्वासवेगैः**=घ्राणवायुवेगैः **पतन्तः**=भूमौ पात्यमानाः **कृच्छ्रेण**= अतिकष्टेन **अस्य अन्तिकं**=समीपम् **आगताः** । **ते**=राक्षसाः **शैलैः**=पर्वतैः **खड्गाद्यायुधैश्च रावणानुजं**=कुम्भकर्णं **जघ्नुः**=चिच्छिदुः ॥३॥

अङ्गे तुङ्गाद्रिसङ्काशे खरैरुष्ट्रैर्गजादिभिः ।

समन्तात् परिधावन्तो नदन्तो नाप्यबोधयन् ॥४॥

तुङ्गाद्रिसङ्काशे=उन्नतपर्वतसदृशे तस्य **अङ्गे**=शरीरे **खरैः**=राक्षसैः **उष्ट्रैः**=क्रमेलकैः

---

१. श्रीसं.रा.यु.का.८.स.४१.श्लोकः ।

२. **'भूरिनिस्वनैः'** इति प्र.व्या ।

३. **'रावणप्रेरिताः'** इति दू.कृश्री ।

Rarest Archiver

गजादिभिः=गजाश्वाजादिभिः **समन्तात्**=पादादिशिरःपर्यन्तं **परिधावन्तः**=शीघ्रगतिं कुर्वतः अपि **नदन्तः=**ध्वनिं कुर्वन्तोऽपि **नाबोधयन्**=प्रबुद्धं नाकुर्वन् ।'बुध=अवगमने'[१] लङ् ॥४।

केचित् केशान् परे श्मश्रु लोमान्यप्युदमूलयन् ।

शतकुम्भैरथाम्भांसि सिञ्चन्ति स्मास्य कर्णयोः ॥५॥

केचित्=राक्षसाः कुम्भकर्णस्य **केशान्**=शिरोगतरोमाणि **उदमूलयन्**=मूलतः उत्पाटयामासुः । **परे=**राक्षसाः **श्मश्रु**=कपोलचुबुकगतरोमाणि **उदमूलयन्** । अन्ये **लोमानि**= देहगतरोमाण्यपि **उदमूलयन्** । **अथ**=अनन्तरं **केचित् शतकुम्भैः**=शतघटैः पूर्णानि **अम्भांसि=**उदकानि **अस्य**=कुम्भकर्णस्य **कर्णयोः**=श्रोत्रयोः **सिञ्चन्ति स्म**=असिञ्चन्, अपूरयन्निति यावत् । 'षिच=क्षरणे' भूते लट् ॥५॥

अप्रबुद्धं प्रयत्नेन संरम्भात् तं[२] निशाचराः ।

पुनरेवाऽयुधैर्घोरैः चिच्छिदुः क्रोधमूर्च्छिताः ॥६॥

निशाचराः संरम्भात्=कोपपूर्वककृतेन प्रयत्नेन **अप्रबुद्धं**=बाह्यज्ञानरहितं **तं=**कुम्भकर्णं **क्रोधमूर्च्छिताः**=क्रोधपरवशाः सन्तः **पुनरेव घोरैः**=भयङ्करैः **आयुधैः चिच्छिदुः** ॥६॥

[३]**निद्रावशो भुजेनैव कुम्भकर्णो युयोध तान् ।**

पुनश्च भिद्यमानाङ्गः[४] कथञ्चित् प्रत्यबुद्ध्यत[५] ॥७॥

निद्रावशः=निद्राधीनोऽपि **कुम्भकर्णः भुजेनैव तान्**=राक्षसान् **युयोध**=प्रजहार । **पुनश्च=** पुनरपि **भिद्यमानाङ्गः**=विदीर्यमाणावयवः कुम्भकर्णः **कथञ्चित्**=अत्यन्तप्रयासेन **प्रत्यबुध्यत**=सुप्तेरुत्थितोऽभूत् । 'बुध=अवगमने' लङ् ॥७॥

---

१. 'णिजन्तात्' इति शेषः ।

२. **'संरम्भात् ते'** इति प्र.व्या । ब.गो च ।

३. इतः पूर्वं प्र.व्या.सं.पाठे सार्धश्लोकद्वयं पठ्यते –

'तप्ततैलैरयः पिण्डैः शूलैः पार्ष्णिप्रदाहनैः । अयोदण्डविघातैस्ते बोधयन्तो विचुक्रुशुः ॥

अङ्गप्रवर्तनेनास्य भङ्गमापुर्नराशिनः । क्षिपद्भ्यो हस्तपादेभ्यो रक्षांसि क्षयमाययुः ॥

श्वासवातहताः केचित् पतन्तो व्यङ्गतां ययुः' ॥

४. **'च्छिद्यमानाङ्गः'** इति ब.गो ।

५. **'प्रत्यबोध्यत'** इति प्र.व्या ।

Rarest Archiver

स जृम्भमाणः सहसा प्रोत्थितो बुभुजे बहून् ।

मांसराशीन् सरुधिरान् पूर्वमेवोपकल्पितान् ॥८॥

सहसा हटात् **प्रोत्थितः**=शयनादुत्थितः **जृम्भमाणः**=जृम्भणं कुर्वन् **सः**=कुम्भकर्णः **पूर्वमेव=**सुप्तेरुत्थानात्प्रागेव **उपकल्पितान्**=समर्थितान्,सिद्धवत्कृतानिति यावत् । रुधिरैः =रक्तैः सहितान् **सरुधिरान् मांसराशीन्=**आमिषसमूहान् **बुभुजे**=अभक्षयत् ॥८॥

द्विसहस्रकरीरेषु पूर्णां पीत्वाऽथ वारुणीम् ।

ज्येष्ठेन प्रेषितः प्रायात् कुम्भकर्णः सभातलम् ॥९॥

अथ=मांसभक्षणानन्तरं **द्विसहस्रकरीरेषु**=द्विसहस्रघटेषु **पूर्णां=**पूरितां **वारुणीं=**वारुणी–नामकमद्यं **पीत्वा**, **ज्येष्ठेन**=अग्रजेन रावणेन **प्रेषितः**=आकारितः **कुम्भकर्णः सभातलं प्रागात्**=अगमत् ॥९॥

दशाननं वन्दमानः कुम्भकर्णोऽभ्यभाषत ।

त्रयाणां कतमं लोकं संहराणि[1] क्षणादिति ॥१०॥

दशाननं=रावणं **वन्दमानः=**नमन् **कुम्भकर्णः त्रयाणां**=भूः,भुवः,स्वर्गाणां लोकानां मध्ये **कतमं=**कं वा लोकं **क्षणात्**=क्षणमात्रेण **संहराणि**=नाशयेयम् । 'हृञ्=हरणे' लोटि उत्तमपुरुषे एकवचनम् । **इति अभ्यभाषत** ॥१०॥

न भयं लोकपालैः नो भयं तु नरवानरैः ।

रामः सलक्ष्मणो वध्यः त्वयेत्यूचे स रावणः ॥११॥

सः=कुम्भकर्णेन भाषितः **रावणः** हे कुम्भकर्ण **! नः=**अस्माकं **लोकपालैः=**इन्द्रादिभिः **भयं=**भीतिर्नास्ति । **तु**=किन्तु **नरवानरैः नराभ्यां**=रामलक्ष्मणाभ्यां, **वानरैश्च भयं** प्राप्तम् । तस्मात् **सलक्ष्मणो रामः त्वया वध्यः**=हन्तव्य **इत्यूचे** ॥११॥

सकलं कलहस्याथ कारणं शुश्रुवानयम् ।

कुम्भकर्णो बभाषेऽथ नीतिमान् निःश्वसन् मुहुः ॥१२॥

---

१. **'संहरामि'** इति वा.वे । प्र.व्या च ।

Rarest Archiver

अथ=रावणवाक्यानन्तरं **नीतिमान्=**नीतिशास्त्राभिज्ञः **अयं**=प्रसिद्धः **कुम्भकर्णः कलह–स्य**=युद्धस्य **सकलं**=समस्तं **कारणं**=निमित्तं **शुश्रुवान्**=श्रुतवान् सन् **निःश्वसन्**=दीर्घ – श्वासं कुर्वन् सन् **मुहुः**=पुनः **बभाषे** ॥१२॥

रामेणामोघवीर्येण विग्रहोऽयमुपस्थितः ।

अचिरान्मरणायात्र नरकाय परत्र च ॥१३॥

विजयाख्यसञ्जीवप्रकाशदशायामाह[1]– **रामेणे**ति । हे रावण ! **अमोघवीर्येण**=सफलपरा–क्रमेण **रामेण** साकं **उपस्थितः=**प्राप्तः **अयं**=प्रत्यक्षसिद्धः **विग्रहः**=विरोधः **अत्र**= भूलोके **अचिरात्=**शीघ्रं[2] **मरणाय**=प्राणत्यागाय भवति । **परत्र च**=लोकान्तरेऽपि **नरकाय** =दुर्गतिप्राप्तये भवति ॥१३॥

बलिना सन्धिरल्पस्य बलिनोऽल्पेन विग्रहः ।

औदासीन्यं समेन स्याद् इति शास्त्रविनिश्चयः[3] ॥१४॥

राजनीतिम् आह– **बलिने**ति । हे राजन् ! **अल्पस्य=**दुर्बलस्य **बलिना=**बलवता साकं **सन्धिः**=सन्धानं **स्यात्**=भवेत् । **बलिना=**बलिष्ठेन कर्त्रा **अल्पेन**=दुर्बलेन साकं **विग्रहः** =विरोधः **स्यात्** । **समेन**=तुल्येन **औदासीन्यम्=**उपेक्षाबुद्धिः स्यादिति **शास्त्रविनिश्चयः** =नीतिशास्त्रेण कृतः निर्णयोऽस्ति ॥१४॥

अनयं त्वं समाश्रित्य प्राप्तो रामेण विग्रहम् ।

शर एको दहेद्यस्य त्रैलोक्यं सचराचरम् ॥१५॥

'अस्तु एवं निश्चयः' । प्रकृते किम्? इत्यत आह– **अनयमि**ति । **अस्य**=रामस्य **एक** एव **शरः सचराचरं**=स्थावरजङ्गमसहितं **त्रैलोक्यं=**लोकत्रयं **दहेत्**=भस्मीकुर्यात् । तेन **रामेण** साकं **अनयम्=**अनीतिम् **आश्रित्य त्वं विग्रहं=**विरोधं **प्राप्तो**ऽसि=प्राप्तवानसि, इति कुम्भकर्णः बभाषे ॥१५॥

---

१. अ) **'प्रकाशदशामाह'** इति वा.वे । आ) **'प्रवेशदशायामाह'** इति ब.गो ।

२. **'दीर्घम्'** इति वा.वे ।

३. अ) **'शास्त्रस्य निर्णयः'** इति मू.श्लो.पा ।
आ) **'शास्त्रसुनिश्चयः'** इति च ब.गो.सं.पा ।

Rarest Archiver

कुम्भकर्णगिरं श्रुत्वा रावणो वाक्यमब्रवीत् ।

त्वादृशैर्बन्धुभिर्युक्ता[1] राजानः किं न[2] कुर्वते ॥१६॥

रावणः कुम्भकर्णगिरं=वाणीं **श्रुत्वा**, हे कुम्भकर्ण ! **त्वादृशैः**=त्वत्सदृशैः **बन्धुभिः**=भ्रातृभिः **युक्ताः**=सहिताः लोके विद्यमानाः **राजानः**=प्रभवः **किम्** अकृत्यं **न कुर्वते**=न कुर्वन्ति? सर्वं कुर्वन्त्येव । कृञो लटि प्रथमपुरुषे बहुवचनम् । *'अदभ्यस्तात्'*[3] इति झस्य आदेशः । इति **वाक्यम् अब्रवीत्** ॥१६॥

पाल्योऽहं हि त्वया वत्स त्वद्बलेन किमन्यथा ।

ज्येष्ठं गुरुं कथं त्वं मामवजानासि मूर्खवत् ॥१७॥

रावणः **'अनयं त्वं समाश्रित्य'**[4] इत्यस्य उत्तरमुक्त्वा, **'रामेण विग्रहो मरणाय'**[5] इत्यस्य उत्तरमाह– **पाल्य** इति । हे वत्स ! **अहं त्वया पाल्यः हि**=रक्षणीय इति यावत् । **अन्यथा**=मत्पालनाभावे **त्वद्बलेन**=तव सामर्थ्येन **किं** प्रयोजनं? न किमपि । **त्वं मूर्खवत्**=अज्ञानिवत् **ज्येष्ठम्**=अग्रजं 'पितृसमो ज्येष्ठ इति प्रसिद्धेः'[6] **गुरुं**=पूज्यं **मां कथं अवजानासि**=आवमानयुक्तं करोषि? इति रावणो वाक्यम् अब्रवीत् ॥१७॥

अग्रजेनैवमुक्तः स विग्रहायोग्रमानसः ।

त्रिशिखं शूलमुद्धुन्वन् उदतिष्ठत् स निष्ठुरः[7] ॥१८॥

दुर्जीवव्यापारमाह– **अग्रजेनेति । अग्रजेन**=रावणेन **एवं** 'पाल्योऽहम्' इत्यादिप्रकारेण **उक्तः उग्रमानसः**=क्रूरचित्तः **सनिष्ठुरः**=निष्ठुरवाक्येन सहितः **सः**=कुम्भकर्णः **त्रिशिखम्** =अग्रत्रययुक्तं **शूलं**=त्रिशूलम् **उद्धुन्वन्**=कम्पयन् सन् **विग्रहाय**=रणाय **उदतिष्टत्**= उत्थितवान् ॥१८॥

मद्बन्धुनिधनस्याथ कृत्वा निष्कृतिमुत्तमाम् ।

प्रसादयेयं राजंस्त्वां व्येतु ते हृदयज्वरः[8] ॥१९॥

---

१. **'बन्धुभिर्गुप्ता'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।
२. **'किं नु कुर्वते'** इति प्र.व्या ।
३. अष्टाध्यायी ७।१।४.पा.सूत्रम् ।
४. श्रीसं.रा.यु.का.९.सर्गे.१५.श्लोकः ।
५. श्रीसं.रा.यु.का.९.सर्गे.१३.श्लोकः ।
६. 'ज्येष्ठभ्राता पितृसमः' इत्यपि लोकोक्तिः ।
७. **'स निष्ठुरः'** इति पाठे **'सः'** इति पुनरुक्तं भवति । अत एव व्याख्याकारेण– **'सनिष्ठुरः=निष्ठुरवाक्येन सहितः'** इत्यर्थः स्वीकृत इति मन्यते । अतः **'सुनिष्ठुरः'** इति मूलपाठः स्यादिति भातीति ब.गोमतम् ॥
८. **'विगतज्वरः'** इति मू.श्लो.पा ।

Rarest Archiver

अथ=अनन्तरं **हे राजन्**=रावण! **मद्बन्धुनिधनस्य**=मद्बन्धुनाशस्य **उत्तमां**=श्रेष्ठां **निष्कृतिं** =प्रतिक्रियां कृत्वा, **त्वां प्रसादयेयं** । **ते**=तव **हृदयज्वरः**=मनोव्यथा **व्येतु**=अपगच्छतु ॥१९॥

कवलत्रितयार्थं स्यात् कथञ्चिद् भुवनत्रयम् ।

सप्ताब्धयोऽनुपानार्थम् इत्युक्त्वा स ययौ युधे ॥२०॥

सः=कुम्भकर्णः **भुवनत्रयं**=लोकत्रयं **कथञ्चित्**=केनापि प्रकारेण **कवलत्रितयार्थं**=ग्रास –त्रयार्थं **स्यात्**=भवेत् **सप्ताब्धयः**=सप्तसमुद्राः **अनुपानार्थं**=भोजनानन्तरम् उदकपानार्थं स्युः इत्युक्त्वा, **युधे**=युद्धार्थं **ययौ**=जगाम ॥२०॥

एकाकिना न गन्तव्यं सर्वे यामो वयं युधे ।

सीता विलोभ्या मायाभिः इत्युवाच महोदरः ॥२१॥

महोदरः=रावणमन्त्री **एकाकिना**=असहायेन **न गन्तव्यं**=गन्तुम् अयोग्यम् । **युधे**=युद्धाय **वयं सर्वे यामः** । **सीता मायाभिः**=कपटैः **विलोभ्या**=वञ्चनीया **इत्युवाच** ॥२१॥

महोदरं विनिर्भत्स्य रावणं प्रतिनन्दयन् ।

सम्पूजितो रावणेन प्रययौ रावणानुजः ॥२२॥

रावणानुजः=कुम्भकर्णः **महोदरं विनिर्भत्स्य**=निन्दित्वा, **रावणं प्रतिनन्दयन्**=हर्षयुक्तं कुर्वन् **रावणेन सम्पूजितः सन्** रणाय **प्रययौ** ॥२२॥

स पञ्चयोजनोत्सेधं प्राकारमतिलङ्घयन्[1] **।**

निर्गम्य नगरात् तस्मात् कपिसैन्यमवैक्षत ॥२३॥

स=कुम्भकर्णः **पञ्चयोजनोत्सेधं**=पञ्चयोजनोन्नतं **प्राकारं=**लङ्कावरणं **अतिलङ्घयन्**= अतिक्रम्य गच्छन् सन् **तस्मात्=**लङ्कानामकात् **नगरात् निर्गत्य**=बहिरागत्य **कपिसैन्यम् अवैक्षत**=अपश्यत् ॥२३॥

१.'**अभिलङ्घयन्**' इति प्र.व्या ।

Rarest Archiver

नानायुधधरा वीरा नानावाहनसंस्थिताः ।

तमन्वयुः राक्षसेन्द्राः चतुरङ्गबलान्विताः[१] ॥२४॥

नानायुधधराः नानावाहनसंस्थिताः चतुरङ्गबलान्विताः वीराः राक्षसेन्द्राः तं=कुम्भकर्णं **अन्वयुः**=अन्वगच्छन् ॥२४॥

बहुयोजनविस्तीर्णं ततश्चाभ्यधिकोच्छ्रयम् ।

कालाम्बुदप्रभतनुं कालन्तक[२]यमोपमम् ॥२५॥

'षड्भिः श्लोकैः' कुम्भकर्णं वर्णयति– **बह्विति । बहुयोजनविस्तीर्णं**=बहुयोजनविशाल–देहं **ततश्च**=ततोऽपि विस्तीर्णादपि **अधिकोच्छ्रयं**=त्रिगुणोन्नतं **कालाम्बुदप्रभतनुं**=प्रलय–कालमेघसदृशशरीरं **कालान्तकयमोपमं**=प्रलयकाले विद्यमानयमसदृशं 'कुम्भकर्णं दृष्ट्वा, कपिसङ्घाः दुद्रुवुः'– इति वक्ष्यमाणेनान्वयः । एवं पञ्चश्लोकेष्वपि ॥२५॥

महाकटककोटीरकेयूरादिविभूषणम्[३] ।

करौ च परिघाकारौ व्यापयन्तं[४] दिशो दश ॥२६॥

महाकटकं=हस्तवलयं **कोटीरं**=किरीटं **केयूरं**=बाहुभूषणम् आदिपदेन काञ्च्यादिकं ग्राह्यं **महाकटककोटीरकेयूरादिविभूषणं**=महाकटकाद्यलङ्कारयुक्तं **परिघाकारौ**=कवाटकील–रूपौ दण्डसदृशौ **करौ च**=हस्तावपि कर्म **दश दिशः**=दशसु दिक्षु **व्यापयन्तं**=व्यापारवन्तौ कुर्वन्तं 'कुम्भकर्णं दृष्ट्वा दुद्रुवुः' ॥२६॥

पादाभ्यामतिभीमाभ्यां दारयन्तमिवावनिम् ।

वृत्ताभ्यां ताम्रनेत्राभ्यां विसृजन्तं महानलम् ॥२७॥

अतिभीमाभ्याम्=अत्यन्तभयङ्कराभ्यां **पादाभ्याम् अवनिं**=मेदनीं **दारयन्तमिव**=विदार–यन्तमिव स्थितं **वृत्ताभ्यां**=वर्तुलाभ्यां **ताम्रनेत्राभ्यां**=रक्तेक्षणाभ्यां **महानलं**=महावह्निं **विसृजन्तम्**=उत्पादयन्तं 'कुम्भकर्णं दृष्ट्वा दुद्रुवुः' ॥२७॥

---

१. अ) **'चतुरङ्गबलैर्वृताः'** इति प्र.व्या । ब.गो च । आ) **'चतुरङ्गबलैर्युताः'** इति तु मू.श्लो.पा ।
२. **'कालानलयमोपम्'** इति मू.श्लो.पा ।
३. अ) **'महकटककोटीरकटकादिविभूषितम्'** इति मू.श्लो.पा । आ) **'महाकटककेयूरकोटीरादिविभूषणम्'** इति ब.गो ।
४. **'व्याप्रियन्तम्'** इति दू.कृ.श्री । अपपाठः इव भाति ।

Rarest Archiver

दंष्ट्राभ्यां क्षुरधाराभ्यां खण्डयन्तमिवाखिलम् ।

महागुहाभवदनं[1] व्याददानमहाननम्[2] ॥२८॥

क्षुरधाराभ्यां=क्षौरसाधनायुधधारासदृशधाराभ्यां **दंष्ट्राभ्यां**=वदनपार्श्वस्थितदन्तविशेषाभ्याम् **अखिलं=**ब्रह्माण्डं **खण्डयन्तमिव**=शकलीकुर्वन्तमिव स्थितं **महागुहाभवदनं**=महागुहा–सदृशवक्त्रं **व्याददानमहाननं**=विवृत्तमहामुखं 'कुम्भकर्णं दृष्ट्वा दुद्रुवुः' ॥२८॥

ग्रसन्तमिव लोकांस्त्रीन् भूरिसंरम्भसम्भ्रमम्[3] ।

महाट्टहासप्रक्ष्वेलं घनाघनघनस्वनम् ॥२९॥

त्रीन् लोकान् ग्रसन्तमिव=भक्षयन्तमिव स्थितं **भूरिसंरम्भसम्भ्रमं=**बहुकोपेन[4] ओष्ठादि–चलनयुक्तं **महाट्टहासप्रक्ष्वेलं**=महाट्टहासयुक्तसिंहनादयुक्तं **घनाघनघनस्वनं**=नववर्ष–णशीलमेघध्वनिवत् **घनः=**गम्भीरः **स्वनः=**ध्वनिः यस्य तं 'दृष्ट्वा दुद्रुवुः' ॥२९॥

क्व द्रुता वानराः क्षुद्राः क्व रामः क्व च लक्ष्मणः ।

आस्फोटयन्तमित्युक्त्वा मनोमारुतरंहसम् ॥३०॥

क्षुद्राः=बलरहिताः **वानराः क्व**=कुत्र **द्रुताः**=गताः? **रामः क्व**=कुत्र वर्तते? **लक्ष्मणश्च क्व** वर्तते? **इत्युक्त्वा, आस्फोटयन्तं=**भुजं हस्तेनाऽस्फालयन्तं, हस्तेन ऊरुं वा ताडयन्तं **मनोमारुतरंहसं=**मनोवाय्वोः वेगसदृशं वेगं 'कुम्भकर्णं दृष्ट्वा दुद्रुवुः' ॥३०॥

कुम्भकर्णं तथा दृष्ट्वा जम्भारेश्च भयङ्करम् ।

दुद्रुवुः कपिसङ्घास्ते चापमुक्ता इवेषवः ॥३१॥

ते=प्रसिद्धाः **कपिसङ्घाः जम्भारेश्च**=इन्द्रस्यापि **भयङ्करं**=भयजनकं **तथा**=पूर्वोक्त–प्रकारेण **कुम्भकर्णं** दृष्ट्वा, **चापमुक्ताः=**धनुर्मुक्ता **इषवः**=बाणा **इव दुद्रुवुः=**पलायनं चक्रुः ॥३१॥

१. अ) **'महागुहाभं गहनम्'** इति मू.श्लो.पा । आ) **'महागुहाभं वदनम्'** इति वा.वे ।
इ) **'महागुहावद् गहनम्/वदनम्'** इति च प्र.व्या । ब.गो च ।
२. **'व्याददानं महाननम्'** इति वा.वे ।
३. अ) **'–संरभ्मसंवृतम्'** इति मू.श्लो.पा । प्र.व्या च । आ) **'संरम्भसम्भृतम्'** इति ब.गो ।
४. **'बहळकोपेन'** इति दू.कृ.श्री । कर्णाटकभाषा उपयुक्ता । तस्मादपपाठः । लिपिकारस्य दोषः स्यात् ।

Rarest Archiver

सेतुमत्यगमन् केचित् केचित् सेतुमुपागमन् ।

केचिन्निलीना वृक्षेषु पतिताः केचन क्षितौ ॥३२॥

[१]**केचित्**=कपयः **सेतुम् अत्यगमन्**=अतीत्य गताः । **केचित्**=कपयः **सेतुम् उपागमन्**=प्राप्ताः । **केचित्**=कपयः **वृक्षेषु निलीनाः**=आच्छादिताः । **केचन क्षितौ पतिताः** ॥३२॥

युवराजोऽङ्गदो दृष्ट्वा निजसैन्यं भयाकुलम् ।

नीलादीन् द्रवतः प्रोचे वीर्यौदार्ययुतं वचः ॥३३॥

युवराजोऽङ्गदः भयाकुलं=भयेन विषण्णं **निजसैन्यं दृष्ट्वा द्रवतः**=पलायनं कुर्वाणान् **नीलादीन्**=कपीन् **वीर्यौदार्ययुतं वचः प्रोचे** अब्रवीत् । *'ब्रुवो वचिः'*[२] अत एव कर्मद्वयम् ॥३३॥

भुवनानां प्रभौ रामे नाथेऽस्मिन्नभयङ्करे ।

वानराः षण्ढतिलवत् कुत्र द्रवथ विक्लवाः[३] **॥३४॥**

हे वानराः ! भुवनानां=लोकानां **नाथे**=स्वामिनि **प्रभौ**=परमसमर्थे **अभयङ्करे**=भयाभावप्रदे **अस्मिन्**=प्रत्यक्षसिद्धे **रामे** स्थिते सति यूयं **षण्ढतिलवत्**=नीरसतिला इव **विक्लवाः**=विषादयुक्ताः सन्तः **कुत्र**=देशे **द्रवथ**=गच्छथ । 'द्रु=गतौ' लटि मध्यमपुरुषे बहुवचनम् । इति प्रोचे ॥३४॥

इत्यङ्गदोदितं श्रुत्वा निवृत्त्य कपिपुङ्गवाः ।

सालशैलशिलाहस्ताः कुम्भकर्णमथाऽऽययुः[४] **॥३५॥**

कपिपुङ्गवाः इति=पूर्वोक्तप्रकारेण **अङ्गदोदितं**=अङ्गदवचनं **श्रुत्वा, अथ निवृत्त्य**=आवृत्त्य, **सालशैलशिलाहस्ताः**=वृक्षगिरिपाषाणहस्ताः सन्तः **कुम्भकर्णम् आययुः**= प्रापुः ॥३५॥

---

१. **केचित्**=कपयः **वृक्षेषु निलीनाः केचन क्षितौ पतिताः केचित्**=कपयः **सेतुमत्यगमन्**=सेतुमतीत्य गताः **केचित्**=कपयः **सेतुमुपागमन्**=सेतुं प्राप्ता' इति तु वा.वे । एवं पूर्वापरेण अर्थः अभीहितः ।

२. अष्टाध्यायी २।४।५३ पा.सूत्रम् ।

३. **'कुत्र यास्यथ सत्तमाः'** इति मू.श्लो.पा । **'विक्लबाः'** इति दू.कृ.श्री ।

४. **'अथाभ्ययुः'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।

Rarest Archiver

कुम्भकर्णानुगास्तूर्णं वानरानतुदञ्छरैः ।

कपयो विविदाद्यास्तान् कुपिताः समसूदयन् ॥३६॥

कुम्भकर्णानुगाः=कुम्भकर्णभृत्याः **तूर्णं**=शीघ्रं **शरैः वानरान् अतुदन्**=व्यथायुक्तान् अकुर्वन् ।'तुद=व्यथने' लङ् । **विविदाद्याः**=कपयः **कुपिताः सन्तः तान् कुम्भकर्णानुगान् समसूदयन्**=जघ्नुः ॥३६॥

तस्मै सालशिलाशैलान्[१] वानराः प्रतिचिक्षुपुः ।

कुम्भकर्णाङ्गसङ्गास्ते चूर्णिताः पांसुपिण्डवत् ॥३७॥

वानराः तस्मै=कुम्भकर्णाय **सालशिलाशैलान्**=वृक्षपाषणपर्वतान् **प्रतिचिक्षिपुः**=निक्षिप्त –वन्तः **कुम्भकर्णाङ्गसङ्गाः**=कुम्भकर्णशरीरसम्बद्धाः **ते**=सालादयः **पांसुपिण्डवत्**=पाषण –स्योपरि पतितपांसुपिण्डो यथा तथा **चूर्णिताः**=पिष्टा बभूवुः ॥३७॥

शतानि सप्त चाष्टौ च सहस्राणि च वानरान् ।

युगपत् प्रतिनिष्पिष्य कुम्भकर्णो न्यपातयत् ॥३८॥

कुम्भकर्णः प्रथमं **सप्त वानरान् युगपत्**=एकवारमेव **प्रतिनिष्पिष्य**=चूर्णीकृत्य, **न्यपातयत्** =पातयामास । अनन्तरं **अष्टौ वानरान्,** पश्चात् **शतानि,** अथ **सहस्राणि च वानरान् युगपत् प्रतिनिष्पिष्य न्यपातयत्** ॥३८॥

षोडशाष्टौ च दश च विंशत् त्रिंशत् तथा परान् ।

परिगृह्य स्वपाणिभ्यां[२] खादं खादं स्म धावति ॥३९॥

सः कुम्भकर्णः **तथा**=तेनैव प्रकारेण **अष्टौ परान्** वानरान् **षोडश परान् विंशत्** वानरान् **त्रिंशत्** वानरान् **पाणिभ्यां परिगृह्य**=गृहीत्वा, **खादं खादम्** इत्येकं पदं, '*णमुलन्तं*' खादित्वा, भक्षयित्वा, भक्षयित्वा इत्यर्थः । **धावति स्म**=शीघ्रम् अगमत् ॥३९॥

अभ्यापतितदर्शं स निनायादर्शनं कपीन् ।

रणरङ्गानुपातं च द्रुतवेदं स्म तिष्ठति ॥४०॥

---

१. **'शिलावर्षान्'** इति मू.श्लो.पा । २. **'परिगृह्य स पाणिभ्याम्'** इति मू.श्लो.पा । ब.गो च ।

Rarest Archiver

सः=कुम्भकर्णः **कपीन्** 'अभ्यापतितदर्थम् इदमपि णमुलन्तं अभ्यापातितान् दृष्ट्वा दृष्ट्वा, ये ये अभ्यापतन्ति=स्वाभिमुख्येनागच्छन्ति तांस्तान् सर्वानित्यर्थः' । **अदर्शनं निनाय**=प्रापयामास । **सः**=कुम्भकर्णः **रणरङ्गानुपातं**='णमुलन्तं' रणरङ्गम् अनुपत्यानुपत्य =रणरङ्गं प्रत्यागत्य स्थितान् वानरान् **द्रुतवेदं**=द्रुतान्=विद्रुतान्, पलायितान् वानरान् विदित्वा विदित्वा=ज्ञात्वा ज्ञात्वा **तिष्ठति स्म**=अतिष्ठत् । [१]यद्वा– स्वयमेव **रणरङ्गानुपातं** =रणरङ्गम् अनुपत्यानुपत्य वर्तमानः सन् वानरान् **द्रुतवेदं**=द्रुतान् ज्ञात्वा ज्ञात्वा **तिष्ठति स्म** ॥४०॥

क्षिप भक्षय पिङ्क्ष्वोर्व्यां प्रतिदारय पातय ।

वानरान् स नराहार इत्थं भूयो व्यनीनशत् ॥४१॥

नराहारः सः=कुम्भकर्णः कांश्चिद् **वानरान् क्षिप**=विक्षिप्त्वा विक्षिप्त्वा, **व्यनीनशत्**= नाशयामास । 'णश=अदर्शने' ण्यन्तात् लुङ् । कांश्चिद् वानरान् **भक्षय**=भक्षयित्वा भक्षयित्वा, **व्यनीनशत्** । कांश्चित् **पिङ्क्ष्व**=पिष्ट्वा पिष्ट्वा, सञ्चूर्ण्येत्यर्थः **व्यनीनशत्** । अन्यान् **प्रतिदारय**=प्रतिदारयित्वा प्रतिदारयित्वा, व्यनीनशत् । अपरान् कपीन् **पातय**= पातयित्वा पातयित्वा, **व्यनीनशत्** । **इत्थं**=एवंप्रकारेण **भूयः**=पुनरपि **व्यनीनशत्** । यद्वा– **'पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः'**[२] इतिवत् क्षिप, भक्षयेत्यादिप्रयोगः । *'क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः'*[३] इति पौनःपुन्ये भृशार्थे वा लोट् । तथा च **क्षिप** वानरान् पुनःपुनः अक्षिपत् । **भक्षय** पुनःपुनः अभक्षयत् । **पिङ्क्ष्व** पुनः पुनः पिष्टान् अकरोत् । **उर्व्यां**=भूमौ **पातय**=पुनःपुनः पातयामास । **प्रतिदारय**=पुनःपुनः अदारयत् । **इत्थं वानरान् भूयः व्यनीनशत्** । यद्वा *'क्रियासमभिहारे'* विहितस्य लोटः सर्वलकारापवादत्वात् वर्तमानार्थकत्वमपि । तथा च सः कुम्भकर्णः **वानरान् क्षिप**= पुनःपुनः क्षिपति । **भक्षय**=पुनःपुनः भक्षयति । **पिङ्क्ष्व**=पुनःपुनः पिनष्टि । **प्रतिदारय**= पुनःपुनः प्रतिदारयति । **उर्व्यां**=भूमौ **पातय**=पुनःपुनः पातयति इति हेतोः **वानरान् व्यनीनशत्** ॥४१॥

ततः शतबलिं श्वेतं सम्पातिपनसावपि ।

उन्मुखान् दुर्मुखमुखान् राक्षसोऽभक्षयत् कपीन् ॥४२॥

---

१. **'यद्वा'** इति पाठः वा.वे मातृकायां नास्ति । २.कुत्रस्थमिति चिन्त्यं नोपलब्धत्वात् । ३. अष्टाध्यायी ३।४।२ पा.सूत्रम् ।

Rarest Archive

ततः=बहुकपिनाशानन्तरं **राक्षसः**=कुम्भकर्णः **शतबल्या**दीन् केसरिपर्यन्तान् षट् **कपीन् भक्षयत्** ॥४२॥

क्षणात् पिपेष पाणिभ्यां जयन्तकुमुदावुभौ ।

[1]भुजावास्फोट्य युद्धार्थी ददर्शाशु दिशो दश ॥४३॥

स कुम्भकर्णः **उभौ**=द्वौ **जयन्तकुमुदौ**=जयन्तकुमुदनामकौ कपी कर्म **पाणिभ्यां**=हस्ताभ्यां **क्षणात्**=क्षणमात्रेण **पिपेष** पिष्टौ=चूर्णीभूतौ चकार । 'जयन्तकुमुदयोः शरीरस्य सर्वात्मना नाशात् गन्धमादनपर्वतानयनान्तरं एतयोः जीवनं नाभूदित्याहुः'[2] । **युद्धार्थी**=युद्धं कर्तुकामः कुम्भकर्णः **भुजौ** कर्म **आस्फोव्य**=हस्तेन सन्ताड्य **दश दिशः आशु ददर्श** ॥४३॥

गजं गवाक्षं गवयं वृषाख्यं गन्धमादनम् ।

तारनीलनलान्योद्धॄन् मुष्टिघातै[3]रपातयत् ॥४४॥

स कुम्भकर्णः **योद्धॄन्**=युद्धं कुर्वाणान् **गजादीन्** पञ्च **तारादींश्च** कपीन् **मुष्टिघातैः**=मुष्टिप्रहारैः **अपातयत्**=पातयामास ॥४४॥

युवराजयुतो राजा वीक्ष्य तं पृतनाक्षयम् ।

अभ्यधावदतिक्रुद्धो जाम्बवांश्चापरैः सह[4] ॥४५॥

युवराजयुतः=अङ्गदयुक्तः **राजा**=सुग्रीवः **तं**=कुम्भकर्णकृतं **पृतनाक्षयं**=सेनानाशं **वीक्ष्य** =दृष्ट्वा, **अतिक्रुद्धः सन् अभ्यधावत्**=शीघ्रं कुम्भकर्णं प्राप । **जाम्बवांश्च**=जाम्बवानपि **अपरैः सह अभ्यधावत्** ॥४५॥

सालशैलशिलावर्षं चक्रुस्ते कपयस्त्रयः ।

[5]चूर्णीबभूवुस्तस्याङ्गे नैवाकम्पत राक्षसः ॥४६॥

---

१. अ) **'गर्जन्नास्फोव्य'** इति प्र.व्या । ब.गो च । आ) **'गच्छन्नास्फोट्य'** इति मू.श्लो.पा ।

२. जयन्तकुमुदयोः भगवतः श्रीरामस्यानुग्रहः विशेषश्च ॥ **'तदा मृतान् राघव आनिनाय यमक्षयाद् देवगणांश्च सर्वशः'** इति श्री.म.भा.ता.नि.८.अ.२२५.श्लोके सर्वेषां कपीनां पुनर्जीवनोक्तेः । इति तु ब.गो ।

३. **'मुष्टिपातैः'** इति मू.श्लो.पा ।

४. **'परैः सह'** इति प्र.व्या ।

५. अ) **'चूर्णा बभूवुस्तस्याङ्गे'** प्र.व्या । आ) **'चूर्णीबभूवुस्तेऽस्याङ्गे'** इति ब.गो ।

Rarest Archiver

सुग्रीवाद्याः **त्रयः कपयः सालशैलशिलावर्षं**=सालादिवृष्टिं कुम्भकर्णे **चक्रुः** । **तस्य** कुम्भकर्णस्य **अङ्गे**=शरीरे **ते** सालादयः **चूर्णीबभूवुः** । **राक्षसः**=कुम्भकर्णः **नैवाकम्पत** =नैव चचाल ॥४६॥

अथ पर्वतमुत्पाट्य तस्मै चिक्षेप तापनिः ।

तमेवाद्रिं कपीन्द्राय कुम्भकर्णोऽक्षिपद्धसन् ॥४७॥

अथ=सालादिचूर्णानन्तरं **तपनस्य**=सूर्यस्य अपत्यं पुमान् **तापनिः**=सुग्रीवः **पर्वतम् उत्पाट्य तस्मै**=कुम्भकर्णाय चिक्षेप । हसन् **कुम्भकर्णः तमेव** सुग्रीवेण क्षिप्तमेवाद्रिं गृहीत्वा **कपीन्द्राय**=सुग्रीवाय **अक्षिपत्**=चिक्षेप ॥४७॥

तपनस्य सुते तस्मिन् पतिते पर्वताहते ।

अङ्गदो जाम्बवांश्चैनं संक्रुद्धावभ्यधावताम् ॥४८॥

पर्वताहते=पर्वतेन ताडिते **तपनस्य**=सूर्यस्य **सुते तस्मिन्**=सुग्रीवे भूमौ **पतिते**=पातिते सति **संक्रुद्धौ अङ्गदः जाम्बवांश्च** इत्येतौ **एनं** कुम्भकर्णम् **अभ्यधावतां**=प्रापतुः ॥४८॥

तळताडनमात्रेण कुम्भकर्णो निपात्य तौ।

मूर्च्छितं द्रुतमादाय भास्करिं राक्षसो ययौ ॥४९॥

कुम्भकर्णः तळताडनमात्रेण=तलप्रहारमात्रेण **तौ**=अङ्गदजाम्बवन्तौ कर्म **निपात्य**=भूमौ पातयित्वा, **द्रुतं** यथा तथा **मूर्च्छितं**=सञ्जातमूर्च्छं **भास्करिं**=सुग्रीवम् **आदाय राक्षसः आययौ**=लङ्कां प्राप ॥ [१]क्वचित्तु– **'तलताडनमात्रेण कुम्भकर्णेन पातितौ ।**

मूर्च्छितं द्रुतमादय भास्करिं राक्षसो ययौ' ॥

इति पाठः । तदा कुम्भकर्णेन अङ्गदजाम्बवन्तौ पातितौ इत्येकान्वयः ।

'राक्षसो मूर्च्छितं भास्करिमादाय द्रुतं ययौ'॥ इत्यपरः ॥४९॥

नयन्तं कपियूथेशं प्रयान्तं च निजां पुरीम् ।

तं सूक्ष्ममक्षिकारूपी[२] क्षिप्रं मारुतिरन्वगात् ॥५०॥

---

१. व्याख्याकारेण पाठान्तरमपि अभिहितम् ।

२. **'मक्षिकारूपः'** इति प्र.व्या । ब.गो च ।

Rarest Archiver

सूक्ष्ममक्षिकारूपी=सूक्ष्ममक्षिकासदृशकपिरूपवान् **मारुतिः**=हनूमान् **कपियूथेशं**=सुग्रीवं **नयन्तं**=वहन्तं **निजां पुरीं** लङ्कां प्रति **प्रयान्तं**=गच्छन्तं **च तं** कुम्भकर्णं **क्षिप्रं** यथा तथा **अन्वगात्**=अनुसृत्य गतः ॥५०॥

***[1]बाध्यते चेदयं राजा मोचयेयं बलादिमम् ।**

स्वयं चेन्मोचयेच्छ्रेय इत्थं हनुमतो मतम्[2] ॥५१॥

'अनुसृत्य गच्छतः' हनूमतः अभिप्रायमाह ग्रन्थकारः– **बाध्यत** इति । **चेत्**=यदि **अयं राजा**=सुग्रीवः कुम्भकर्णेन **बाध्यते**=पीडितो भवति । 'बाध=पीडायां'[3] कर्मणि लट् तर्हि अहम् **इमं**=सुग्रीवं **बलात्**=समाथ्यार्त् **मोचयेयं**=मुक्तं कुर्याम् । 'मुचेः'[4] कर्तरि लिङि उत्तमपुरुषे एकवचनम् । **चेत्**=यदि सुग्रीवः **स्वयम्** एव **मोचयेत्**=आत्मानं मुक्तं कुर्यात्, तर्हि **श्रेयः**=तन्मोचनम् उत्तमम् **इत्थम्**=एवंप्रकारेण **हनुमतः मतम्**=अभिप्रायः ॥५१॥

विवेश बिभ्रत् सुग्रीवं लङ्कां लङ्केश्वरानुजः ।

प्रहृष्टै राक्षसगणैः तत्र तत्राभिपूजितः ॥५२॥

सुग्रीवं बिभ्रत्=दधानः **लङ्केश्वरानुजः**=रावणानुजः कुम्भकर्णः **लङ्कां विवेश**=प्राविशत् । **तत्र तत्र**=स्वस्वगृहसमीपे **प्रहृष्टैः**=सन्तुष्टैः **राक्षसगणैः अभिपूजितश्च**=सम्यक् पूजितः अभूत् ॥५२॥

पूजयद्भिः कुम्भकर्णं [5]स्रग्गन्धैस्तुहिनाम्बुभिः ।

आसिच्यमानः सुग्रीवः शनैः सञ्ज्ञामवाप्तवान् ॥५३॥

स्रग्गन्धैः=स्रग्भिः गन्धैश्च **तुहिनाम्बुभिः**=हिमसलिलैः करणैः **कुम्भकर्णं पूजयद्भिः**=कर्तृभिः **आसिच्यमानः**=सम्यगभिषिच्यमानः, स्नात इति यावत् । **सुग्रीवः शनैः**=मन्दं **सञ्ज्ञां**=स्मृतिम् **आप्तवान्**=प्राप ॥५३॥

कुम्भकर्णस्य कर्णौ स कराभ्यां तूर्णमच्छिनत् ।

नासिकां चाऽशु दशनैः सुग्रीवोऽथोत्पपात च ॥५४॥

---

*.१. **'बाध्येत चेदयम्'** इति दू.कृ.श्री । ब.गो.सं.पा । अस्मिन् पक्षे– **'बाध्येत**=पीडितो भवेत्' कर्मणि लिङ् लकारः ।
२. **'हनूमतो मनः'** इति प्र.व्या ।
३. 'बाधृ=लोडने' इति सि.कौमुद्याम् ।
४. णिजन्तात् इति शेषः ।
५. अ) **'सुगन्धैः'** इति प्र.व्या । आ) **'सगन्धैः'** इति ब.गो.सं.पा ।

Rarest Archiver

अथ=सञ्ज्ञाप्राप्त्यनन्तरं **सुग्रीवः कराभ्यां कुम्भकर्णस्य कर्णौ**=श्रोत्रे कर्म **तूर्णं**=शीघ्रम् **अच्छिनत्**=चिछेद । **दशनैः**=दन्तैः **नासिकां**=घोणां च 'घोणा नासा च नासिका'[१] इति अमरः । **आशु अच्छिनत्** । **अथ**=कर्णादिछेदनानन्तरम् **उत्पपात**=अन्तरिक्षं गतश्च ॥५४॥

सम्भ्रान्तः कुम्भकर्णोऽथ तळेनैनमताडयत् ।

पिपेष च पुनः पृथ्व्यां[२] सोऽङ्गुल्यन्तरतो ययौ ॥५५॥

अथ=कर्णादिच्छेदनानन्तरं **सम्भ्रान्तः**=चित्तचाञ्चल्ययुक्तः **कुम्भकर्णः एनं** सुग्रीवं **तळेन अताडयत्**=विव्याध । **पुनश्च=**पुनरपि **पृथ्व्यां**=भूमौ पतितम् **एनं** सुग्रीवं **पिपेष=** पिष्टमकरोत् । **सः** सुग्रीवः **अङ्गुल्यन्तरतः**=कम्भकर्णाङ्गुलिविवरेण **ययौ**=बहिर्गतः ॥५५॥

अमोघं शूलमशनैः अक्षिपद्[३] राक्षसाधिपः ।

कालदण्डप्रचण्डाभं कपिराजजिघांसया ॥५६॥

राक्षसाधिपः=कुम्भकर्णः **कालदण्डप्रचण्डाभं**=यमदण्डवत् क्रूरकान्तियुक्तं, क्रूरयमदण्ड –सदृशं वा **अमोघं**=सफलं **शूलं कपिराजजिघांसया**=सुग्रीवनाशेच्छया **अशनैः=**शीघ्रम् **अक्षिपत्**=चिक्षेप ॥५६॥

जग्राह हनुमान् मङ्क्षु खमाप्लुत्य महायुधम् ।

जानुनि न्यस्य तच्छित्त्वा जहास च ननाद च ॥५७॥

हनुमान् मङ्क्षु=शीघ्रं **खम्**=आकाशम् **आप्लुत्य**=प्राप्य, **महायुधं**=त्रिशूलं **जग्राह** । **तत्** शूलं **जानुनि न्यस्य**=निक्षिप्य, **छित्त्वा=**द्विधाकृत्वा **जहास=**अट्टहासं कृतवान्, **ननाद च**=सिंहनादमकरोत् ॥५७॥

ततः क्रुद्धः कुम्भकर्णो मुष्टिमावृत्य सत्वरम् ।

विशाले प्रजहारोच्चैः वायुनन्दनवक्षसि ॥५८॥

ततः=शूलच्छेदनानन्तरं **क्रुद्धः कुम्भकर्णः सत्वरं**=शीघ्रं यथा तथा **मुष्टिमावृत्य**= भ्रामयित्वा **विशाले**=विस्तीर्णे **वायुनन्दनवक्षसि=**हनुमद्वक्षःस्थले **उच्चैः**=सर्वशक्त्या **प्रजहार=**ताडयामास ॥५८॥

---

१. अ.कोशे.२.का.मनुष्यवर्गे.३५५.श्लोकः । २.**'पुनश्चोर्व्याम्'** इति मू.श्लो.पा । श्रीविश्व.ती च । ३.**'प्राक्षिपद्'** इति ब.गो ।

Rarest Archiver

अचिन्तयंस्तस्य परं प्रहारं नदन् हनूमान् प्रजहार चैनम् ।

तन्मुष्टिपिष्टः स पपात दुष्टो वज्रप्रभिन्नोऽद्रिरिवातितुङ्गः ॥५९॥

नदन्=ध्वनिं कुर्वन् **हनूमान् तस्य** कुम्भकर्णस्य **परं**=महान्तं **प्रहारं=**ताडनम् **अचिन्तयन्** सन्=अगणयन् सन् **एनं च** कुम्भकर्णमपि **प्रजहार** । **तन्मुष्टिपिष्टः**=हनूमन्मुष्टिताडितः **दुष्टः**=दोषयुक्तः **सः**=कुम्भकर्णः **वज्रप्रभिन्नः**=वज्रेण विदारितः **तुङ्गः=**उन्नतः **अद्रिरिव पपात**=भूमौ पतितः ॥५९॥

[1]**सञ्ज्ञामवाप्याथ च कुम्भकर्णः संरम्भतिर्यग्भ्रुकुटीकठोरः**[2] **।**

तुङ्गं गिरेः शृङ्गमथ प्रगृह्य चचार दण्डीव स दण्डपाणिः ॥६०॥

कुम्भकर्णः सञ्ज्ञां=बाह्यज्ञानम् **अवाप्य, अथ**=अनन्तरं **संरम्भनिर्यद्भ्रुकुटीकटोरः संरम्भेण**=कोपेन **तिर्यग् भ्रुकुट्या**=भ्रुवो ग्रन्थ्या, भ्रूचलनेन वा **कठोरः**=क्रूरः सन् **गिरेः** =अद्रेः **तुङ्गम्**=उन्नतं **शृङ्गं**=कूटं **प्रगृह्य, अथ**=अनन्तरं **दण्डी**=दण्डाख्यायुधवान् **सः** प्रसिद्धः **दण्डपाणिरिव**=यम इव **चचार=**चचाल ॥६०॥

[3]**जघान कांश्चिन्निजघान कांश्चित् चिक्षेप कांश्चित् स पिपेष कांश्चित् ।**

कपीनकम्प्यो विगतानुकम्पः प्रकम्पयन् गामपि कुम्भकर्णः ॥६१॥

अकम्प्यः=केनाप्यचाल्यः **विगतानुकम्पः**=निष्करुणः **गामपि=**भूमिमपि **कम्पयन्=** चालयन् **सः**=कुम्भकर्णः **कांश्चित् कपीन् जघान**=ताडितवान् । **कांश्चित् निजघान**= हिंसितवान् । **कांश्चित् चिक्षेप=**निरास । **कांश्चित् पिपेष=**चूर्णीकृतवान् ॥६१॥

ते भक्ष्यमाणा हरयो निरीयुः स्रोतोभिरन्येऽस्य[4] **च रोमकूपैः ।**

सहस्रशः साहसिनः पुनश्च तमेव हन्ताऽरुरुहुर्यथाऽद्रिम् ॥६२॥

कुम्भकर्णेन **भक्ष्यमाणाः ते=**प्रसिद्धाः केचन **हरयः**=वानराः **अस्य** कुम्भकर्णस्य **स्रोतोभिः**=इन्द्रियद्वारैः **निरीयुः**=बहिनिर्गताः । ‘इण्=गतौ’ लिटि प्रथमपुरुषे बहुवचनम् ।

---

१. **‘सञ्ज्ञामवाप्याथ’** इति सर्वत्र प्रचुरः पाठः । तदा तु द्विरथशब्दप्रयोगो भवति । **‘सञ्ज्ञामवाप्याऽशु च कुम्भकर्णः’** इत्यपि मूलपाठः स्यात् । इति ब.गो मतम् । २. **‘संरम्भनिर्यद्भ्रुकुटीकटोरः’** इति दू.कृ.श्री. प्र.व्या. ब.गो च । ३.**‘जघास’** इति प्र.व्या । ब.गो च । ४.**‘स्रोतोभिरप्यस्य’** इति प्र.व्या ।

Rarest Archiver

अन्ये वानरा **अस्य रोमकूपैः**=रोमांधुभिः 'पुंस्येवान्धुः प्रहिः कूप'[१] इत्यमरः । **सहस्रशः** =सहस्रसङ्ख्याकाः **साहसिनः**=सहनशक्तिमन्तः, अतिमानुषकर्म कुर्वन्तो वा [२]केचन कपयः **अद्रिं यथा**=पर्वतमिव **पुनश्च**=पुनरपि **तमेव** कुम्भकर्णमेव **हन्त** हर्षेण **आरुरुहुः** =आरूढाः ॥६२॥

स रक्तगन्धेन विवृद्धदर्पः प्रभक्षयन् वानरराक्षसौघम्[३] ।

रघुप्रवीरं विभयोऽभिधावन्[४] स्वानां परेषां च भयङ्करोऽभूत् ॥६३॥

रक्तगन्धेन=रक्तपरिमळेन **विवृद्धदर्पः**=अभिवृद्धमदः **वानरराक्षसौघं**=वानरसमूहं, राक्षस –समूहं च **प्रभक्षयन्**=अदन् **रघुप्रवीरं**=रामम् **अभिधावन्**=आभिमुख्येन शीघ्रं गच्छन् **विभयः**=भयरहितः **सः** कुम्भकर्णः **स्वानां**=स्वज्ञातीनां*'स्वोऽर्थज्ञात्यन्यवाच्यपि'* इत्युक्तेः[५] अत्र 'स्व' शब्दस्य ज्ञातिवाचित्वेन सर्वनामत्वाभावात् 'स्वानाम्' इत्युक्तम् । **परेषां च**= कपीनामपि **भयङ्करः**=भयजनकः **अभूत्** ॥६३॥

वज्रोपमैर्बाणगणैरगण्यैः सौमित्रिरेनं प्रबिभेद वीरः ।

अचिन्तयंस्तान् प्रययौ सुरारिः सृणिप्रहारानिव मत्तहस्ती ॥६४॥

वीरः सौमित्रिः=लक्ष्मणः **वज्रोपमैः**=वज्रसदृशैः **अगण्यैः**=असंख्यैः **बाणगणैः**=शर–समूहैः **एनं** कुम्भकर्णं **प्रबिभेद**=विददार । **सुरारिः**=कुम्भकर्णः **मत्तहस्ती**=मत्तगजः **सृणिप्रहारानिव**=अङ्कुशप्रहारान् यथा 'अङ्कुशं तु सृणिर्द्वयोः'[६] इत्यमरः । न गणयति तथा **तान्**=लक्ष्मणबाणगणान् **अचिन्तयन्**=अगणयन् सन् रामं **प्रययौ** ॥६४॥

क्षिप्रं प्रचिक्षेप[७] स राक्षसेन्द्रः शृङ्गं गिरेर्मङ्गलकीर्तनाय ।

चिच्छेद तच्छीघ्रमतुच्छकीर्तिः स सत्वरं सप्तभिरेव बाणैः ॥६५॥

---

१. अ.कोशे.१.का.वारिवर्गे.२८३.श्लोकः ।

२. **'केचन-'** इत्यतः **'हन्त'** पर्यन्तं दू.कृ.श्री मातृकायां लुप्तः, प्रमादितो वा स्यात् ।

३. अ) **'राक्षसवानरौघम्'** इति प्र.व्या । ब.गो च । आ) **'राक्षसवानरौघान्'** इति मू.श्लो.पा ।

४. **'विभयो विधावन्'** इति प्र.व्या ।

५. **'स्वोर्थज्ञात्यन्यवाच्यपीत्युक्तः'** इदं तु वार्तिको भवेत् । वा.वे मातृकायां लुप्तः, प्रमादितो वा स्यात् ।

६. अ.कोशे.२.का.क्षत्रियवर्गे.५०७.श्लोकः ।
'अङ्कुशं तु सृणिर्द्वयोरित्यमरः' इति का.श्री. पठति । **'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्'** इति साम्प्रतः अमरकोशपाठः । **'अङ्कुशोऽस्त्री सृणिर्द्वयोः'** इति मल्लिनाथोऽपि पपाठ माघव्याख्यायाम् । एतत्तु ब.गो मतम् ।

७. **'क्षिप्रं च चिक्षेप'** इति प्र.व्या । ब.गो च ।

Rarest Archiver

राक्षसेन्द्रः सः कुम्भकर्णः **मङ्गलकरं**=भक्ताभीष्टसम्पादकं **कीर्तनं**=नामोच्चारणं यस्य तस्मै **मङ्गलकीर्तनाय** रामाय **गिरेः शृङ्गं**=पर्वतशिखरं **क्षिप्रं** यथा तथा **प्रचिक्षेप**= निरास । **अतुच्छकीर्तिः**=महायशाः **सः**=रामः **ससत्वरं**=सवेगं यथा तथा **सप्तभिरेव बाणैः तत्** शृङ्गं **शीघ्रं चिच्छेद** ॥६५॥

स रामबाणैरथ भिन्नवर्मा रक्तं पिबन् राक्षसवानराणाम् ।

सकोपमाटोपमुपाजगाम कपीन् विधुन्वन् मुहुरङ्गलग्नान् ॥६६॥

अथ=गिरिशृङ्गनाशानन्तरं **रामबाणैः भिन्नवर्मा**=विदारितकवचः **राक्षसवानराणां रक्तं पिबन् सः** कुम्भकर्णः **अङ्गलग्नान्**=शरीरसम्बद्धान् **कपीन् मुहुः**=पुनःपुनः **विधुन्वन्**= हस्तेन निराकुर्वन्सन् **सकोपं**=कोपसहितम् **आटोपं**=भयङ्करत्वम् **उपाजगाम**=प्राप ॥६६।

एह्येहि किं ते कपिकालनेन नन्वस्मि देवारिनिषूदनोऽहम्[1] **।**

इति ब्रुवाणो भगवानुदारो विस्फारयामास धनुः सुधन्वा[2] **॥६७॥**

हे कुम्भकर्ण ! **एहि एहि**=आगच्छ आगच्छ **ते**=तव **कपिकालनेन**=कपिनाशनेन **किं** प्रयोजनम्? **अहं देवारिनिषूदनः**=सुरशत्रुसंहारी अस्मि, **ननु**=निश्चितम् । **इति ब्रुवाणः**= वदन् **उदारः**=उत्कृष्टः **सुधन्वा**=शोभनधनुष्मान् **भगवान्**=रामः **धनुः**=कोदण्डं **विस्फार–यामास**=शब्दयुक्तम् अकरोत् ॥६७॥

नाहं विराधो न खरो न वराको[3] **नाम्नाऽस्म्यहं राघव कुम्भकर्णः ।**

बाहू इमौ पश्य महेन्द्रभीमौ उक्त्वेति रामं स खलोऽभ्यधावत् ॥६८॥

हे राघव=राम ! **अहं विराधः न** भवामि **वराकः**=नीचः **न खरः** न भवामि । किन्तु **अहं नाम्ना कुम्भकर्णः अस्मि** । त्वं **महेन्द्रभीमौ**=देवेन्द्रस्य भयङ्करौ **इमौ** प्रत्यक्षसिद्धौ मम **बाहू** कर्म **पश्य**=अवलोकय **इत्युक्त्वा**, **खलः**=दुष्टः **सः**=कुम्भकर्णः **रामम् अभ्यधावत्**=आभिमुख्येन शीघ्रं प्राप ॥६८॥

---

१. **'–निषूदनोऽहम्'** इति भ्रान्तः पाठः । इति ब.गो मतम् । व्याकरणरीत्यापि **'निसूदनोऽहम्'** इति भवितव्यम् । तथापि सर्वस्यां मातृकायां **'निषूदनोऽहम्'** इति उक्तत्वात् मयापि एतदेव स्वीकृतम् ।

२. **'धनुः सधन्वा'** इति प्र.व्या ।

३. **'न खरो न काको'** इति प्र.व्या ।

Rarest Archiver

तौ कुम्भकर्णस्य करावुदीर्णौ उदीक्ष्य देवा दिवमुल्लिखन्तौ ।

भियाऽपयाताः सहसोपयाता रामो हि नः पालक इत्युदीर्य ॥६९॥

देवाः=सुराः **दिवम्**=आकाशं, स्वर्गं वा **उल्लिखन्तौ**=स्पृशन्तौ **उदीर्णौ**=उत्कृष्टौ **तौ** प्रसिद्धौ **कुम्भकर्णस्य करौ उदीक्ष्य**=दृष्ट्वा **भिया**=भयेन **अपयाताः**=विद्रुता अपि **नः**= अस्माकं **हि**=प्रसिद्धः **रामः पालकः**=रक्षक **इत्युदीर्य**=उक्त्वा पुनरपि **सहसा**=शीघ्रम् **उपयाताः**= युद्धदर्शनाय उपाजग्मुः ॥६९॥

देदीप्यमानानलसन्निकाशैः सुवर्णपुङ्खैश्च सुपर्णवेगैः ।

रामः शरौघैः प्रबिभेद शूरः[1] सतां शरारोर्द्विषतः शरीरम् ॥७०॥

शूरः=युद्धे भयरहितः **रामः देदीप्यमानानलसन्निकाशैः**=जाज्वल्यमानाग्नितुल्यैः **सुवर्ण –पुङ्खैः**=सुवर्णयुक्तादिभागैः **सुपर्णवेगैः**=गरुडवेगैः **शरौघैः**=शरसमूहैः **सतां**=सात्विका –नाम् इति ‘कर्मणि षष्ठी’ । **शरारोः**=हिंसनशीलस्य ‘शॄ=हिंसायाम्’ इत्यतः, *‘शॄवन्द्यो रारुः’*[2] इति ‘आरु’ प्रत्यये शरारुः इतिरूपम् ।‘शरारुः हिंसकः प्रोक्तः’[3] इति रत्नकोशः । **द्विषतः**=कुम्भकर्णस्य **शरीरं**=देहं **प्रबिभेद**=विददार ॥७०॥

उद्यच्छतो मुद्गरमुग्रमूर्तेः[4] काण्डेन दोर्दण्डमखण्डयत् सः ।

महीयसीं व्याप महीं स बाहुः महामहीभृच्छिखरोपमानः ॥७१॥

सः=रामः **मुद्गरं**=लगुडं **उद्युच्छतः**=ग्रहीतुमुद्योगं कुर्वतः **उग्रमूर्तेः**=क्रूरशरीरस्य कुम्भकर्णस्य **दोर्दण्डं**=दण्डवत् स्थितदक्षिणबाहुं **काण्डेन**=बाणवरेण **अखण्डयत्**= चिच्छेद । **महामहीभृच्छिखरोपमानः**=स्थूलगिरिशृङ्गसदृशः **सः** रामेण च्छिन्नः कुम्भ–कर्णस्य **बाहुः महीयसीं**=विपुलां **महीं**=भूमिं **व्याप**=व्याप्तोऽभूत् ॥७१॥

उन्मूल्य सालं विपुलं परेण हस्तेन हस्तीन्द्रवदादृतस्य ।

पौलस्त्यपुत्रस्य परं च बाहुं चिच्छेद तीव्रेण शरेण रामः ॥७२॥

---

१. अ) **‘प्रबिभेद वीरः सतां शरारोर्द्विषतः’** इति मू.श्लो.पा ।   आ) **प्रबिभेद शूरः सतां सुराणां द्विषतः**’इति प्र.व्या ।

२. अष्टाध्यायी ३।२।१७३ पा.सूत्रम् ।

३. रत्नकोशस्थः श्लोकः ।

४. **‘मुद्गरमुग्रकीर्तिः’** इति प्र.व्या ।

Rarest Archiver

रामः परेण=सव्येन **हस्तेन=**बाहुना **विपुलं**=विशालं सालवृक्षम् **उन्मूल्य**=मूलत उत्पाट्य, **हस्तीन्द्रवत्**=गजश्रेष्ठ इव **आद्रुतस्य**=स्वाभिमुख्येनागतस्य **पौलस्त्यपुत्रस्य**= विश्रवसः सुतस्य कुम्भकर्णस्य **परम्**=अन्यं सव्यं **बाहुं च**=हस्तमपि **तीव्रेण=**तीक्ष्णेन **शरेण चिच्छेद** ॥७२॥

उद्गर्जतोऽभिद्रवतः परस्य क्रोधाज्जिघांसोः प्रपदप्रहारैः ।

सम्पूर्णचन्द्राभमुखोऽर्धचन्द्रौ[1] **विमुच्य पादौ च चकर्त शत्रोः ॥७३॥**

सम्पूर्णचन्द्राभमुखः=पूर्णचन्द्रसदृशाननः रामः **उद्गर्जतः=**सिंहनादं कुर्वतः **अभिद्रवतः**= स्वाभिमुख्येनागच्छतः **क्रोधात् प्रपदप्रहारैः=**पादाग्रप्रहारैः'पादाग्रं प्रपदं पाद'[2] इत्यमरः । **जिघांसो**ः=स्वात्मानं हन्तुमिच्छोः **शत्रोः परस्य**=कुम्भकर्णस्य **पादौ च**=पादावपि, कर्म **अर्धचन्द्रौ**=अर्धचन्द्राकारौ शरौ **विमुच्य**=मुक्त्वा **चकर्त**=चिच्छेद ॥७३॥

ते कौम्भकर्णा भुवि हस्तपादा लोठन्त उच्चैः कठिनाद्रितुल्याः[3] **।**

अनीकिनीं तां कपिराक्षसानाम् अक्षोभयन्नम्बुनिधिं पुरं च ॥७४॥

कठिनाद्रितुल्याः=कठिनपर्वतसदृशाः कुम्भकर्णस्य इमे **कौम्भकर्णाः भुवि**=भूमौ **लोठन्तः**=परिवेष्टयन्तः **उच्चैः**=उन्नताः **ते** रामेण च्छिन्नाः **हस्तपादाः कपिराक्षसानां तां अनीकिनीं**=सेनाम् **अक्षोभयन्**=नाशितवन्तः, तथा **अम्बुनिधिं**=समुद्रं च **पुरं च**=लङ्काम् अपि **अक्षोभयन्**=कम्पितवन्तः ॥७४॥

अहस्तपादोऽपि विवृत्य वक्त्रं महागुहाभं स समुद्रनादः ।

अभ्यापतत् तं ग्रसितुं तदोग्रः शरैरपूरि प्रभुरस्य वक्त्रम् ॥७५॥

अहस्तपादोऽपि=हस्तपादरहितोऽपि **समुद्रनादः**=समुद्रघोषः **उग्रः**=क्रूरः **सः**=कुम्भकर्णः **महागुहाभं=**महाबिलसदृशं **वक्त्रं**=वदनं **विवृत्य**=व्यादाय, **तं**=रामं यदा **ग्रसितुं**=भक्षयितुं **अभ्यापतत्**=आभिमुख्येन अगात् । **तदा प्रभुः**=समर्थो रामः **अस्य=**कुम्भकर्णस्य **वक्त्रं =**तुण्डं **शरैः अपूरि**=पूरितवान्, पूर्णमकरोत् इति यावत् ।'पूरी=आप्यायने' कर्तरि लुङ् । 'दीपजन'[4] इति चिण्' ॥७५॥

---

१. **'मुखोऽर्धचन्द्रम्'** इति प्र.व्या ।

२. अ.कोशे.२.का.मनुष्यवर्गे.३३७.श्लोकः ।

३. **'कठिणाद्रितुल्याः'** इति मू.श्लो.पा । ब.गो च ।

४. अष्टाध्यायी ३।१।६१ पा.सूत्रम् ।

Rarest Archiver

परेण घोरेण शरेण रामः स्वच्छेन चिच्छेद बृहच्छिरोऽस्य ।

उद्दीप्तनेत्रं कटुदंष्ट्रमस्य पतच्छिरो भूरि बिभेद भूमिम् ॥७६॥

रामः स्वच्छेन=निर्मलेन **घोरेण**=भयङ्करेण **परेण**=अन्येन **शरेण उद्दीप्तनेत्रं**=ज्वलितनेत्र – युक्तं **कटुदंष्ट्रं**=क्रूरदंष्ट्रयुतं **बृहत्**=महत् **अस्य** कुम्भकर्णस्य **शिरः चिच्छेद** । **अस्य बृहच्छिरः** कर्तृ **भूमिं भूरि**=बहुलं यथा तथा **बिभेद**=विददार ॥७६॥

त्रिलक्षमानः खलु योजनानां स कुम्भकर्णो ववृधे पुरस्तात् ।

सङ्कोचमाप्तो नगरीं प्रवेष्टुं निषूद्यमानो[१] ववृधे पुरेव ॥७७॥

सः=कुम्भकर्णः **पुरस्तात्**=पूर्वम् उत्पत्त्यनंन्तरम् इति यावत् । **त्रिलक्षमानः**=लक्षत्रय–योजनोन्नतदेहपरिमाणवान् सन् **ववृधे**=अभिवृद्धोऽभवत्[२] । **खलु** इत्यनेन–

[३]**'योजनानां त्रिलक्षं हि कुम्भकर्णो व्यवर्धत ।**

पूर्वं पश्चात्सञ्चुकोच लङ्कायामुषितुं स्वयम्' ॥

इति प्रमाणप्रसिद्धिं सूचयति । पश्चात् **नगरीं**=लङ्कां **प्रवेष्टुं**=लङ्काप्रवेशं कर्तुं **सङ्कोच**=स्वल्पशरीरम् **आप्तः**=अभूत् । इदानीं रामेण **निषूद्यमानः**=हन्यमानः कुम्भकर्णः **पुरेव** =पुरस्तादिव **ववृधे**=त्रिलक्षमानोऽभूत् ॥७७॥

चिक्षेप तद्राक्षसदेहमब्धौ शरैः शरण्यो जगतां सलीलः ।

शरीरपातादुदगान्महाब्धिः महाश्मपातादिव पल्वलाम्भः ॥७८॥

लीलया=क्रीडया सह वर्तत इति **सलीलः जगतां शरण्यः**=सज्जनवर्येण शरणं प्राप्तुं योग्यो रामः **शरैः**=बाणैः **तत्**=प्रसिद्धं **राक्षसदेहं**=कुम्भकर्णशरीरम् **अब्धौ चिक्षेप** । [४]पूर्वसमुद्रे, पश्चिमसमुद्रे, दक्षिणसमुद्रे, उत्तरसमुद्रे च तस्य एकैकावयवविशेषं[५] निक्षिप्तवान् इत्यर्थः । **महाब्धिः**=समुद्रः **पल्वलाम्भः**=क्षुद्रसरोवराम्भः **महाश्मपातादिव**=पाषणप्रक्षेपाद् यथा वर्धते तथा अस्य कुम्भकर्णस्य **शरीरपातात्**=शरीरपतनात् **उदगात्**=उद्रिक्तोऽभूत् ॥७८॥

---

१. **'निषूद्यमानो'** इति भ्रान्तः पाठः । 'निषूदनोऽहम्' इतिवत् । पुठसंख्या–१८ । २. **'अभिवृद्धो बभूव'** इति दू.कृ.श्री ।
३. श्री.म.भा.ता.नि.८.अ.१३२.मूलश्लोकः ।
४. **'पूर्वसमुद्रे, दक्षिणसमुद्रे, पश्चिमसमुद्रे, उत्तरसमुद्रे'** इति पूर्वापरेण उक्तम् । दू.कृ.श्री ।
५. **'एकैकावयवशेषम्'** इति ब.गो ।

Rarest Archive

करटकटककालं भीषणं प्राणभाजां भुवनभवनपूर्णं कुम्भकर्णच्छलेन ।

तिमिरमहरदेवं रामभानुः शरोस्रैः[1] सुरमुनिनिकरस्तं पूजयामास पुष्पैः ॥७९॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे नवमः सर्गः ॥

रामभानुः=रामाख्यसूर्यः **करटकटककालं**=काकसमूहवत् कृष्णवर्णं 'काकेभगण्डौ करटौ'[2] इत्यमरः । **प्राणभाजां**=प्राणिनां **भीषणं**=भयङ्करं **कुम्भकर्णच्छलेन**=कुम्भकर्ण–व्याजेन **भुवनभवनपूर्णं**=ब्रह्माण्डाख्यगृहे पूर्णत्वेन विद्यमानं **तिमिरम्**=अन्धकारं **शरोस्रैः**=शराख्यकिरणैः 'किरणोऽस्रमयूखांशुः'[3] इत्यमरः । **एवं**=पूर्वोक्तप्रकारेण **अहरत्**=अनाशयत् । **सुरमुनिनिकरः**=सुरमुनिसमूहः **तं** रामं **पुष्पैः पूजयामास** ॥७९॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे नवमः सर्गः ॥

आरम्भतः श्लोकाः–३८७+७९=४६६

१. **'शरौघैः'** इति ब.गो.सं.पा ।

२. अ.कोशे.३.का.नानार्थवर्गे.१९०.श्लोकः ।

३. अ.कोशे.१.का.दिग्वर्गे.१२०.श्लोकः ।

Rarest Archive

Rarest Archiver

॥ अथ दशमः सर्गः ॥

Rarest Archiver

॥ अथ दशमः सर्गः ॥

रावणः पतितं श्रुत्वा भ्रातरं भ्रातृवत्सलः ।

मुहूर्तं मूर्च्छितः प्राप्य मनीषां विललाप सः ॥१॥

कुम्भकर्णमरणानन्तरं रावणः किमकरोत् ? इत्यत आह– **रावण** इति । **भ्रातृवत्सलः=** भ्रातरि स्नेहवान् **सः**=रावणः **भ्रातरं=**कुम्भकर्णं **पतितं**=मृतं **श्रुत्वा मूहुर्तं=**मुहूर्तकाले **मूर्च्छितः**=मूर्च्छितवान्[1] **मनीषां**=सञ्ज्ञां **प्राप्य विललाप=**प्रलापम् अकरोत् । 'लप= विलापे'[2] लिट् ॥१॥

हा वत्स कुम्भकर्ण त्वं कुत्र यासि मया विना ।

अनुयास्याम्यहं च त्वां रामबाणाग्निदीपितः ॥२॥

प्रलापप्रकारमेव आह– **हे**ति । **हा वत्स**=हे प्रीतिविषय ! **कुम्भकर्ण ! मया विना**=मां विना **त्वं कुत्र यासि=**कुत्र गच्छसि? **रामबाणाग्निदीपितः**[3]**=**रामबाणाख्याग्निना दग्धः **अहं च**=अहमपि **त्वाम् अनुयास्यामि=**अनुगमिष्यामि ॥२॥

कुलभूषणभूतो नः सत्यवादी विभीषणः ।

मया कामात्मना त्यक्तः सद्यः पश्यामि तत्फलम् ॥३॥

नः=अस्माकं **कुलभूषणभूतः**=कुलस्य अलङ्कारस्थानीयः **सत्यवादी**=यथार्थस्य वक्ता **विभीषणः कामात्मना**=विषयमनस्केन **मया त्यक्तः**=परित्यक्तः, निष्कासित इति यावत् । अहं **तत्फलं**=विभीषणपरित्यागफलं, 'कुम्भकर्णादिमरणरूपं' **सद्यः**=इदानीमेव **पश्यामि** इति विललाप ॥३॥

विलपन्तं विषण्णं तम् अवलोक्य सुरेन्द्रजित् ।

मेघनादो जगादोच्चैः मेघसन्नादिनीं गिरम् ॥४॥

---

१. **'सञ्जातमूर्च्छः सन्'** इति दू.कृश्री ।

२. **'लप=व्यक्तायां वाचि'** इति तु धा.प्र ।

३. **'रामबाणाग्निपीडितः'** श्लोके **'दीपितः'** इति स्वीकृत्य, अर्थे **'पीडित'** इति स्वीकृतः दू.कृ.श्री ।

Rarest Archiver

मेघनादः=उत्पत्त्यनन्तरं मेघनादनामकः, इन्द्रजयानन्तरं **सुरेन्द्रजित्**=‘इन्द्रजित्’नामकः रावणपुत्रः **विलपन्तं**=प्रलापं कुर्वन्तं **विषण्णं**=प्राप्तभयं, कर्तव्यमूढम् इति यावत् । **तं** रावणम् **अवलोक्य**=विलोक्य, **मेघसन्नादिनीं**=मेघध्वनिसमानां **गिरं**=वाचम् **उच्चैः**= उन्नततया, तारतरम् इति यावत् । **जगाद**=उवाच ॥४॥

नरराजसुताद् भीतो देवराजजितः पिता ।

माभूदित्थं परीवादो मामादिश युधे द्रुतम् ॥५॥

देवराजजितः=देवेन्द्रं जितवतः मम **पिता** त्वं **नरराजसुतात्**=दशरथपुत्रात् रामात् **भीतः** =भयं प्राप्तः **इत्थम्**=एवंप्रकारेण **परीवादः**=अपवादः, अपकीर्तिरिति यावत् । **माऽभूत्**= माऽस्तु । **युधे**=युद्धार्थं **माम् आदिश**=आज्ञापय[१] ॥५॥

इत्युक्त्वा तातमापृच्छय सन्नद्धो युद्धकर्मणे[२] ।

चकार रुद्रदैवत्यम् आभिचारं महेन्द्रजित् ॥६॥

महेन्द्रजित्=इन्द्रजित् **इति**=पूर्वोक्तप्रकारेण **उक्त्वा**, **तातं**=पितरं रावणम् **आपृछय**= पृष्ट्वा **युद्धकर्मणे**=युद्धाख्यकर्म कर्तुं **सन्नद्धः**=उद्युक्तः सन् **रुद्रदैवत्यं**=रुद्रदेवताकम् **आभिचारं**=मारणप्रयोगं **चकार** ॥६॥

शरबर्हिः शोणवासा वह्नौ वैभीतकेध्मवान् ।

कार्ष्णायसस्रुवश्छागं[३] सर्वकृष्णं जुहाव सः ॥७॥

मारणहोमप्रयोगप्रकारमाह– **शरे**ति । **शराः**=बाणा एव **बर्हिः**=दर्भाः, दर्भमुष्टिर्वा यस्य सः **शरबर्हिः** **शोणवासाः**=रक्तवस्त्रः **वैभीतकेध्मवान्**=विभीतकवृक्षसम्बन्धीध्मवान् ‘कारस्करवृक्षेन्धनवान्’ इत्यर्थः । ‘काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्’[४] इत्यमरः । यद्वा ‘इध्मशब्देन समित्समुदाय उच्यते’ तद्वानित्यर्थः । **कार्ष्णयसस्रुवः**= कृष्णायोविकारस्रुववान् **सः**=इन्द्रजित् **सर्वकृष्णं**=सर्वदेहे कृष्णवर्णं **छागम्**=अजं **वह्नौ**

१. **‘अनुजानीहि’** इति दू.कृश्री ।
२. **‘युद्धकर्मणि’** इति वा.वे । प्र.व्या च ।
३. अ) **‘कृष्णायसस्रुवश्छागम्’** इति मू.श्लो.पा । आ) **‘स्रुवं छागम्’** इति प्र.व्या ।
४. अ.कोशे.२.का.वनौषधिवर्गे.६२.श्लोकः ।

Rarest Archiver

–जुहाव=प्रक्षिप्तवान् । 'हु=दानादनयोः'[१] लिट् ॥७॥

स हुत्वाऽऽथर्वणैर्मन्त्रैर्दिव्यं रथमधिष्ठितः ।

गच्छन् गगनमार्गेण माययाऽन्तर्दधे खलः ॥८॥

खलः=गूढद्वेषी **सः**=इन्द्रजित् **आथर्वणैः**=आथर्वणवेदसम्बन्धिभिः **मन्त्रैः हुत्वा**=होमं कृत्वा, **दिव्यम्**=आलौकिकं **रथमधिष्टितः**=रथे स्थितः । '*अधिशीङ्स्थाऽऽसां कर्म*'[२] इति 'रथस्य' कर्मत्वम् । **गगनमार्गेण**=आकाशमार्गेण **गच्छन्** सन् **मायया**=तिरोधानशक्त्या **अन्तर्दधे**=तिरोहितो बभूव ॥८॥

स शरैरशनिप्रख्यैः दिव्यैर्नागास्त्रमन्त्रितैः ।

राघवौ वानरांस्तांश्च च्छादयामास राक्षसः ॥९॥

राक्षसः सः=इन्द्रजित् **दिव्यनागास्त्रमन्त्रितैः**=अलौकिकसर्पदेवताकमन्त्रैः अभिमन्त्रितैः **अशनिप्रख्यैः**=वज्रसदृशैः **शरैः राघवौ**=रामलक्ष्मणौ **तान्**=प्रसिद्धान् **वानरांश्च**=कपीनपि **च्छादयामास**=आच्छादितवान् । 'छद=अपवारणे' लिट् ॥९॥

दिदृक्षमाणाः प्रक्षीणा राक्षसं रूक्षविक्रमम्[३] ।

क्षोभयन्तोऽपि गगनं[४] नापश्यन् वानरा रिपुम् ॥१०॥

रूक्षविक्रमं=क्रूरपराक्रमं **राक्षसम्**=इन्द्रजितं **दिदृक्षमाणाः**=द्रष्टुकामाः **प्रक्षीणाः**=अस्त्र–पीडिताः **वानराः गगनम्**=आकाशं **क्षोभयन्तः**=आलोडयन्तोऽपि **रिपुं**=शत्रुम् **इन्द्रजितं नापश्यन्**=नाद्राक्षुः ॥१०॥

शरैराशीविषाकारैः असङ्ख्यैः सङ्ख्यपण्डितः ।

रावणिर्द्रावयामास वानरांस्तान् महाबलान् ॥११॥

सङ्ख्यपण्डितः=युद्धकुशलः **रावणिः**=इन्द्रजित् **आशीविषाकरैः**=सर्पाकरैः **असङ्ख्यैः**= संख्यारहितैः **शरैः महाबलान् तान् वानरान् दारयामास**=विदारितवान् ॥११॥

---

१. **'हु=दाने'** इत्यपि भवति धा.प्र.रीत्या ।

२. अष्टाध्यायी १।४।४६ पा.सूत्रम् ।

३. **'क्रूरविक्रमम्'** इति श्रीविश्व.ती ।

४. **'गगने'** इति प्र.व्या ।

Rarest Archiver

बद्ध्वाऽऽशीविषपाशैस्तान् कपीन् सर्वान् सलक्ष्मणान् ।

शक्रशत्रुः पुरीं[1] प्राप्य मुमुदे रावणान्वितः ॥१२॥

शक्रशत्रुः=इन्द्रजित् **आशीविषापाशैः**=सर्पमयरज्जुभिः **सलक्ष्मणान् सर्वान् तान् कपीन् बद्ध्वा पुरीं**=लङ्कां **प्राप्य रावणान्वितः सन् मुमुदे**=जहर्ष ॥१२॥

नामोचयन् नागबन्धाद् राममारुतिलक्ष्मणाः ।

देवगुह्यमनुस्मृत्य समर्था अपि वानरान् ॥१३॥

समर्था अपि=नागपाशमोचने शक्ता अपि **राममारुतिलक्ष्मणाः देवगुह्यं**=देवानां रहस्यम् **अनुस्मृत्य**=संस्मृत्य, **नागबन्धात्**=सर्पमयपाशात् **वानरान् नामोचयन्**=न त्याजितवन्तः । '**देवगुह्यम्**' इत्यनेन–

[2]'वरेण शर्वस्य हि रावणात्मजो यदा निबध्नाति कपीन् सलक्ष्मणान् ।
उरङ्गपाशेन तदा त्वमेव समेत्य सर्वानपि मोचयस्व ॥
अहं समर्थोऽपि सलक्ष्मणश्च तथा हनूमान् न विमोचयामः ।
तव प्रियार्थं गरुडैष एव कृतस्तवाऽऽदेश इमं कुरुष्व' ॥

इति हरिणाऽवतारसमये गरुडं प्रत्यभिहितत्वाद् इदानीं गरुडेन कपयो मोचनीया इति **देवगुह्यम् अनुसृत्य न अमोचयन् इति** सूचितम् ॥१३॥

विद्धवद् बद्धवद् रामो मुग्धवत् क्षतजार्द्रवत् ।

दर्शयामास पापानां मोहनायाखिलेश्वरः ॥१४॥

[3]'ग्रन्थान्तरे रामस्यापि नागपाशबद्धत्वादिकं श्रूयते' । तत्कथं समर्थोऽपि रामः कपीन् नामोचयद् इत्युक्तम् ? इत्यत आह– **विद्धवदि**ति । **अखिलेश्वरः**=जगन्नाथोऽपि रामः **पापानां**=तमोयोग्यानां **मोहनाय**=वञ्चनाय, मिथ्याज्ञानोत्पत्तये वा **विद्धवद्**=अस्त्र– ताडित इव **बद्धवत्**=नागपाशेन बद्ध इव **मुग्धवत्**=अजानन्निव **क्षतजार्द्रवत्**=रक्तसंसिक्त –वत् आत्मानं **दर्शयामास** । 'इदं वक्ष्यमाणस्य सर्वस्यापि तात्पर्यम् । तदुक्तम्–

'विद्धवन्मुग्धवच्चैव केशवो वेदनार्तवत् ।
दर्शयन्नपि मोहाय नैव विष्णुस्तथा भवेत्'[4] ॥ इत्यादि ॥१४॥

---

१. **'पुरं प्राप्य'** इति मू.श्लो.पा ।
२. **'श्री.म.भा.ता.नि.**८.अ .१४०,१४१.श्लोकौ ।
३. **'ग्रन्थान्तरे'** इत्यनेन वाल्मीकिरामायणादिषु इति चिन्त्यम् ।
४ **'श्री.म.भा.ता.नि.**११अ.९६.श्लोकः ।

Rarest Archiver

मायासीतामुपादाय राक्षस्यो रावणाज्ञया ।

अदर्शयन् दशामेतां[१] त्रिजटा तामसान्त्वयत् ॥१५॥

'सीतारक्षणे रावणेन नियुक्ताः' **राक्षस्यः**=राक्षसस्त्रियः **रावणाज्ञया मायासीताम् उपादाय** कपीनां समीपं प्रापयित्वा, **एतां**=पूर्वोक्तां **दशां**=कपीनां मूर्च्छाऽऽवस्थाम् **अदर्शयन्=** दर्शयामासुः । **त्रिजटा**=राक्षसी **तां मायासीताम् असान्त्वयत्=**दुखरहितामकरोत् ॥१५॥

शक्रारिणा शर्वबलात्[२] पातितेषु कपिष्वति ।

सप्तद्वीपवतीं भूमिं कम्पयन् वायुराववौ ॥१६॥

'देवगुह्यं'[३] विवृणोति– **शक्रारिणे**ति । **शक्रारिणा**=इन्द्रजिता **शर्वबलात्**=शर्वसामर्थ्यात् **कपिषु पातितेषु**=मूर्छां प्रापितेषु सत्सु अनन्तरं **सप्तद्वीपवतीं**=सप्तद्वीपयुक्तां **भूमिं कम्पयन्=**चालयन् **वायुः आववौ**=आगतः । 'वा=गतिगन्धनयोः' लिट् । 'गरुडागमन–समये तत्पक्षवात आगत' **इति** भावः ॥१६॥

आ जानुतः स्वर्णवर्ण आ नाभेर्हारगौरभाः ।

माणिक्यशोण आ कर्णाद्[४] आ केशाद्धरितप्रभः ॥१७॥

'त्रिभिः श्लोकैः गरुडं वर्णयति'– **आजानुत** इति । **आजानुतः**=पादतलमारभ्य जानु–पर्यन्तं **स्वर्णवर्णः=**निष्टप्तकाञ्चनवर्णः **आ नाभेः**=जान्वारभ्य नाभिपर्यन्तं **हारगौरः=**मुक्ता–हारवत्[५] श्वेतवर्णः **आ कर्णात्**=नाभेरारभ्य कर्णपर्यन्तं **माणिक्यशोणः**=पद्मरागमणिवत् रक्तवर्णः **आ केशात्**=कर्णाभ्याम् आरभ्य केशपर्यन्तं **हरितप्रभः**=हरिद्रकान्तिः[६] 'गरुडः प्लवङ्गमैः दृष्टः'[७] । इति उत्तरेणान्वयः ॥१७॥

नीलकेशो लसन्माल्यः चारुचन्दनचर्चितः ।

अष्टभिर्भोगिभिः पुष्टैः भूषितो मणिमौलिभिः ॥१८॥

नीलकेशः=कृष्णकेशः **लसन्माल्यः=**प्रकाशमानमालावान् **चारुचन्दनचर्चितः=**मनोहर–चन्दनेन लिप्तः **मणिमौलिभिः**=रत्नयुक्तशिरस्कैः **पुष्टैः**=संपुष्टैः **अष्टभिः भोगिभिः=**नागैः

---

१. **'दशामेनाम्'** इति मू.श्लो.पा । २. **'शर्ववरात्'** इति मू.श्लो.पा । ब.गो च ।
३. सं.रा.यु.का.१०.स.१३.श्लोकः । ४. **'आ कण्ठाद्'** इति ब.गो ।
५. **'मुक्तासरवत्'** इति दू.कृ.श्री । ६. **'हारिद्रकान्तिः'** इति दू.कृ.श्री । ७. सं.रा.यु.का.१०.स.२०.श्लोकः ।

Rarest Archiver

भूषितः=अलंकृतः 'गरुडः प्लवङ्गमैः दृष्टः' ॥१८॥

***पत्राभ्यां चित्रवर्णाभ्यां[१] मुञ्चद्भ्यां च सुधाकणान् ।**

कालयन् नागपूगं तं चारुचञ्चुः सुलोचनः ॥१९॥

चित्रवर्णाभ्यां=नानावर्णोपेताभ्यां **सुधाकणान्**=अमृतबिन्दून् **मुञ्चद्भ्यां**=सिञ्चद्भ्यां **पत्राभ्यां च**=पक्षाभ्यामेव 'पत्रं वाहनपक्षयोः' इत्यमरः[२] । **तं**=इन्द्रजिता निर्मितं **नागपूगं** =सर्पसमूहं **कालयन्**=नाशयन्, द्रावयन् वा **चारुचञ्चुः**=मनोहरत्रोटिः, 'चञ्चुस्त्रोटिः उभे स्त्रियाम्'[३] इत्यमरः । मनोहरं तुण्डाग्रम् इति यावत् । **सुलोचनः=**मनोहरनेत्रः 'गरुडः प्लवङ्गमैः दृष्टः' ॥१९॥

ब्रुवाणो जय रामेति दृष्टः स्पष्टं प्लवङ्गमैः ।

ववन्दे परमानन्दं गरुडो गरुडध्वजम् ॥२०॥

प्लवङ्गमैः=कपिभिः **स्पष्टं**=निःसन्देहं यथा तथा **दृष्टः**=नेत्रजन्यज्ञानविषयीकृतः गरुडः **हे राम! जय**=प्रकाशय, शत्रून् संहर **इति ब्रुवाणः**=वदन् सन् **परमानन्दं**=उत्तमसुखोपेतं **गरुडध्वजं** रामं **ववन्दे**=अस्तौषीत्, ननाम च । '**परमानन्दम्**' इत्युक्त्या– 'नागपूगनिमि – त्तपीडा[४] रामस्य नास्ति' इति सूचितम् ॥२०॥

कालिताः काद्रवेयास्ते पक्षवातेन पक्षिणः ।

तद्दर्शनस्पर्शनाभ्यां वानरा बलिनोऽभवन् ॥२१॥

पक्षिणः=गरुडस्य **पक्षवातेन**=पक्षवायुना **ते**=इन्द्रजिन्निर्मिताः **काद्रवेयाः=**कद्रुपुत्राः सर्पाः **कालिताः**=नष्टा बभूवुः । **तद्दर्शनस्पर्शनाभ्यां=**गरुडकृतवानरविषयकदर्शनस्पर्शना – भ्यां **वानराः बलिनः**=पूर्ववद्बलयुक्ताः **अभवन्** ॥२१॥

शुश्रूषां गरुडः कृत्वा राममामन्त्र्य यातवान् ।

सालशैलशिलाहस्ता उदगर्जन् प्लवङ्गमाः ॥२२॥

---

*. ग्रन्थकारः– गरुडदेवस्य च लक्षणे श्रीमध्वोक्तिमनुसरति । तद्यथा–
**''काश्यपोऽस्य मुनिः ध्येयः सुधापूर्णं हिरण्मयम् । दधानः कुम्भमभयं पीतशुक्लारुणो हरिः ॥
कृष्णश्चाजानुतो नाभेः कण्ठात्कादन्त एव च । प्रियायुक् पुरतो विष्णोः पक्षतुण्डसमन्वितः''॥ तं.सा.सं.४.अ.८२–८४.श्लो**

१. **'शुभ्रवर्णाभ्याम्'** इति मू.श्लो.पा ।

२. परन्तु अमरकोशे नोपलभ्यते ।

३. अ.कोशे.२.का.सिंहादिवर्गे.२५८.श्लोकः ।

४. **'नागपूगनिबन्धनं'** दुःखं इति ब.गो ।

Rarest Archiver

गरुडः शुश्रूषां=नागपाशान्मुक्तिं[1] रामसेवां **कृत्वा**, **राममामन्त्र्य**=गच्छामि इति रामम् आपृच्छय **यातवान्**=ययौ । **सालशैलशिलाहस्ताः**=वृक्षपर्वतपाषणपाणयः **प्लवङ्गमाः उदगर्जन्**=सिंहनादमकुर्वन् । 'गर्ज=शब्दे' लङ् ॥२२॥

आकर्ण्य कपिसिंहानां सिंहनादं भयानकम् ।

अस्त्रमोक्षं विनिश्चित्य त्रस्तौ रावणरावणी ॥२३॥

रावणरावणी=रावणेन्द्रजितौ **कपिसिंहानां**=कपिश्रेष्ठानां **भयानकं=**भयजनकं **सिंहनादं =**सिंहध्वनिं, उच्चध्वनिम् इति यावत्, **आकर्ण्य**=श्रुत्वा **अस्त्रमोक्षं**=कपीनां नागस्त्र–मोचनं **विनिश्चित्य**=निर्णीय, **त्रस्तौ**=भयं प्राप्तौ बभूवतुः ॥२३॥

आथर्वणविधानेन हुत्वा हुतवहं मुहुः ।

अदृश्यो रथमध्यास्य ययावाकाशवर्त्मना ॥२४॥

इन्द्रजित् **आथर्वणविधानेन**=अथर्वणवेदोक्तप्रकारेण **हुतवहं**=वह्निं **मुहुः**=पुनरपि **हुत्वा**=पूजयित्वा, **रथमध्यास्य**=रथे उपविश्य **अदृश्यः**=कपिभिः द्रष्टुमयोग्यः सन् **आकश–वर्त्मना**=आकाशमार्गेण **ययौ** ॥२४॥

शम्भुशर्ववराद् गर्वी[2] पूर्ववत् सर्ववानरान् ।

नागभोगैर्दृढं बद्ध्वा रावणं रावणिर्ययौ ॥२५॥

शम्भुशर्ववरात्=ब्रह्मरुद्रानुग्रहात् **गर्वी=**'अहमेव समर्थ' इति अहङ्कारवान् **रावणिः=**इन्द्र–जित् **पूर्ववत्**=प्रागिव **नागभोगैः**=सर्पशरीरैः **सर्ववानरान् दृढं** यथा तथा **बद्ध्वा**, **रावणं ययौ** ॥२५॥

राक्षसेन्द्रो महेन्द्रारिम् अभ्यनन्दत् स्वनन्दनम् ।

कृतकार्यं महावीर्यं प्रशशंस च सादरम् ॥२६॥

राक्षसेन्द्रः=रावणः **स्वनन्दनं**=स्वस्य हर्षजनकं **महेन्द्रारिम्=**इन्द्रजितं दृष्ट्वा **अभ्यनन्दत् =**जहर्ष । **कृतकार्यम्**=अनुष्ठितकपिबन्धप्रयोजनं **महावीर्यं**=महासामर्थ्योपेतं महेन्द्रारिं

---

१. **'नागपाशनाशात्मकरामसेवाम्'** इति दू.कृश्री ।

२. अ) **'स शम्भुवरतो गर्वी'** इति । आ) **'शम्भुशर्ववरात् गर्वात्'** इति च ब.गो.सं.पा । इ) **'स शम्भुवरतो गर्वात्'** प्र.व्या ।

Rarest Archive

सादरम्=आदरेण सहितं यथा तथा **प्रशशंस**=तुष्टाव । 'शंस=कथने'[१] लिट् ॥२६॥

जिज्ञासुः पुरि वृत्तान्तं पूर्वं यातो विभीषणः ।

रणभूमिं तदा प्राप्तो ददर्श पतितान् कपीन् ॥२७॥

पुरि=लङ्कायां **वृत्तान्तं**=वार्तां **जिज्ञासुः**=ज्ञातुम् इच्छुः **पूर्वं**=द्वितीयवानरनागबन्धात् पूर्वं **यातः**=लङ्कां प्राप्तः **विभीषणः रणभूमिं**=युद्धमण्डलं **प्राप्तः** सन्, **तदा**=तस्मिन् काले **पतितान्**=मूर्छितान् **कपीन् ददर्श** ॥२७॥

अपश्यन्नुत्थितं कञ्चिद् रात्र्यां रात्रिचरेश्वरः ।

कोऽत्राविपन्न इत्युच्चैः उवाच जलदस्वनः ॥२८॥

जलदस्वनः=मेघध्वनिः **रात्रिचरेश्वरः**=विभीषणः **रात्र्यां**=निशि **कञ्चित्**=कमपि **उत्थितं** =उत्थाय स्थितं **अपश्यन्** सन्, **अत्र**=रणभूमौ **कः**=पुरुषः **अविपन्नः**=अमूर्च्छितोऽस्ति? **इत्युच्चैः**=उन्नतध्वनिना[२] **उवाच** ॥२८॥

अहमस्मीति हनुमान् ब्रुवन्नुपससार तम् ।

अलातं भ्रामयन्तौ तौ कपीन् विष्वगपश्यताम् ॥२९॥

हे विभीषण ! **अहम्** 'अविपन्नः सन् उत्थितोऽस्मि' इति **ब्रुवन्=**वदन् **हनुमान् तं**=विभीषणम् **उपससार=**प्राप । **अलातम्**=उल्कां **भ्रामयन्तौ**=परिवर्तयन्तौ **तौ=**हनूमद्–विभीषणौ **विष्वक्=**परितः **कपीन् अपश्यताम्**=ऐक्षेताम् । दृशेः लङि प्रथमपुरुषे द्विवचनम् ॥२९॥

सुग्रीवाङ्गदनीलादीन् भग्नाङ्गान् रुधिरोक्षितान् ।

दृष्ट्वाऽन्यांश्चोपययतुः जाम्बवन्तं विमोहितम् ॥३०॥

तौ **भग्नाङ्गान्**=भग्नावयवान् **रुधिरोक्षितान्**=रक्तेन सिक्तान् **सुग्रीवादीन् अन्यांश्च=**कपींश्च **दृष्ट्वा, मोहितं=**प्राप्तमूर्च्छं **जाम्बवन्तं ययतुः**=प्रापतुः । यार्तेलिटि प्रथमपुरुषे द्विवचनम् ॥३०॥

आश्वसयन् जाम्बवन्तम् अम्बुसेकैर्विभीषणः ।

किं जीवसीत्युवाचाऽरात् मन्दं मन्दं स चाब्रवीत् ॥३१॥

---

१. 'शंसु=स्तुतौ' इति वै.सि.कौमुद्याम् ।

२.**'उन्नतत्वेन'** इति दू.कृश्री ।

Rarest Archiver

अम्बुसेकैः=उदकप्रोक्षणैः[1] **जाम्बवन्तम् आश्वासयन्**=दुःखरहितं कुर्वन् **विभीषणः** हे जाम्बवन् ! त्वं **जीवसि किं**=प्राणधारणं करोषि किं? । 'जीव=प्राणधारणे' लटि मध्यम–पुरुषैकवचनम् । **इति आरात्**=समीपे स्थित्वा **उवाच** । **स च**=सोऽपि जाम्बवान् **मन्दं मन्दं**=अतिशनैः **अब्रवीत्** ॥३१॥

अञ्जना सुप्रजा येन स किं जीवति पावनिः ।

तस्मिन् जीवति जीवामो मृते तस्मिन् मृता वयम् ॥३२॥

येन=पावनिना **अञ्जना**=केसरिपत्नी **सुप्रजा**=शोभनपुत्रवती भवति **पावनिः**=वायुपुत्रः **सः** हनूमान् **जीवति किं**=प्राणधारणं करोति किम्? । **तस्मिन्** पावमानौ **जीवति**=प्राण–धारणं कुर्वति सति, त्वं च, अहं च, एते च **वयं जीवामः**=प्राणधारणं कुर्मः । **तस्मिन्**=हनूमति **मृते सति वयं मृताः** इत्युवाच ॥३२॥

इत्युक्त ऊचे पौलस्त्यः कस्मात् पृच्छसि मारुतिम् ।

न लक्ष्मणं न सुग्रीवं नाङ्गदं सन्मतिं त्विति[2] **॥३३॥**

जाम्बवता **इत्युक्तः पौलस्त्यः**=पुलस्त्यपौत्रो विभीषणः हे जाम्बवन् ! **कस्मात्**=हेतोः **मारुतिं**=हनुमन्तं **पृच्छसि**=ज्ञाप्स्यसि, ज्ञातुम् इच्छसीति यावत् । **लक्ष्मणं न पृच्छसि, सुग्रीवं न पृच्छसि** । **सन्मतिं**=समीचीनबुद्धियुक्तम्[3] **अङ्गदं न पृच्छसि** इत्यूचे ॥३३॥

इत्युक्तो ब्रह्मज्ञः प्रोचे हनूमान् यदि जीवति ।

स्वतेजसा पालयेन्नो नास्त्यन्यः शक्तिमानिति ॥३४॥

विभीषणेन **इत्युक्तो ब्रह्मज्ञः**=जाम्बवान् हे विभीषण ! **यदि हनूमान् जीवति** तर्हि **स्वतेजसा**=स्वसामर्थ्येन **नः**=अस्मान् **पालयेत्**=रक्षेत् । **शक्तिमान्**=सामर्थ्योपेतः हनू–मतः **अन्यः नास्ति** । अतः तं पृच्छामीति **प्रोचे** ॥३४॥

आर्य जीवाम्यहमिति ब्रुवाणो वायुनन्दनः ।

उपसृत्य तमस्प्राक्षीत् शङ्करेण स्वपाणिना ॥३५॥

---

१. **'उदकप्रक्षेपैः'** इति वा.वे ।

२. **'मतिमन्निति'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।

३. **'समाधिना बुद्धियुक्तम्'** इति तु प्रामादिकः स्यात् वा.वे ।

Rarest Archiver

जाम्बुवता इत्युक्ते सति **हे आर्य !**=पूज्य जाम्बवन् **अहं** जीवामि, इति **ब्रुवाणः**=वदन् सन् **वायुनन्दनः**=वायुसुतः हनूमान् **उपसृत्य**=जाम्बवत्समीपं प्राप्य **तं**=जाम्बवन्तं **शङ्करेण** =सुखकरेण **स्वपाणिना अस्प्राक्षीत्**=पस्पर्श ।'स्पृश=संस्पर्शने'[१] लुङ् ॥३५॥

अथाब्रवीद् ब्रह्मसुतो वत्स स्वज्ञातिवत्सलः ।

मृतं कपिकुलं रक्ष रामदासाग्रणीर्भवान् ॥३६॥

अथ=हनूमतः स्पर्शानन्तरं **ब्रह्मसुतः**=जाम्बवान् **हे वत्स**=हे बालक ! हनूमान् यतः **भवान् रामदासाग्रणीः**=रामभृत्येषु श्रेष्ठः । अतः **स्वज्ञातिवत्सलः**=कपिषु स्नेहवान् त्वं **मृतं कपिकुलं रक्ष**=पालय ॥३६॥

समीपे मेरुशैलस्य शैलोऽयं गन्धमादनः[२] **।**

तस्मादानीयतां शीघ्रं त्वयौषधिचतुष्टयम् ॥३७॥

कपिकुलं कथं रक्षणीयम्? इत्यत आह– **समीप** इति । **मेरुशैलस्य**=मेरुपर्वतस्य **समीपे अयं**=प्रसिद्धः **गन्धमादनः**=गन्धमादननामकः **शैलः**=पर्वतः वर्तते, **त्वया तस्मात्** =गन्धमादनात् **औषधिचतुष्टयं शीघ्रं** यथा तथा **आनीयताम्** ॥३७॥

मृतसञ्जीवनी मुख्या सन्धानकरणी परा ।

सवर्णकरणी चैव विशल्यकरणीति च ॥३८॥

'औषधचतुष्टयस्य नाम किम्' ? इत्यताह– **मृते**ति । तत्र **मृतसञ्जीवनी मृतानां**=त्यक्त–प्राणानां **सञ्जीवनी**=पुनः प्राणप्रतिष्ठापिका **मुख्या**=प्रधाना **सन्धानकरणी**=छिन्नावयवानां मेलनकरणी **परा**=अन्या **सवर्णकरणी च**=क्षतात्पूर्वं यः देहवर्णः तत्समानवर्णकरी **विशल्यकरणी च**=देहेषु विद्यमानशराणां बहिर्निर्गमनकरणी च इति 'औषधचतुष्टयं त्वया शीघ्रम् आनीयताम्'[३] **इति** 'ब्रह्मसुतोऽब्रवीत्' ॥३८॥

इत्युक्तो हनुमान् नत्वा रामं रामप्रियामपि ।

ववृधे पर्वताग्रस्थो द्वितीय इव पर्वतः ॥३९॥

---

१. **'स्पृश=आमर्शने'** इति श्रीविश्व.ती ।
२. **'शैलो यो गन्धमादनः'** इति प्र.व्या । ब.गो च ।
३. पूर्वश्लोकेनान्वयः ।

Rarest Archiver

जाम्बवता **इत्युक्तः हनुमान् रामं रामप्रियां**=सीतामपि **नत्वा पर्वताग्रस्थः**=त्रिकूटपर्वताग्रे विद्यमानः सन् **द्वितीयः पर्वत इव ववृधे**=अभिवृद्धः बभूव ॥३९॥

अतुच्छं[1] पुच्छमाविध्य कर्णावाकुञ्च्य पूर्णभाः ।

धराधरमवष्टभ्य धीरोऽसावथ पुप्लुवे ॥४०॥

धीरः=अध्यवसायान्तगामी[2] 'धीरः' इति क्वचित्पाठः । धैर्योपेत इत्यर्थः । **पूर्णभाः=**पूर्ण–कान्तिः **असौ** हनूमान् **अतुच्छं**=अतिस्थूलं **पुच्छं**=लाङ्गूलम् **आविध्य**=ताडयित्वा **कर्णौ**=श्रोत्रे **आकुञ्च्य**=सङ्कुच्य, **धराधरं**=पर्वतं **अवष्टभ्य**=पीडयित्वा **अथ=**अनन्तरं **पुप्लुवे**=आकाशं प्राप ॥४०॥

सप्तद्वीपवती पृथ्वी चकम्पे तेन पीडिता ।

शाखेव शाखिनः स्निग्धा पल्लवावलिशालिनी ॥४१॥

तेन=हनुमता **पीडिता सप्तद्वीपवती पृथ्वी**=भूमिः **पल्लवावलिशालिनी**=पल्लव–पङ्क्तिभिः[3] युक्ता **शाखिनः**=वृक्षस्य **स्निग्धा**=मनोहरा **शाखेव**=शाखा यथा तथा **चकम्पे**= चचाल । 'कपि=कम्पने' लिट् ॥४१॥

प्रासादशिखरादीनि लङ्कायां[4] भङ्गमाययुः ।

[5]मारुतेः पातरभसा त्रिकूटे चालिते[6] तथा ॥४२॥

मारुतेः=हनुमतः **पातरभसा**=प्लुतवेगेन तथा **त्रिकूटे**=पर्वते **चालिते**=कम्पिते सति **लङ्कायां** स्थितानि **प्रासादशिखरादीनि भङ्गं**=नाशम् **आययुः=**प्रापुः ॥४२॥

मृताः केचित् परे मुग्धा रुरुदू राक्षसाः परे ।

कर्तव्यमूढा अपरे लङ्काकम्पनकम्पिताः ॥४३॥

---

१. **'अतुलं पुच्छम्'** इति प्र.व्या ।
२. **'अध्यवसितान्तगामी'** इति दू.कृ.श्री ।
३. **'पल्लवावलिभिः'** इति वा.वे ।
४. **'लङ्काया भङ्ग'** मू.श्लो.पा । इति श्रीविश्व.ती ।
५. **'निष्पीडिते त्रिकूटे च मारुतेः पातरंहसा'** इति ब.गो ।
६. **'लोलिते'** इति ब.गो.सं.पा ।

Rarest Archiver

[1]**लङ्काकम्पनकम्पिताः**=लङ्काचलनेन चलनयुक्ताः **केचित् राक्षसाः मृताः** । **परे** दुद्रुवुः । **रुरुदुः**=अश्रुविमोचनं चक्रुः । **अपरे**=अन्ये **कर्तव्यमूढाः**=कर्तव्यज्ञानरहिताः अभवन् ॥४३

स द्वितीय इवाऽदित्य आदित्यपथमेयिवान् ।

[2]अतिदीर्घमथाऽकाशं [3]हनूमानत्यवर्तत ॥४४॥

द्वितीय आदित्य इव=द्वितीयसूर्य इव **सः**=हनूमान् **आदित्यपथम्**=आदित्यमार्गं **एयिवान्**=प्राप्तः । **अथ**=अनन्तरं **हनूमान् अतिदीर्घम्**=अतिदूरस्थितम् **आकाशम् अत्यवर्तत**=अतिक्रान्तवान् ॥४४॥

योजनानामर्धलक्षम् अतीत्यायत्नतो द्रुतम् ।

असङ्ग एकपातेन प्रापासौ गन्धमादनम् ॥४५॥

असङ्गः=कुत्राप्यनवस्थितः **असौ**=हनूमान् **एकपातेन**=एकप्लुत्या **योजनानाम् अर्धलक्षं**=पञ्चाशत् सहस्रपरिमितम् आकाशम् **अयत्नतः**=अनायासेन **अतीत्य**=अतिक्रम्य, **द्रुतं**=शीघ्रं **गन्धमादनं** पर्वतं **प्राप** ॥४५॥

औषधानि विलीनानि[4] ज्ञात्वा क्रुद्धो मरुत्सुतः ।

गिरिमेवोज्जहारैनं शतयोजनमण्डलम् ॥४६॥

मरुत्सुतः=हनूमान् **विलीनानि**=आच्छादितानि **औषधानि**=सञ्जीवनादीनि **ज्ञात्वा**=आलोच्य **क्रुद्धः सन् शतयोजनमण्डलं**=शतयोजनविशालं **गिरिमेव**=गन्धमादनमेव **उज्जहार**= उत्पाटितवान् । 'हृञ्=हरणे' लिट् ॥४६॥

तं गिरिं काञ्चनमयं प्रतिदीप्तमहौषधम् ।

प्रतिगृह्य पपाताथ[5] रामं रामप्रियाग्रणीः ॥४७॥

अथ=पर्वतोत्पाटनानन्तरं **रामप्रियाग्रणीः**=रामप्रियेषु श्रेष्टः हनूमान् **काञ्चनमयं**=सुवर्णा

---

१. '**लङ्काकम्पनकम्पिताः** इत्येदारभ्य '**परे मृताः**' इति पर्यन्तं दू.कृ.श्री मातृकायां लुप्तः, प्रमादो वा स्यात् ।

२. '**अतिदीर्घमथाध्वानं**' इति ब.गो ।

३) '**हनूमानभ्यवर्धत**' इति च मू.श्लो.पा । प्र.व्या च ।

४. '**निलीनानि**' इति वा.वे । ब.गो.सं.पा ।

५. अ) '**प्रतिगृह्याऽपपाताथ**' इति ब.गो ।

आ) '**प्रतिगृह्योत्पपाताथ**' इति ब.गो.सं.पा ।

Rarest Archiver

–त्मकं **प्रतिदीप्तमहौषधं**=जाज्वल्यमानमहौषधयुक्तं **तं**=गन्धमादननामकं **गिरिं**=पर्वतं **प्रतिगृह्य**=हस्ते गृहीत्वा **रामम् पपात**=प्राप ॥४७॥

लीलयोल्लोलयन्नद्रिं कराग्रे कन्दुकायितम् ।

विरराज वियत्येष वीरराजो जगत्त्रये ॥४८॥

जगत्त्रये वीरराजः=वीरश्रेष्ठः **एषः**=हनूमान् **कन्दुकायितं**=कन्दुवत् आचरितम् **अद्रिं**= गन्धमादनं **कराग्रे लीलया**=क्रीडया **उल्लोलयन्**=उच्चालयन् सन् **वियति**=आकाशे **विरराज**=चकाशे ॥४८॥

निन्ये निमेषमात्रेण[1] स यावद्गन्धमादनम् ।

उदतिष्ठन् कपिगणाः तावदौषधवायुना ॥४९॥

सः=हनूमान् **निमेषमात्रेण**=चक्षुरुन्मीलनकालमात्रेण **यावत्**=यदा **गन्धमादनं निन्ये** =आनीतवान्, **तावत्**=तदा **औषधवायुना कपिगणाः उदतिष्ठन्**=उत्थिताः ॥४९॥

जीवनं च्छिन्नसन्धानं विशल्यत्वं सवर्णताम् ।

चतुर्णामौषधानां ते गन्धसामर्थ्यतोऽगमन् ॥५०॥

ते=कपयः **चतुर्णां**=सञ्जीवन्यादीनाम् **औषधानां**=लताविशेषाणां **गन्धसामर्थ्यतः**= परिमळसामर्थ्यात् **जीवनं**=प्राणधारणं, **छिन्नसन्धानं**=छिन्नावयवानां पुनः मेलनं, पुनरुत्प–त्तिं वा, **विशल्यत्वं**=शरीरान्तर्विद्यमानशरादीनां बहिर्गमनं, **सवर्णतां**=पूर्ववर्णेन समान–वर्णोपेतत्वं च **अगमन्**=अगुः । 'गन्धमादनपर्वतानयनानन्तरं कपीनामिव राक्षसानामपि जीवनादिप्राप्तिः किं न स्याद्' ? इति शङ्का–

'रामाज्ञया हि रक्षांसि हरयोऽब्धाववाक्षिपन् ।
नोज्जीविताः ततस्ते तु वानरा नीरुजोऽभवन्'[2] ॥ इत्यनेन परिहर्तव्या ॥५०॥

स देवतानामभयङ्करात्मा भयङ्करो दैवतशात्रवाणाम् ।

बभौ गिरिं बिभ्रदहो हनूमान् त्रिविक्रमश्चक्रधरो यथा प्राक् ॥५१॥

---

१. **'निमिषमात्रेण'** इति प्र.व्या ।

२. श्रीम.भा.ता.नि.८.अ.२०४.श्लोकः ।

Rarest Archive

देवतानाम् अभयङ्करात्मा=भयाभावसम्पादकस्वरूपः **दैवतशात्रवाणां**=सुरशत्रूणां **भय–ङ्करः**=भयजनकः **गिरिं**=गन्धमादनं **बिभ्रद्**=दधानः **सः हनूमान्** **प्राक्**=पूर्वं **चक्रधरः**=चक्रं बिभ्रत् **त्रिविक्रमः**=परमात्मा यथा बभौ तथा **बभौ**=रराज । **अहो**=आश्चर्यम् ॥५१॥

सौमित्रिसुग्रीवविधातृनन्दना आनन्दिनः साङ्गदनीलपूर्वकाः ।

धराधरेन्द्रं दधतं तमार्चयन् धरां दधानं विबुधा यथा हरिम् ॥५२॥

प्राक्=पूर्वं **विबुधाः**=देवाः **धरां**=भूमिं **दधानं**=बिभ्राणं **हरिं**=वराहं यथा **अर्चयन्** तथा **आनन्दिनः**=सन्तोषयुक्ताः सौमित्र्यादयः **धराधरेन्द्रं**=पर्वतश्रेष्ठं गन्धमादनं **दधतं**=दधानं **तं**=हनूमन्तम् **आर्चयन्**=अपूजयन् ॥५२॥

समधिकपरिरब्धो रामदेवस्य दोर्भ्यां स्तुवदमरविमुक्तैर्भूषितः पुष्पपूगैः ।

समरभुवि स तिष्ठन् क्षेपणेनैव चक्रे पवनतनय एनं पूर्ववत् पर्वतेन्द्रम् ॥५३॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे दशमः सर्गः ॥

रामदेवस्य दोर्भ्यां=हस्ताभ्यां **समधिकपरिरब्धः**=सम्यग् अतिदृढं यथा तथा आलिङ्गितः **स्तुवदमरविमुक्तैः**=स्तुवन्तो ये **अमराः**=देवाः तैः **विमुक्तैः**=अभिवृष्टैः **पुष्पपूगैः**=कुसुम–समूहैः **भूषितः**=अलङ्कृतः **सः पवनतनयः**=हनूमान् **समरभुवि**=युद्धभूमौ **तिष्ठन्**=स्थितः सन्नेव **पर्वतेन्द्रम् एनं**=गन्धमादनं **क्षेपणेनैव**=आवृत्य प्रक्षेपेणैव **पूर्ववत्**=पूर्वं यथा तथा स्वस्थाने स्थितः तथा **चक्रे** ॥५३॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे दशमः सर्गः ॥

आरम्भतः श्लोकाः–४६६+५३=५१९

Rarest Archive

Rarest Archiver

॥ अथ एकादशः सर्गः ॥

Rarest Archiver

॥ अथ एकादशः सर्गः ॥

उत्थितैरुद्धतैर्वीरैः उल्बणैः सर्ववानरैः ।

सिंहनादः कृतो घोरः सद्यो लङ्कामकम्पयत् ॥१॥

उत्थितैः=नागपाशविमोचनानन्तरम् उत्तिष्ठद्भिः **उद्धतैः**=बलवद्भिः **वीरैः उल्बणैः**=क्रूरैः **सर्ववानरैः कृतः** उच्चरितः **घोरः**=भयङ्करः **सिंहनादः**=सिंहध्वनिः **सद्यः**=सिंहनादक्षण एव **लङ्काम् अकम्पयत्**=अचालयत् ॥१॥

रावणस्य नियोगेन रावणिः पुनरुत्कटः ।

निर्ययौ रथमध्यास्य तर्पयित्वा हुताशनम् ॥२॥

उत्कटः=क्रूरः **रावणिः**=इन्द्रजित् **रावणस्य नियोगेन**=आज्ञया पुनरपि **हुताशनं**=वह्निं **तर्पयित्वा**=तृप्तिं प्रापय्य **रथमध्यास्य**=रथे स्थित्वा आकाशवर्त्मना **निर्ययौ** ॥२॥

शर्वशम्भुवराद् गर्वी पूर्ववत् सर्ववानरान् ।

बबन्ध नागैरिन्द्रारिः [१]तं न सेहेऽथ लक्ष्मणः ॥३॥

शर्वशम्भुवरात्=शिवब्रह्मानुग्रहात् **गर्वी**=अहङ्कारवान् **इन्द्रारिः**=इन्द्रजित् **सर्ववानरान् पूर्ववत्**=पूर्वं यथा तथा **नागैः**=नागपाशैः **बबन्ध । लक्ष्मणः तं**=बन्धं 'तद्' इति पाठे **तत्**=बन्धनं **न सेहे**=न ममर्ष । 'षह=मर्षणे' लिट् ॥३॥

रामानुजोऽब्रवीद् रामं देवाहं ते प्रसादतः[२] ।

सूदयिष्यामि शक्रारिं ब्रह्मास्त्रेण क्षणादिति ॥४॥

रामानुजः=लक्ष्मणः **हे देव**=राम ! **अहं ते**=तव **प्रसादतः**=अनुग्रहात् **शक्रारिं**=इन्द्रजितं **ब्रह्मास्त्रेण क्षणात् सूदयिष्यामि**=हनिष्यामि **इति** रामम् **अब्रवीत्** ॥४॥

भयाददृश्ये ब्रह्मास्त्रं न मोक्तव्यं विपश्चिता ।

हन्यां शरेण शक्रारिम् इति रामोऽब्रवीदिमम् ॥५॥

---

१. अ) **'तं न सेहे स लक्ष्मणः'** इति दू.कृ.श्री । आ) **'तन्न सेहेऽथ लक्ष्मणः'** इति ब.गो । २. **'त्वत्प्रसादतः'** इति प्र.व्या ।

Rarest Archiver

हे लक्ष्मण ! **भयात्=**साध्वसात् **अदृश्ये=**अदृश्यत्वं प्राप्ते पुरुषे **ब्रह्मास्त्रं विपश्चिता**= 'स्वात्मानमेव हनिष्यति'[१] इति जानता **न मोक्तव्यम्=**न प्रयोक्तव्यम् । अहं **शरेण** अस्त्र – रहितकेवलबाणेन **शक्रारिम्=**इन्द्रजितं **हन्यां**=हिंस्याम् इति **रामः इमं=**लक्ष्मणम् **अब्रवीत्** ॥५॥

रामो गरुडमारुत्योः बलं दर्शयितुं पुरा ।

अस्त्रबद्धवदास्ते स्म तदोग्रं शरमाददे ॥६॥

'ईदानीं शरमात्रेण शक्रारिं हन्यामिति वदन् रामः पूर्वं किमर्थं तूष्णीं स्थितवान्' इत्यतः ग्रन्थकार आह– **राम** इति । **रामः पुरा**=पूर्वं **गरुडमारुत्योः**=गरुडहनूमतोः **बलं=**सामर्थ्यं **दर्शयितुम्**=प्रकटयितुम् एव **अस्त्रबद्धवत्**=नागास्त्रेण बद्ध इव **आस्ते स्म**=अतिष्ठत् । **तदा=**तृतीयवारबन्धनानन्तरम् **उग्रं**=क्रूरं **शरं=**बाणम् **आददे**=जग्राह ॥६॥

अद्राक्षीन्मामयं रामो घोरशक्तिरिति स्मरन् ।

पलायितः प्राणभयाद् रणं त्यक्त्वा स रावणिः ॥७॥

सः रावणिः=इन्द्रजित् **घोरशक्तिः**=भयङ्करबलः **अयं रामः माम् अद्राक्षीत्**=दृष्ट्वानिति **स्मरन्=**चिन्तयन् सन् **प्राणभयात्=**रामेण शरे मुक्ते सति प्राणान् त्यक्षामीति भीत्या **रणं=** युद्धं **त्यक्त्वा पलायितः**=पलायनमकरोत्, दुद्राव इति यावत् ॥७॥

जय देव त्रिलोकैकभूषणारिविभीषण ।

इति देवस्तदाऽस्तावि देवैरिन्द्रारिकालनः[२] ॥८॥

'इन्द्रजिति पलायिते देवाः विभीषणम् अस्तुवन्' इति ग्रन्थान्तरे वर्तते' । तस्याभिप्राय उक्तस्तात्पर्यनिर्णये । 'विभीषणः शत्रुभीषणत्वाद्' इति तदाह ग्रन्थकारः– **जये**ति । **अरि –विभीषण**=शत्रुभयङ्कर! **त्रिलोकैकभूषण**=लोकत्रयस्य मुख्यालङ्कारस्थानीय! **देव**=राम! **जय**=तव जयं प्रकाशय, शत्रून् तिरस्कुरु । **इति**=एवंप्रकारेण **इन्द्रारिकालनः**=इन्द्रजितं पलायनं कुर्वन् **देवः=**रामः **देवैः**=इन्द्रादिभिः **तदा**=इन्द्रजित्पलायनसमये **अस्तावि=** स्तुतोऽभुत् । 'ष्टुञ्=स्तुतौ' कर्मणि लुङ् ॥८॥

---

१. **'स्वात्मनमेव हिनस्तीति जानता'** इति ब.गो ।

२. **'देवैरिन्द्रारिकालनात्'** इति ब.गो ।

Rarest Archiver

मृतकोपममालोक्य स्वसैन्यं करुणाकरः ।

ज्ञानास्त्रेण ज्ञानमूर्तिः क्षणमात्रादबूबुधत् ॥९॥

करुणाकरः=दयानिधिः **ज्ञानमूर्तिः**=ज्ञानात्मकशरीरो रामः **मृतकोपमं**=मृतसदृशं **स्वसैन्यं** =कपिसेनाम् **आलोक्य**=दृष्ट्वा **ज्ञानास्त्रेण क्षणमात्रात्**=क्षणमात्रकालात् **अबूबुधत्**=बोध –यामास, ज्ञानयुक्तानकार्षीत् इति यावत् । 'बुध=अवगमने' णिजन्तात् लुङ् ॥९॥

उत्तस्थुरुन्नदन्तस्ते सालशैलशिलाधराः ।

हनूमन्तं पुरस्कृत्य लङ्कामभ्यद्रवन् रुषा[1] **॥१०॥**

सालशैलशिलाधराः=वृक्षगिरिपाषाणान् बिभ्राणाः **उन्नदन्तः**=सिंहनादं कुर्वन्तः **ते**=कपयः **उत्तस्थुः**=उत्थिताः । अनन्तरं **हनूमन्तं पुरस्कृत्य**=पुरतः कृत्वा **रुषा**=कोपेन **लङ्काम् अभ्यद्रवन्**=प्राप्ताः ॥१०॥

रावणस्य नियोगेन रावणिः पुनरुत्कटः ।

ससैन्यः पश्चिमद्वारे रथी धन्वी विनिर्ययौ ॥११॥

रावणस्य नियोगेन=आज्ञया **उत्कटः**=क्रूरः **ससैन्यः**=सेनया सहितः **रथी**=रथवान् **धन्वी** =धनुष्मान् **रावणिः**=इन्द्रजित् **पश्चिमद्वारे पुनः विनिर्ययौ**=बहिरागतः ॥११॥

हरयो हरिसङ्काशाः युयुधुः शक्रशत्रुणा[2] **।**

सृष्ट्वा स्वमायया सीताकृतिं तां निजघान सः ॥१२॥

हरिसङ्काशाः=सिंहसदृशाः **हरयः**=कपयः **शक्रशत्रुणा**=इन्द्रजिता सह **युयुधुः**=युद्धं चक्रुः । **सः**=इन्द्रजित् **स्वमायया**=स्वसामर्थ्येन **सीताकृतिं**=सीताप्रतिमां **सृष्ट्वा**= निर्माय **तां**=स्वसृष्टसीताप्रतिकृतिं **निजघान**=हिंसितवान् ॥१२॥

दुःखाज्ञानविहीनोऽपि रामः स्वानन्दवारिधिः ।

दर्शयामास दुःखादीन् नटवत् पटुचेष्टितः ॥१३॥

---

१. **'अभ्यद्रवन् द्रुतम्'** मू.श्लो.पा ।

२. **'शक्रवैरिणा'** इति च मू.श्लो.पा ।

Rarest Archiver

स्वानन्दवारिधिः=स्वरूपभूतानन्दसमुद्रः **दुःखाज्ञानविहीनोऽपि**=दुःखाज्ञानरहितोऽपि **पटु – चेष्टितः**=स्पष्टव्यापारः **रामः नटवत्**=नृत्तं कुर्वन् पुरुष इव **दुःखादीन्**=दुःखाज्ञानादीन् **दर्शयामास**=प्रकाशितवान् ॥१३॥

शतशत्रो रिपुजनान्[1] हत्वा मारुतिरुद्धतः ।

प्रचण्डो गण्डशैलेन द्रावयामास रावणिम् ॥१४॥

प्रचण्डः=शत्रुभयङ्करः **उद्धतः**=बलयुक्तः **मारुतिः**=हनूमान् **गण्डशैलेन**=स्थूलपाषाणेन **शक्रशत्रोः**=इन्द्रजितः **रिपुजनान्**=भृत्यभूतराक्षसान् **हत्वा रावणिम्**=इन्द्रजितं **द्रावयामास** =पलायितं चकार ॥१४॥

भग्नदर्पो हनुमता जम्भारिद्विट् निकुम्भिलाम् ।

प्राप्य होतुं हुतवहं चक्रे परममुद्यमम् ॥१५॥

हनुमता भग्नदर्पः=नाशितगर्वः **जम्भारिद्विट्**=शक्रजित् **निकुम्भिलां**=निकुम्भिलानामिकां होमभूमिं, होमस्थलमिति यावत्, **प्राप्य हुतवहं**=वह्निं **होतुं**=पूजयितुं **परम्**=उत्तमम् **उद्यमं**=प्रयत्नं **चक्रे** ॥१५॥

विभीषणोऽब्रवीद् रामं रावणिर्वध्यतां द्रुतम् ।

कृतहोमो ह्यवध्यः स्याद् ब्रह्मणोऽयं वरादिति ॥१६॥

अथ इन्द्रजितः होमस्थलप्राप्त्यनन्तरं **विभीषणः** हे राम ! **ब्रह्मणः**=चतुर्मुखस्य **वरात्**=अनुग्रहात् **कृतहोमः**=चतुर्वारमनुष्ठितहोमः **अयम्**=इन्द्रजित् **हि**=यस्मात् **अवध्यः** =हन्तुम् अशक्यः **स्यात्** तस्मात् होमकरणात्पूर्वमेव **द्रुतं**=शीघ्रं यथा तथा **रावणिः बध्यतां**=त्वया हन्यताम् **इति रामम् अब्रवीत्** ॥१६॥

महेन्द्रारिं जिघांसुं[2] तं लक्ष्मणं लक्ष्मणाग्रजः ।

आदिदेश हरीन्द्रांश्च समारुतिविभीषणान् ॥१७॥

लक्ष्मणाग्रजः=रामः **महेन्द्रारिम्**=इन्द्रजितं **जिघांसुं**=हन्तुंकामं **लक्ष्मणम् आदिदेश**= आज्ञापयामास । **समारुतिविभीषणान्**=हनुमद्विभीषणाभ्यां सहितान् **हरीन्द्रांश्च**=कपींश्च

---

१. **'परिजनान्'** इति मू.श्लो.पा ।

२. **'जिघांसन्तम्'** इति मू.श्लो.पा । प्र.व्या । ब.गो ।

Rarest Archiver

आदिदेश ॥१७॥

परादुतं नीचवृत्तिं रावणिं कूटयोधिनम् ।

अजिघांसुः स्वयं रामः प्रेषयामास लक्ष्मणम् ॥१८॥

'रामः इन्द्रजितं हन्तुं स्वयं कुतो नागच्छद्' ? इत्यत आह– **परादुत**मिति । **परादुतं**= पलायितं **नीचवृत्तिं**=नीचव्यापारं **कूटयोधिनं=**कापट्येन युद्धं कुर्वन्तं **रावणिम्=**इन्द्रजितं **स्वयमजिघांसुः**=अहन्तुकामः **रामः** इन्द्रजितं हन्तुं **लक्ष्मणं प्रेषयामास** आदिदेश ॥१८॥

प्राप्ता निकुम्भिलोपान्तं ते विभीषणनीतितः ।

निजघ्नू रक्षसां सैन्यं नियुक्तं शक्रशत्रुणा ॥१९॥

निकुम्भिलोपान्तं=होमभूमिसमीपं **प्राप्ताः**=गताः **ते**=कपयः **शक्रशत्रुणा**=इन्द्रजिता **नियुक्तं**=प्रेषितं **रक्षसां=**राक्षसानां **सैन्यं=**सेनां **विभीषणनीतितः=**विभीषणोक्तयुक्त्या **निजघ्नुः=**हिंसितवन्तः । **विभीषणनीतितः** निकुम्भिलोपान्तं प्राप्ता इति अन्वयः ॥१९॥

ऋक्षवानरवीराणां वृक्षशैलप्रहारतः ।

लक्ष्मणस्य शरैश्चोग्रै रक्षसामभवत् क्षयः ॥२०॥

ऋक्षवानरवीराणां=भल्लकश्रेष्ठानां कपिश्रेष्ठानां च **वृक्षशैलप्रहारतः**=द्रुमगिरिप्रहारैः **लक्ष्म –णस्य उग्रैः=**क्रूरैः **शरैश्च**=बाणैरपि **रक्षसां क्षयः**=नाशः अभवत् ॥२०॥

ते विभीषणसौमित्र्योः वाक्यतः कपयो रिपोः ।

होमविघ्नं स्फुटं चक्रुः हसन्तो बहुहेलनैः ॥२१॥

ते=कपयः **विभीषणसौमित्र्योः**=विभीषणलक्ष्मणयोः **वाक्यतः होमविघ्नं** कुरुतेति वाक्याभ्यां **हसन्तः**=हासं कुर्वन्तः सन्तः **बहुहेलनैः**=बहुविधाभिरवज्ञाभिः, मलमूत्रोत्स – र्जनादिभिः इति यावत् । **रिपोः**=इन्द्रजितः **होमविघ्नं=**होमनाशं **स्फुटं=**स्पष्टं यथा तथा **चक्रुः** ॥२१॥

कपिभिः कोपितस्तत्र रावणी रणदुर्मदः ।

सालजालादथोत्पत्य रथी धन्वी व्यदृश्यत ॥२२॥

Rarest Archiver

तत्र=तस्मिन् समये **कपिभिः कोपितः**=कोपं प्रापितः **रणदुर्मदः**=रणं करोमीति दुष्टाह – ङ्कारवान् **रावणिः**=इन्द्रजित् **अथ**=होमनाशानन्तरं **सालजालात्**=वृक्षसमूहात् **उत्पत्य**= बहिरागत्य **रथी धन्वी सन् व्यदृश्यत**=कपिभिः न दृष्टः ॥२२॥

रक्तास्यनयनः क्रुद्धो भिन्नाञ्जनचयोपमः ।

कपीनद्रावयद् बाणैः दण्डपाणिरिवापरः ॥२३॥

रक्तास्यनयनः=अरुणवदननेत्रः **भिन्नाञ्जनचयोपमः**=छिन्नमषीराशिसदृशः[१] **क्रुद्ध** इन्द्रजित् **अपरः**=अन्यः **दण्डपाणिः**=दण्डहस्तो यम **इव बाणैः कपीनद्रावयद्**=द्रावयामास ॥२३॥

कपीनां कालनं दृष्ट्वा कुपितो मारुतात्मजः ।

राक्षसीमक्षिणोत् सेनां वृक्षवर्षैर्निरन्तरैः ॥२४॥

मारुतात्मजः=हनूमान् **कपीनां कालनं**=पलायनं, नाशनं वा **दृष्ट्वा कुपितः सन् निरन्तरैः**=अव्यवहितैः, अनवरतैरिति यावत् । **वृक्षवर्षैः**=द्रुमवृष्टिभिः **राक्षसीं**=इन्द्रजित्– सम्बन्धिनीं सेनाम् **अक्षिणोत्**=अनाशयत् ॥२४॥

जाज्वल्यमानं कोपेन कालज्वलनसप्रभम्[२] **।**

अभ्यद्रवद्धनूमन्तं शरवर्षेण रावणिः ॥२५॥

रावणिः=इन्द्रजित् **कोपेन**=अमर्षेण **जाज्वल्यमानम्**=अतिशयेन ज्वलन्तं **कालज्वलन – सप्रभं**=प्रलयाग्निसदृशं **हनूमन्तं शरवर्षेण**=द्रुमवर्षेण **सह अभ्यद्रवत्**=आभिमुख्येन आगतः ॥२५॥

परश्वधान् पट्टिसांश्च[३] **खड्गानन्यायुधान्यपि ।**

क्षणमात्रेण चिक्षेप शक्रशत्रुर्हनूमते ॥२६॥

शक्रशत्रुः=इन्द्रजित् **हनूमते**=वायुसुताय **परश्वधान्**=कुठारान् **पट्टिसान्**=आयुधविशेषान् **च खड्गान्**=असीन् **अन्यान्यपि आयुधानि क्षणमात्रेण**=कालेन **चिक्षेप**=प्रक्षिप्तवान् ॥२६।

---

१. **'छिन्नपर्वतशरीरः'** इति वा.वे ।

२. **'कालज्वलनसन्निभम्'** इति मू.श्लो.पा ।

३. अ) **'पट्टसांश्च'** इति मू.श्लो.पा । ब.गो च । आ) **'पट्टिशांश्च'** इति प्र.व्या ।

Rarest Archiver

यद्यदायुधमत्युग्रं प्राक्षिपद् राक्षसात्मजः ।

तच्छित्त्वाऽऽदाय हस्तेन हनूमान् हसितोऽब्रवीत् ॥२७॥

राक्षसात्मजः=रावणपुत्रः इन्द्रजित् **अत्युग्रम्**=अत्यन्तक्रूरं **यद्यदायुधं प्राक्षिपत्**=प्रक्षिप्तवान् **हनूमान् तत्** तदायुधं **हस्तेन आदाय**=गृहीत्वा **छित्त्वा** च **हसितः**=हासं कुर्वन् सन् **अब्रवीत्** ॥२७॥

यद्याखण्डलशत्रुस्त्वं षण्डको नासि वा यदि ।

एह्येहि मारुतिकरात् जीवन् यावन्न मोक्ष्यसे ॥२८॥

हे राक्षसात्मज! **त्वं यदि आखण्डलशत्रुः**=इन्द्रशत्रुः 'आखण्डलः सहस्राक्ष'* इत्यमरः। **यदि वा त्वं षण्डकः**=क्लीबः **नासि**=न भवसि तर्हि **मारुतिकरात्**=हनुमद्धस्तात् **यावत्**=यावत्कालं **न मोक्ष्यसे**=न त्यक्ष्यसे **तावत् एह्येहि**=आगच्छागच्छ । **मारुतिकरात्** इति परोक्षनिर्देशः ॥२८॥

बाहुभ्यामथ बाणैर्वा मायया वाऽप्यमायया ।

मद्वेगं सहसे चेत् त्वं कीर्तिं पूर्वामवाप्स्यसि ॥२९॥

बाहुभ्याम् अथ वा बाणैः मायया=कापट्येन **वा अमाययाऽपि**=अकापट्येनापि **चेत्**=यदि **त्वं मद्वेगं सहसे**=सोढुं शक्तोऽसि, तर्हि **पूर्वां**=पूर्वं सम्पादितां **कीर्तिं**=यशः इदानीम् **अवाप्स्यसि** =प्राप्स्यसि[१] हनूमान् इत्यब्रवीत् ॥२९॥

तस्येत्युच्चैर्ब्रुवाणस्य बलं जानन् बलारिजित् ।

अपक्रम्याभिमुखतः प्रययावपरान् युधे ॥३०॥

इति बाहुभ्यामित्यादिप्रकारेण **उच्चैः**=सर्वश्राव्यतया **ब्रुवाणस्य**=वदतः **तस्य**=हनूमतः **बलं**=सामर्थ्यं **जानन् बलारिजित्**=बलारिः इन्द्रः, 'बलारातिः शचीपतिः'[२] इत्यमरः । तं जयतीति **बलारिजित्**=इन्द्रजित्,हनूमतः **अभिमुखतः**=आभिमुख्यात् **अपक्रम्य**=अपसृत्य, विमुखो भूत्वेति यावत् । **युधे**=युद्धार्थम् **अपरान्** कपीन् प्रति **प्रययौ** ॥३०॥

---

* एतत्पूर्वमागतम् पुटसंख्या– ।

१. **'यास्यसि'** इति दू.कृ.श्री ।

२. अ.कोशे.१.का.स्वर्गवर्गे.५०.श्लोकः ।

Rarest Archive

एतस्मिन्नन्तरे प्राह[१] लक्ष्मणं स विभीषणः ।

यतस्व[२] हन्तुमिन्द्रारिं पुरा कर्मकृतेरिति ॥३१॥

स विभीषण एतस्मिन्नन्तरे=हनुमन्तं विहाय, इन्द्रजितः अन्यान् प्रति गमनसमये हे लक्ष्मण! **कर्मकृतेः**=होमरूपकर्मकरणात् **पुरा**=पूर्वमेव **इन्द्रारिम्**=इन्द्रजितं **हन्तुं**=हिंसितुं **यतस्व**=यत्नं कुरु । 'यती=प्रयत्ने' लोट् मध्यमपुरुषैकवचनम् । **इति लक्ष्मणं प्राह** ॥३१॥

अभ्यद्रवच्छक्रजितं सौमित्रिः सविभीषणः ।

मण्डलीकृतकोदण्डो मण्डयन् कपिमण्डलम् ॥३२॥

कपिमण्डलं=कपिसमूहं **मण्डयन्**=अलङ्कुर्वन् **मण्डलीकृतकोदण्डः**=शरादानमोक्षयोः अतिशीघ्रत्वात् मण्डलाकरस्थितधनुष्मान् **सविभीषणः**=विभीषणेन सहितः **सौमित्रिः**= लक्ष्मणः **शक्रजितम्**=इन्द्रजितम् **अभ्यद्रवत्**=प्राप ॥३२॥

ज्ञातीन् सन्त्यज्य नीचान् त्वं पितृव्य कथमाश्रितः ।

इत्यब्रवीदिन्द्ररिपुः प्रहसंस्तं विभीषणम् ॥३३॥

विभीषणं पश्यतः इन्द्रजितः वचनप्रकारमाह– **ज्ञातीनिति । प्रहसन्**=प्रकर्षेण हासं कुर्वन् **इन्द्ररिपुः**=इन्द्रजित् **हे पितृव्य**=पितुरनुज विभीषण ! त्वं **ज्ञातीन्**=एकगोत्रजान् अस्मान् **सन्त्यज्य**=विहाय **नीचान्** कपीन् **कथं**=केन प्रकारेण **आश्रितः** असि **इति तं विभीषणम् अब्रवीत्** ॥३३॥

पुत्र यूयं नरकिणां नीचानां सख्यमाप्स्यथ ।

अहं[३] विश्वेशदासः स्याम् इत्यूचे तं विभीषणः ॥३४॥

विभीषणस्य प्रत्युत्तरप्रकारमाह– **पुत्रेति । हे पुत्र**=इन्द्रशत्रो ! त्वं च एते च **यूयं नरकिणां**=नरकं प्राप्तुं योग्यानां **नीचानां**=रक्षसां **सख्यं**=सखित्वं **आप्स्यथ**=यास्यथ[४] । 'आप्लृ=व्याप्तौ' लृटि मध्यमपुरुषे बहुवचनम् । **अहं** तु **विश्वेशदासः**=जगत्स्वामिनो रामस्य भृत्यः **स्यां**=भवेयम् इति **विभीषणः तम्** इन्द्रजितम् **ऊचे** ॥३४॥

---

१. **'स्माह'** इति प्र.व्या । २. **'त्वरस्व'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।
३. **'सोऽहं विश्वेशदासः'** इति मू.श्लो.पा । ४. **'प्राप्स्यथ'** इति वा.वे ।

Rarest Archiver

लक्ष्मण त्वं मुमूर्षुश्चेत् तिष्ठ गच्छ न चेदिति ।

उवाचाथ धनुर्धुन्वन् रावणी रामसोदरम् ॥३५॥

अथ=विभीषणवाक्यानन्तरं **धनुः**=चापं **धुन्वन्**=कम्पयन् **रावणी**=इन्द्रजित् **हे लक्ष्मण ! त्वं चेत्**=यदि **मुमूर्षुः**=मर्तुमिच्छसि तर्हि मम पुरतः **तिष्ट** । **चेत्=**यदि **मुमूर्षुः न** भवसि =जीवितुम् इच्छसि इति यावत्, तर्हि अन्यत्र **गच्छ**=याहि । **इति रामसोदरं=**लक्ष्मणम् **उवाच** ॥३५॥

वाचा मायाविनां वीर्यं वीराणां कर्मणा ननु ।

क्लीब तिष्ठ क्षणमिति स्पष्टमाचष्ट लक्ष्मणः ॥३६॥

हे इन्द्रशत्रो ! **मायाविनां**=कपटिनां **वीर्यं**=सामर्थ्यं **वाचा**=वाङ्मात्रेण भवति । **वीराणाम्** =अध्यवसायान्तगामिनां **वीर्यं कर्मणा**=युद्धरूपकर्मकरणेन भवति, **ननु=**निश्चितम् । **हे क्लीब =**नपुंसक! इन्द्रशत्रो **क्षणं**=क्षणमात्रं **तिष्ट**=मम पुरतो वर्तस्व, इति **लक्ष्मणः स्पष्टं**=स्फुटं यथा तथा **आचष्ट**=उवाच । 'चक्षिङ्=व्यक्तायां वाचि' लङ् ॥३६॥

अविध्यत् पञ्चविंशद्भिर्विशिखैरथ लक्ष्मणम् ।

पौलस्त्यमष्टादशभिर्नदन् पौलस्त्यनन्दनः ॥३७॥

अथ लक्ष्मणः **पञ्चविंशद्भिः**=पञ्चविंशतिसंख्याकैः **विशिखैः**=शरैः **पौलस्त्यं=** पुलस्त्यगोत्रोत्पन्नम् इन्द्रजितम् **अविध्यत्=**अताडयत् । **नदन्=**ध्वनिं कुर्वन् **पौलस्त्य–नन्दनः**=पुलस्त्यपुत्रस्य रावणस्य पुत्रः इन्द्रजित् **अष्टादशभिः** विशिखैः **लक्ष्मणम् अविध्यत्** ॥३७॥

पुनः शरशतेनाशु शक्रशत्रुर्विदार्य तौ ।

उवाच परुषं वाक्यं ततश्चुक्रोध लक्ष्मणः ॥३८॥

शक्रशत्रुः=इन्द्रजित् **पुनः** अपि **शरशतेन आशु विदार्य तौ=**लक्ष्मणविभीषणौ कर्म निवार्य, **परुषं**=निष्ठुरं **वाक्यमुवाच** । **ततः** परुषवाक्याश्रवणानन्तरं **लक्ष्मणः चुक्रोध**= चुकोप ॥३८॥

Rarest Archiver

सौमित्रिः पञ्च नाराचान् अमित्रोरस्यमज्जयत्[१] ।

त्रीन् बाणानुल्बणान् तस्मै व्यमुञ्चद्रावणात्मजः ॥३९॥

सौमित्रिः=लक्ष्मणः **पञ्च** संख्यायुक्तान् **नाराचान्**=नाराचनामकान् शरान् **अमित्रोरसि**=इन्द्रजिद्वक्षसि **अमज्जयत्**=मग्नान् अकरोत् । **रावणात्मजः**=इन्द्रजित् **तस्मै**=लक्ष्मणाय **उल्बणान्**=क्रूरान् **त्रीन् बाणान् व्यमुञ्चत्**=मुमोच । 'मुचेः' लङ् ॥३९॥

धरायां धन्विनां श्रेष्ठौ वरिष्ठावस्त्रवेदिनाम् ।

चिरं चित्रं युयुधतुः तौ रामानुजरावणी ॥४०॥

धरायां=भूमौ विद्यमानानां **धन्विनां**=धनुष्मतां **श्रेष्ठौ**=उत्तमौ **अस्त्रवेदिनाम्**=अस्त्रज्ञानां मध्ये **वरिष्ठौ**=अतिशयेनोत्तमौ **तौ**=प्रसिद्धौ **रामानुजरावणी**=सौमित्रीरिन्द्रजितौ **चिरं**=बहुकालं **चित्रं**=द्रष्टॄणाम् आश्चर्यं यथा भवति तथा **युयुधतुः**=युद्धं चक्रतुः । 'युध=संप्रहारे' लिटि प्रथमपुरुषे द्विवचनम् ॥४०॥

ततः शरशतेनाऽशु शक्रशत्रुं स लक्ष्मणः ।

अदारयदुदारात्मा विषण्णोऽभूत् स रावणिः ॥४१॥

ततः=चित्रयुद्धकरणानन्तरम् **उदारात्मा**=उत्कृष्टमनस्कः **सलक्ष्मणः शरशतेन शक्रशत्रुम्**=इन्द्रजितम् **आशु अदारयत्**=अभिनत् । 'दॄ=विदारणे'[२] लङ् । **स रावणिः**=इन्द्रजित् **विषण्णः**=त्रस्तः **अभूत्** ॥४१॥

इदमन्तरमिन्द्रारेः वधायाऽशु प्रयत्यताम् ।

इत्यूचे नीतिसम्पन्नो लक्ष्मणं स विभीषणः ॥४२॥

नीतिसम्पन्नः=नीतियुक्तः **स विभीषणः** हे लक्ष्मण ! **इन्द्रारेः**=इन्द्रजितः **वधाय**=हन्तुम् **इदमन्तरम्**=अयमेव अवकाशः त्वया **इन्द्रारेर्वधाय आशु**=शीघ्रं **प्रयत्यतां**=प्रयत्नः क्रियताम्, प्रयतितव्यमिति वा । 'यती=प्रयत्ने' भावे लोट् । **इत्यूचे** ॥४२॥

---

१. अ) **'अस्य अमोचयत्'** इति प्र.व्या ।
आ) **'रस्य ताडयत्'** ब.गो.सं.पा ।
२. **'णिजन्तात् इति शेषः'** धा.प्र.रीत्या ।

Rarest Archive

स सौमित्रिरमित्राय शरान् शिखिशिखोपमान्[१] ।

मुमोच स दृढं विद्धो मुहूर्तं मूर्च्छितोऽपतत्[२] ॥४३॥

स सौमित्रिः अमित्राय=शत्रवे इन्द्रजिते **शिखिशिखोपमान्**=वह्निज्वालसदृशान् **शरान् मुमोच । दृढं**=गाढं यथा तथा **विद्धः**=ताडितः **सः**=इन्द्रजित् **मुहूर्तं**=मूहर्तपर्यन्तं **मूर्च्छितः**=संज्ञारहितः सन् **अपतत्**=पपात ॥४३॥

सञ्ज्ञामवाप्येन्द्ररिपुः कोपसंरक्तलोचनः ।

तूर्णं शरशतं तस्मै लक्ष्मणाय मुमोच सः ॥४४॥

सः मूर्च्छितः **इन्द्ररिपुः**=इन्द्रजित् **सञ्ज्ञां**=बाह्यज्ञानम् **अवाप्य कोपसंरक्तलोचनः** =कोपेन रक्तनेत्रः सन् **शरशतं तस्मै लक्ष्मणाय तूर्णं**=शीघ्रं **मुमोच** ॥४४॥

पुनः शरशतेनाऽऽशु निर्बिभेद विभीषणम् ।

वानरांश्च नराशेन्द्रः शरैराशीविषोपमैः ॥४५॥

नराशेन्द्रः=इन्द्रजित् **पुनः शरशतेन** विभीषणम् **आशु निर्बिभेद**=विददार । **आशीविषो- पमैः**=सर्पसदृशैः **शरैः वानरांश्च**=वानरानपि **निर्बिभेद** ॥४५॥

प्रहस्य लक्ष्मणो वीरो नैतत् किञ्चिदिति ब्रुवन् ।

शरैर्विदारयामास कवचं शक्रवैरिणः ॥४६॥

वीरो लक्ष्मणः प्रहस्य=हासं कृत्वा **एतत्**=इन्द्रजिता कृतं कर्म **न किञ्चित्**= किञ्चिदपि न **इति ब्रुवन् सन् शक्रवैरिणः**=इन्द्रजितः **कवचं**=वर्म **शनैः विदारयामास**=विददार ॥४६॥

शूरः शरसहस्रेण मेघनादोऽपि लक्ष्मणम् ।

आविध्य तस्य कवचं संच्छिद्यापातयद् भुवि ॥४७॥

शूरः=प्राणत्यागभयरहितः **मेघनादः**=इन्द्रजिदपि **शरसहस्रेण लक्ष्मणमाविध्य**=ताडयित्वा **तस्य** लक्ष्मणस्य **कवचं** शरैः **संच्छिद्य**=द्विधा कृत्वा, **भुवि अपातयत्**=पातयामास ॥४७॥

---

१. **'शरं शिखिशिखोपमम्'** इति मू.श्लो.पा ।

२. **'मूर्च्छितोऽभवत्'** इति प्र.व्या ।

Rarest Archiver

दिशो दश शरव्रातैः छादयामासतुस्तदा ।

कृतप्रतिकृतोदारौ तौ रामानुजरावणी ॥४८॥

कृतप्रतिकृतोदारौ कृतस्य प्रतिकृते=प्रतिकरणे, प्रतीकारकरणे **उदारौ**=समर्थौ **तौ**= प्रसिद्धौ **रामानुजरावणी**=लक्ष्मणेन्द्रजितौ **शरव्रातैः**=शरसमूहैः**तदा**=युद्धसमये **दश दिशः छादयामासतुः=**आच्छादितवन्तौ । 'छद=अपवारणे' लिटि प्रथमपुरुषे द्विवचनम् ॥४८॥

सौष्ठवे लाघवे वीर्ये शौर्ये वेगे पराक्रमे ।

अन्योन्यमतिशिश्याते धन्विनां प्रवरावुभौ ॥४९॥

धन्विनां=धनुष्मतां मध्ये **प्रवरौ**=श्रेष्ठौ **उभौ=**लक्ष्मणेन्द्रजितौ **सौष्ठवे**=सुष्ठुत्वे **लाघवे=** लघुत्वे **वीर्ये=**अध्यवसायान्तगामित्वे **शौर्ये**=भयराहित्ये **वेगे**=रंहसि **पराक्रमे**=पराजये विषये **अन्योन्यं**=परस्परम् **अतिशिश्याते**=अतिशयितवन्तौ । अतिशिश्ये अतिशिश्याते अतिशिश्यिरे । 'शीङ्=स्वप्ने' प्रथमपुरुषे द्विवचनम् ॥४९॥

[1]**आक्तौ रक्तेन महता धातुनेव धराधरौ ।**

अयुध्यतामस्त्रशस्त्रैः अस्त्रशस्त्रविशारदौ ॥५०॥

धातुना=गैरकेण धातुरसेन **आक्तौ**=लिप्तौ **धराविव=**पर्वतौ यथा तथा **महता**=बहुलेन **रक्तेन=**क्षतजेन **आक्तौ**=स्नातौ **अस्त्रशस्त्रविशारदौ**=अस्त्रे=मन्त्रे, शस्त्रे=शराद्यायुधे **विशारदौ**=कुशलौ लक्ष्मणेन्द्रजितौ **अस्त्रशस्त्रैरयुध्यतां=**युद्धं चक्रतुः । 'युध=सम्प्रहारे' लङ् ॥५०॥

अस्मिन् हते हतं सर्वं रावणस्यातुलं बलम् ।

[2]**त्वरध्वं हरयो योद्धुमित्युवाच विभीषणः ॥५१॥**

हे हरयः=कपयः ! **अस्मिन्=**इन्द्रजिति हते सति **अतुलम्**=असदृशं **रावणस्य सर्वं बलं** यस्मात् **हतं**=नष्टं भवति तस्मात् यूयं **योद्धुं**=युद्धं कर्तुं **त्वरध्वं**=वेगं कुरुध्वम् **इति उवाच विभीषणः** । 'ञि त्वरा=सम्भ्रमे' । त्वरस्व त्वरेथां त्वरध्वम् । लोटि मध्यमपुरुषे बहुवचनम् ॥५१॥

---

१. **'रक्तौ रक्तेन'** विश्व.ती । प्र.व्या च ।　　२. **'चरध्वम्'** इति प्र.व्या ।

Rarest Archiver

विभीषणस्य वचनात् कपयो जाम्बवन्मुखाः ।

दन्तैर्नखैश्च वृक्षैश्च रक्षसां क्षयमानयन् ॥५२॥

विभीषणस्य वचनात् जाम्बवान्मुखाः=जाम्बवत्प्रधानाः **कपयः दन्तैः नखैश्च वृक्षैश्च रक्षसां**=राक्षसानां **क्षयं**=नाशम् **आनयन्=**अकुर्वन् ॥५२॥

विभीषणस्यानुचरा विभीषण उत स्वयम् ।

भीषणं विदधुर्युद्धं भीषणैरिन्द्रजिद्भटैः ॥५३॥

विभीषणस्यानुचराः=भृत्याः **उत=**अनन्तरं **स्वयं=**साक्षात् **विभीषणश्च भीषणैः=**भयङ्करैः **इन्द्रजिद्भटैः=**इन्द्रजिद्भृत्यैः साकं **भीषणं=**भयङ्करं **युद्धं विदधुः**=चक्रुः ॥५३॥

रक्षसां विक्रमं वीक्ष्य भीमः[1] प्राभञ्जनिः प्रभुः ।

सालेन तान् जघानोग्रान् सौमित्रेर्बृंहयन् बलम् ॥५४॥

भीमः=शत्रुभयङ्करः **प्रभुः**=समर्थः **प्राभञ्जनिः**=हनूमान् **रक्षसाम्**=इन्द्रजिद्भृत्यानां **विक्रमं**=पराक्रमं **वीक्ष्य**=दृष्ट्वा **सौमित्रेः**=लक्ष्मणस्य **बलं**=सामर्थ्यं **बृंहयन्**=अभिवृद्धं कुर्वन् सन् **सालेन=**वृक्षेण **उग्रान्=**क्रूरान् **तान्** राक्षसान् **जघान** ॥५४॥

[2]**चतुर्भिश्चतुरो वाहान् करालान् कालवर्चसः ।**

शरैर्विव्याध सौमित्रिः सूतं चान्येन वैरिणः ॥५५॥

सौमित्रिः=लक्ष्मणः **वैरिणः**=इन्द्रजितः [3]**कालवर्चसः**=नीलवर्णान् [4]**करालान्=**क्रूरान् **चतुरः**=चतुःसंख्याकान् **वाहान्**=हयान् **चतुर्भिः शरैः विव्याध**=जघान । 'व्यध=ताडने' लिट् । **अन्येन** शरेण **सूतं च**=सारथिमपि **विव्याध** ॥५५॥

---

१. **'भीमं प्राभञ्जनिः'** इति मू.श्लो.पा । विश्व.ती च ।

२. श्लोकार्थः दू.कृ.श्री मातृकायां प्रमादितो लुप्तो वा स्यात् ।

३. 'कालं कृष्णं वचोर्येषां ते तथा तान्' इति श्रीविश्व.ती.भा.दी ।

४. **"करालो दन्तुरे तुङ्गे विशाले विकृतेऽपि च"** । इति तु वै.कोशे ।

Rarest Archiver

ववर्षाथोल्बणान्[1] बाणान् पदाती रावणात्मजः ।

शरैरशनिकल्पैस्तं लक्ष्मणः [2]श्रममानयत् ॥५६॥

अथ=हयादिनाशानन्तरं पदाभ्याम् अतति=गच्छतीति **पदातिः**=पादसञ्चारी **रावणात्मजः** =इन्द्रजित् **उल्बणान्**=क्रूरान् **बाणान्=**शरान् **ववर्ष**=अवाकिरत् ।'वृष=सेचने' । **अशनि–कल्पैः=**वज्रतुल्यैः **शरैः तं** लक्ष्मणं **श्रमं**=श्रान्तिम् **आनयत्=**प्रापयामास । नयतेः द्विकर्मकत्वम् ॥५६॥

मण्डोदरीसुतश्चण्डो विरथः पुरमाविशत् ।

रथमारुह्य सन्नद्धः पुनरागाद् रणाजिरम् ॥५७॥

विरथः=रथरहितः **चण्डः**=क्रूरः **मण्डोदरीसुतः**=इन्द्रजित् **पुरं=**लङ्काम् **आविशत्=** प्रविवेश । प्रवेशानन्तरं **रथमारुह्य सन्नद्धः=**युद्धसामग्रीसहितः सन् **पुनः** अपि **रणाजिरं** =युद्धभूमिम् 'अङ्गणं चत्वराजिरे' इत्यमरः । **अगात्=**प्राप । 'इण्=गतौ' लुङि ॥५७॥

स रावणिर्बाणगणैर्निशातैः प्लवङ्गमान् भङ्गमुपानिनाय ।

चिच्छेद रामावरजः शरेण शक्रद्विषः कार्मुकमुग्रकर्मा[3] ॥५८॥

स रावणिः=इन्द्रजित् **निशातैः**=शाणोल्लीढैः **बाणगणैः**=शरसमूहैः **प्लवङ्गमान्**=कपीन् **भङ्गं**=नाशम् **उपानिनाय**=प्रापयामास, **उग्रकर्मा**=क्रूरकर्मा **रामावरजः**=लक्ष्मणः **शक्रद्विषः** =इन्द्रजितः **कार्मुकं=**चापं **शरेण चिच्छेद** ॥५८॥

क्षणेन चापान्तरमाददे स क्षणेन चिच्छेद स लक्ष्मणस्तत् ।

वक्षो विपक्षस्य बिभेद चाऽशु[4] स पञ्चभिः पत्रिभिस्तत्र वीरः[5] ॥५९॥

सः=इन्द्रजित् **क्षणेन=**क्षणमात्रेण **चापान्तरं**=अन्यच्चापं **आददे**=जग्राह । **लक्ष्मणः तत्** =चापान्तरं **क्षणेन चिच्छेद च । वीरः सः**=लक्ष्मणः **पञ्चभिः पत्रिभिः तत्र**=तस्मिन् समये **विपक्षस्य**=शत्रोरिन्द्रजितः **वक्षः**=वक्षस्थलम् **आशु बिभेद**=विददार ॥५९॥

---

१. **'उद्बणान् बाणान्'** इति ब.गो । २. **'शममानयत्'** इति प्र.व्या । ब.गो.सं.पा च ।
३. **'कार्मुकमुग्रधन्वा'** इति मू.श्लो.पा । श्रीविश्व.ती च । ४. **'बिभेद चोग्रः'** इति मू.श्लो.पा ।
५. अ) **'पत्रिभिराशु वीरः'** इति मू.श्लो.पा । आ) **'पत्रिभिरत्र वीरः'** इति प्र.व्या । ब.गो च ।

Rarest Archiver

वमंश्च रक्तं शतमन्युशत्रुः चापान्तरेणेषुगणान् ववर्ष ।

च्छित्त्वैव तांस्तस्य चमूं च हत्वा जघान सौमित्रिरमित्रसूतम् ॥६०॥

रक्तं=शोणितं **वमंश्च**=उद्गिरन्नपि **शतमन्युशत्रुः**=इन्द्रजित् **चापान्तरेण**=अन्यचापेन **इषुगणान्**=बाणगणान् **ववर्ष** । **सौमित्रिः तान्**=बाणगणान् **च्छित्त्वैव**=द्विधा कृत्वैव **तस्य**=इन्द्रजितः **चमूं**=सेनां **हत्वा**=नाशयित्वा **अमित्रसूतम्** =इन्द्रजितः सारथिं **जघान** ॥६०॥

विनाऽपि सूतं वहतोऽस्य वाहान् अबिभ्रमल्लक्ष्मण उग्रबाणैः ।

न भेत्तुमीशः कवचं सुरारिः बिभेद बाणैरथ तल्ललाटम् ॥६१॥

लक्ष्मणः सूतं=सारथिं **विनाऽपि वाहान्**=हयान् **वहतः**=प्रापयतः **अस्य**=इन्द्रजितः **वाहान् उग्रबाणैः अबिभ्रमत्**=भ्रामयामास । 'भ्रमु=चलने' लुङ् । **सुरारिः**=इन्द्रजित् लक्ष्मणस्य **कवचं**=वर्म **भेत्तुं**=दारयितुं **न ईशः**=असमर्थः सन् **अथ**=अनन्तरं **तल्ललाटं** =तस्य लक्ष्मणस्य फालं **बाणैः बिभेद** ॥६१॥

ललाटमस्याऽऽशु स लक्ष्मणोऽपि[1] बिभेद बाणैरशनिप्रकाशैः ।

भिन्नाखिलाङ्गाविषुभिः सरक्तौ तौ रेजतुः पुष्पितकिंशुकाभौ[2] ॥६२॥

स लक्ष्मणोऽपि अशनिप्रकाशैः=वज्रसदृशैः बाणैः **अस्य** इन्द्रजितः **ललाटमाशु बिभेद** । **इषुभिः भिन्नाखिलाङ्गौ**=विदारितसकलावयवौ **सरक्तौ**=रक्तेन सहितौ **पुष्पितकिंशुकाभौ** =सञ्जातपुष्पपलाशवृक्षसदृशौ **तौ**=लक्ष्मणेन्द्रजितौ **रेजतुः**=शुशुभाते ॥६२॥

विभीषणायैष[3] मुमोच बाणान् त्रीनेकमेकं हरिपुङ्गवेभ्यः ।

विभीषणोऽश्वान् न्यहनत् सुरारेः शक्तिं पितृव्याय मुमोच पुत्रः ॥६३॥

एषः इन्द्रजित् **विभीषणाय त्रीन् बाणान् मुमोच । हरिपुङ्गवेभ्यः**=कपिश्रेष्ठेभ्यः **एकमेकं** बाणं **मुमोच । विभीषणः सुरारेः**=इन्द्रजितः **अश्वान् न्यहनत्**=जघान । **पुत्रः**=इन्द्रजित् **पितृव्याय**=विभीषणाय **शक्तिं मुमोच** ॥६३॥

---

१. **'लक्ष्मणस्य बिभेद'** इति प्र.व्या ।

२. **'किंशुकः=मुत्तुग'** इति कार्णाटकभाषायाम् ।

३. **'विभीषणायैव'** इति ब.गो.सं.पा ।

Rarest Archiver

चिच्छेद सौमित्रिरमोघशक्तिं विभीषणश्चेषुभिरार्दयत् तम् ।

यमेन दत्तं प्रमुमोच बाणं विभीषणं हन्तुमथेन्द्रवैरी ॥६४॥

सौमित्रिः अमोघशक्तिं चिच्छेद । विभीषणश्च तम्=इन्द्रजितम् **इषुभिः**=बाणैः **आर्दयत्**=अपीडयत् । **अथ**=अनन्तरम् **इन्द्रवैरी**=इन्द्रजित् **विभीषणं हन्तुं यमेन दत्तं बाणं प्रमुमोच** ॥६४॥

कुबेरदत्तं प्रमुमोच बाणं सलाघवो राघवसोदरोऽथ ।

शरौ ज्वलन्तौ ज्वलनप्रकाशौ संहृत्य तौ व्योम्नि निपेततुः कौ ॥६५॥

लाघवेन सह वर्तत इति **सलाघवः राघवसोदरः**=लक्ष्मणः **अथ=**इन्द्रजिद्बाणमोचनानन्तरं **कुबेरदत्तं बाणं प्रमुमोच** । **ज्वलन्तौ**=ज्वालायुक्तौ **ज्वलनप्रकाशौ**=अग्निसदृशौ **तौ**=इन्द्रजिल्लक्ष्मणाभ्यां मुक्तौ **शरौ**=बाणौ **व्योम्नि**=आकाशे **संहत्य=**परस्परं सन्ताड्य, **कौ**[१] =भूमौ **निपेततुः**=पतितौ ॥६५॥

स लक्ष्मणोऽमुञ्चत वारुणास्त्रं निरास रौद्रेण स मेघनादः ।

आग्नेयमस्त्रं मुमुचे सुरारिः सौरेण सौमित्रिरदो निरास ॥६६॥

सः=प्रसिद्धः **लक्ष्मणः वारुणास्त्रं**, **सः**=प्रसिद्धः **मेघनादः**=इन्द्रजित् **रौद्रेण**=रुद्र–देवताकेन अस्त्रेण लक्ष्मणमुक्तं **वारुणास्त्रं निरास**=निराकृतवान् । **सुरारिः**=इन्द्रजित् **आग्नेयमस्त्रं मुमुचे । सौमित्रिः**=सूर्यदेवताकेनास्त्रेण **अदः आग्नेयमस्त्रं निरास** । **'अद'** इति अदश्शब्दस्य नपुंसके द्वितीयैकवचनमेतत् ॥६६॥

अथाऽसुरास्त्रं सुरशत्रुरुग्रं मुमोच नानायुधवर्षभीमम् ।

महेश्वरास्त्रेण महामनस्वी तल्लक्ष्मणोऽस्त्रं प्रतिसञ्जहार ॥६७॥

अथ=अनन्तरं **सुरशत्रुः=**इन्द्रजित् **उग्रं**=क्रूरं **नानायुधवर्षेण**=वृष्ट्या **भीमं**=भयङ्करं **आसु–रास्त्रम्**=असुरदेवताकमस्त्रं **मुमोच** । **महामनस्वी**=प्रशस्तमनाः **लक्ष्मणः** महेश्वरदत्तेन अस्त्रेण तद् आसुरास्त्रं **प्रतिसञ्जहार**=निराचकार ॥६७॥

---

१. **'कुः पृथ्वी पृथिवी** इति हल' । इति हलकोशस्थः श्लोक उदाहृतः, श्रीविश्व.ती.भा.दी ।

Rarest Archive

सुराः पुरस्कृत्य पुरन्दरं खे तस्थू रणं चित्रमवेक्षमाणाः ।

[१]स्वस्त्यस्तु रामानुज ते सुरारिं विनाशयेति प्रवदन्त उच्चैः ॥६८॥

इन्द्रजिल्लक्ष्मणयोः **चित्रम्**=आश्चर्यकरं **रणं**=युद्धम् **अवेक्षमाणाः**=पश्यन्तः **सुराः**= देवाः **पुरन्दरम्**=इन्द्रं **पुरस्कृत्य**=पुरतः कृत्वा **हे रामानुज**=हे लक्ष्मण ! **ते**=तुभ्यं **स्वस्ति** =मङ्गलम् **अस्तु** । **सुरारिम्**=इन्द्रजितं **विनाशय**=अदर्शनं प्रापय । 'णश=आदर्शने'* लोट् । **इति उच्चैः**= उन्नततया **प्रवदन्तः सन्तः खे**=आकाशे **तस्थुः**=अतिष्ठन् ॥६८॥

दिव्यं पुरासादितदैत्यचक्रम्[२] आकृष्य चाऽकर्णत उग्रवीर्यम् ।

रामोऽभिरामो जयतीत्युदीर्य रामानुजो बाणवरं मुमोच ॥६९॥

रामानुजः=लक्ष्मणः **दिव्यम्**=अलौकिकं **पुरा**=पूर्वम् **आसादितदैत्यचक्रं**=नाशितदैत्य–समूहम् **उग्रवीर्यं बाणवरं आकर्णतः**=दक्षिणकर्णपर्यन्तम् **आकृष्य अभिरामः**=मनोहरः **रामः**=दाशरथिः **जयति**=शत्रुं तिरस्करोति । **इति उदीर्य**=उक्त्वा **बाणवरं मुमोच** ॥६९॥

आखण्डलारातिशिरः प्रचण्डम् उत्खण्डितं काण्डवरेण तेन ।

सन्मण्डितं[३] कुण्डलमण्डलाभ्यां भूमण्डले भूधरवत् पपात ॥७०॥

तेन=लक्ष्मणमुक्तेन **काण्डवरेण**=बाणश्रेष्ठेन **उत्खण्डितं**=छिन्नं **कुण्डलमण्डलाभ्यां**= वर्तुलकुण्डलाभ्यां **सन्मण्डितं**=सम्यगलङ्कृतं **प्रचण्डम्**=उग्रं **आखण्डलारातिशिरः**= **आखण्डलः**=सहस्राक्षः तस्य **अरातेः**=इन्द्रजितः **शिरः**=शीर्षं **भूमण्डले**=भूवलये **भूधर –वत्**=पर्वतवत् **पपात**=पतितम् ॥७०॥

तस्मिन् हते तेन[४] हतावशिष्टाः प्रदुद्रुवुः क्रव्यभुजोऽतिभीताः ।

हरिप्रबर्हा[५] हनुमत्पुरोगाः सौमित्रिमस्तारिमपूजयंस्ते ॥७१॥

तेन=लक्ष्मणेन **तस्मिन्**=इन्द्रजिति **हते** सति **हतावशिष्टाः**=नष्टेभ्यः उर्वरिताः **क्रव्यभुजः**

---

१. **'स्वस्त्यस्तु रामानुज देवशत्रुम्'** इति मू.श्लो.पा । ब.गो च ।

* **णिजन्तात् इति शेषः** वै.सि.कौ.रीत्या ।

२.**'दिव्यं पुरादारित'** इति मू.श्लो.पा ।

३.**'सम्मण्डितम्'** इति प्र.व्या । ब.गो च ।

४.**'तस्मिन् हते तत्र'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।

५. **'हरिप्रवीराः'** इति दू.कृश्री । प्र.व्या च ।

Rarest Archiver

=मांसभक्षकाः ‘पललं क्रव्यमामिषम्’[1] इत्यमरः । राक्षसाः **भीताः सन्तः प्रदुद्रुवुः**=पला–यन्त । **ते**=प्रसिद्धाः **हनुमत्पुरोगाः**=हनुमत्प्रभृतयः **हरिप्रबर्हाः अस्तारिं**=निराकृतशत्रुं **सौमित्रिं**=लक्ष्मणम् **अपूजयन्**=पूजयामासुः ॥७१॥

दिनैस्त्रिभिस्तत्र दिवानिशं च युद्ध्वा हते राक्षसराजसूनौ ।

इन्द्रादिदेवा वरपुष्पवर्षम् इन्द्रारिशत्रौ विदधुर्नदन्तः[2] **॥७२॥**

तत्र=लङ्कायां **त्रिभिः दिनैः दिवानिशम्**=अहोरात्रं **युद्ध्वा**=युद्धं कृत्वा **राक्षसराजसूनौ**=राक्षसाधिपरावणपुत्रे इन्द्रजिति **हते**=मृते सति **नदन्तः**=लक्ष्मणं स्तुवन्तः **इन्द्रादिदेवाः इन्द्रारिशत्रौ**=इन्द्रजित्संहारके लक्ष्मणे **वरपुष्पवृष्टिम्**=उत्तमकुसुमवर्षं **विदधुः**=चक्रुः॥७२

रामाभ्याशं प्राप्य रामानुजन्मा साकं वायोः सूनुना तं ववन्दे ।

सान्द्रानन्दो मन्दहासी मुकुन्दः तं सौमित्रिं लालयन्नालिलिङ्गे ॥७३॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे एकादशः सर्गः ॥

रामानुजन्मा=लक्ष्मणः **वायोः सूनुना**=हनुमता **साकं**=सह **रामाभ्याशं**=रामसमीपं **प्राप्य**=गत्वा **तं**=रामं **ववन्दे**=ननाम । **सान्द्रानन्दः**=पूर्णसुखः **मन्दहासी**=मन्दस्मितयुक्तः **मुकुन्दः**=रामः **तं**=वन्दमानं **सौमित्रिं**=लक्ष्मणं **लालयन्**=वाचा स्तुवन् **आलिलिङ्गे**=परिरेभे । ‘लिगि=आलिङ्गने’[3] लिट् ॥७३॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे एकादशः सर्गः ॥

आरम्भतः श्लोकाः–५१९+७३=५९२

---

१. अ.कोशे.२.का.मनुष्यवर्गे.३२८.श्लोकः ।

२. **‘विदधुः स्तुवन्तः’** इति मू.श्लो.पा । ब.गो च ।

३. ‘लिगि=गतौ’ इति वै.सि.कौमुद्याम् ।

Rarest Archiver

Rarest Archiver

॥ अथ द्वादशः सर्गः ॥

Rarest Archiver

॥ अथ द्वादशः सर्गः ॥

भूयानभूद् राघवसैनिकानां मोदश्च मोदप्रभवश्च रावः ।

ततोऽपि भूयान् पुरि राक्षसानां शोकश्च शोकप्रभवश्च रावः ॥१॥

इन्द्रजिन्नाशान्तरं किमभूत्? इत्यत आह– **भूया**निति । **राघवसैनिकानां**=रामस्य सेनायां समवेतानां कपीनां **भूयान्=**बहुलः **मोदश्च**=सन्तोषः अभूत् । **मोदप्रभवः**=सन्तोषजन्यः **भूयान् रावश्च**=ध्वनिरपि **अभूत्** । **पुरि**=लङ्कायां स्थितानां **राक्षसानां ततोऽपि=**मोदादपि **भूयान् शोकश्च**=दुःखध्वनिरपि च **अभूत्** । **ततोऽपि**=कपिरावादपि **भूयान् शोकप्रभवः**= दुःखजन्यः **रावश्च**=स्वनोऽपि अभूत् ॥१॥

मृतं निशम्येन्द्रजितं सुतं स्वं प्राणोपमानं व्यलपद् दशास्यः ।

हा वत्स नौ त्वं पितरौ विहाय मृतोऽसि देवेन्द्रजयिन् बतेति ॥२॥

दशास्यः=रावणः **प्राणोपमानं**=प्राणसदृशं **स्वं=**स्वकीयम् **इन्द्रजितं सुतं मृतं**=त्यक्त–प्राणं **निशम्य=**श्रुत्वा **हे देवेन्द्रजयिन् ! हे वत्स=**बालक ! **त्वं पितरौ**=मातापितरौ **नौ=** 'द्वितीयाद्विवचनम्' आवां **विहाय=**त्यक्त्वा **मृतोऽसि=**प्राणान् त्यक्तवानसि **हा=**आश्चर्यं **बत=**कष्टम् **इति**=एवंप्रकारेण **व्यलपत्=**विललाप ॥२॥

पुनश्च शोकं[१] द्विगुणं प्रयातो जिघांसुराप छलमैथिलीं[२] सः ।

व्यक्तं सुपार्श्वेन निवारितोऽथ[३] स मन्त्रयामास[४] सभामवाप्य ॥३॥

पुनश्च=पुनरपि **द्विगुणं**=द्विरावृत्तं **शोकं=**दुःखं **प्रयातः**=कोपं गतः **छलमैथिलीं**=कपट–जानकीं **जिघांसुः=**हन्तुमिच्छुः **सः=**रावणः **छलमैथिलीं आप**=प्राप । **अथ**=अनन्तरं **सुपार्श्वेन=**तन्नामकमन्त्रिणा **व्यक्तं**=स्पष्टं यथा तथा **निवारितः**=निरुद्धः **सः** रावणः **सभामवाप्य मन्त्रयामास**=विचारितवान् ॥३॥

---

१. **'पुनश्च कोपम्'** इति मू.श्लो.पा ।

२. **'जिघांसुरायाच्छलमैथिलीम्'** इति मू.श्लो.पा ।

३. **'निवारितोऽपि'** इति मू.श्लो.पा ।

४. **'सम्मन्त्रयामास'** इति च मू.श्लो.पा । प्र.व्या । ब.गो च ।

Rarest Archive

त्रिंशत्सहस्राणि महौघकानाम् [1]अक्षौहिणीनामपि षट्सहस्रम् ।

समादिदेशाऽशु रणाय यास्यन् स राक्षसान्[2] राक्षसयूथनाथः ॥४॥

आलोचनानन्तरं किमकरोत्? इत्यत आह– **त्रिंशदिति** । **रणाय**=युद्धाय **यास्यन्**=गन्तुकामः **राक्षसयूथनाथः**=रक्षःसमूहाधिपतिः **सः**=रावणः **महौघकानां**=महौघनामक–सङ्ख्यावतां **त्रिंशत्**=त्रिंशत्सहस्रसङ्ख्याकानि[3] **राक्षसान् समादिदेश**=आज्ञापयामास । अथ **अक्षौहिणीनाम्**=अक्षौहिणीनामकसंख्याविशेषाणां **षट्सहस्रमपि राक्षसान् रणाय**=युद्धाय **आशु समादिदेश** ॥४॥

कल्लोलकल्पैः करिभिः परीतः[4] त्वङ्गत्तरङ्गाभतुरङ्गतुङ्गः ।

रथाख्ययादोभरितोऽभिपेदे बलार्णवो राघववाडवाग्निम् ॥५॥

कल्लोलकल्पैः=महातरङ्गसमानैः **करिभिः**=गजैः **परीतः**=परिवृतः **त्वङ्गत्तरङ्गाभतुरङ्ग–तुङ्गः=**नृत्यत्तरङ्गसमानतुरङ्गैः=हयैरुन्नतः **रथाख्ययादोभरितः**=रथनामकजलजन्तुसम्पूर्णः 'यादांसि जलजन्तव'[5] इत्यमरः । **बलार्णवः=**मूलबलाख्यसमुद्रः **राघववाडवाग्निं**=रामा–ख्यसमुद्रमध्यस्थाग्निं 'शुचिरप्पित्तमोर्वस्तु बाडवो बडवानलः'[6] इत्यमरः । **अभिपेदे**= प्राप ॥५॥

जाज्वल्यमानोज्ज्वलहेतिलीलो धूमायमानोद्धतधूलिधूम्रः[7] ।

विसृत्वरः सैन्यमहौघसङ्घः सांवर्तको वह्निरिवोददीपि ॥६॥

जाज्वल्यमानोज्ज्वलहेतिलीलः=अत्यन्तप्रज्वलदुज्ज्वलायुधलीलायुक्तः **धूमायमानोद्धत –धूलिधूम्रः धूमायमानाभिः**=धूमवद्वर्तमानाभिः **उद्धताभिः**=अभिवृद्धाभिः, उद्गताभिरिति वा । **धूलिभिः**=पांसुभिः **धूम्रः**=मिश्रवर्णः **विसृत्वरः**=जगद्व्यापनशीलः **सैन्यमहौघसङ्घः**=सेनामहौघसमूहः **सांवर्तकः**=प्रलयकाले विद्यमानः 'संवर्त्तः प्रळयः कल्प'[8] इत्यमरः । **वह्निरिव उददीपि** =जज्वाल । 'दीपी=दीप्तौ' लुङ् ॥६॥

---

१. **'अक्षोहिणीनामपि'** इति मू.श्लो.पा । ब.गो च ।
२. **'स रक्षसां राक्षसयूथनाथः'** इति प्र.व्या । ब.गो च ।
३. **'त्रिंशत् सङ्ख्याकानि सहस्राणि'** इति दू.कृ.श्री ।
४. **'परीतैः'** इति प्र.व्या ।
५. अ.कोशे.१.का.वारिवर्गे.२७६.श्लोकः ।
६. अ.कोशे.१.का.स्वर्गवर्गे.६४.श्लोकः ।
७. **'धूमोपमानोद्धतधूलिधूम्रः'** इति मू.श्लो.पा । वा.वे च ।
८. अ.कोशे.१.का.कालवर्गे.१४६.श्लोकः ।

Rarest Archiver

उन्मूलयन्ती सकलांश्च सालान् निमीलयन्ती सकलांश्च लोकान् ।

सा वाहिनी वानरवाहिनीं द्राक्[१] चिक्षेप वात्येव विशीर्णपर्णा[२] ॥७॥

सकलान्=समस्तान् **सालांश्च**=वृक्षानपि **उन्मूलयन्ती**=मूलतच्छेदं कुर्वन्ती **सकलान्=**समस्तान् **लोकांश्च**=जनानपि **निमीलयन्ती**=चक्षुर्निमीलनं कारयन्ती **सा** रावणप्रेरिता **वाहिनी=**सेना **विशीर्णपर्णा**=नाशितपर्णा **वात्येव**=चक्रवात इव **वानरवाहिनीं=**कपिसेनां **द्राक्**=शीघ्रं **चिक्षेप**=निराचकार । 'क्षिपु=निरसने' लिट् ॥७॥

छिन्नेषु भिन्नेषु निपातितेषु विद्रावितेष्वाकुलितेषु भूयः ।

सैन्येषु सैन्यप्रभवोऽभ्ययुध्यन् सुग्रीवनीलाङ्गदपूर्वकांस्ताम्[३] ॥८॥

केषुचित् **सैन्येषु छिन्नेषु**=द्विधा कृतेषु सत्सु, केषुचित् **भिन्नेषु**=विदारितेषु सत्सु, केषुचित् **निपातितेषु=**पतनं प्रापितेषु सत्सु, केषुचित् **विद्रावितेषु=**पलायितेषु सत्सु, केषुचित् **आकुलितेषु=**मूर्छितेषु सत्सु **भूयः=**पुनः **सैन्यप्रभवः**='प्रभुशब्दस्य प्रथमा बहुवचनम्' सेनानां पतयः, सेनानायका इति यावत् । **सुग्रीवनीलाङ्गदपूर्वकाः तां** रावण –सेनां **अभ्ययुध्यन्**=अभिमुखेन प्रहृतवन्तः । 'युध=संप्रहारे' लङ् ॥८॥

वराद् विरिञ्चस्य परैरजेयां सर्वैरवध्यां च चमूं प्रयुध्य ।

तरङ्गिणीतुङ्गतरङ्गलोलपलाण्डुवन्नस्थिरतां ययुस्ते ॥९॥

ते सुग्रीवादयः **विरिञ्चस्य वरात्=**अनुग्रहात् **परैः**=अन्यैः **अजेयां=**जेतुमशक्याम् अत एव **सर्वैरवध्यां**=हन्तुमशक्यां **चमूं**=रावणसेनां **प्रयुध्य**=प्रहृत्य **तरङ्गिणीतुङ्गतरङ्गलोल–पलाण्डुवत् तरङ्गिण्याः**=नद्याः **तुङ्गाः**=उन्नताः ये **तरङ्गाः**=ऊर्मयः तेषु **लोलाः**=चञ्चलाः ये **पलाण्डवः**=शुष्कलाम्बूनि,[४]* फेना इति यावत् । तद्वत् **नस्थिरतां='**न समासोऽयं' अस्थिरत्वं **ययुः=**प्रापुः ॥९॥

पराक्रमं क्रूरतरं विधाय परान् पराभाव्य वरास्त्रशस्त्रैः[५] ।

रामं ययौ रावणवाहिनी सा ज्वलन्तमग्निं शलभावलीव ॥१०॥

---

१. **'वानरवाहिनीन्द्रान्'** इति प्र.व्या । २. अ) **'विशीर्णपर्णम्'** इति ब.गो । आ) **'विशीर्णपर्णान्'** इति प्र.व्या ।
३. **'–पूर्वकांस्तान्'** इति प्र.व्या । ४. **'शुष्कालाबूपमाः'** इति ब.गो । * पलाण्डुः=ईरुळ्ळि इति कर्णाटकभाषयाम् ।
५. अ) **'परास्त्रशस्त्रैः'** इति मू.श्लो.पा । आ) **'महास्त्रशस्त्रैः'** इति श्रीविश्व.ती ।

Rarest Archiver

सा प्रसिद्धा **रावणवाहिनी क्रूरतरम्**=अतिशयेन क्रूरं **पराक्रमं**=शूरत्वं **विधाय**=कृत्वा **परान्**=शत्रुभूतान् कपीन् **वरास्त्रशस्त्रैः**=उत्तमास्त्रशस्त्रैः **पराभाव्य**=विजित्य, **शलभावली** =शलभपङ्क्तिः 'आवलीशब्दोऽपि ङीबन्तोऽस्ति' **ज्वलन्तमग्निम् इव**=अग्निं यथा प्राप्नोति तथा **रामं ययौ**=प्राप ॥१०॥

अथर्ष्टिभिः[१] पट्टिसभिण्डिवालैः[२] शक्त्या शतघ्नीपरिघैश्च शूलैः ।

गदासिभिस्तोमरसायकौघैः[३] युयोध रामं विविधायुधैः सा[४] ॥११॥

अथ=रामप्राप्त्यनन्तरं **सा** रावणवाहिनी **ऋष्टिभिः**=ऋष्टिनामकैः आयुधैः **पट्टिसभिण्डि–वालैः**[५] **पट्टसैः**=पट्टायुधैः **भिण्डिवालैश्च**=तन्नामकायुधैः **शक्त्या**=शक्तिनामकायुधेन **शतघ्नीपरिघैश्च**=शतघ्नीभिः परिघैश्च **शूलैः**=त्रिशूलैः **गदासिभिः**=गदाभिः, खड्गैः **तोमर –सायकौघैः तोमराणां, सायकानाम् ओघैः**=समूहैः **विविधायुधैः**=नानायुधैः करणैः **रामं युयोध**=प्रहृतवती ॥११॥

कच्चिद् बहून् जेष्यति राम एको रामो जयेदेव रिपून् प्रवीरः ।

विश्वेश्वरः क्रीडति सेनयेति बालाः समा भूरिधियोऽप्यवोचन् ॥१२॥

बालाः=अधमजनाः **एकः रामः बहून् रिपून् जेष्यति कच्चित्**=जेष्यति किं? **इति अवोचन्** । **समाः**=मध्यमाः **प्रवीरः रामः एकोऽपि बहून् रिपून् जयेदेवेत्यवोचन्** । **भूरिधियः**=बहुलज्ञानाः, उत्तमाधिकारिणः पुरुषाः **विश्वेश्वरः**=जगत्स्वामी रामः **सेनया**= रावणसेनया **क्रीडति**=क्रीडां करोति **इत्यवोचन्** ॥१२॥

आदाय कार्तस्वरभास्वरं स चापं चकार प्रभुराशु सज्यम्[६] ।

विष्फारशब्देन[७] सुरासुराणाम् उद्घोषयामास सुखासुखे च ॥१३॥

प्रभुः=समर्थः **सः** रामः **कार्तस्वरभास्वरं**=सुवर्णेन प्रकाशमानं **चापं**=धनुः **आदाय**= गृहीत्वा, **सज्यं**=ज्यासहितं **आशु चकार** । **विष्फारशब्देन**=धनुष्टङ्कारेण **सुरासुराणां**= देवासुराणां,युद्धद्रष्टॄणां **सुखासुखे**=सुखदुःखे **उद्घोषयामास**=प्रकटयामास । 'घुष=शब्दे'[८] लिट् ॥१३॥

---

१. **'अथेषुभिः'** इति प्र.व्या । ब.गो च ।
२.**पट्टसभिण्डिपालैः'** इति दू.कृ.श्री ।
३. **'–मरसायकाद्यैः'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।
४. **'विविधायुधैश्च'** इति प्र.व्या ।
५. **'पट्टशभिंडिपालैः पट्टसैः भिंडिपालैश्च** इत्येवं दू.कृ.श्री ।
६.**'सज्जम्'** इति मू.श्लो.पा ।
७. **'विस्फारशब्देन'** मू.श्लो.पा । ब.गो च ।
८. 'घुषिर्=विशब्दने' वै.सि.कौमुद्याम् ।

Rarest Archiver

सुवर्णपुङ्खानतितीव्रधारान् अक्षीणपक्षान् नतपर्वणोऽथ ।

बाणासने बाणगणानगण्यान् सन्धाय सन्धाय मुमोच रामः ॥१४॥

अथ=चापग्रहणानन्तरं, सुखासुखोत्पादनानन्तरं वा **रामः सुवर्णपुङ्खान्=**सुवर्णयुक्तादि-भागवतः **अतितीव्रधारान्**=अतितीक्ष्णमुखान् **अक्षीणपक्षान्**=नाशरहितगृध्रबर्हयुक्तान् **नत – पर्वणः**=समीचीनपर्ववतः[१] **अगण्यान्=**गणयितुमशक्यान् **बाणगणान्=**शरसमूहान् **बाणाः आस्यन्ते**=क्षिप्यन्ते अनेनेति **बाणासनं=**धनुः तस्मिन् **सन्धाय सन्धाय**=संयोज्य, संयोज्य **मुमोच** ॥१४॥

कण्ठेषु घण्टाघटितेषु कांश्चित् करेषु कांश्चिच्चरणेषु चान्यान्[२] **।**

मदोत्कटानापततः क्षुरप्रैः चकर्त कर्ता जगतां गजेन्द्रान् ॥१५॥

जगतां=चतुर्दशभुवनानां *'कर्मणि षष्ठी'* **कर्ता**=उत्पादकः रामः **मदोत्कटान्**=मदोद्धतान् **आपततः**=आभिमुख्येनागच्छतः **कांश्चिद्गजेन्द्रान् घण्टाघटितेषु=**घण्टायुक्तेषु **कण्ठेषु क्षुरप्रैः=**क्षुरसदृशैः बाणैः **चकर्त**=चिच्छेद । 'कृती=छेदने' लिट् । **कांश्चिद्गजान् करेषु=** शुण्डादण्डेषु **चकर्त** । **अन्यान्**=गजेन्द्रान् **चरणेषु=**पादेषु **चकर्त** ॥१५॥

श्रिया प्रदीप्तानविषादिनोऽत्र निषादिनः संयति सादिनश्च ।

अपातयत् तान् सहसा स[३] **देवो नाकाधिरोहानिव पुण्यनाशे ॥१६॥**

देवः=स रामः **पुण्यनाशे**=पुण्यक्षये सति **नाकाधिरोहानिव**=स्वर्गाधिरुढान् पुरुषान् यथा इन्द्रभृत्याः पातयन्ति 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति'[४] इति वचनात् । तथा **श्रिया**= सम्पदा, देहकान्त्या वा **प्रदीप्तान्=**जाज्वल्यमानान् **अविषादिनः**=निर्भयान् **निषादिनः**= गजारोहान् **अत्र**=लङ्कायां **संयति**=युद्धे **सहसा**=स्वसामर्थ्येन **अपातयत्** । **तान्** प्रसिद्धान् **सादिनश्च**=अश्वारोहानपि **अपातयत्=**पातयामास । 'पत्ऌ=गतौ' णिजन्तात् लङ् ॥१६॥

अलङ्घनीयां विमलां विशालां वेलामिवानन्तशरावलीं[५] **ताम् ।**

अभ्यापतन्ती प्रययौ क्षणेन भङ्गं तुरङ्गाख्यतरङ्गमाला ॥१७॥

---

१. **'नतपर्वणः=समीपेपर्ववतः'** इति दू.कृ.श्री ।
२. अ) **'चरणेष्वथान्यान्'** इति मू.श्लो.पा ।
आ) **'चरणेषु कांश्चित्'** इति ब.गो ।
३. **'सहसा च देवो'** इति प्र.व्या ।
४. श्री.भ.गीता.९.अ.२१.श्लोकः ।
५. **'शरावलिम्'** इति मू.श्लो.पा ।

Rarest Archive

तरङ्गमाला=ऊर्मिपङ्क्तिः **अलङ्घनीयां**=लङ्घितुमशक्यां **विमलां**=निर्मलां **विशालां वेला –मिव**=समुद्रतीरं प्राप्नुवन्ती यथा **भङ्गं**=नाशं याति तथा **तुरङ्गाख्यतरङ्गमाला=**हयाख्यतरङ्गपङ्क्तिः **अलङ्घनीयां विमलां**=विशालां **तां=**प्रसिद्धां **अनन्तशरावलीं=**रामशर –पङ्क्तिं **अभ्यापतन्ती=**प्राप्नुवन्ती सती **क्षणेन भङ्गं**=नाशं **प्रययौ** ॥१७॥

पदातिपङ्क्तिं द्रुतमापतन्तीं पतत्रिवेगां धृतखड्गखेटाम् ।

निरास रामो बहुबाणवर्षैः वर्षैर्महामेघ इवोरुधूलिम् ॥१८॥

महामेघः वर्षैः=वृष्टिभिः **उरुधुलिमिव**=उत्कृष्टपांसुं यथा **निरास=**निरस्यति तथा **रामः** अपि **धृतखड्गखेटां**=धृतासिचर्मरूपायुधां **पतत्रिवेगां**=पक्षिवेगसदृशवेगां **द्रुतं=**शीघ्रं यथा तथा **आपतन्तीं**=स्वाभिमुख्येनागच्छन्तीं **पदातिपङ्क्तिं पदातीनां**=पादचारिणां भटानां **पङ्क्तिं =**श्रेणीं **बहुबाणवर्षैः निरास**=निराचकार । ‘असु=क्षेपणे’ लिट् ॥१८॥

युद्धे समृद्धे कृतविक्रमाणां पुरा [१]मुहुर्दारितदैवतानाम् ।

महारथानां मधुजिच्छिरांसि चिच्छेद[२] भल्लैश्चलकुण्डलानि ॥१९॥

मधुजित्=मधुनामकदैत्यघाती रामः **समृद्धे**=पूर्णे **युद्धे**=रणे **कृतविक्रमाणां=**कृतपरा–क्रमाणां **पुरा**=पूर्वं **मुहुः**=पुनः **दारितदैवतानां**=विदारितदेवानां **महारथानां**=राक्षसानां **चल –कुण्डलानि**=चञ्चलकुण्डलयुक्तानि **शिरांसि भल्लैः**=आयुधविशेषैः **चिच्छेद** ॥१९॥

सन्धानमाकर्षमिषोर्विमोक्षम् आदानमीशस्य तथाऽपदानम् ।

जनोऽविवेकी च विवेकहीनं[३] विभ्रान्तचक्रारवदीक्षते स्म ॥२०॥

अविवेकी=विवेकहीनः अज्ञ इति यावत् । **जनः=**लोकः **ईशस्य**=रामस्य सम्बन्धिनः **इषोः=**बाणस्य **आदानं**=तूणाद् ग्रहणं **सन्धानं=**धनुषि संयोजनम् **आकर्षं**=कर्णसमीपं प्रापणं **मोक्षं**=विसर्जनं तथा **अपदानं**=तिर्यगादानं, तिर्यक् प्रयोगं वा ‘नावेक्षते स्म’ इति नञोऽध्याहारेण योजनीयम् । किन्तु धनुर्मण्डले **विभ्रान्तचक्रारमिव विभ्रान्तं**=विशेषेण

१. **‘मुहुर्द्रावितदैवतानाम्’** इति मू.श्लो.पा ।
२. **‘चकर्त’** इति प्र.व्या ।
३. **‘विवेकहीनो’** इति मू.श्लो.पा ।

Rarest Archiver

भ्रामितं यच्चक्रं तस्य दलमिव, परिभ्रामितचक्रदलसमं यथा तथा अवेक्षते स्म=ऐक्षत । 'विवेकहीनम्' इति पाठे विवेकिजनोऽपि शीघ्रत्वात् विवेकहीनं यथा तथा अवेक्षते स्म इत्यर्थः ॥२०॥

स यौगपद्येन शतं सहस्रं लक्षं च साक्षादविलक्ष्य एव[१] ।

कोटिं च खर्वं च तथा महौघं मुञ्चन्निषूनेष रिपून् जघान ॥२१॥

एषः रामः **यौगपद्येन**=एकवारमेव **शतम् इषून् मुञ्चन्**, एवं **सहस्रम् इषून् मुञ्चन्, लक्षं च इषून्, कोटिम् इषून्, खर्वं च इषून्, महौघं च इषून् मुञ्चन्**=विसृजन् सन् **साक्षाद्**=अव्यवधानेन [२]**अविलक्ष्य एव=**लक्ष्यममुच्यैव युध्यन्, लक्ष्यमनवेक्ष्यैव युध्यन् सन् इति वा **रिपून् जघान** ॥२१॥

अपाङ्गमात्रेण जगन्नियन्ता नन्वेकरूपोऽपि रिपून् निहन्यात्[३] ।

स्वैश्वर्यमेवं च निदर्शयन् हि स विश्वरूपोऽकृत विश्वरूपम् ॥२२॥

अपाङ्गमात्रेण=कटाक्षवीक्षमात्रेण **जगन्नियन्ता**=विश्वसंहारकः **यः** रामः **एकरूपोऽपि**= एकव्यक्तिरपि **रिपून्=**शत्रून् **निहन्यात्**=हन्तुं समर्थो भवेत् **ननु**=निश्चितम् । **एवं च=**एवम –पि **स्वैश्वर्यं**=स्वसामर्थ्यं **निदर्शयन्=**प्रकाशयन्,नितरां प्रकाशयन्निति यावत् । **विश्वरूपः** =पूर्णरूपः **सः** रामः **विश्वरूपम्**=अनेकरूपम् **अकृत=**प्रादुश्चकार । करोतेः लुङ् ॥२२॥

रामो धरण्यां गगने च रामो रामोऽन्तिके दूरतरे च रामः ।

रामो विपक्षे स्वबले च रामः सर्वत्र रामः क्व बभौ न रामः ॥२३॥

'अकृत विश्वरूपम्' इत्युक्तं विश्वरूपत्वं दर्शयति– **राम** इति । **धरण्यां**=भूमौ **रामः बभौ**=रराज । **गगने च**=आकाशेऽपि **रामः बभौ** । **अन्तिके=**कपिसेनासमीपे **दूरतरे च=** अत्यन्तदूरे च **रामो बभौ** । **विपक्षे**=शत्रुसेनामध्ये **रामो बभौ** । **स्वबले च=**कपिसेना–मध्येऽपि रामो बभौ । किं बहुना ! **सर्वत्र**=दिक्षु विदिक्षु **रामो बभौ** । यद्वा **रामः क्व**= कुत्र **न बभौ** ? किन्तु **सर्वत्र रामो बभौ** ॥२३॥

---

१. अ) **'लक्षं च लक्ष्याधिकमेव सैन्यम्'** इति मू.श्लो.पा । आ) **'लक्षं च लक्षाधिकलक्षसैन्यम्'** इति ब.गो.सं.पा ।

२. वा.वे मातृकायाम्– **'अविलक्ष्य एव** एतदारभ्य **इति वा** पर्यन्तं लुप्तः, प्रमादितो वा स्यात् ।

३. **'रिपून् स हन्यात्'** इति मू.श्लो.पा । प्र.व्या च ।

Rarest Archiver

रामान् अनन्तान् अवलोकयन्तः प्रत्येकशस्तेषु गुणाननन्तान् ।

एकैकशस्तांश्च[१] गुणाननन्तान् सुरेश्वराः प्राञ्जलयः प्रणेमुः ॥२४॥

न विद्यते **अन्तः**=परिमितिः येषान्तान् **अनन्तान् रामान्**=रामविग्रहान् **आलोकयन्तः**=पश्यन्तः **तेषु**=रामरूपेषु **प्रत्येकशः**=प्रत्येकं यथा तथा **अनन्तान्**=अपरमितान् **गुणान्**=ज्ञानानन्दादीन् धर्मान् **अवलोकयन्तः तांश्च गुणान् एकैकशः**=एकैकगुणान् ज्ञानानन्दादीन् **अनन्तादीन्**=अपरिमितान् अवलोकयन्तः **सुरेश्वराः**=देवश्रेष्ठाः **प्राञ्जलयः** सन्तः **तान्**=रामान् **प्रणेमुः**=नमस्कृतवन्तः । प्रणनाम प्रणेमतुः प्रणेमुः । नमेर्लिट् । अनेन 'मय्यनन्त–गुणेऽनन्ते गुणतोऽनन्तविग्रहे'[२] । इति भागवतश्लोकार्थ उक्त इति ध्येयम् ॥२४॥

हरिन्मणिश्यामलकोमलाङ्गान् बिम्बाधरानम्बुजपत्रनेत्रान् ।

रामान् विरामान् रिपुवाहिनीनां प्रेक्ष्य प्रजाः प्राञ्जलयः प्रणेमुः ॥२५॥

न केवलं सुरेश्वराः किन्तु प्रकृष्टो अञ्जलिः यासान्ताः **प्राञ्जलयः प्रजाः**=सज्जना अपि **हरिन्मणि**वत्=इन्द्रनीलमणिरिव **श्यामलाः**=श्यामलवर्णाः **कोमलं**=मृदु अङ्गं येषान्ते तथा हरिन्मणिश्यामलाश्चते कोमलाङ्गाश्च तान् **हरिन्मणिश्यामलकोमलाङ्गान्**, बिम्बपक्वम् इव अधरो येषां तान्, **बिम्बाधरान्**=रक्ताधरोष्टान् **अम्बुजपत्राणि इव**=कमलदलानीव **नेत्राणि** येषान्ते तान् **अम्बुजपत्रनेत्रान्**, **रिपुवाहिनीनां** 'कर्मणि षष्ठी' **विरामान्**=विराममव– सानं प्रापकान् अवसानकर्तॄनित्यर्थः । **रामान्**=रामविग्रहान् **प्रेक्ष्य**=दृष्ट्वा **प्रणेमुः** ॥२५॥

विष्फारयन्ति[३] स्म धनूंषि केचित् केचिद्विभिन्दन्ति पुरा विपक्षान् ।

अन्ये पराक्रम्य[४] नदन्ति यावद् रामास्त्रिलोक्यामभिरामरूपाः ॥२६॥

त्रिलोक्यां=लोकत्रये **अभिरामरूपाः**=मनोहराकाराः इति सर्वेषां विशेषणम् । केचिद् रामाः **धनूंषि**=चापान् कर्म **विष्फारयन्ति स्म**=व्यष्फारयन् शब्दयुक्तान्यकुर्वन्, धनुष्टङ्कारम् अकुर्वन् इति यावत् । **केचिद्** रामाः **विपक्षान्**=शत्रुपक्षान् **विभिन्दन्ति पुरा**=अभिन्दन्, व्यदारयन् **अन्ये** रामाः **पराक्रम्य**=पराक्रमं कृत्वा **नदन्ति यावत्** अनन्दन् । 'विभिदन्ति –पुरा नदन्ति' इत्यत्र च 'यावत्पुरानिपातयोर्लट्'[५] इति 'भूतेः' लट् ॥२६॥

---

१. **'एकैकशस्तेषु'** इति प्र.व्या । ब.गो च ।   २. श्रीब्र.सू.अ.व्या.२.अ.२.पा.१५१.श्लोकः ।

३. **'विस्फारयन्ति'** इति वा.वे । मू.श्लो.पा । प्र.व्या च । ४. **'पराक्रन्द्य'** इति प्र.व्या ।   ५. अष्टाध्यायी ३।३।४ पा.सूत्रम् ।

Rarest Archiver

जिघत्सतां[1] वानरवाहिनीं तां कृताट्टहासं मुखकोटरान्तम् ।

निशाचराणां निशितैः शरौघैः अपूरयन् केचन रामदेवाः ॥२७॥

केचन=अन्ये रामाश्च ते देवाश्च **रामदेवाः**=क्रीडादिगुणविशिष्टाः रामाः **तां**=प्रसिद्धां **वानर–वाहिनीं**=कपिसेनां **जिघत्सताम्**=अत्तुकामानां 'जिघांसताम्' इति पाठे=हन्तुकामानां **निशाचराणां**=राक्षसानां **कृताट्टहासं**=कृतोन्नतहासं **मुखकोटरान्तं**=मुखाख्यबिलमध्यं कर्म **निशितैः**=तीक्ष्णैः **शरोघैः**=शरसमूहैः **अपूरयन्**=पूरितम् अकुर्वन् । 'पॄ=पालन–पूरणयोः'[2] लङ् ॥२७॥

रामैरगण्यैरिति वध्यमानां सम्पश्यमाना रिपुवाहिनीं ताम् ।

अन्योन्यमाबद्धकरा हसन्तः तस्थुः परे केचन रामदेवाः ॥२८॥

अगण्यैः=असंख्यैः **रामैः**=रामरूपैः **इति**=पूर्वोक्तप्रकारेण **वध्यमानां**=हन्यमानां **तां** प्रसिद्धां **रिपुवाहिनीं**=रिपुसेनां **सम्पश्यमानाः**=सम्यक् पश्यन्तः **अन्योन्यं**=परस्परम् **आबद्धकराः**=गृहीतहस्ताः **हसन्तः**=हासं कुर्वन्तः **परे**=भिन्ना इव स्थिताः **केचन**= केचिद् रामदेवाः **तस्थुः**=स्थितवन्तः ॥२८॥

किं विश्वमूर्तेः कपिभिस्तु कृत्यम् इति ब्रुवाणान् प्लवगान् विलोक्य ।

अविस्मितं सुस्मितमाननाब्जम् अकम्पयन् केचन रामदेवाः ॥२९॥

केचन=केचित् **रामदेवाः**=रामरूपविशेषाः **विश्वमूर्तेः**=अनन्तरूपस्य रामस्य **कपिभिः किं कृत्यं**=किं प्रयोजनम्? **इति**=एवंप्रकारेण **ब्रुवाणान्**=भाषमाणान् **प्लवङ्गान्**=कपीन् **विलोक्य**=दृष्ट्वा **अविस्मितम्**=आश्चर्यरहितं **सुस्मितं**=शोभनहासयुक्तम् **आननाब्जं**= मुखकमलम् **अकम्पयन्**=अचालयन् । 'कपि=कम्पने'[3] लङ् ॥२९॥

भिन्ना न वह्नेः पृथगीक्षिताश्च जाता यथा दीपत एव दीपाः ।

न विश्वमूर्तेर्ननु जातु भिन्ना जातास्तथा रामत एव रामाः ॥३०॥

---

१. अ) **'जिघां सताम्'** इति ब.गो । आ) **'जिघृक्षताम्'** इति मू.श्लो.पा ।

२. अस्य धातोः लङि 'अपारयन्' इति रूपम् ॥ 'पूरीधातुः दिवादावपि पठ्यते । चुरादावपि । दिवादेर्लङि अपूर्यन्तेति रूपम् । चुरादेरपूरयन्निति' तु ब.गो । तथा च– वै.सि.कौमुद्यां 'पूरी=आप्ययने' इति ।

३. 'कपि=चलने' इति वै.सि.कौमुद्याम् ।

Rarest Archiver

दीपत एव=दीपादेव **जाताः**=उत्पन्नाः **पृथक्**=प्रत्येकं **यथा** तथा **ईक्षिताश्च**=जनैर्दृष्टा अपि **दीपाः**=यथा **वह्नेः**=ज्वलनात् **भिन्ना** न भवन्ति । तथा **रामत एव**=रामरूपादेव **जाताः**=आविर्भूता **रामाः**=रामविग्रहाः **जातु**=कदाचिदपि **विश्वमूर्तेः**=अनन्तविग्रहाद् रामाद् **भिन्नाः**=भेदयुक्ता न भवन्ति **ननु**=निश्चितम् ॥३०॥

वर्त्याद्युपाधेर्ननु तारतम्याद् दीपेषु दृष्टं गुणतारतम्यम्[१] **।**

रामस्य रूपेषु तथा गुणानां नैसर्गिकाणां न हि तारतम्यम् ॥३१॥

'ननु अणुत्वमहत्त्वादिपरिमाणभेदात् दीपेषु भेदो दृष्ट इति कथं ते दृष्टान्ताः?' इत्यत आह– **वर्ती**ति । **वर्त्याद्युपाधेः**=वर्तिः–तैलादिनिमित्तस्य **तारतम्यात्**=नीचोच्चभावात् **दीपेषु गुणतारतम्यं**=दाहकत्वादिगुणे नीचोच्चभावः यथा **ननु दृष्टम्, तथा रामस्य रूपेषु नैसर्गिकाणां**=स्वाभाविकानां **गुणानां**=ज्ञानानन्दादीनां **तारतम्यं न हि**=नास्त्येव ॥३१॥

सर्वेऽपि ते श्याममणीन्द्ररामाः सर्वेऽपि विध्वस्तनिजोपरामाः ।

सर्वेऽपि ते सर्वगुणाभिरामाः सर्वेऽपि नाथा जगतां हि रामाः ॥३२॥

तारतम्याभावम् उपपादयति– **सर्व इति । सर्वेऽपि**=समस्ता अपि **ते रामाः श्याममणी–न्द्ररामाः**=इन्द्रनीलमणिवत् श्यामवर्णाः तद्वन्मनोहराश्च **सर्वेऽपि विध्वस्तनिजोपरामाः**= **विध्वस्तो**=नाशितः **निजः**=आत्मीयः **उपरामः**=संहारो येषान्ते तथोक्ताः=नाश –रहिता इति यावत् । **सर्वेऽपि ते** रामाः **सर्वगुणाभिरामाः**=सर्वगुणपूर्णाः, सर्वगुणैः मनोहरा वा **सर्वेऽपि रामाः जगतां**=लोकानां **नाथाः**=स्वामिनः **हि**=प्रसिद्धमेतत् ॥३२॥

भेदं विनैवापि विशेषमात्राद् रूपाण्यनन्तानि पृथग्विधाय ।

एकीचकाराथ स रामदेवो दीपाभिमानी हि[२] **यथाऽग्निदेवः ॥३३॥**

दीपाभिमानी=दीपनियामकः **हि**=प्रसिद्धः **अग्निदेवः**=अग्न्याख्यः देवः **यथा अनन्तान्** दीपान् विधाय एकीभवति तथा **स रामदेवः भेदं विनैवापि**=भेदाभावेऽपि **विशेषमात्रात्**= भेदप्रतिनिधिविशेषाख्यशक्त्यतिशयमात्रात् **अनन्तानि रूपाणि पृथक्**=प्रत्येकं **विधाय**= कृत्वा, **अथ**=अनन्तरं **एकीचकार**=एकरूपम् अकरोत् ॥३३॥

---

१. **'ननु तारतम्यम्'** इति मू.श्लो.पा ।

२. **'दीपाभिमानी तु'** इति च मू.श्लो.पा ।

Rarest Archiver

न भवति बहुभावो भेदहीनार्थ इत्थं मतिरपटुमतीनामस्तु डोलायमाना ।

वपुरवयवधर्मा वर्णचेष्टाः गुणाद्याः ध्रुवमपरिमिताः श्रीराम एको विशेषात् ॥३४॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे द्वादशः सर्गः ॥

अपटुमतीनां=अकुशलबुद्धीनां **भेदहीनार्थे**=भेदरहिते वस्तुनि **बहुभावः**=बहुत्वं, बहु–रूपत्वं **न भवति । इत्थम्**=एवंप्रकारेण **डोलायमाना**=चञ्चला **मतिः**=बुद्धिः **अस्तु**= स्यात् । किन्तु **विशेषात्– 'भेदहीने त्वपर्याय शब्दान्तरनियामकः'** ॥

'विशेषो नाम कथितः सोऽस्ति वस्तुष्वशेषतः'[1]॥ इति प्रमाणसिद्धात् विशेषाख्यशक्त्यतिशयबलात् **वपुरवयवधर्माः**=वपूंषि च अवयवाश्च धर्माश्च वपुरादिस्वभा–वाः **वर्णचेष्टाः**=गुणाद्याः **वर्णाः**=श्यामलादयः **चेष्टाः**=व्यापाराः **गुणद्याः**=ज्ञानानन्दादयः इत्येते **अपरिमिताः** अपि=अनन्ताः अपि **एकः श्रीराम** एव=वपुरादिभेदरहितो रामः एकः एवेत्यर्थः । **ध्रुवं**=निश्चितम् । 'अत्र प्रतिश्लोकं 'ब्रह्मसूत्राणि'[2] उदाहृत्य उक्तार्थः साधयितुं शक्यते यद्यपि । तथापि ग्रन्थगौरवभयादुपरम्यते' ॥३४॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे द्वादशः सर्गः ॥

आरम्भतः श्लोकाः–५९२+३४=६२६

१. श्रीब्र.सू.अ.व्या.१.अ.१.पा.१०९..११०.श्लोकयोः ।
२. भगवता श्रीवेदव्यासेन विरचितानि ।

Rarest Archives

Rarest Archiver

॥ अथ त्रयोदशः सर्गः ॥

Rarest Archiver

॥ अथ त्रयोदशः सर्गः ॥

महाबलेन रामेण श्रुत्वा मूलबलं हतम् ।

जीविताशां सुखाशां च क्षणात् तत्याज रावणः ॥१॥

मूलबलनाशानन्तरं किमभूद्? इत्यत आह– **महाबलेने**ति । **रावणः महाबलेन**=महाशक्ति–मता[१] रामेण **हतं**=नाशितं **मूलबलं श्रुत्वा जीविताशां**=जीवनेच्छां **सुखाशां च**=सुखे–च्छा मपि **क्षणात्** =क्षणमात्रात् **तत्याज**=जहौ । 'त्यज=हानौ' लिट् ॥१॥

स्नुषाणामथ भार्याणां [२]परासामपि योषिताम् ।

पत्यपत्यार्तिजं रोदं श्रुत्वा मर्तुं मनो दधे ॥२॥

अथ=अनन्तरं **स्नुषाणां**=पुत्रभार्याणां सपत्नीनां **पत्यपत्यार्तिजं**=यथाक्रमं पतीनां मरणेन **आर्तिजं**=दुःखजम् **अपत्यानां**=पुत्राणां क्लेशजातं **रोदम्**=अश्रुविमोचनपूर्वकं विलापं **परासां**=अन्यासां **योषितां**=स्त्रीणां 'पत्यपत्यार्तिजं रोदनमपि' **श्रुत्वा मर्तुं**=प्राणत्यागं कर्तुं **मनः दधे**=दधार ॥२॥

जाज्वल्यमानः कोपेन[३] नेत्रेभ्यो वह्निमुद्गिरन् ।

अवानरनरामुर्वीं करीष्यामीत्युवाच सः ॥३॥

कोपेन जाज्वल्यमानः=पुनः पुनः अतिशयेन ज्वलन् **नेत्रेभ्यः**[४] **वह्निम्**=अग्निम् **उद्गिरन्** =सृजन् **सः**=रावणः **उर्वीं**=भूमिम् **अवानरनरां**=वानरनरै रहितां **करिष्यामि इत्युवाच** ॥३।

सर्वदिव्यायुधोपेतं पुष्पकं पुष्टिवर्धनम् ।

आरुरोह महाबाहुः सन्नद्धो दशकन्धरः ॥४॥

महाबाहुः=महासमर्थः **सन्नद्धः**=युद्धप्रयत्नोपेतः, बद्धकवचो वा **दशकन्धरः सर्वदिव्या – युधोपेतं**=कृत्स्नालौकिकायुधयुक्तं **पुष्टिवर्धनं**=सन्तोषाभिवृद्धिकरं **पुष्पकं**=पुष्पकाख्यं विमानम् **आरुरोह**=आरूढः ॥४॥

---

१. **'महाशक्तिना'** इति दू.कृ.श्री ।
२. **'अन्यासामपि'** इति मू.श्लो.पा ।
३. **'क्रोधेन'** इति मू.श्लो.पा । ब.गो च ।
४. **'नेत्राभ्याम्'** इति द्विवचनं स्वीकृतम् । वा.वे ।

Rarest Archiver

विरूपाक्षश्च यूपाक्षो महापार्श्वमहोदरौ ।

दंशिता[१] रथमारुह्य रावणं पर्यवारयन् ॥५॥

विरूपाक्षः यूपाक्षः च=विरूपाक्षयूपाक्षनामकौ **महापार्श्वमहोदरौ** च इत्येते चत्वारः मन्त्रिणः **दंशिताः**=बद्धकवचाः सन्तः स्वयमपि **रथमारुह्य रावणं पर्यवारयन्**=परितः स्थिताः । 'वृञ्=वरणे' णिजन्तात् लङ् ॥५॥

निर्ययौ नगराद् राजा सेनया हतशेषया ।

उत्पातान् वीक्षमाणोऽपि दिव्यान् भौमानथाङ्गिकान्[२] ॥६॥

अथ=अनन्तरं **राजा**=राक्षसाधिपो रावणः **दिव्यान्** दिवि=आकाशे भवान्=सञ्जातान् **उत्पातान्**=उल्कापातरक्तवृष्ट्यादीन् **भौमान्**=भूमौ सम्भूतान् भूकम्पादीन् **आङ्गिकान्**= अङ्गेषु भवान् वामबाह्वादिचलनरूपान् **उत्पातान्**=मरणसूचकान् **वीक्षमाणोऽपि**= पश्यन्नपि **राजा** रावणः **हतशेषया**=हत्या उर्वरितया **सेनया सह नगरात्**=लङ्कापुर्याः **निर्ययौ**=बहिर्गतः ॥६॥

देवो ववर्ष रुधिरं विनेदुरशिवाः शिवाः ।

चेलुरङ्गानि वामानि यतो मृत्युः प्रतीयते ॥७॥

तदेव विवृणोति– **देव इति** । देवः=इन्द्रः, पर्जन्यो वा **रुधिरं**=रक्तं **ववर्ष**=वृष्टवान् । 'वृष=सेचने' लिट् । **अशिवाः**=अमङ्गलाः **शिवाः**=सृगलाः **विनेदुः**=चुक्रुशुः । **वामानि**= अपसव्यानि **अङ्गानि**=नेत्रबाहूरुपादादीनि[३] **चेलुः**=चलितानि । चचाल चेलतुः चेलुः । 'चल=सञ्चलने' लिट् । **यतः**=येभ्यः रुधिरवृष्ट्यादिभ्यः[४] **मृत्युः**=मरणं **प्रतीयते**=ज्ञायते तानि आसन्नित्यन्वयः ॥७॥

पुरुषादाधिपस्यास्य पुरुषादान्[५] पुरःसरान् ।

वानरा वारयामासुः तन्नासहत रावणः ॥८॥

---

१. **'दंसिता'** इति दू.कृ.श्री । ब.गो च ।

२. **'अथाऽङ्गजान्'** इति प्र.व्या ।

३. **'नेत्रबाहुरूपाणि'** इति दू.कृ.श्री । वा.वे च ।

४. **'रुधिरवर्षादिभ्यः'** इति दू.कृ.श्री ।

५. **'पुरुषाशान्'** इति मू.श्लो.पा ।

Rarest Archiver

वानराः पुरुषादाधिपस्य=राक्षसपतेः **अस्य** रावणस्य **पुरःसरान्**=पुरोगतान् **पुरुषादान् राक्षसान् वारयामासुः**=रुरुधुः । 'वृञ्=वरणे' लिट् । **रावणः तत्**=स्वभृत्यवारणं **नासहत** =न ममर्ष । 'षह=मर्षणे' लङ् ॥८॥

[१]निकृत्तकरकर्णाङ्घ्रिकण्ठाद्यवयवान् बहून् ।

पत्रिभिः पातयामास युगपद् रावणः कपीन् ॥९॥

रावणः पत्रिभिः=बाणैः **निकृत्ताः**=छिन्नाः **करकर्णाङ्घ्रिकण्टाद्यवयवाः**=हस्त,श्रोत्र,पाद,–गलाद्यवयवाः येषां तान्, निकृत्तकरकर्णाङ्घ्रिकण्ठाद्यवयवान् **बहून् कपीन् युगपत्**=एकवारमेव **पातयामास**=न्यपातयत् । 'पतॢ=गतौ' णिजन्तात् लिट् ॥९॥

पराद्रवन् पराभूताः केचित् तच्छरपावकैः ।

अपरे कपयस्तस्य ध्वजिनीं जघ्नुरुद्धताः ॥१०॥

तच्छरपावकैः=रावणशराख्याग्निभिः **पराभूताः**=तिरस्कृताः **केचिद्**=वानराः **पराद्रवन्**=दुद्रुवुः । 'द्रु=गतौ' लङ् । **उद्धताः**=उत्कृष्टाः **अपरे कपयः तस्य** रावणस्य **ध्वजिनीं**= सेनां **जघ्नुः**=हिंसितवन्तः । 'हन्तेः' लिट् ॥१०॥

प्रक्षीणान् राक्षसान् वीक्ष्य[२] महादेहो[३] महोदरः ।

अभ्यद्रवद् वानरेन्द्रान् शरवर्षी घनस्वनः ॥११॥

घनस्वनः=मेघध्वनिः **शरवर्षी**=शरवृष्टिमान् **महादेहः**=महाकायः **महोदरः**=तन्नामकरावण –मन्त्री **प्रक्षीणान्**=कपिभिः हतान् **राक्षसान् वीक्ष्य, वानरेन्द्रान् अभ्यद्रवत्**=अभिमुखं प्राप । 'द्रु=गतौ' लङ् ॥११॥

स एव कुम्भकर्णोऽयं हन्तुं नः पुनरागतः ।

इति विक्रुश्य हरयो[४] पलायन्त दिशो दश ॥१२॥

---

१. **'निकृत्य'** इति प्र.व्या ।

२. **'दृष्ट्वा'** इति प्र.व्या ।

३. **'महाकायो'** इति मू.श्लो.पा ।

४. **'कपयः'** इति च मू.श्लो.पा ।

Rarest Archiver

हरयः=कपयः यः **कुम्भकर्णः** पूर्वं रामेण हतः **स एव अयं**=पुरोवर्ती **स एव**= कुम्भकर्ण एव **नः**=अस्मान् **हन्तुं**=हिंसितुं **पुनः**=मुहुः **आगतः**=प्राप्तः **इति विक्रुश्य**= शब्दं कृत्वा, **दश**=दशसङ्ख्याकाः **दिशः** कर्म **पलायन्त**=दुद्रुवुः । 'अय=गतौ' लङ् । *'उपसर्गस्यायतौ'*[1] इति लत्वम्' ॥१२॥

इदं विभीषिकामात्रं नैवं[2] द्रवत तिष्ठत ।

इत्युक्त्वा स्थापयामास तारेयो ध्वजिनीं निजाम् ॥१३॥

तारेयः=तारापुत्रोऽङ्गदः हे वानराः ! **इदं** रक्षः **विभीषिकामात्रं**=भयशङ्कामात्रम् [3]*'आशङ्का –यां सन् वक्तव्यः'* इति 'ञिभी=भये' इत्यतः सन् । यूयं **नैव द्रवत**=द्रवणं न कुरुत । 'द्रु=गतौ' लोटि मध्यमपुरुषे बहुवचनम् । किन्तु **तिष्ठत**=गतिनिवृत्तिं कुरुत । 'ष्ठा=गति –निवृत्तौ' लोटि मध्यमपुरुषे बहुवचनम् । **इत्युक्त्वा निजां**=स्वीयां **ध्वजिनीं**=कपिसेनां **स्थापयामास**=वारयामास । *'तिष्ठतेः' णिजन्तात् लिट्* ॥१३॥

इन्द्रसूनुसुतो वीरो महोदरमथाद्रवत् ।

सङ्ग्रामः समजन्युग्रो रक्षोवानरवीरयोः ॥१४॥

अथ=सेनास्थापनानन्तरं **वीरः इन्द्रसूनुसुतः**=वालिपुत्रोऽङ्गदः **महोदरं**=राक्षसम् **आद्रवत्** =प्राप । 'द्रु=गतौ' लङ् । **रक्षोवानरवीरयोः**=रक्षःश्रेष्ठवानरश्रेष्ठयोः, वालिसुनुमहोदरयोः **उग्रः**=क्रूरः **सङ्ग्रामः**=कलहः **समजनि**=अभूत् । 'जनी=प्रादुर्भावे' लुङ् । *'दीपजन'*[4] इति चिण्' ॥१४॥

महोदरो वालिसुते ववर्ष निशितान् शरान् ।

अचिन्तयंस्तान् जग्राह केशे वालिसुतो रिपुम् ॥१५॥

महोदरः=राक्षसः **वालिसुते**=अङ्गदे **निशितान्**=शाणोल्लीढान् **शरान् ववर्ष**=अकिरत् । 'वृष=सेचने' लिट् । **तान्**=शरान् **अचिन्तयन्**=अगणयन् **वालिसुतः रिपुं**=महोदरं **केशे**=केशपाशे **जग्राह**=अग्रहीत् ॥१५॥

---

१. अष्टाध्यायी ८।२।१९ पा.सूत्रम् ।

२. **'मैवं द्रवत'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।

३. इति वार्तिकम् । इदं वाक्यं वा.वे मातृकायां लुप्तः, प्रमादितो वा स्यात् ।

४.**'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्'** इति अष्टाध्यायी ३।१।६१ पा.सूत्रम् ।

Rarest Archive

महोदरं महीपृष्ठे पातयित्वाऽङ्गदो रुषा ।

परिघापातपरुषैः पादपातैरचूर्णयत् ॥१६॥

अङ्गदः महीपृष्ठे=भूतले **महोदरं पातयित्वा**=निपात्य, **रुषा**=कोपेन **परिघापातपरुषैः= परिघस्य**=कवाटकीलस्य अपातवत्=अभिपतनवत्, परिघप्रहारवदिति यावत् । **परुषैः** =असह्यैः **पादपातैः=**पादप्रहारैः **महोदरम् अचूर्णयत्=**चूर्णितवान् ॥१६॥

महोदरं हतं दृष्ट्वा महापार्श्वः तमापतत्[१] **।**

ववर्ष च शरान्[२] **घोरान् वालिसूनुजिघांसया ॥१७॥**

महापार्श्वः=रावणस्य मन्त्री **हतं=**मृतं **महोदरं दृष्ट्वा, तम्** अङ्गदम् **आपतत्**=प्राप । **वालिसूनुजिघांसया**=अङ्गदं हन्तुमिच्छया **घोरान् शरान् ववर्ष च**=चिक्षेप ॥१७॥

अङ्गदस्तमभिद्रुत्य प्रसह्याऽदत्त तद्धनुः ।

महापार्श्वोऽपि[३] **कुपितः खड्गमादत्त वेगवान् ॥१८॥**

अङ्गदः तं=महापार्श्वम् **अभिद्रुत्य=**प्राप्य, **प्रसह्य**=बलाकृत्त्य **तद्धनुः**=महापार्श्वचापम् **आदत्त**=जग्राह । 'डुदाञ्=दाने' लङ् । **वेगवान् कुपितः महापार्श्वोऽपि खड्गम्**=असिम् **आदत्त** ॥१८॥

[४]**खलस्य खड्गमाच्छिद्य केशपाशे**[५] **प्रगृह्य तम् ।**

पातयित्वा धरापृष्ठे खड्गेनाकृन्तदङ्गदः ॥१९॥

अङ्गदः खलस्य=गूढद्वेषिणः**महापार्श्वस्य खड्गम्**=असिम् **आच्छिद्य**=बलाद् गृहीत्वा, **तं**=महापार्श्वं **केशपाशे प्रगृह्य**=गृहीत्वा **धरापृष्ठे**=भूतले **पातयित्वा**=निपात्य, **खड्गेन**= असिना **अकृन्तत्**=अच्छिनत् । 'कृती=छेदने' लङ् । *'शे मुचादीनाम्'*[६] इति नुम् ॥१९॥

---

१. अ) **'समापतत्'** इति ब.गो.सं.पा । आ) **'समाययौ'** इति प्र.व्या । इ) **'समापतन्'** इति ब.गो ।
२. **'ववर्ष विशिखान् घोरान्'** इति ब.गो ।
३. **'महापार्श्वोऽथ'** इति मू.श्लो.पा । ब.गो च ।
४. वा.वे मातृकायां तु १८.१९ सङ्ख्याकद्वयोः श्लोकयोः अर्थः एकीकृत्य उक्तः ।
५. **'केशपक्षे'** इति मू.श्लो.पा ।
६. अष्टाध्यायी ७।१।५९ पा.सूत्रम् । वा.वे मातृकायां सूत्रमिदं लुप्तं प्रमादितं वा स्यात् ।

Rarest Archive

आ दक्षिणोदरप्रान्तादा वामांसाच्च राक्षसम् ।

खण्डयन् निजघानैनम् आखण्डलसुतात्मजः ॥२०॥

कथमकृन्तद्? इत्यत आह– **आ दक्षिणे**ति । **आखण्डलसुतात्मजः**=इन्द्रसूनुः वालि–पुत्रो अङ्गदः 'आखण्डलः सहस्राक्ष'[१] इत्यमरः । **आ वामांसात्**=सव्यभुजमारभ्य **आ दक्षिणोदरप्रान्तात्**=दक्षिणोदरपार्श्वपर्यन्तं उपवीतवत् **राक्षसं** महापार्श्वम् **खण्डयन्**=द्विधा कुर्वन् सन् **एनं** महापार्श्वं **निजघान**=मारयामास ॥२०॥

ततो विरूपनेत्रेण यूपनेत्रेण चाङ्गदः ।

आच्छन्नः शरवर्षाभ्यां[२] मेघाभ्यामिव भास्करः ॥२१॥

ततः=महापार्श्वनाशानन्तरं जलवर्षाभ्यां **मेघाभ्यां भास्कर इव**=सूर्यः यथा **आच्छन्नः** भवति तथा **अङ्गदः शरवर्षाभ्यां**=शरवृष्टिं कुर्वद्भ्यां **विरूपनेत्रेण यूपनेत्रेण च**= इत्येताभ्यां रावणमन्त्रिभ्यां **आच्छन्नः**=आच्छादितः ॥२१॥

शरपञ्जरबद्धोऽथ रक्षोभ्यां वालिनन्दनः ।

न शशाक प्रचलितुं व्याघ्रः पञ्जरगो यथा ॥२२॥

अथ=अनन्तरं **रक्षोभ्यां**=विरूपनेत्रयूपनेत्राभ्यां **शरपञ्जरबद्धः**=शरसमूहेनाच्छादितः **वालिनन्दनः**=अङ्गदः **पञ्जरगः**=पेटिकायां विद्यमानः **व्याघ्रः यथा** तथा **प्रचलितुं**=चलनं कर्तुं **न शशाक**=समर्थो न बभूव । 'शक्लृ=शक्तौ' लिट् ॥२२॥

सुतं संशयिनं[३] वीक्ष्य पृतनां च प्रतापिताम्[४] ।

गुल्मे सुषेणं विन्यस्य[५] सुग्रीवोऽभ्यद्रवद्[६] रुषा ॥२३॥

सुग्रीवः संशयिनं=सन्दिग्धं जीवितं **सुतम्**=अङ्गदं **वीक्ष्य प्रतापितां**=ताभ्यां नाशितां **पृतनां**=कपिसेनामपि **वीक्ष्य**=दृष्ट्वा, **गुल्मे**=लक्षे **सुषेणं**=श्वशुरं **विन्यस्य**=निक्षिप्य **रुषा**=कोपेन **अभ्यद्रवत्**=तयोः आभिमुख्येन जगाम ॥२३॥

---

१. अ.कोशे.१.का.स्वर्गवर्गे.५२.श्लोकः ।

२. **'शरवर्षेण'** इति ब.गो ।

३. **'संशयितम्'** इति ब.गो ।

४. **'प्रपातिताम्'** इति प्र.व्या । ब.गो च ।

५. **'निक्षिप्य'** इति मू.श्लो.पा ।

६. **'अभ्यपतद्'** इति ब.गो ।

Rarest Archiver

उत्पाट्य पाटवेनाशु गिरिं हरिगणेश्वरः ।

तरसा पातयामास[१] तयो रावणमन्त्रिणोः ॥२४॥

हरिगणेश्वरः=कपिसमूहस्वामी सुग्रीवः **आशु**=शीघ्रं **पाटवेन**=पटुत्वेन **गिरिं**=पर्वतं **उत्पाट्य**=उद्धृत्य **तरसा**=वेगेन **रावणमन्त्रिणोः तयोः** इति सप्तमी द्विवचनम्, विरूप–नेत्रयूपनेत्रयोः तं **गिरिं पातयामास**=चिक्षेप ॥२४॥

चूर्णीबभूवतुस्तूर्णम् अमात्यौ रावणस्य तौ ।

तेन स्थूलेन शैलेन पांसुपिण्डाविवाश्मना ॥२५॥

अश्मना=पाषाणेन **पांसुपिण्डाविव**=लोष्टौ यथा चूर्णीभवतः तथा **रावणस्यामात्यौ=** मन्त्रिणौ **तौ**=विरूपनेत्रयूपनेत्रौ **स्थूलेन**=बृहता **तेन**=सुग्रीवपातितेन **शैलेन=**गिरिणा **तूर्णं=**शीघ्रं यथा तथा **चूर्णीबभूवतुः**=पिष्टावभूताम् ॥२५॥

मन्त्रिणोः[२] मरणं वीक्ष्य क्रोधदीप्तो दशाननः ।

उल्बणं बाणमादाय कार्मुकेणाऽशु सन्दधे ॥२६॥

मन्त्रिणोः=विरूपनेत्रयूपनेत्रयोः **मरणं=**प्राणत्यागं **वीक्ष्य**=दृष्ट्वा **क्रोधदीप्तः**=कोपेन जाज्वल्यमानः **दशाननः उल्बणं**=तीक्ष्णं **बाणं=**शरम् **आदाय**=गृहीत्वा **कार्मुकेण=**चापेन **आशु सन्दधे**=संयोजितवान् ॥२६॥

तेन हर्यक्षराजस्य वक्षो रक्षोधिपो बली ।

निर्बिभेदाथ सुग्रीवो मूर्च्छितो न्यपतद् भुवि[४] ॥२७॥

बली=बलवान् **रक्षोधिपः**=रावणः **हर्यक्षराजस्य**=कपिश्रेष्ठस्वामिनः[३] सुग्रीवस्य **वक्षः=** वक्षःस्थलं, कर्म **तेन**=सन्धितेन बाणेन **निर्बिभेद**=विददार । **अथ**=वक्षोभेदानन्तरं **मूर्च्छि–तः**=प्राप्तमोहः **सुग्रीवः भुवि न्यपतत्**=पपात ॥२७॥

---

१. **'पोथयामास'** इति प्र.व्या ।

२. **'मन्त्रिणाम्'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।

३. **'कपिभल्लकस्वामिनः'** इति दू.कृ,श्री ।

४. **'निपपात हि'** इति मू.श्लो.पा ।

Rarest Archiver

विधूय वानरान् बाणैः विधूमोऽग्निरिव ज्वलन् ।

राममभ्यद्रवद् दुष्टो[१] रामभ्राता रुरोध तम् ॥२८॥

दुष्टः=दोषयुक्तः **विधूमः**=धूमरहितः **अग्निरिव**=वह्निर्यथा तथा **ज्वलन्**=कोपयुक्तः रावणः **बाणैः वानरान् विधूय**=तिरस्कृत्य, कम्पयित्वा वा **राममभ्यद्रवत्**=रामसमीपं जगाम । लक्ष्मणः **तं** रामं प्रति गच्छन्तं रावणं **रुरोध**=ववार । 'रुधिर्=आवरणे' लिट् ॥२८॥

[२]तत्र युद्धमभूच्चित्रं सौमित्रिदशवक्त्रयोः ।

शरवर्षं सुबहुलं मुञ्चतोरितरेतरम् ॥२९॥

तत्र=तस्मिन् काले **सुबहुलम्**=अधिकं **शरवर्षं**=शरवृष्टिम् **इतरेतरं**=परस्परं **मुञ्चतोः**=किरतोः **सौमित्रिदशवक्त्रयोः**=लक्ष्मणरावणयोः **चित्रं**=पश्यतामाश्चर्यकरं **युद्धमभूत्** ॥२९॥

विभीषणो गदापाणिः न्यहनद् रावणानुगान् ।

मुमोच रावणः शक्तिं घोरां भ्रातृजिघांसया ॥३०॥

गदापाणिः विभीषणः रावणानुगान्=रावणभृत्यान् **न्यहनत्**=जघान । **रावणः भ्रातृजिघां – सया**=विभीषणहननेच्छया **घोरां**=भयङ्करां **शक्तिं मुमोच** ॥३०॥

तामापतन्तीं चिच्छेद सौमित्रिः पत्रिभिस्त्रिभिः ।

विनेदुर्वानरा हृष्टाः ततश्चुक्रोध रावणः ॥३१॥

सौमित्रिः=लक्ष्मणः **आपतन्तीं**=विभीषणं प्रत्यागच्छन्तीं **तां** शक्तिं **त्रिभिः पत्रिभिः चिच्छेद** । **हृष्टाः**=सन्तुष्टाः **वानराः विनेदुः**=ध्वनिमकुर्वन् । **ततः**=तदनन्तरं **रावणः चुक्रोध**=चुकोप ॥३१॥

लक्ष्मण त्वं बलश्लाघी विभीषणमपीपलः ।

शक्तश्चेत् पालयाऽत्मानम् इत्युवाच दशाननः ॥३२॥

---

१. **'राममभ्यद्रवत् क्रुद्धो'** इति ब.गो ।

२. 'इतः पूर्वं पद्यमेकमधिकं क्वचित्– **'तत्र युद्धमभूत्–––**॥ इति श्लोकमुक्त्वा, **व्याचख्यौ च केवलं का.श्री'** इति ब.गो.सं.पुस्तकेऽस्ति । परन्तु मू.श्लो.पाठे पाठान्तरेष्वपि अयं श्लोकः स्फुटतोऽभिहितः । तथा च अन्यैः व्याख्याकारैः पद्यमिदं किमर्थं न स्वीकृतम्? इति चिन्त्यम् ।

Rarest Archiver

हे लक्ष्मण ! रणश्लाघी=युद्धकुशलः **त्वं विभीषणम् अपीपलः**=रक्षितवानभूः । 'पा=रक्षणे' लुङि मध्यमपुरुषैकवचनम् । 'पातेर्णौलुगागमः ण्यन्तत्वात् च्लेश्चङ्' । **चेत्**=यदि आत्मपालने **शक्तः=**समर्थः तर्हि **आत्मानं**=स्वं **पालय**=रक्ष **इत्युवाच दशाननः** ॥३२॥

मयाय ब्रह्मणा दत्तां मयेन पुनरात्मने ।

कालदण्डोपमां शक्तिं मुमोचास्मै स रावणः[1] ॥३३॥

[2]वचनानन्तरं किमकरोत्? इत्यत आह– **मयायेति** । **ब्रह्मणा=**चतुर्मुखेन मयाय दत्तां **मयेन पुनः**=अनन्तरं **आत्मने=**स्वस्मै 'मण्डोदरीविवाहकाले' **दत्तां कालदण्डोपमां**=यमदण्ड-तुल्यां **शक्तिं तस्मै**=लक्ष्मणाय **स रावणः मुमोच** ॥३३॥

अथाष्टघण्टारणिता[3] ज्वलन्ती शक्तिरम्बरे ।

लक्ष्मणस्य क्षणाद् वक्षो दारयामास दारुणा ॥३४॥

अथ=शक्तिमोचनानन्तरं **अष्टघण्टारणिता**=अष्टभिर्घण्टाभिर्ध्वनिं कुर्वन्ती **अम्बरे ज्वलन्ती** =प्रकाशमाना **दारुणा**=क्रूरा **शक्तिः क्षणात्**=क्षणमात्रात् **लक्ष्मणस्य वक्षः**=उरः **दारयामास =**बिभेद । 'दॄ=विदारणे' णिजन्तात् लिट् ॥३४॥

पतितं लक्ष्मणं वीक्ष्य कुपितो वायुनन्दनः ।

विशालं शैलमादाय रक्षोवक्षस्यथाक्षिपत्[4] ॥३५॥

अथ=वक्षोविदारणानन्तरं **वायुनन्दनः=**हनूमान् **पतितं लक्ष्मणं वीक्ष्य, कुपितः सन् विशालं**=विस्तीर्णं **शैलं**=गिरिम् **आदाय रक्षोवक्षसि**=रावणस्य उरसि **आक्षिपत्**=अपातयत् ॥३५॥

गर्वी पर्वतपातेन व्यथां प्राप[5] गरीयसीम् ।

दशास्यो दशभिश्चाऽस्यैः शोणितं वमति स्म सः ॥३६॥

---

१. **'दशाननः'** इति मू.श्लो.पा ।

२. **'वचनानन्तरम्'** इत्यतः **'आत्मानम्'** इति पर्यन्तं वा.वे मातृकायां लुप्तः प्रमादितो वा स्यात् ।

३. **'घण्टाघटिता'** इति मू.श्लो.पा । प्र.व्या.च ।

४. **'वक्षस्यवाक्षिपत्'** इति प्र.व्या ।

५. **'व्यथां प्राप्यं'** इति मू.श्लो.पा । ब.गो च ।

Rarest Archiver

गर्वी=अहङ्कारवान् **सः=**रावणः **पर्वतपातेन गरीयसीम्**=अतिशयेन गुर्वीं **व्यथां=**दुःखं **प्राप=**ययौ । 'पीडा बाधा व्यथा दुःखम्'[1] इत्यमरः । **दशास्यः दशभिश्च**=दशभिरपि **आस्यैः =**मुखैः **शोणितं**=रक्तं **वमति स्म**=अवमत् । 'टुवम्=उद्गिरणे' लट् ॥३६॥

एतस्मिन्नन्तरे हन्त विसञ्ज्ञं[2] राघवानुजम् ।

पादारविन्दं देवस्य प्राणदेवात्मजोऽनयत् ॥३७॥

एतस्मिन्नन्तरे=रावणमूर्च्छाकाले **प्राणदेवात्मजः**=इन्द्रियस्वामिमुख्यप्राणसुतो हनूमान् **हन्त** =दयया **विसञ्ज्ञं**=बाह्यज्ञानरहितं **राघवानुजं**=लक्ष्मणं **देवस्य=**रामस्य **पादारविन्दं=** चरणकमलम् **अनयत्=**प्रापयामास ॥३७॥

सर्वशक्तिरिमां शक्तिम् उत्पाट्यानुजवक्षसः ।

औषधान्यानयेत्याशु हनूमन्तमबोधयत्[3] ॥३८॥

सर्वशक्तिः=सर्वसमर्थः रामः **अनुजवक्षसः**=लक्ष्मणवक्षःस्थलात् **इमां**=रावणेन क्षिप्तां **शक्तिम् उत्पाट्य=**उद्धृत्य हे हनूमन् ! **आशु**=शीघ्रम् **औषधानि**=सञ्जीवनादीनि लतारूपाणि **आनय=**याहि, **इति हनूमन्तम् अबोधयत्**=बोधयामास । 'बुध=अवगमने' लङ् ॥३८॥

पूर्ववत् पर्वतश्रेष्ठं सर्वौषधनिधिं[4] प्रभुः ।

आनिनाय महातेजा वायुजो वायुवेगवान् ॥३९॥

वायुवेगवान्=वायुवेगसदृशवेगवान्[5] **महातेजाः**=महाकान्तिः **प्रभुः=**समर्थः **वायुजः=** हनूमान् **पूर्ववत्=**नागपाशमोचनसमये यथा **सर्वौषधनिधिं**=सर्वौषधाश्रयं **पर्वतश्रेष्ठं**= गन्धमादनम् **आनिनाय=**लङ्कां प्रापयामास ॥३९॥

अप्यौषधानां गन्धेन सौमित्रिर्मित्रवर्धनः ।

अक्षतः प्रोत्थितो वीरः पूर्णानन्दमवन्दत ॥४०॥

---

१. अ.कोशे.१.का.नरकवर्गे.२५६.श्लोकः ।

२. **'निःसञ्ज्ञम्'** इति प्र.व्या । ब.गो च ।

३. **'अचोदयत्'** इति दू.कृ.श्री ।

४. **'सर्वौषधिनिधिम्'** इति वा.वे । प्र.व्या च ।

५. **'वायुगतिसदृशगतिमान्'** इति दू.कृ.श्री ।

Rarest Archiver

औषधानां=सञ्जीवन्यादीनां **गन्धेनापि**=गन्धमात्रेणैव **प्रोत्थितः**=प्रोद्बुद्धः **अक्षतः**=क्षत – रहितः **वीरः मित्रवर्धनः**=मित्राणां सन्तोषकरः **सौमित्रिः**=लक्ष्मणः **पूर्णानन्दं**=पूर्णसुखं रामम् **अवदन्त=**अनमत् ॥४०॥

श्यामलाङ्गं शबलयन् हसितेन सितत्विषा ।

प्रसन्नो मारुतिं प्रेक्ष्य परिरेभे परः पुमान् ॥४१॥

सितत्विषा=श्वेतकान्तिना **हसितेन**=हासेन स्वस्य **श्यामलाङ्गं**=श्यामलदेहं **शबलयन्=** मिश्रितं कुर्वन् । **परः पुमान्**=सर्वोत्तमः रामः **मारुतिं प्रेक्ष्य प्रसन्नः=**सन्तुष्टस्सन् **परिरेभे** =आलिलिङ्गे ॥४१॥

छिन्नप्ररोहिणश्चैव विशल्याः पूर्ववर्णिनः ।

औषधानां प्रभावेन सर्वेऽपि हरयोऽभवन्[१] ॥४२॥

सर्वेऽपि हरयः=सर्वे वानराः **औषधानां प्रभावेन**=सामर्थ्येन **छिन्नप्ररोहिणः**=छिन्नानाम् अवयवानां **प्ररोहः**=उत्पत्तिः **छिन्नप्ररोह** एषामस्तीति ते तथा **विशल्याः**=विगतशल्यादि– मन्तः **पूर्ववर्णिनः**=क्षतात्पूर्वमवस्थितवर्णयुक्ताः **अभवन् । 'निरुज'** इति पाठे=रोगरहिताः, व्यथारहिता इत्यर्थः ॥४२॥

राक्षसान् प्राक्षिपन्नब्धौ वानरेन्द्रा मृतान् मृतान् ।

रामाज्ञया मृतास्तेन[२] नाजीवन्नौषधैरपि ॥४३॥

ननु पर्वतानयनेन राक्षसानामपि जीवनं स्यादित्यत आह– **राक्षसा**निति । यतः **वानरेन्द्राः रामाज्ञया मृतान् मृतान् राक्षसान् अब्धौ=**समुद्रे **प्राक्षिपन्**=निक्षिप्तवन्तः **तेन=**कारणेन राक्षसाः **मृताः । औषधैरपि नाजीवन्**=जीवनं न प्रापुः । 'जीव=प्राणधारणे'लङ् ॥४३॥

लक्षार्धयोजनाध्वानं प्राक्षिपन्मारुतिस्ततः[३] ।

पर्वतं पूर्ववत् सोऽद्रिः निश्छेदाङ्कः [४]स्थितोऽभवत् ॥४४॥

---

१. **'निरुजोऽभवन्'** इति ब.गो.सं.पा ।

२. अ) **'ततस्त्वेते'** इति ब.गो । आ) **'ततस्तेत्र'** इति मू.श्लो.पा । इ) **'मृतास्त्वेते'** प्र.व्या ।

३. **'मारुतात्मजः'** इति प्र.व्या ।

४. **'स्थिरोऽभवत्'** इति मू.श्लो.पा । ब.गो च ।

Rarest Archiver

हनुमान् पर्वतं किं चकार? इत्यत आह– **लक्षेति । मारुतिः**=हनूमान् **ततः** लङ्कास्थलात् लक्षस्य अर्धं लक्षार्धं, लक्षार्धं योजनानि लक्षार्धयोजनानि तेषां **अध्वा**=मार्गो यस्य तं **लक्षार्धयोजनाध्वानं** यद्वा लक्षार्धयोजनपरिमितः अध्वा यस्य तमिति वा । लक्षार्धं योजनानि यस्याध्वनः सलक्षार्धयोजनः, लक्षार्धयोजनोऽध्वा यस्य सः तमिति वा । **पर्वतं**=गन्धमादनं **प्राक्षिपत्**=प्रक्षिप्तवान् । **सोऽद्रिः**=स गन्धमादनः **पूर्ववत्**=पूर्वमिव छेदस्य **अङ्कः**=चिह्नं, निर्गतः छेदाङ्को यस्मात्सः **निश्छेदाङ्कः**=पूर्वमनुत्पाटित इव **स्थितः** =अवस्थितः **अभूत्** ॥४४॥

अथाभिनन्द्य स्वचमूं चक्रे रामो धनुर्ध्वनिम् ।

युद्धनाट्यप्रसङ्गाय पूर्वरङ्गमिवाग्रतः ॥४५॥

अथ=सर्ववानरोज्जीवनान्तरम्, अद्रिप्रक्षेपानन्तरं वा **रामः स्वचमूं**=स्वसेनाम् **अभिनन्द्य** =सन्तोषयित्वा **युद्धनाट्यप्रसङ्गाय**=युद्धाख्यताण्डवं कर्तुम् **अग्रतः**=प्रथमं **पूर्वरङ्गमिव**= पूर्वरङ्गं यथा तथा **धनुर्ध्वनिं चक्रे** । 'दशमुखवदनाख्यपूर्वरङ्गम्'[1] इति अरण्यकाण्ड–श्लोकव्याख्यावसरे 'पूर्वरङ्ग'शब्दो व्याख्यातः तत्रैव द्रष्टव्यः' ॥४५॥

विमाने भासमानः स सहमानो[2] दशाननः ।

मण्डलीकृतकोदण्डः पुण्डरीकाक्षमभ्ययात् ॥४६॥

तदा रावणः किमकरोद्? इत्यत आह– **विमान** इति । **विमाने**=पुष्पके **भासमानः**= दीप्यमानः **मानेन**=अभिमानेन सह वर्तत इति **सहमानः**, 'सह' इत्यव्ययस्य सादेशा–भावपक्षे इदं रूपम् । शत्रोः आयुधादिकं सहमान इति वा । **सः दशाननः मण्डलीकृत –कोदण्डः**=मण्डलाकारतया कृतचापः सन् **पुण्डरीकाक्षं**=रामम् **अभ्ययात्**=प्राप ॥४६॥

शम्भुशर्वौ पुरस्कृत्य पुरन्दरपुरःसराः ।

देवोपदेवमुनयो युद्धं द्रष्टुं वियद् ययुः ॥४७॥

पुरन्दरपुरःसराः=इन्द्रपुरोगाः **देवोपदेवाः**=देवा,गन्धर्वाश्च **मुनयश्च शम्भुशर्वौ**=अज,शिवौ **पुरस्कृत्य**=अग्रतः कृत्वा **युद्धं द्रष्टुं वियद्**=आकाशं **ययुः**=प्रापुः ॥४७॥

---

१. श्रीसं.रा.अ.का.१.सर्गे.४५.श्लोकः ।

२. **'स महामानो'** इति मू.श्लो.पा । ब.गो च ।

Rarest Archiver

नास्मन्नाथः क्षितौ तिष्ठेद् राक्षसेऽस्मिन् विमानगे ।

इति मत्वा महेन्द्रोऽस्मै निजं रथमयापयत् ॥४८॥

महेन्द्रः=देवेन्द्रः **अस्मिन् राक्षसे** रावणे **विमानगे**=पुष्पगस्थे सति **अस्मन्नाथः**=अस्मत् –स्वामी रामः **क्षितौ**=भूमौ **न तिष्ठेत्**=न वसेत् **इति मत्वा**=ज्ञात्वा, अस्मै रामाय **निजं**= स्वकीयं **रथमयापयत्**= प्रापयामास । 'या=प्रापणे' णिजन्तात् लङ् ॥४८॥

[१]अवतीर्य रथं दिव्यं प्राञ्जलिः [२]स्माऽह मातलिः ।

विजयस्व जगन्नाथ रथेऽस्मिन् विहरन्निति ॥४९॥

मातलिः=इन्द्रसारथिः **दिव्यम्**=अलौकिकं **रथम् अवतीर्य**=भूमिं प्रापयित्वा **प्राञ्जलिः सन् हे जगन्नथ**=राम ! **अस्मिन् रथे विहरन्**=क्रीडमानः त्वं **विजयस्व**=शत्रुपराभवं कुरु ।'जि=जये'लोट् ।'*विपराभ्यां जेः*'[३] इत्यात्मनेपदम् । इति **आह स्म**=अब्रवीत् ॥४९

रथोदयाद्रिमारूढो रेजे रामसहस्रगुः ।

विश्वग्रासिदशग्रीवध्वान्तविध्वंसदीक्षितः ॥५०॥

विश्वग्रासिदशग्रीवध्वान्तविध्वंसदीक्षितः=लोकव्यापितिमिरनाशे कृतसंकल्पः **सहस्रंगावः** =किरणाः यस्य सः **सहस्रगुः**=सूर्यः '*गोस्त्रियोरुपसर्जनस्य*'[४] इति गोशब्दस्य ह्रस्वे कार्ये '*एच इग्घ्रस्वादेशे*'[५] इति ओकारस्य उकारः । **उदयाद्रिं**=उदयपर्वतम् **आरूढः**= प्राप्तः यथा राजते तथा **विश्वग्रासिदशग्रीवध्वान्तविध्वंसदीक्षितः**=लोकनाशकरावणाख्य – गाढान्धकारनिरसने कृतसंकल्पः **रामसहस्रगुः**=रामनामकसूर्यः **रथोदयाद्रिं**=रथाख्योदय – पर्वतम् **आरूढः**=प्राप्तः सन् **रेजे**=दीप्तो बभूव ॥५०॥

बाणान् बहून् बहुविधान् उल्बणान् निशितान् दृढान् ।

स्वर्णपुङ्खान् स्फुरत्पक्षान् प्रास्यद्रामाय रावणः ॥५१॥

---

१. **'अवतार्य'** इति प्र.व्या । ब.गो च ।
२. **'प्राह'** इति मू.श्लो.पा । ब.गो.सं.पा ।
३. अष्टाध्यायी १।३।१९ पा.सूत्रम् ।
४. अष्टाध्यायी १।२।४८ पा.सूत्रम् ।
५. अष्टाध्यायी १।१।४८ पा.सूत्रम् ।

Rarest Archiver

रावणः रामाय स्फुरत्पक्षान्=प्रकाशमानगृध्रबर्हयुक्तान् **स्वर्णपुङ्खान्** सुवर्णयुक्तादि–भागवतः **दृढान्=**इतरैरच्छेद्यान् **निशितान्=**शाणोल्लीढान् अत एव **उल्बणान्=**क्रूरान् **बहुविधान्**=बहुप्रकारोपेतान् **बहून्**=बहुसंख्याकान् **बाणान्=**शरान् **प्रास्यत्=**चिक्षेप । 'असु=क्षेपणे' लङ् ॥५१॥

ताननन्तोऽन्तरेणैव भल्लैश्चिच्छेद राघवः ।

मुमोच च स्वयं बाणान् प्रहसन्नेव[1] लीलया ॥५२॥

अनन्तः=नाशरहितः **राघवः**=रामः **तान्=**रावणमुक्तान् **बाणान् अन्तरेणैव**=मार्गमध्य एव **भल्लैः**=अर्धचन्द्राकारैः बाणैः **चिच्छेद** । **स्वयं च=**स्वयमपि **प्रहसन्नेव**=मन्दहासं कुर्वन्नेव **लीलया=**क्रीडया, अनायासेनेति यावत् । **बाणान् मुमोच** ॥५२॥

मण्डलानि विचित्राणि दक्षिणानीतराणि च ।

चरन्तौ चक्रतुश्चित्रं युद्धं तौ विश्वविस्मयम् ॥५३॥

विचित्राणि=आश्चर्यकराणि **दक्षिणानि**=प्रदक्षिणाकाराणि **इतराणि च**=सव्यान्यपि **मण्डला–नि=**वर्तुलाकाराणि **चरन्तौ**=मण्डलाकारतया गच्छन्तौ **तौ** रामरावणौ **चित्रं=**बहुप्रकारं **विश्वविस्मयं=**लोकाश्चर्यकरं **युद्धं चक्रतुः**=अकुरुताम् ॥५३॥

दिशो दश शरैः शूरौ छादयामासतुः क्षणात् ।

अन्धकारेण सान्द्रेण विश्वमन्धमभूत् तदा ॥५४॥

शूरौ=प्राणत्यागभयरहितौ रामरावणौ यदा **शरैः**=बाणैः **दश दिशः** कर्म **क्षणात्=**क्षण–मात्रादेव **छादयामासतुः=**आच्छादितवन्तौ, **तदा सान्द्रेण**=निबिडेन **अन्धकारेण विश्वं=** जगत् **अन्धम्**=अन्धीभूतम् **अभूत्**=बभूव ॥५४॥

वानरा राक्षसाश्चेमे विस्मयोत्फुल्ललोचनाः ।

तस्थुर्विहाय सङ्ग्रामं सङ्ग्रामं वीक्ष्य तं तयोः[2] ॥५५॥

---

१. **'बहूनेव च लीलया'** इति मू.श्लो.पा ।
२. **'वीक्षितुं तयोः'** इति मू.श्लो.पा । प्र.व्या च ।

Rarest Archiver

इमे प्रसिद्धाः रामसम्बन्धिनो **वानराः**, रावणसम्बन्धिनो **राक्षसाश्च तयोः**=रामरावणयोः **तं** =प्रसिद्धम्, आश्चर्यकरं वा **सङ्ग्रामं**=युद्धं **वीक्ष्य**=दृष्ट्वा, स्वयं परस्परं **सङ्ग्रामं विहाय** =त्यक्त्वा **विस्मयोत्फुल्ललोचनाः**=आश्चर्येण विकासितनयनाः[१] सन्तः **तस्थुः**=तूष्णीम् अतिष्ठन् ॥५५॥

किञ्चित् प्रहृष्टं वित्रस्तं किञ्चित् किञ्चित् समाकुलम् ।

विचित्ररूपं त्रैलोक्यं विस्मितं समभूत् तदा ॥५६॥

किञ्चिद् ईषत् **प्रहृष्टं**=सन्तुष्टं, **किञ्चित् वित्रस्तं**=भीतं, **किञ्चित् समाकुलं**=व्याकुलं, **विचित्ररूपं**=नानारूपं **त्रैलोक्यं**=लोकत्रयं **तदा**=तयोर्युद्धसमये **विस्मितम्**=आश्चर्ययुक्तं **समभूत्**=जातम् ॥५६॥

नाराचमालाममुचद् रावणो राममूर्धनि ।

सा नीलोत्पलमालेव न रामस्य व्यथां व्यधात् ॥५७॥

रावणः राममूर्धनि=रामशिरसि **नाराचमालां**=नाराचनामकशरपङ्क्तिम् **अमुञ्चत्**=मुमोच । सा **नाराचमाला नीलोत्पलमालेव**=नीलोत्पलाख्यपुष्पपङ्क्तिरिव **रामस्य व्यथां**=दुःखं **न व्यधात्**=नाकरोत् ॥५७॥

ललाटं पाटयामास पाटवत् कैटभार्दनः ।

शरैर्निशाचरेशस्य चुक्षोभ स[२] **दशाननः ॥५८॥**

कैटभार्दनः=कैटभाख्यासुरनाशको रामः **पाटवात्**=पटुत्वात् **निशाचरेशस्य**=रावणस्य **ललाटं**=फालं **शरैः पाटयामास**=विददार । **स दशाननः चुक्षोभ**=चकम्पे ॥५८॥

ससर्ज विविधान् बाणान् आसुरास्त्रेण रावणः ।

सिंहव्याघ्रादिकमुखान् पक्षिसर्पाननानपि ॥५९॥

रावणः आसुरास्त्रेण=असुरदेवताकास्त्रेण **सिंहव्याघ्रादिकमुखान्**=सिंह,व्यघ्रादिमुख–सदृशमुखान् **पक्षिसर्पाननानपि**=पक्षि,सर्पमुखसदृशमुखानपि **विविधान्**=नानाप्रकारान् **बाणान् ससर्ज**=निर्मितवान्, मुमोच इति वा ॥५९॥

---

१. **'विकसितवदनाः सन्तः'** इति वा.वे । लिपिकृत्प्रमादः स्यात् । २.**'निशाचरेन्द्रस्य चुक्षोभ च दशाननः'** इति प्र.व्या ।

Rarest Archive

राघवो रावणास्त्राणि [1]स्वमन्त्रास्त्रैर्न्यवारयत् ।

[2]याम्याग्नेयादिनामानि वह्न्याद्यैः साधितत्वतः ॥६०॥

राघवः=रामः **रावणास्त्राणि**=रावणेन मुक्तास्त्राणि **स्वमन्त्रास्त्रैः**=राममन्त्रास्त्रैः **न्यवारयत् ।** वह्न्याद्यानां=वह्निप्रभृतिदेवानां **साधितत्वतः**=स्वाधीनत्वात् । यद्वा वह्न्याद्यस्त्राणां साधित–त्वतः अभ्यस्तत्वात्, **याम्याग्नेयादिनामानि**=यमदेवताकाग्निदेवताकादिनामानि अस्त्राणि **वह्न्याद्यैः** अस्त्रैः **न्यवारयत्**=निवारयामास ॥६०॥

ब्रह्मेन्द्रपशुपत्याद्या देवा यस्य प्रसादतः ।

सत्ताशक्त्यादिमन्तः स्युः तस्य का परतन्त्रता ॥६१॥

'ननु ब्रह्माद्यस्त्रविमोचनेन रामस्य ब्रह्माद्यधीनत्वं स्यात्'? इत्यत आह– **ब्रह्मे**ति । **ब्रह्मा**=चतुर्मुखः **इन्द्रः** प्रसिद्धः **पशुपतिः**=रुद्रः **ब्रह्मेन्द्रपशुपत्याद्याः देवाः यस्य** रामस्य **प्रसादतः**=अनुग्रहात् **सत्ताशक्त्यादिमन्तः**=स्वरूपस्थिति–सामर्थ्य–प्रवृत्ति–प्रतीतियुक्ताः **स्युः** =भवेयुः । **तस्य** रामस्य **परतन्त्रता**=ब्रह्माद्यधीनता **का**?=न कोऽपीत्यर्थः ॥६१॥

आग्नेयास्त्रेण भगवान् ससर्जाग्निमुखान् शरान् ।

विद्युन्मुखांश्च सूर्यास्त्रैः तैस्तस्यास्त्रमनीनशत्[3] ॥६२॥

भगवान्=रामः **आग्नेयास्त्रेण**=अग्निदेवताकास्त्रेण **अग्निमुखान्**=अग्निमुखसदृशमुखोपे–तान् **विद्यन्मुखांश्च**=विद्युत्सदृशमुखानपि **शरान् ससर्ज**=निर्मितवान् । **तैः** अग्निमुखाद्यैः **सूर्यास्त्रैश्च तस्य** रावणस्य **अस्त्रम् अनीनशत्**=नाशयामास । 'नश=अदर्शने' णिजन्तात् लुङ् ॥६२॥

दैवगान्धर्वपूर्वाणि मुक्तान्यस्त्राणि वैरिणा ।

दैवगान्धर्वपूर्वैः स नाशयामास केशवः ॥६३॥

[4]कश्च ईशश्च **केशौ**=ब्रह्मरुद्रौ, तौ **वर्तयति**=प्रवर्तयतीति **केशवः**=ब्रह्मरुद्रादिनियामकः **सः**=रामः **वैरिणा** रावणेन **मुक्तानि**=त्यक्तानि देवानामिदं **दैवं,** गन्धर्वाणामिदं **गान्धर्वम् ।** **दैवगान्धर्वपूर्वाणि**=दैवगान्धर्वप्रभृतीनि **अस्त्राणि दैवगान्धर्वपूर्वैः**=अस्त्रैः **नाशयामास** ॥६३

---

१. **'स्वतन्त्रास्त्रैः'** इति ब.गो । २. **'यान्याग्नेयादिनामानि'** इति ब.गो ।
३. **'सूर्यास्यांस्तैस्तस्यास्त्राण्यनीनशत्'** इति प्र.व्या । ब.गो च । ४. श्लोकस्यार्थः लुप्तः प्रमादितो वा स्यात् । दू.कृ.श्री ।

Rarest Archiver

रावणोऽथास्त्रवीर्येण नागांश्चक्रे विषोल्बणान्[१] ।

सुपर्णैः स्वशरोद्भूतैः तान् जघान जगद्गुरुः ॥६४॥

अथ=अनन्तरं **रावणः अस्त्रवीर्येण**=मन्त्रसामर्थ्येन **विषोल्बणान्**=गरलेन क्रूरान्[२] **नागान्**=सर्पान् **चक्रे**=ससर्ज । **जगद्गुरुः**=रामः **स्वशरोद्भूतैः**=स्वशरेणोत्पन्नैः **सुपर्णैः**=गरुडैः **तान्** नागन् **जघान**=नाशयामास ॥६४॥

यत् परैर्दुष्करं[३] लोके तच्चक्रे रावणो युधि ।

यद्यच्चक्रे दशास्योऽयं तत्तत् प्रत्याहरत् प्रभुः[४] ॥६५॥

रावणः **परैः**=अन्यैः **दुष्करं** कर्तुमशक्यं **यत्** कर्म **तत् युधि चक्रे** । **प्रभुः**=समर्थः रामः **अयं**=दशास्यः **यद्यत् चक्रे तत्तत् प्रत्याहरत्**=नाशयामास ॥६५॥

रामरावणयोर्युद्धं रामरावणयोरिव ।

गगनं गगनाकारं सागरं सागरोपमम्[५] ॥६६॥

'दृष्टान्तोक्तिपूर्वकं रामरावणयुद्धस्य स्वयमेव दृष्टान्त' इत्याह– **रामे**ति । यथा **गगनम्**=आकाशं **गगनाकारम्**=आकाशसदृशं, [६]सागराणां=समुद्राणां समाहारः **सागरं**=सागर समूहः **सागरोपमं**=समुद्रसमूहसदृशं तथा **रामरावणयोः युद्धं रामरावणयोरिव**=रामरावण युद्धमिव, न तु अन्येषां युद्धं तत्सदृशमित्यर्थः ॥६६॥

रथं सारथिमप्यश्वान्[७] ध्वजं च निशितैः शरैः ।

रावणस्ताडयामास रामस्य प्रणदन् मुहुः ॥६७॥

प्रणदन्=सिंहनादं कुर्वन् **रावणः रामस्य रथं सारथिम् अश्वानपि ध्वजं च**=ध्वजमपि **निशितैः**=शाणोल्लीढैः **शरैः मुहुः**=पुनः **ताडयामास** ॥६७॥

---

१. **'विषोद्धणान्'** इति ब.गो । २. **'क्रूरान्'** इत्येव वा.वे ।

३. **'परैः दुष्कृतम्'** इति प्र.व्या । ४. अ) **'प्रत्यहनत् प्रभुः'** इति प्र.व्या । आ) **'प्रत्यहनद् विभुः'** इति च श्रीविश्व.ती ।

५. **'सागरः सागरोपमः'** इति मू.श्लो.पा ।

६. अ) **'सागरणाम्'** इत्यतः **'सागरम्'** इति पर्यन्तं दू.कृ.श्री मातृकायां लुप्तः, प्रमादितो वा स्यात् ।

आ) **'सागराणां समाहारः सागरम् । काकानां समूहः काकमित्यादिवदयं शब्दः'** इति श्रीवि.भू.टी ।

७. **'सारथिमश्वादीन्'** इति मू.श्लो.पा ।

Rarest Archiver

कोपं प्रकाशयामास[१] भगवांल्लोकभीषणम् ।

पूर्णानन्दे मुकुन्देऽस्मिन् कुतः कोपस्तमोभवः ॥६८॥

भगवान्=रामः **लोकभीषणं**=जनभयङ्करं **कोपं**=रक्तनेत्रत्वभ्रकुटीकरणादि कोपचिह्नं **प्रकाशयामास**=प्रकटयामास । मुख्य एव **कोपः** किं न स्यादित्यत आह– **पूर्णे**ति । **पूर्णानन्दे**=पूर्णसुखे **मुकुन्दे**=मोक्षप्रदे **अस्मिन्** रामे **तमोभवः**=तमोगुणजन्यः **कोपः कुतः**= कस्माद्धेतोः स्यात् ? न कुतोऽपीत्यर्थः ॥६८॥

[२]भ्रुकुटीमल्ललाटेन सर्वशोणेक्षणेन च ।

भ्रूभ्यां च भावगर्भाभ्यां रामोऽभूत् सर्वभीषणः[३] ॥६९॥

तदेव विवृणोति– **भ्रुकुटीमदि**ति । **रामः भ्रुकुटीमल्ललाटेन=**भ्रूवेष्टनयुक्तफालेन **सर्व–शोणेक्षणेन च=**सर्वरक्तनेत्रेणापि **भावगर्भाभ्याम्**=अभिप्रायगर्भाभ्यां **भ्रूभ्यां च**=भ्रूचलने –नापि[४] **सर्वभीषणः**=सर्वभयङ्करोऽभूत् ॥६९॥

संरम्भं तं भगवतो वीक्षमाणो भयाकुलः[५] ।

न्यस्तमापद्धनमिव शूलमादत्त रावणः ॥७०॥

भगवतः=रामस्य **तं**=पूर्वोक्तं **संरम्भं**=कोपचिह्नं **वीक्षमाणः**=पश्यन् **भयाकुलः=**भीति–युक्तो रावणः **आपद्धनमिव**=आपत्काले उपकुर्वद्धनं यथा तथा **न्यस्तं**=रक्षितं **शूलम्**=त्रिशूलम् **आदत्त**=जग्राह ॥७०॥

जाज्वल्यमानं तच्छूलं युगान्तानलभीषणम् ।

चिक्षेप घण्टाघटितं क्षिप्रं रामाय रावणः ॥७१॥

रावणः घण्टाघटितं=घण्टाभिर्युक्तं **युगान्तानलभीषणं**=प्रलयाग्निरिव भयङ्करं **जाज्वल्य–मानं**=पुनः पुनः अतिशयेन ज्वलत् **तत्** गृहीतं **शूलं** क्षिप्रं **रामाय चिक्षेप**=निरास ॥७१॥

---

१. **'प्रकटयामास'** इति ब.गो ।
२. **'भृकुटीमल्ललाटेन'** इति वा.वे । प्र.व्या च ।
३. **'सर्वदुःसहः'** इति मू.श्लो.पा । ब.गो च ।
४. **'भ्रूभ्यामपि'** इति दू.कृ.श्री ।
५. **'भयातुरः'** इति मू.श्लो.पा ।

Rarest Archiver

सर्वशक्तिस्ततः शक्त्या तस्य शूलमशातयत् ।

बिभेद चोल्बणैर्बाणैः ऊरू वक्षश्च रक्षसः ॥७२॥

ततः=शूलप्रक्षेपानन्तरं **सर्वशक्तिः**=सर्वसमर्थः रामः **शक्त्या**=शक्त्याख्यायुधेन **तस्य**= रावणस्य **शूलम् अशातयत्**=अच्छिनत् ।'शद्लृ=शातने' णिजन्तात् लङ् । **उल्बणैः**=क्रूरैः **बाणैः**=शरैः **रक्षसः**=रावणस्य **'ऊरू'** इति द्वितीया द्विवचनम् । **ऊरू**=सक्थिनी **वक्षश्च**=उरश्च[१] **बिभेद** =विददार ॥७२॥

विकिरन्तं बहून् बाणान् विकिरन्नेव सायकान् ।

मेघगम्भीरया वाचा रामो रावणमब्रवीत् ॥७३॥

बहून् सायकान् विकिरन्नेव=प्रक्षिपन्नेव **रामः बहून् बाणान् विकिरन्तं**=प्रक्षिपन्तं **रावणं मेघगम्भीरया**=मेघध्वनिवत् मनोहरया **वाचा अब्रवीत्** ॥७३॥

सुतो विश्रवसः शूरः त्वं हि वैश्रवणानुजः ।

जितवान् किल दिक्चक्रं भवान् निजभुजौजसा ॥७४॥

हे रावण ! **त्वं विश्रवसः** मुनेः **सुतः** असि, **शूरः** असि, **वैश्रवणानुजः**=कुबेरानुजः असि, **हि**=प्रसिद्धमेतत् । **भवान् निजभुजौजसा**=स्वभुजसामर्थ्येन **दिक्चक्रं**=दिक् समूहं **जितवान् किल**=पराभूतं कृतवान् इति 'लोकवार्ता' ॥७४॥

नटवत् कपटीभूतान् नाटयस्यङ्ग तान्[२] गुणान् ।

निसर्गनीचस्त्वमिति स्त्रीचौर्येणावगम्यते[३] ॥७५॥

हे अङ्ग=प्रीतिविषय ! 'इति अपहासः' हे रावण ! **त्वं नटवत्**=नृत्तं कुर्वाण इव **कपटी भूतान्**=कपटत्वं प्राप्तान् **तान्** शूरत्वदिक्चक्रजयित्वादीन् **गुणान् नाटयसि**=अनुकरोषि । 'वस्तुतः ते गुणाः न सन्तीति भावः' । **त्वं निसर्गनीचः**=स्वभावेन अधम **इति स्त्री–चौर्येण**=सीतापहारेण **अवगम्यते**=ज्ञायते ॥७५॥

---

१. **'ऊरू**=सक्थितो **वक्षश्च बिभेद'** । इति ब.गो । वा.वे मातृकायां लुप्तः ।

२. **'नाटयन् स्वगतान् गुणान्'** इति ब.गो ।

३. **'अतिगम्यते'** इति मू.श्लो.पा ।

Rarest Archiver

ब्रह्महत्या गुरुद्रोहो देवतानां[१] च हेळनम् ।

इत्यादयोऽपराधास्ते स्त्रीचौर्येण नवीकृताः ॥७६॥

ब्रह्महत्या=ब्राह्मणहननं **गुरुद्रोहः**=गुर्वपराधः **देवतानां**=इन्द्रादिदेवानां **हेळनं च =** अवमानोऽपि **इत्यादयः**=एवमादयः **ते**=तव **अपराधाः** पूर्वं जीर्णतया स्थिताः इदानीं **स्त्रीचौर्येण नवीकृताः**=नूतनत्वं प्राप्ताः ॥७६॥

दारयिष्यामि हृदयं दारुणं तव रावण ।

साधूनां धर्ममार्गस्य कवाटमिव रोधकम् ॥७७॥

हे रावण ! साधूनां=निर्दुष्टानां सज्जनानां **धर्ममार्गस्य**=धर्माध्वनः **कवाटमिव=**मार्गस्य कवाटं यथा **रोधकम्**=आवरकं, प्रतिबन्धकमिति यावत् । तथा **धर्ममार्गस्य रोधकं**= प्रतिबन्धकं **दारुणं**=क्रूरं **तव हृदयं**=वक्षः **दारयिष्यामि=**भेत्स्यामि ।'दॄ=विदारणे'लृट् ॥७७॥

मुनिमांसेन पुष्टस्य तव मांसेन दुर्मते ।

कङ्कान् सन्तर्पयिष्यामि पश्य सीतापतेर्बलम् ॥७८॥

हे दुर्मते=दुष्टबुद्धे रावण ! **मुनिमांसेन**=मुनीनामामिषेण **पुष्टस्य**=अभिवृद्धस्य **तव मांसेन=**आमिषेण **कङ्कान्=**श्वेतगृध्रान् **सन्तर्पयिष्यामि**=प्रीणयिष्यामि । **सीतापतेः** मम **बलं** =सामर्थ्यं **पश्य=**अवलोकय ॥७८॥

इत्युदाहृत्य भगवान् शरैरशनिसन्निभैः ।

राघवो रावणस्याङ्गं बिभेद गिरिसन्निभम् ॥७९॥

भगवन् राघवः इति=पूर्वोक्तप्रकारेण **उदाहृत्य=**उक्त्वा **अशनिसन्निभैः**=वज्रसदृशैः **शरैः गिरिसन्निभं**=गिरितुल्यं **रावणस्याङ्गं**=शरीरं **बिभेद=**विददार ॥७९॥

रामबाणैर्विभिन्नाङ्गो रावणो विश्वरावणः[२] ।

स्रस्तगात्रो विवृत्ताक्षो मुहूर्तं मूर्छितोऽपतत् ॥८०॥

---

१. **'दैवतानाम्'** इति प्र.व्या ।

२. **'लोकरावणः'** इति प्र.व्या ।

Rarest Archiver

रामबाणैः विभिन्नाङ्गः=दारितशरीरः **विश्वं**=जगत् **रावयति**=कूजयति इति **विश्वरावणः**[1]**=** दशाननः **स्रस्तगात्रः**=स्वेदयुक्तशरीरः **विवृत्ताक्षः**=विवृत्तनेत्रः **मूर्च्छितः सन् मुहुर्तं**=मुहूर्त –पर्यन्तम् **अपतत्**=विमान एव पपात ॥८०॥

अर्धप्रहर्षितसुराम्बुरुहस्तदानीम्

अर्धावमीलितसुरेतरकैरवोऽयम् ।

अर्धप्रभग्नदशवक्त्रतमाः स्वगोभिः

अर्धोदितो रविरिवाथ रराज रामः ॥८१॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे त्रयोदशः सर्गः ॥

स्वगोभिः=स्वकिरणैः **अर्धं** यथा तथा **प्रहर्षितानि**=विकसितानि **अम्बुरुहाणि**=कमलानि येन सः **अर्धप्रहर्षिताम्बुरुहः**, **अर्धं** यथा तथा **अवमीलितानि**=मुकुलितत्वं प्रापितानि **कैरवाणि**=उत्पलानि येन सः **अर्धावमीलितकैरवः**, **अर्धं** यथा तथा **प्रभग्नं**=नाशितं तमो येन सः **अर्धप्रभग्नतमाः**, **अर्धं** यथा तथा **उदितः**=उदयं प्राप्तः **रविरिव**=सूर्यो यथा तथा, **अथ**=रावणमूर्छानन्तरं **तदानीं=**तस्मिन् समये **स्वगोभिः**=स्वबाणैः **अर्धं** यथा तथा **प्रहर्षितानि**=सन्तोषं प्रापितानि **सुराम्बुरुहाणि**=देवाख्यकमलानि येन सः **अर्धप्रहर्षित–सुराम्बुरुहः**, **अर्धं** यथ तथा **अवमीलितानि**=दुःखं प्रापितानि **सुरेतरकैरवाणि**=असुराख्यो –त्पलानि येन सः **अर्धावमीलितसुरेतरकैरवः**, **अर्धं** यथा तथा **प्रभग्नं**=पराजयं प्रापितं **दशवक्त्राख्यं तमो** येन सः **अर्धप्रभग्नदशवक्त्रतमः अयं रामः रराज** ॥८१॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे त्रयोदशः सर्गः ॥

आरम्भतः श्लोकाः–६२६+८१=७०७

१. **'रौतीति रावणः=दशाननः'** इति दू.कृश्री ।

Rarest Archiver

Rarest Archiver

॥ अथ चतुर्दशः सर्गः ॥

Rarest Archiver

॥ अथ चतुर्दशः सर्गः ॥

विमानयानैर्विविधैर्द्विजैश्च[१] निमन्त्रितो मन्त्रविदां वरिष्ठः ।

व्योम्नोऽवतीर्योपगतो मुकुन्दम् उवाच वाचं मतिमानगस्त्यः ॥१॥

विमानान्येव यानानि=रथाः येषां ते विमानयानाः तैः **विमानयानैः=**देवैः, **विविधैः**=नाना प्रकारैः **द्विजैश्च=** ब्राह्मणैरपि **निमन्त्रितः**='गच्छ' इति प्रेरितः **मन्त्रविदां**=विचारं जानतां मध्ये **वरिष्टः**=अतिशयेन श्रेष्ठः **मतिमान्=**बुद्धिमान् **अगस्त्यः**=अगस्त्यमुनिः **व्योम्नः**= आकाशात् **अवतीर्य**=भूमिं प्राप्य, **मुकुन्दं=**रामम् **उपगतः**=प्राप्तः सन् **वाचमुवाच** ॥१॥

लीलाभिरेताभिरलं महेश क्षिप्रं क्षिपैनं जगदेकशत्रुम् ।

बिभेति लोको न विदन् भवन्तम् अपायदर्शी प्रणयो मृदूनाम्[३] ॥२॥

हे महेश=मुख्यस्वामिन् राम ! यस्मात् **भवन्तं**=त्वां **न विदन्** 'नसमासोऽयं'= अजानन् **लोकः**=जनः **अपायदर्शी**=अनिष्टं पश्यन् सन्[२] **बिभेति**=भयं प्राप्नोति । 'भी= भये' लट् । **मृदूनां=**ऋजूनां पुरुषाणां **प्रणयः**=स्नेहः त्वयि युक्तः, तस्माद् **एताभिः**= पूर्वोक्ताभिः **लीलाभिः**=क्रीडाभिः **अलम्** । **जगदेकशत्रुं**=लोकमुख्यवैरिणम् **एनं** रावणं **क्षिप्रं=**शीघ्रं **क्षिप**=जहि ॥२॥

मार्तण्डसन्मण्डलमध्यवृत्तं[४] नारायणं भक्तपरायणं त्वाम् ।

संसेव्य दिव्यस्तुतिभिर्जनोऽयं सर्वोऽपि सर्वं पुरुषार्थमेतु ॥३॥

अयं प्रत्यक्षप्रसिद्धः **सर्वोऽपि जनः मार्तण्डसन्मण्डलमध्यवृत्तं**=सूर्यमण्डलमध्यवर्तिनं **भक्तपरायणं**=भक्तानां मुख्याश्रयं **नारायणं** 'ध्येयः सदा सवितृमण्डलमध्यवर्ती'[५] इत्यादि–प्रमाणप्रतिपाद्यं **त्वां दिव्यस्तुतिभिः**=अलौकिकस्तोत्रैः **संसेव्य**=सम्यक् सेवां कृत्वा, **सर्वं=**सकलं **पुरुषार्थं**=मोक्षरूपफलम् **ऐतु=**प्राप्नोतु । 'इण्=गतौ' लोट् ॥३॥

---

१. **'विमानयानैर्विबुधैर्द्विजैश्च'** इति मू.श्लो.पा । ब.गो च । २. **'अनिष्टं कुर्वन् सन्'** इति वा.वे । ३. **'प्रणयेन दूनः'** इति –मू.श्लो.पा । ब.गो.सं.पा च । ४. **'–मध्यवृत्तिम्'** इति प्र.व्या । ५. अ) **'आदित्यहृदयस्तोत्रम्'** पु.सं–४११ ।
५. आ.) गायत्रीमन्त्रध्यानश्लोकोऽयं श्रीमदानन्दतीर्थभगवत्पादविरचिते **'सदाचारस्मृति'** नामके ग्रन्थे निरूपितः । तद्यथा–

'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुः धृतशङ्खचक्रः' ॥ स.स्मृ. ९ श्लोकः ।

Rarest Archive

इत्युक्त ईशो मुनिना नितान्तम् ओमित्युदाहृत्य चकर्ष चापम् ।

सम्प्राप्य संज्ञामनवाप्य भीतिं स रावणस्तावदवाप रामम् ॥४॥

मुनिना अगस्त्येन **इति**=पूर्वोक्तप्रकारेण **नितान्तम्**=अत्यन्तं यथा तथा **उक्तः**=कथितः **ईशो**=रामः **'ओम्' इति**=तथाऽस्तु इति **उदाहृत्य=**उक्त्वा यदा **चापं=**धनुः **चकर्ष=** आकृष्टवान् । 'कृष=विलेखने' लिट् । **तावत्**=तदैव **सः रावणः**=दशाननः **सञ्ज्ञां=** बाह्यज्ञानं **सम्प्राप्य भीतिं**=मरणभयम् **अनवाप्य राममवाप** ॥४॥

विज्ञाय वीर्यं रघुवंशकेतोः दृष्ट्वा निमित्तं मृतिसूचकं[1] च ।

चचाल चेतो न दशाननस्य न मानिनामापदि चापलं स्यात् ॥५॥

रघुवंशकेतोः=रघुकुलश्रेष्ठस्य रामस्य **वीर्यं=**पराक्रमं **विज्ञाय मृतिसूचकं=**मरणं भविष्यति इति ज्ञापकं, **निमित्तं च**=पूर्वोक्तदुर्निमित्तमपि **दृष्ट्वा**=अवलोक्य स्थितस्य तस्य **दशाननस्य चेतः=**मनः **न चचाल**=न चकम्पे । 'चल=सञ्चलने' लिट् । तथाहि – **मानिनां**=दुराग्रहवताम् **आपदि**=आपत्कालेऽपि **चापलं**=मनसश्च चलत्वञ्च **न स्यात्**=न भवेत् । अत एवोक्तं भारते– **'द्वावेतावतिमूर्खौ हि दुर्योधनदशाननौ ।**

गोग्रहं वनभङ्गं च दृष्ट्वा युद्धं प्रचक्रतुः'[2] ॥ इति ॥५॥

स्वपार्षदानां प्रवरेण तेन महर्षिशापाद् रिपुजन्मभाजा ।

प्रक्रीडितस्तत्र[3] दशाननेन चकार चित्रं रणमम्बुजाक्षः ॥६॥

महर्षिशापात्=सनकादीनां शापाद् **रिपुजन्मभाजा**=शत्रुजन्म प्राप्तवता **स्वपार्षदानां**=स्व–भृत्यानां मध्ये **प्रवरेण**=श्रेष्ठेन **तेन** जयाख्यद्वारपालकस्वरूपेण **दशाननेन तत्र** युद्धमण्डले **प्रक्रीडितः**=प्रकृष्टक्रीडावान् **अम्बुजाक्षः**=रामः **चित्रम्**=आश्चर्यकरं **रणं**=युद्धं **चकार** ॥६॥

उत्कार्मुकौ काञ्चनवर्मभाजौ तौ रेजतुः सन्ततबाणवर्षौ ।

व्यक्तेन्द्रचापावचिरांशुचारू संवर्तमेघाविव भूरिवर्षौ ॥७॥

---

१. **'मृतिसूचनं च'** इति मू.श्लो.पा ।

२. श्लोकोऽयं श्रीमन्महाभारतसम्बद्धः प्रसिद्धश्च ।

३. **'प्रक्रीडितस्तेन'** इति प्र.व्या ।

Rarest Archiver

उत्कार्मुकौ=उत्कृष्टचापवन्तौ **काञ्चनवर्मभाजौ=**सुवर्णमयकवचवन्तौ **सन्ततबाणवर्षौ=** निरन्तरं यथा तथा शरवृष्टिमन्तौ **तौ** रामरावणौ **व्यक्तेन्द्रचापौ**=अभिव्यक्तशक्रचापौ **अचिरांशुचारू**=अचिरांशुभिः तटिद्भिः मनोहरौ **भूरिवर्षौ**=बहलोदकवृष्टिमन्तौ **संवर्तमेघा–विव**=प्रलयकालमेघौ यथा तथा **रेजतुः**=दीप्तौ बभूवुतुः ॥७॥

ताभ्यां तदा राघवरावणाभ्यां[1] युद्धोद्धताभ्यामतिलोड्यमाना[2] ।

धरा ससप्ताब्धिधराधराऽपि वाताहता नौरिव चञ्चलाऽभूत् ॥८॥

तदा=युद्धसमये **युद्धोद्धताभ्यां=**युद्धकुशलाभ्यां **ताभ्यां** प्रसिद्धाभ्यां **राघवरावणाभ्याम् अतिलोड्यमाना=**अत्यन्तं पीड्यमाना **धरा**=भूमिः **सप्ताब्धिभिः**=सप्तसमुद्रैः **सप्तभिः धराधरैः**=पर्वतैश्च सह वर्तत इति **ससप्ताब्धिधराधराऽपि वाताहता**=वायुना पीडिता **नौरिव** =जलयानं यथा तथा **चञ्चला**=चपला **अभूत्** ॥८॥

प्रभाकरे निष्प्रभतां प्रयाते वातेऽप्यवाते सुरसिद्धसङ्घाः ।

प्रोचुः प्रभुं प्राञ्जलयः प्रसीद राम द्विषं संहर संहरेति ॥९॥

प्रभाकरे=सूर्ये **निष्प्रभतां**=कान्तिराहित्यं **प्रयाते=**प्राप्ते सति **वातेऽपि=**वायावपि **अवाते**= वीजनरहिते, गमनरहिते सतीति यावत् । **प्राञ्जलयः सुरसिद्धसङ्घाः**=सुरसिद्धसमूहाः **हे राम ! प्रसीद**=अस्माकं प्रसन्नो भव । **द्विषं**=अस्मच्छत्रुभूतं रावणं **संहर संहर=**शीघ्रं नाशय नाशय । **इति प्रभुं**=रामं **प्रोचुः** ॥९॥

दशाननस्याथ[3] शिरांसि शीघ्रं दश स्फुरत्कुण्डलमण्डितानि ।

चिच्छेद तुच्छेतरमौलिमन्ति तुल्यं क्षुरप्रेण रघुप्रवीरः ॥१०॥

अथ=सुरादिप्रार्थनानन्तरं **रघुप्रवीरः**=रामः **तुच्छेतरमौलिमन्ति**=महाकिरीटयुक्तानि **स्फुर–त्कुण्डलमण्डितानि**=देदीप्यमानकर्णाभरणैः अलङ्कृतानि **दशाननस्य दश शिरांसि क्षुरप्रेण** =बाणविशेषेण **तुल्यं**=युगपदेव शीघ्रं **चिच्छेद** ॥१०॥

---

१. **'रावणराघवाभ्याम्'** इति मू.श्लो.पा । प्र.व्या च ।

२. अ) **'अभिलोठ्यमाना'** इति ब.गो । आ) **'अतिलोड्यमाना'** इति मू.श्लो.पा ।

३. **'दशाननस्याशु'** इति मू.श्लो.पा ।

Rarest Archiver

अन्यानि दृष्ट्वा पुनरुद्गतानि शिरांसि देवो दशकन्धरस्य ।

जानन् विरिञ्चस्य वरं वरिष्ठम् आदत्त बाणं प्रहसन् महेशः[1] ॥११॥

देवः=रामः **पुनरुद्गतानि**=पुनरुत्पन्नानि **अन्यानि** छिन्नेभ्यो भिन्नानि[2] **दशकन्धरस्य**=रावणस्य **शिरांसि दृष्ट्वा=**अवलोक्य **विरिञ्चस्य**=चतुर्मुखस्य **वरं**=छिन्नानां पुनः प्ररोहरूपवरं **जानन्**=विद्वान् **महेशः**=रामः **प्रहसन्**=मन्दस्मितं कुर्वन् सन् **वरिष्टम्=**अतिशयेन **वरं बाणम् आदत्त**=जग्राह ॥११॥

तं वायुवाजं[3] रविवह्निधारम् आकाशमानस्वशरीरयष्टिम् ।

शरं महामेरुगुरुं स्वचापे सुवर्णपुङ्खं प्रतिसन्दधे सः ॥१२॥

बाणस्वरूपं वदन्नेव रामकृतव्यापारमाह– **तमिति । सः** रामः **वायुवाजं=**वायव्यात्मक–पक्षयुक्तं **रविवह्निधारं=**सूर्याग्न्यात्मकाग्रयुक्तम् **आकाशमानस्वशरीरयष्टिं**=आकाशाभिमानि देवतारूपं **स्वशरीरयष्टिं**=शरीराख्यदण्डयुक्तं **सुवर्णपुङ्खं**=सुवर्णयुक्तादिभागं **महामेरुगुरुं=**महामेरोरप्यधिकभारयुक्तं **तं** गृहीतं **शरं स्वचापे**=स्वधनुषि **प्रतिसन्दधे**=संयोजयामास॥१२

विदारणं दारुणदानवानाम् अदारणीयं कुलिशादिभिश्च ।

विराविणं भीमतरं नितान्तं स रावणायाथ मुमोच बाणम् ॥१३॥

अथ=बाणप्रतिसन्धानानन्तरं **सः** रामः **दारुणदानवानां**=क्रूरदैत्यानां **विदारणं=**भेदकं[4] **कुलिशादिभिश्च**=वज्रादिभिरपि **अदारणीयं=**दारयितुम् अशक्यं **विराविणं**=महाध्वनिसहितं **नितान्तम्**=अत्यन्तं यथा तथा **भीमतरम्**=अतिशयेन भयङ्करं **बाणं रावणाय मुमोच** ॥१३॥

श्रीरामनामाक्षरलक्षणोऽयं विलक्षणः[5] सर्वजगत्सु जिष्णुः ।

स मार्गणः श्रीरमणेन मुक्तो मुख्यः स्वयं भक्त इवाज्वलत् खे[6] ॥१४॥

---

१. **'प्रहसन् रमेशः'** इति वा.वे । प्र.व्या च ।
२. **'छिन्नेभ्यो भिन्नाभिन्नानि'** इति दू.कृ.श्री ।
३. **'वायुवाहम्'** इति मू.श्लो.पा । वा.वे च ।
४. **'भेदकम्'** इत्यतः **'विराविणं'** पर्यन्तं वा.वे मातृकायां लुप्तः, प्रमादितो वा स्यात् ।
५. **'विलक्षणम्'** इति मू.श्लो.पा ।
६. **'मुक्तः स्वयं भक्त इवोज्ज्वलन् खे'** इति मू.श्लो.पा ।

Rarest Archiver

श्रीरामनामाक्षरलक्षणः=श्रीरामनामज्ञापकरेखारूपचिह्नयुक्तः [१]**विलक्षणः**=इतरेभ्यो विलक्ष–णः **सर्वजगत्सु**=सर्वलोकेषु **जिष्णुः**=जयशीलः **श्रीरमणेन**=रामेण **मुक्तः**=त्यक्तः, **सः** अयं **मार्गणः**=बाणः **स्वयं**=साक्षात् **मुख्यः**=श्रेष्टः **भक्त इव**=भक्तो यथा तथा **खे**= आकाशे **अज्वलत्**=प्रजज्वाल ॥१४॥

विदारयामास स रावणोरो निपातयामास च पुष्पकात् तम् ।

व्यापादयामास च तं शराग्र्यः सम्पादयामास च विश्वमोदम्[२] **॥१५॥**

सः शराग्र्यः=शरश्रेष्ठः **रावणोरः**=रावणवक्षस्थलं **विदारयामास**=बिभेद । **तं** रावणं **पुष्प–काद्** विमानात् **निपातयामास**=भूमौ पातितवान् । 'पतलृ=गतौ' णिजन्तात् लिट् । **तं** रावणं **व्यापादयामास**=मृतकमकरोत् । 'पद=गतौ' णिजन्तात् लिट् । **विश्वमोदं च**= जगत्सन्तोषमपि **सम्पादयामास**=उत्पादयामास ॥१५॥

प्रशस्यमानः सकलैः सलोकैः विवेश भूमिं प्रदरो ह्रियेव ।

पत्युः पुनः पार्श्वमुपाजगाम साक्षादृजूनां ननु युक्तमेतत् ॥१६॥

सकलैश्च=समस्तैरपि **लोकैः**=जनैः **प्रशस्यमानः**=स्तूयमानः **ह्रियेव**='जगत्संहारकस्य मम रावणसंहारोऽल्प' इति लज्जयेव **भूमिं विवेश । पुनः**=भूमिप्रवेशानन्तरं **पत्युः**= स्वामिनःरामस्य **पार्श्वं**=समीपम् **उपाजगाम**=प्राप । **साक्षात्**=मुख्यतः **ऋजूनां**='मनोवाक्–कर्मसु एकप्रकाराणाम्' **एतत्** स्वामिप्रयोजनं कृत्वा, **पुनः** आगमनं **युक्तं ननु**=उपपन्नं खलु ॥१६॥

ते राक्षसा रावणभृत्यभूता हतावशिष्टाः पतिते दशास्ये ।

परादृवन् प्राणपरीप्सयाऽथ[३] **वृक्षे विपन्ने पतगा इव द्राक् ॥१७॥**

हतावशिष्टाः=मृतेभ्य उर्वरिताः **रावणभृत्यभूताः**=रावणभृत्यत्वं प्राप्ताः **ते राक्षसाः वृक्षे विपन्ने पतिते सति पतगा इव**=पक्षिणो यथा पलायन्ते तथा **दशास्ये पतिते सति अथ**= अनन्तरं **प्राणपरीप्सया**=जीवनेच्छया **द्राक्**=शीघ्रं **परादृवन्**=दुद्रुवुः ॥१७॥

---

१. **'विलक्षणः'** इत्यतः **'मुक्तः'** पर्यन्तं वा.वे मातृकायां लुप्तः, प्रमादितो वा स्यात् ।

२. अ) **'संविमोदम्'** इति प्र.व्या । आ) **'सद्विनोदम्'** ब.गो.सं.पा ।

३. **'प्राणरिरक्षयाऽथ'** इति प्र.व्या । ब.गो च ।

Rarest Archive

प्रक्षीणकर्माणमिवाथ पृथ्व्यां प्रेक्ष्याग्रजं निष्पतितं विमानात् ।

विभीषणोऽलं विललाप हा हा[१] रामागसस्तात मृतोऽसि हीति ॥१८॥

अथ=रावणमरणानन्तरं **विभीषणः** स्वर्गात् **पृथ्व्यां** पतितं **प्रक्षीणकर्माणमिव**=क्षीण–पुण्यपुरुषमिव स्थितं **विमानात्**=पुष्पकात् **पृथिव्यां निष्पतितम् अग्रजं**=रावणं **प्रेक्ष्य हे तात** ! अग्रज रावण ! त्वं **रामागसः**=रामविषयकापराधात्, रामं प्रति कृतादिति यावत् । **मृतोऽसि**=मरणं प्राप्तोऽसि **हि**=प्रसिद्धं **हा हा**=कष्टम् **इति अलम्**=अत्यन्तं **विललाप**= प्रलापम् अकरोत् ॥१८॥

धूलीविधूम्रं रुधिरौघसिक्तं वीरं विधात्राऽर्पितवीरशय्यम् ।

पतिं परेतं परिरभ्य दीना मयात्मजाद्या महिला विलेपुः ॥१९॥

दीनाः=दैन्योपेताः **मयात्मजाद्याः**=मण्डोदरीपूर्विकाः **महिलाः**=रावणस्त्रियः **धूलीविधूम्रं**= पांसुभिः धूम्रवर्णं **रुधिरौघसिक्तं**=रक्तसमूहेन स्नातं **विधात्रा**=ब्रह्मणा अर्पिता वीराणां शय्या यस्य तम् **अर्पितवीरशय्यं**=भूमौ पतितम् इत्यर्थः । **परेतं**=मृतं **पतिं**=रावणं **परिरभ्य**=आलिङ्ग्य **विलेपुः**=विलापं चक्रुः ॥१९॥

हा रामकान्तामपहृत्य कान्त विभीषणादीन् सुनयान् विधूय ।

दशामिमां प्राप्य गतोऽसि कुत्र नय प्रियास्मांश्च करवाम कृत्यम्[३] ॥२०॥

हे कान्त=हे पते ! त्वं **रामकान्तां**=सीताम् **अपहृत्य**=बलादाहृत्य **सुनयान्**=उत्तमनीति–युक्तान् **विभीषणादीन् विधूय**=निराकृत्य **इमां दशां**=मरणावस्थां **प्राप्य कुत्र गतोऽसि ! हे प्रिय !** पते **अस्मांश्च**=अस्मानपि **नय**=त्वत्समीपं प्रापय, वयं **कृत्यं**=त्वत्सेवां **करवाम**= कुर्याम । 'डुकृञ्=करणे' लोट् उत्तमपरुषे बहुवचनम् । **'प्रियास्मान् करवाम कृत्यम्'** इति पाठः । **'प्रियास्मांश्च करोमि कृत्यम्'** इति पाठे अहं करोमीति प्रत्येकमन्वयः ॥२०॥

एवं ब्रुवाणे बहुधा जने स्वे[४] विभीषणं तं भगवान् उवाच[५] ।

भ्रातुः परेतस्य कुरुष्व कृत्यं नारीः पुरीं प्रापय धार्मिकेति[६] ॥२१॥

---

१. **'विललाप हा त्वम्'** इति मू.श्लो.पा । २. **'रक्तसमूहेन सिक्तम्'** इति वा.वे । ३. अ) **'प्रियास्मान् करवाम कृत्यम्'** । आ) **'प्रियास्मांश्च करोमि कृत्यम्'** । इ) **'प्रियास्मांश्च नयाऽत्मपार्श्वम्'** इति च पाठान्तराणि ।
४. **'एवं विलापे बहु वर्तमाने'** इति मू.श्लो.पा । ५. **'भगवान् बभाषे'** इति । ६. **'पुरं प्रापय धाम चेति'** इति च प्र.व्या ।

Rarest Archiver

स्वे=विभीषणसम्बन्धिनि **जने**=स्त्रीजने **बहुधा**=बहुप्रकारेण **एवं**=पूर्वोक्तप्रकारेण **ब्रुवाणे** =वदति सति **भगवान्**=रामः **हे धार्मिक**=धर्ममार्गस्थित विभीषण ! **परेतस्य**=मृतस्य **भ्रातुः**=अग्रजस्य रावणस्य **कृत्यम्**=उत्तरक्रियां **कुरुष्व** । **नारीः**=स्त्रियः कर्म **पुरीं**=लङ्कां **प्रापय**=प्रवेशय **इति तं विभीषणम् उवाच** ॥२१॥

[1]दारापहाराद् भवतोऽद्य पापो भ्राता च नैवास्य करोमि कृत्यम् ।

एवं ब्रुवाणं तमुवाच देवो मदाज्ञया स्यादिति मन्दहासी ॥२२॥

हे राम ! यस्माद् **भ्राता**=रावणः **भवतः**=तव **दारापहारात्**=स्त्रीचौर्यात् **अद्य**=इदानीं **पापः**=पापिष्ठोऽभूत् । तस्माद् **अस्य** पापस्य रावणस्य **कृत्यम्**=उत्तरक्रियां **नैव करोमि**=न करोम्येव, **एवं ब्रुवाणं**=वदन्तं **तं** विभीषणं **मन्दहासी**=मन्दस्मितः **देवः**=रामः **मदाज्ञया**= मन्नियोगेन **स्यात्**=भवेत् **इति उवाच** ॥२२॥

दशाननस्य क्रतुभिः [2]समिद्धान् अग्नीन् पुरस्कृत्य पुरोहिताग्र्यैः[3] ।

विधाय संस्कारमथापराश्च क्रियाश्चकाराऽशु विभीषणोऽत्र ॥२३॥

विभीषणः दशाननस्य क्रतुभिः=यज्ञैः **समिद्धान्**=सम्यक् दीप्तान्[4] **अग्नीन्पुरोहिताग्र्यैः** =पुरोहितश्रेष्ठैः **पुरस्कृत्य**=पुरतःकृत्वा **संस्कारं**=देहसंस्कारं **विधाय**=कृत्वा, **अथ**=अन – न्तरम् **अत्र** लङ्कायाम् **अपराः**=देहसंस्कारातिरिक्ताः **क्रियाश्च**=कर्माण्यपि **आशु चकार** ॥२३॥

लोकैकशत्रौ निहते दशास्ये लोकैकनाथो द्रुहिणो हरश्च ।

महेन्द्रपूर्वैः सह लोकपालैः लोकेशचूडामणिमाप्य नेमुः ॥२४॥

लोकैकशत्रौ=लोकस्य मुख्यवैरिणि **दशास्ये**=रावणे **निहते सति लोकैकनाथः**=लोक– मुख्यस्वामी **द्रुहिणः**=ब्रह्मा **हरः**=रुद्रः **च महेन्द्रपूर्वैः**=इन्द्रादिभिः **लोकपालैः सह**= साकं **लोकेशचूडामणिं**=जगत्स्वामिश्रेष्ठं रामम् **आप्य द्रुहिणा**दयो **नेमुः**=ववन्दिरे ॥२४॥

पद्मापतिं पद्मभवोऽथ देवो बद्धाञ्जलिर्बद्धमहानुबन्धः ।

तुष्टाव तुष्टात्ममतिर्वचोभिः गुह्यैः स वेदान्तकृतान्तसारैः ॥२५॥

---

१. **‘दारापहारी तव नाथ पापो भ्राता न मे नास्य करोमि कृत्यम्’** इति मू.श्लो.पा । प्र.व्या च ।
२. **‘समृद्धान्’** इति प्र.व्या । ३. **‘पुरोहिताग्रैः’** इति प्र.व्या । ४. **‘सम्यक् दाष्टान्’** इति दू.कृ.श्री ।

Rarest Archiver

अथ=नमनानन्तरं **देवः**=कान्त्यादिगुणयुक्तः **बद्धाञ्जलिः**=कृतकरसम्पुटः **बद्धमहानु–बन्धः**=रामे बद्धमहाभक्तिः 'अनुबन्धस्तु भक्तिः स्यात्'[१] इयुक्तेः । **तुष्टात्ममतिः**=पूर्णस्व–रूपज्ञानं **सः पद्मभवः**=ब्रह्मा **पद्मापतिं**=लक्ष्मीपतिं रामं **गुह्यैः**=रहस्यैः **वेदान्त–कृतान्तसारैः वेदानाम् अन्तः**=निर्णयो यस्मात् तस्मात् 'ब्रह्ममीमांसाशास्त्रं' वेदान्तस्य[२] सिद्धान्तसारभूतैः, 'कृतान्तो यमसिद्धान्त'[३] इत्यमरः । **वचोभिः**=वाग्भिः **तुष्टाव**=अस्तौषी–त् । 'ष्टुञ्=स्तुतौ' लिट् ॥२५॥

जयो ध्रुवस्ते न पराजयः स्याद् विश्वेश्वरस्त्वं वयमत्र दासाः[४] ।

न चान्यथा स्यादयमीरितोऽर्थः क्वचित् कदाचिद् भगवन् कुतश्चित् ॥२६॥

हे भगवन्=राम ! **ते**=तव **जयः**=रावणादिशत्रुतिरस्कारः **ध्रुवः**=शाश्वतः, नित्य इति यावत् । [५] **ते**=तव **पराजयः**=शत्रुभिः तिरस्कारः **न स्यात्** । **त्वम् विश्वेश्वरः**=जगत्स्वामी **अत्र** त्वयि **वयं दासाः**=भृत्याः मया **ईरितः**=उक्तः **अयम् अर्थः जयो ध्रुव** इत्यादि रूपोऽर्थः । **क्वचिद्**=देशे **कदाचित्**=कालविशेषे **कुतश्चित्**=कारणात् **अन्यथा**=विपरीतः **न च स्यात्**= नैव भवेत् ॥२६॥

नाऽदिर्न नाशस्तव सद्गुणानां नान्तो न हन्ताऽस्ति तिरस्कृतिश्च ।

एकैकशोऽप्येवमुतान्यथा नो क्वचित् कदाचिद्भगवन् कुतश्चित् ॥२७॥

हे भगवन् ! तव सद्गुणानां=निर्दुष्टज्ञानानन्दादिगुणानां[६] मध्ये **एकैकशः**=एकैकस्यापि गुणस्य **आदिः**=उत्पत्तिर्नास्ति, **नाशः**=ध्वंसो नास्ति, **अन्तः**=परिमितिः नास्ति । 'अन्त–स्त्ववसितौ मृत्यौ स्वरूपे निश्चयेति क'[७] इत्यमरः । **तिरस्कृतिश्च**=तिरस्कारोऽपि नास्ति, **हन्त**=हर्षः सदाप्येवमेव । **उत**=अनन्तरं **क्वचित् कदाचित् कुतश्चित् अन्यथा**=उक्त–वैपरीत्यं **नो**=नास्ति ॥२७॥

अनाद्यनन्तः परमः स्वतन्त्रः त्वमेक एवेश भवद्वशाः स्मः ।

अहं शिवः[८] शक्र इनादयश्च भवे च मुक्तौ च परे च सर्वे ॥२८॥

---

१. **'स्नेहो भक्तिरिति प्रोक्त'** इत्यनेन श्री.म.भा.नि.सारं संवदते । २. **'वेदान्ताख्यसिद्धान्तसारभूतैः'** इति वा.वे । ब.गो च ।
३. अ.कोशे.३.का.नानार्थवर्गे.२२१.श्लोकः । ४. **'वयमद्य दासाः'** इति मू.श्लो.पा ।
५. **'ते'** इत्यतः आरभ्य **'भृत्याः'** इति पर्यन्तं दू.कृ.श्री मातृकायां लुप्तः प्रमादितो वा स्यात् ।
६. **'दुष्टज्ञानानन्दादिगुणानां'** इति वा.वे । ७. अमरकोशे नोपलभ्यते ।
८. **'अहं भवः शक्र'** इति मू.श्लो.पा । ब.गो च ।

Rarest Archiver

हे ईश ! त्वम् एक एव अनाद्यनन्तः=उत्पत्तिनाशरहितः **परमस्वतन्त्रः**=स्वरूपसत्ता प्रतीतिप्रवृत्त्यादौ परानपेक्षोऽसि **अहं** ब्रह्मा **शिवः=**रुद्रः **शक्रः**=इन्द्रः **इनादयश्च**= सूर्यादयोऽपि वयं **भवे च=**संसारेऽपि **मुक्तौ च**=मुक्त्यनन्तरमपि **भवद्वशाः**=त्वदधीनाः **स्मः**=भवामः । **परे=**अन्ये **सर्वेऽपि=**भवद्वशाः सन्ति ॥२८॥

अर्चिष्मतोऽर्चींषि रवेर्मयूखाः वेगाश्च वायोः सरितो[१] यथाऽऽपः ।

निर्यान्ति संयान्ति च सन्ततं हि त्वत्तो वयं चेश तथा समस्ताः ॥२९॥

हे ईश ! अर्चिष्मतः=वैश्वानरात् **अर्चींषि**=ज्वालाः **यथा सन्ततं**=निरन्तरं **निर्यान्ति=** बहिर्निर्गच्छन्ति, **संयान्ति**=पुनरग्निं प्रविशन्ति, **रवेः**=सूर्यात् **मयूखाः**=किरणाः **यथा निर्यान्ति संयान्ति**, **वायोः**=पवनात् **वेगाश्च** यथा **संयान्ति निर्यान्ति**, **च सरितः**=नद्याः **आपः=**उदकानि यथा **संयान्ति निर्यान्ति तथा त्वत्तः**=तव सकाशात् भिन्ना **वयं समस्ताः** 'सृष्टिकाले बहिः निर्गच्छामः, प्रलयकाले पुनः त्वां प्रविशामः' **हि**=प्रसिद्धमेतत् ॥२९॥

न दोषलेशोऽपि[२] तवेश कश्चिद् गुणान् सुखादीन् गणयन्ति के च[३] ।

स्वरूपभूताश्च वपुर्गुणाद्या विशेषतोऽनन्त तव ह्यनन्ताः ॥३०॥

हे ईश ! तव कश्चिदपि दोषलेशः नास्ति, **सुखादीन् तव गुणान् के च गणयन्ति**= सङ्ख्यायन्ति ? न केऽपि । 'गण=सङ्ख्याने' लिट् । **हे अनन्त=**अपरिछिन्न ! **तव वपुः=**शरीरः **गुणाद्याः=**आनन्दाद्याः गुणप्रभृतयः **स्वरूपभूताश्च**=त्वदभिन्ना[४] एव । तर्हि **तव वपुः**, **तव गुणा** इति व्यवहारः कथम्? इत्यत आह– **विशेषत** इति । भेदप्रतिनिधि–विशेषबलात् **वपुर्गुणाद्याः अनन्ताः**=अपरिमिताः **'स्वरूपभूताश्च वपुर्गुणाद्याः विशेषतो–ऽनन्ततव ह्यनन्ताः' हि**=प्रसिद्धमेतत् ॥३०॥

भ्रूविभ्रमेणैव जगन्ति हन्तुं स्रष्टुं पुनः पालयितुं प्रभोस्ते ।

रक्षोवधो नाद्भुतमत्र यद्वत् तूलप्रदाहः प्रलयानलस्य ॥३१॥

भ्रूविभ्रमेणैव=भ्रूचलनमात्रेणैव **जगन्ति**=भुवनानि **हन्तुं**=नाशयितुं, **पुनः=**मुहुः **स्रष्टुम्** =उत्पादयितुं, **पालयितुं**=रक्षितुं **प्रभोः**=समर्थस्य **ते=**तव **प्रलयानलस्य**=प्रलयकालाग्नेः

---

१. **'सरितां यथाऽऽपः'** इति प्र.व्या । ब.गो च ।
२. **'न दोषलेशोऽस्ति'** इति मू.श्लो.पा ।
३. **'गणयन्ति के वा'** इति मू.श्लो.पा । प्र.व्या । ब.गो. च ।
४. **'त्वद्भिन्नत्वदभिन्ना एव'** इति वा.वे ।

Rarest Archiver

तूलप्रदाहः=कार्पासभस्मीकरणं **यद्वद्**=यथा **नाद्भुतः**=नाश्चर्यकारः, तथा **अत्र**=जगति **रक्षोवधः**=राक्षसनाशनं[१] **नाद्भुतं**=नाश्चर्यकरम् । यद्वा **'रक्षोवध'** इति यावत् । **'तन्नाद्भूतं'** तेन अद्भूतम् इति नपुंसकलिङ्गोपपत्तिः' ॥३१॥

अनन्यसाध्येन तथाऽपि शत्रोः वधेन रक्षस्यखिलामरांस्त्वम्[२] ।

नमो नमो राम नमो नमस्ते सदेति तुष्टाव विधिः स्वतातम् ॥३२॥

तथापि=तवाद्भूतत्वाभावेऽपि हे प्रभो ! **अनन्यसाध्येन**=त्वदन्येन साधयितुमशक्येन **शत्रोः**=रावणादेः **वधेन**=नाशेन **त्वम् अखिलामरान्**=समस्तदेवान् **रक्षसि**=पासि । **हे राम ! ते**=तुभ्यं **सदा**=कालत्रयेऽपि **नमो नमः** पुनरपि **नमो नमः** अस्तु । **इति=** पूर्वोक्तप्रकारेण **विधिः**=ब्रह्मा **स्वतातं**=स्वजनकं रामं **तुष्टाव**=अस्तौत् ॥३२॥

दशाननं स्वेन वरेण गुप्तं निरीक्ष्य रामेण निपातितं तम् ।

भवस्तदा तामसभावमाप्तो योद्धुं क्रुधाऽऽह्वास्त रघुप्रवीरम् ॥३३॥

तदा=रावणवधसमये **भवः**=रुद्रः **स्वेन**=सम्बन्धिना **वरेण**=अनुग्रहेण **गुप्तं**=रक्षितं **तं**=प्रसिद्धं **दशाननं रामेण निपातितं**=नाशितं **निरीक्ष्य**=दृष्ट्वा, **तामसभावं**=तमोगुण–कार्यम् असुरावेशम् **आप्तः**=प्राप्तः सन् **क्रुधा**=कोपेन 'धकान्तरान्तोऽयम्' । 'प्रतिघा रुट्क्रुधौ स्त्रियाम्'[३] इत्यमरोक्तेः । **योद्धुं**=स्वेन युद्धं कर्तुं **रघुप्रवीरं**=रामम् **आह्वास्त**= असूयया आहूतवान् । 'ह्वेञ्=स्पर्धायां शब्दे च' लुङ् आत्मनेपदम् ॥३३॥

चापेन रोपं प्रतिसन्दधाने चराचरेशे विचचाल भूमिः ।

पृथ्वीप्रकम्पेन पपात शर्वः स उत्थितोऽभूच्च विशुद्धभावः ॥३४॥

चराचरेशे=स्थावरजङ्गमात्मकलोकनाथे रामे **चापेन**=धनुषा **रोपं**=बाणं **प्रतिसन्दधाने सति**=संयोजयति सति **भूमिः विचचाल**=चलिताऽभूत् । **शर्वः**=रुद्रः **पृथ्वीप्रकम्पेन**= भूमिचलनेन **पपात**=भूमौ पतितः । **सः**=शर्वः पुनः **उत्थितः** सन् **विशुद्धभावश्च**= निर्मलचित्तोऽपि **अभूत्** ॥३४॥

---

१. **'राक्षससेनानाशनम्'** इति वा.वे ।
२. **'–स्यखिलामरांश्च'** इति प्र.व्या ।
३. अ.कोशे.१.का.नाट्यवर्गे.२२९.श्लोकः ।

Rarest Archiver

पद्मापतेराशु स पादपद्मे पपात भक्त्या भरितो भवोऽथ ।

क्षमस्व लक्ष्मीरमणापराधं शुद्धाऽस्तु मे बुद्धिरिति ब्रुवाणः ॥३५॥

अथ=शुद्धभावप्राप्त्यनन्तरं **हे लक्ष्मीरमण=**राम ! मम **अपराधं क्षमस्व=**सहस्व **मे**=मम **शुद्धा**=निर्मला **बुद्धिः**=धीः **अस्तु**=सर्वदा भवतु । **इति ब्रुवाणः**=वदन् **भक्त्या=**माहात्म्य –ज्ञानयुक्तसुदृढस्नेहेन **भरितः**=पूर्णः **भवः=**रुद्रः **पद्मापतेः**=रामस्य **पादपद्मे=**पादकमले **आशु पपात** ॥३५॥

वृन्दारकैरिन्द्रपुरःसरैश्च स्वानन्दमूर्तिः परिवन्द्यमानः ।

मुखेन्दुना चारुवचोऽमृतेन विश्वाभिरामोऽभिननन्द रामः ॥३६॥

इन्द्रपुरस्सरैः=इन्द्रमुख्यैः **वृन्दारकैः**=देवैः **परिवन्द्यमानः=**सम्यक् नमस्कृतः **स्वानन्द –मूर्तिः**=स्वरूपभूतसुखात्मकशरीरः **मुखेन्दुना**=मुखचन्द्रेण **चारुवचोऽमृतेन=**मनोहरवागा –ख्यसुधया **विश्वाभिरामः=**जगत्सन्तोषकरः **रामः अभिननन्द**=सन्तुष्टोऽभूत् ॥३६॥

रामानुजो रामनियोगतोऽथ समं समस्तैः कपिपुङ्गवैस्तैः ।

लङ्काधिनाथोऽयमिति ब्रुवाणो विभीषणं शोभनमभ्यषिञ्चत् ॥३७॥

अथ=विभीषणस्य अशौचसमाप्त्यनन्तरं **रामानुजः**=लक्ष्मणः **रामनियोगतः**=रामाज्ञया **समस्तैः**=सकलैः **तैः**=प्रसिद्धैः **कपिपुङ्गवैः=**कपिश्रेष्ठैः **समं**=साकम् **अयं**=विभीषणः **लङ्काधिनाथः**=लङ्काधिपतिः **इति ब्रुवाणः**=वदन् सन् **शोभनं**=मङ्गलरूपं **विभीषणम् अभ्यषिञ्चत्**=अभिषिक्तमकरोत् ॥३७॥

भूम्ना नियुक्तः पवनस्य सूनुः सीताकृतिं तां विनयेन गत्वा ।

पतिव्रते ते पतिरेष हत्वा तं रावणं राजत इत्युवाच ॥३८॥

भूम्ना=पूर्णगुणेन रामेण **नियुक्तः**=प्रेरितः **पवनस्य सूनुः**=हनुमान् **विनयेन**=नम्रतया **तां=** पूर्वं स्वेन दृष्टां **सीताकृतिं**=सीताप्रतिकृतिं **गत्वा**=प्राप्य, **हे पतिव्रते=**सीते ! **ते**=तव **पतिः एषः** रामः **तं=**तवापहारिणं **रावणं हत्वा राजते=**दीप्तो वर्तते **इत्युवाच** ॥३८॥

स्वस्त्यस्तु वत्स प्रियावादिने ते प्रियं दिदृक्षे मम देवदेवम् ।

इति ब्रुवन्त्यां तनुमध्यमायाम् उवाच तन्मारुतिराप्य रामम् ॥३९॥

Rarest Archiver

हे वत्स=प्रीतिविषय हनुमन् ! **प्रियवादिने**=सन्तोषवार्तां वदते **ते**=तुभ्यं **स्वस्ति**= मङ्गलम् **अस्तु**=भवतु । अहं **देवदेवं**=ब्रह्मादिभिः स्तुत्यं **मम प्रियं**=पतिं **रामं दिदृक्षे**= द्रष्टुमिच्छामि । 'दृशिर्=प्रेक्षणे' सन्नन्तात् लट् उत्तमपुरुषैकवचनम् । **तनुमध्यमायां** सीतायाम् **इति**=पूर्वोक्तप्रकारेण **ब्रुवन्त्यां**=उक्तवत्यां सत्यां **मारुतिः**=हनूमान् **रामम् आप्य तत्**=सीतावचनम् **उवाच** ॥३९॥

रामज्ञया तत्र विभीषणस्ताम् उपानिनायाधिकगोपनेन ।

[१]स्वयंवरेऽथ व्यसने च युद्धे राज्ञी न गोप्येति जगाद रामः ॥४०॥

तत्र=तस्मिन् काले **विभीषणः रामाज्ञया अधिकगोपनेन**=अत्यन्तगूहनेन **तां**=सीताम् **उपानिनाय**=रामं प्रापयामास । **रामः स्वयंवरे**=स्वयंवरकाले **अथ व्यसने**=आपत्काले **युद्धे**=युद्धकाले **राज्ञी**=राजस्त्री **न गोप्या**=गूहनीया न भवति **इति जगाद** ॥४०॥

तिरस्करिण्यामपवाहितायाम् असंवृता संसदि जातलज्जा ।

स्वेष्वेव गात्रेषु निलीय याता[२] रामाननं चारु ददर्श रामा ॥४१॥

तिरस्करिण्यां=यवनिकावस्त्रे **अपवाहितायाम्**=अपनीतायां सत्याम् **असंवृता**=आच्छादन –रहिता **संसदि**=सभायां **जातलज्जा**=जनितत्रपा **स्वेषु**=स्वकीयेषु **गात्रेषु**=अवयवेष्वेव **निलीय**=आच्छाद्य **याता**=रामं प्राप्ता **रामा**=सीता **चारु**=मनोहरं **रामाननं ददर्श** ॥४१॥

आलोक्य तां लोकपतिर्बभाषे जिताऽसि[३] भद्रे विनिहत्य शत्रुम् ।

दारापहारोद्भवदुर्यशो मे प्रमृष्टमेवं किमिहाद्य कृत्यम् ॥४२॥

लोकपतिः=रामः **तां**=सीताप्रतिकृतिं **आलोक्य**=दृष्ट्वा **हे भद्रे**=मङ्गलस्वरूपे ! तं **शत्रुं**=रावणं **विनिहत्य**=नाशयित्वा **जिताऽसि**=जयं प्राप्ता भवसि । **मे**=मम **एवं**=प्रकारेण **दारापहारोद्भवदुर्यशः**=त्वदपहारेण जन्यदुष्कीर्तिः **प्रमृष्टं**=नाशितम् । **अद्य**=इदानीम् इह मयि त्वया **किं कृत्यं**=किं प्रयोजनम् ? इति **बभाषे** ॥४२॥

कुलाङ्गनायां परवेश्मगायां कथं कुलीनः कुरुतेऽभिलाषम् ।

वयं तु सर्वत्र च सङ्गहीनाः शुचिस्मिते याहि यथेप्सितं ते[५] ॥४३॥

---

१. **'स्वयंवरे च व्यसने च युद्धे'** इति मू.श्लो.पा । प्र.व्या । ब.गो च । २. **'विधीयमाना'** इति मू.श्लो.पा । ३. **'जित्वाऽस्मि भद्रे'** इति प्र.व्या । ४. **'विनिहत्य शत्रून्'** इति श्रीविश्व.ती । ५. **'यथेप्सितं त्वम्'** इति ब.गो ।

Rarest Archiver

कुलाङ्गनायां=कुलस्त्रियां **परवेश्मगायां**=शत्रुगृहं प्रविष्टायां सत्यां **कुलीनः**=सत्कुल–प्रसूतः **अभिलाषम्**=इच्छाम् 'कामोऽभिलाषस्तर्षश्च'[1] इत्यमरः । **कथं कुरुते**=न कथम् अपि । **हे शुचिस्मिते**=पवित्रस्मितयुक्ते सीते ! **वयं तु सर्वत्र**=दारादिषु **सङ्गहीनाः**= आसक्तिरहिताः प्रसिद्धाः **ते**=तव **यथा**=येन प्रकारेण **ईप्सितम्**=आप्तुमिष्टं तथा **याहि**= गच्छ । 'बभाषे' इति पूर्वेण संबन्धः ॥४३॥

नास्म्यन्यसक्तेति मुहुर्ब्रुवाणा विज्ञाय भावं भुवनेश्वरस्य ।

शुकालपा लक्ष्मणमाललाप चितां[2] द्रुतं मे कुरु लक्ष्मणेति ॥४४॥

हे राम ! अहं **अन्यसक्ता**=अन्यपुरुषासक्ता **नास्मि**=न भवामि । **इति मुहुः**=पुनःपुनः **ब्रुवाणा शुकालपा**=कीरवाणीसीता **भुवनेश्वरस्य**=जगत्स्वामिनो रामस्य **भावम्**=अभिप्रायं **विज्ञाय**=ज्ञात्वा **हे लक्ष्मण ! मे**=मम **चितां**=अग्निप्रवेशानुकुलकाष्ठसमूहं **द्रुतं** =शीघ्रं **कुरु इति लक्ष्मणम् आललाप**=उवाच । 'लप=व्यक्तायां वाचि' लिट् ॥४४॥

सुग्रीवमुख्येष्वथ वानरेषु मुञ्चत्सु बाष्पं सविभीषणेषु ।

बाष्पेक्षणो लक्ष्मण आशु चक्रे चितां[3] प्रभोश्चित्तमवेत्य भावैः ॥४५॥

अथ=सीतावचनानन्तरं **सविभीषणेषु**=विभीषणसहितेषु **सुग्रीवमुख्येषु** वानरेषु **बाष्पं**= नेत्रजलं **मुञ्चत्सु सत्सु प्रभोः**=रामस्य **भावैः**=अङ्गचेष्टाभिः **चित्तं**=मनोभिप्रायम् **अवेत्य**=ज्ञात्वा, **बाष्पेक्षणः**=अश्रुनेत्रः **लक्ष्मणः चिताम् आशु चक्रे** ॥४५॥

अगामहं चेन्मनसाऽपि नान्यं मां पावकः पातु परीक्षकोऽयम् ।

सेति ब्रुवाणा प्रणिपत्य रामं जाज्वल्यमाने ज्वलने पपात ॥४६॥

अहं मनसाऽपि अन्यपुरुषं **चेत्**=यदि **न अगां**=न अगमं तर्हि **परीक्षकः**=पुण्यपाप–विवेकस्य कर्ता **अयं**=प्रत्यक्षसिद्धः **पावकः मां पातु**=रक्षतु, **इति ब्रुवाणा** सीता **रामं प्रणिपत्य**=नमस्कृत्य **जाज्वल्यमाने**=अतिशयितज्वालायुक्ते **ज्वलने**=अग्नौ **पपात** ॥४६॥

हाहाकृतं वानरराक्षसैस्तैः तस्यां पतन्त्यामनले विशङ्कम् ।

ब्रह्मादयो राममथाभ्यधुस्ते शुद्धैव सीता महिषी तवेति ॥४७॥

---

१. अ.कोशे.१.का.नाट्यवर्गे.२३१.श्लोकः ।

२. **'चितिं द्रुतम्'** इति वा.वे । ब.गो.सं.पा च ।

३. **'चितिं प्रभो'** इति वा.वे । ब.गो.सं.पा च ।

Rarest Archiver

तस्यां=सीतायां **विशङ्कम्**=निःशङ्कं यथा तथा **अनले**=अग्नौ **पतन्त्यां** सत्यां **तैः**= समीपस्थैः **वानरराक्षसैः हाहाकृतं**=कष्टंकष्टमित्युक्तम् **अथ**=सीतायाः अग्निप्रवेशानन्तरं **ते ब्रह्मादयः** देवाः हे राम ! **तव महिषी**=पट्टाभिषिक्ता **सीता शुद्धैव**=निर्मलैव **इति राममभ्यधुः**=अवोचन् ॥४७॥

सीताकृतिं दिव्यपरीक्षणच्छलात् सीतापतिर्हव्यवहे निधाय ताम् ।

कैलासशैलात् पुनरागतां प्रियां सीतां स्वयं प्रैक्षत पावकार्पिताम् ॥४८॥

सीतापतिः=रामः **दिव्यपरीक्षणच्छलात्**=अलौकिकपरीक्षाव्याजात् **तां**=रावणाहृतां **सीता –कृतिं**=सीताप्रतिकृतिं **हव्यवहे**=अग्नौ **निधाय**=निक्षिप्य, प्रतिकृतिनाशानन्तरं **कैलास शैलात्** =कैलासपर्वतात् **पुनः आगतां** हव्यवहे प्राप्ताम् । अत एव **पावकार्पिताम्** =अग्निना दत्तां **प्रियां**=प्रीतिविषयां **सीतां**=चिदानन्दरूपां **स्वयं प्रैक्षत**=अपश्यत् । 'स्वयम्' इत्युक्त्या 'रामादन्ये नापश्यन्' इत्युक्तं भवति ॥४८॥

प्राप्येन्दिरां नृपसुतामतिसुन्दरीं तां मन्दस्मितेन्दुलसितां मुमुदे मुकुन्दः ।

रामं समेत्य परमं मुमुदेऽपि देवी दृष्ट्वैव तौ मुमुदिरे सुजनाः समेताः[1] ॥४९॥

मुकुन्दः=रामः **मन्दस्मितेन्दुलसितां**=मन्दस्मिताख्येन्दुना दीप्तां **अतिसुन्दरीं**=अत्यन्त–लावण्ययुक्तां **इन्दिरां**=लक्ष्मीरूपां **नृपसुतां**=जनकसुतां **तां**=सीतां प्राप्य, **मुमुदे**=तुतोष । **देवी**=सीताऽपि **परमं**=सर्वोत्तमं रामं प्राप्य **मुमुदे** । **समेताः**=मिलिताः **सुजनाः**=सज्जनाः **तौ**=सीतारामौ **दृष्ट्वा एव मुमुदिरे**=तुतुषुः । 'मुद=हर्षे' लिट् ॥४९॥

ब्रह्म ब्रह्मादिकानां शिशुरतिललितः केवलं राजराज्ञो

राजेन्द्रो मध्यमानां स्वगतिरथ सतामङ्गनानामनङ्गः ।

मृत्युर्नक्तञ्चराणां जगति हनुमतो नित्यनैसर्गिकेष्टो

रेजे रामोऽभिरामो जनकदुहितुरश्रान्तमेकान्तकान्तः ॥५०॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे चतुर्दशः सर्गः ॥

---

१. **'सुजनाः समेतौ'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।

Rarest Archiver

**[1]'मल्लानाम् अशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभृतां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विधातृविहितस्तत्वं परं योगिनां
[2]वृष्णीनां परदेवतेति शुशुभे रङ्गेऽच्युतः साग्रजः'** ॥

इति श्लोकार्थमाह– **ब्रह्मे**ति । **रामः ब्रह्मादिकानां** देवानां **ब्रह्म**=परब्रह्मभूतः **राजराज्ञोः=**कौसल्यादशरथयोः **केवलं**=मुख्यं यथा तथा **अतिललितः**=कोमलः **शिशुरिव** स्थितः, **मध्यमानां**=नित्यसंसारिणां **राजेन्द्रः**=राजश्रेष्ठ इव प्रतीतः, **अथ**=अनन्तरं **सतां**=सज्जना – नां **स्वगतिः**=स्वप्राप्य इव भातः, **अङ्गनानां**=स्त्रीणाम् **अनङ्गः**=मन्मथ इव स्थितः, **नक्तञ्चराणां**=राक्षसाणां **मृत्युः**=यम इव स्थितः, **जगति**=लोके **हनुमतः नित्यनैसर्गिकेष्टः** =सदा स्वाभाविकप्रियः **जनकदुहितुः**=सीतायाः **अश्रान्तं**=निरन्तरं यथा तथा 'सतता– नारताश्रान्त'[3] इत्यमरः । **एकान्तकान्तः=**नियतपतिः, मुख्यभर्ता वा **अभिरामः=**मनोहरः **रामः रेजे**=दिदीपे ॥५०॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे चतुर्दशः सर्गः ॥

आरम्भतः श्लोकाः–७०७+५०=७५७

१. श्रीमद्भागवते.१०.स्क.४१.अ.१७.श्लोकः ।
२. प्रकटितेषु पाठेषु **'वृष्णीनां च गतिः सदैव'** इति तु पाठान्तरं स्यात् ।
३. अ.कोशे.१.का.स्वर्गवर्गे.७४.श्लोकः ।

Rarest Archive

Rarest Archiver

॥ अथ पञ्चदशःसर्गः॥

Rarest Archiver

॥ अथ पञ्चदशः सर्गः ॥

गिरेरानयनात् पश्चाद् ये रावणशराहताः ।

हरींस्तान् [१]निरुजश्चक्रे सुषेणो भिषजां वरः ॥१॥

भिषजां=वैद्यानां मध्ये **वरः**=श्रेष्टः **सुषेणः**=सुग्रीवस्य श्वशुरः तारापिता **गिरेः**=गन्ध–मादनस्य **आनयनात्**=लङ्कां प्रति प्रापणात् **पश्चाद्**=अनन्तरं **ये**=हरयः **रावणशराहताः**=रावणबाणपीडिताः **तान् हरीन्**=कपीन् **निरुजः**=विगतरोगान् **चक्रे** ॥१॥

उच्चावचा ये हरयो मृतास्तान् राघवः स्वयम् ।

सङ्कल्पात् सत्यसङ्कल्पः[२] समानिन्ये यमक्षयात् ॥२॥

सत्यसंकल्पः=यथार्थप्रतिज्ञः **राघवः**=रामः **उच्चावचाः**=उत्कृष्टापकृष्टाः **ये हरयः मृताः**=परित्यक्तप्राणाः **तान्**=हरीन् **स्वयं सत्यसङ्कल्पात् यमक्षयात्**=यमगृहात्,यमपुरादिति वा । 'निवेशः शरणं क्षयः'[३] इत्यमरः । **समानिन्ये**=लङ्कां प्रापयामास ॥२॥

[४]तदा राजा दशरथो महेन्द्रेण सहाऽगतः[५] ।

परिरेभे सुतं प्रीत्या[६] बाष्पपर्याकुलेक्षणः ॥३॥

तदा=यमक्षयात् हरीणामागमनसमये **महेन्द्रेण**=देवेन्द्रेण **सह**=साकम् **आगतः**=यमक्षया–त् लङ्कां प्राप्तः, स्वर्गादागतो वा **दशरथः राजा बाष्पपर्याकुलेक्षणः**=आनन्दाश्रुपीडित –नेत्रः सन् **प्रीत्या**=सन्तोषेण **सुतं**=रामं **परिरेभे**=आलिलिङ्गे ॥३॥

लक्ष्मणं च परिष्वज्य लक्ष्मणाग्रजमब्रवीत् ।

त्वया भवाब्धिमतरं विश्वनन्दन[७] नन्दन ॥४॥

दशरथः **लक्ष्मणं च**=लक्ष्मणमपि **परिष्वज्य**=परिरभ्य **हे विश्वनन्दन**=जगत्सन्तोषकर–**नन्दन** राम ! अहं **त्वया भवाब्धिं**=संसारसमुद्रम् **अतरं**=तीर्णवानभवम् । 'तॄ=प्लवनतर –णयोः' लङ् उत्तमपुरुषैकवचनम् । इति **लक्ष्मणाग्रजम् अब्रवीत्** ॥४॥

---

१. **'विरुजश्चक्रे'** इति वा.वे । प्र.व्या च ।
२. **'सत्यसन्धश्च'** इति मू.श्लो.पा ।
३. अ.कोशे.२.का.पुरवर्गे.२६.श्लोकः ।
४. **'ततो राजा'** इति मू.श्लो.पा । ब.गो च ।
५.**'समागतः'** इति प्र.व्या.ब.गो च । ६.**'सुतं दोर्भ्यां प्रीत्या बाष्पाकुलेक्षणः '** इति मू.श्लो.पा । ७.**'विश्वानन्दन'** इति ब.गो ।

Rarest Archive

स्वर्गादप्यपवर्गाच्च सर्वस्माच्चान्यतः सुखात् ।

श्रवणं दर्शनं वा ते स्मरणं वा वरं मम ॥५॥

हे नन्दन ! **स्वर्गात्**=स्वर्गसुखात्, **अपवर्गाच्च**=मोक्षसुखादपि, **अन्यतः**=स्वर्गापवर्गा–भ्यामन्यस्मात् **सर्वस्मात्**=सकलात् **सुखादपि मम ते**=तव सम्बन्धि **श्रवणं**=श्रवणजन्य–ज्ञानं **स्मरणं**=स्मृतिर्वा **दर्शनं**=साक्षात्कारो वा **वरं**=श्रेष्ठम् । 'स्वर्गादिसुखात् श्रवणादिज–न्यसुखं श्रेष्ठम्' इति भावः ॥५॥

धन्या सा खलु कौसल्या सुमित्राऽन्ये च नागराः ।

[१]ये तवानुभवेयुस्तम् अभिषेकमहोत्सवम् ॥६॥

हे राम ! **सा**=प्रसिद्धा **कौसल्या धन्या खलु**=कृतकृत्या ननु, **सुमित्रा च धन्या खलु । ये तव अभिषेकमहोत्सवम्**=अभिषेकाख्यमहोत्सवम् **अनुभवेयुः**=साक्षात्कुर्युः । ते **अन्ये** =अपरे **नागराः**=नगरे विद्यमानाः, अयोध्यायां स्थिताश्च **धन्याः खलु** ॥६॥

सीते सीमन्तिनीनां त्वां मन्ये धन्यतमां सतीम्[२] ।

साक्षान्नारायणं रामं या मत्सुतमुपाश्रिता ॥७॥

हे सीते ! या त्वं **साक्षात्**=मुख्यतः **नारायणं**=नारायणावतारं **मत्सुतं रामम् उपाश्रिता**=प्राप्ता तां **सतीं**=पतिव्रतां **त्वां सीमन्तिनीनां**=सुमङ्गलीनां मध्ये **धन्यतमाम्**=अतिशयेन कृतकृत्यां **मन्ये**=जानामि । 'मनु=अवबोधने' लट् उत्तमपुरुषैकवचनम् ॥७॥

सौमित्रे कृतकृत्योऽसि रामशुश्रूषया ध्रुवम्[३] ।

वासुदेवमिमं पूर्णं[४] विदुर्वेदान्तवेदिनः[५] ॥८॥

हे सौमित्रे=लक्ष्मण ! **वेदान्तवेदिनः**=ब्रह्ममीमांसापारङ्गताः विद्वांसः यम् **इमं**=रामं **पूर्णं**=पूर्णगुणं **वासुदेवं**=वासुदेवावतारं **विदुः**=जानन्ति । 'विद=ज्ञाने' लट् । तादृश–**रामशुश्रूषया**=रामसेवया **त्वं कृतकृत्यः**=धन्यः **असि ध्रुवम्** । अत एवोक्तं बालकाण्डे–**'चतुर्मूर्तेर्मुकुन्दस्य मूर्तिराद्याऽग्रतोऽभवत्'**[६] इति ॥८॥

---

१. **'ये ते तवानुभवेयुः समस्तं च महोत्सवम्'** इति मू.श्लो.पा । २. **'धन्यतमां सति'** इति प्र.व्या । ब.गो च ।
३. **'रामशुश्रूषणाद् ध्रुवम्'** इति ब.गो । ४. **'इमं देवाः'** इति प्र.व्या । ब.गो च ।
५. **'विदुर्वेदान्तवेदितम्'** इति ब.गो । ६. सं.रा.बा.का.३.अ.३५.श्लोकः ।

Rarest Archiver

इति ब्रुवाणं पितरम् अभिवन्द्य[१] जगद्गुरुः ।

[२]अन्वजानात् स पितरं ब्रह्मादीनपरानपि ॥९॥

जगद्गुरुः=जगत्पिता **सः**=रामः **इति**=पूर्वोक्तप्रकारेण **ब्रुवाणं**=वदन्तं तं **पितरम् अभिवन्द्य** =नमस्कृत्य **पितरं**=दशरथम् **अन्वजानात्**=अनुज्ञातवान् । तथा **ब्रह्मादीन् अपरानपि अन्व –जानात्**=प्रेषयामास ॥९॥

तत आमन्त्रयामास भक्त्या रामं विभीषणः ।

राजभोगैर्वस स्वामिन् ससीतो मे गृहेष्विति ॥१०॥

ततः=दशरथाद्यनुज्ञानन्तरं **विभीषणः भक्त्या**=सुधृढस्नेहेन **हे स्वामिन्**=राम ! **ससीतः**= सीतया सहितः त्वं **मे**=मम **गृहेषु राजभोगैः**=स्रक्चन्दनवनितामृष्टान्नभोजनाभ्यञ्जनादि –भिः सह=साकं **वस**=वासं कुरु । 'वस=निवासे' लोट् । **इति रामम् आमन्त्रयामास**= सम्प्रार्थयामास ॥१०॥

उपवासकृशं दीनं भरतं स्थण्डिलेशयम् ।

नादृष्ट्वा पुरि मे वास इति रामोऽब्रवीदिमम् ॥११॥

उपवासकृशम् उपवासैः=निराहारैः[३] **कृशं**=कृशत्वं प्राप्तं **दीनं**=दुःखितं **स्थण्डिलेशयं** =भूमौ शयनं कुर्वाणं **भरतम् अदृष्ट्वा**=अनवलोक्य विद्यमानस्य **मे**=मम **पुरि**=नगर्यां **न वासः**=अवस्थानं न कार्यः । इति **रामः इमं**=विभीषणम् **अब्रवीत्** ॥११॥

अथ रामाज्ञया सर्वान् वानरान् स विभीषणः ।

रत्नैः सुवर्णैः कामैश्च[४] यथाकाममपूजयत् ॥१२॥

अथ=रामवचनानन्तरं **स विभीषणः रामाज्ञया सर्वान् वानरान्** लङ्कां प्रवेश्य **रत्नैः**= नवरत्नैः, **सुवर्णैः**=काञ्चनैः, **कामैः**=मनोरथैः, अन्नादिविषयैः **च यथाकामं**=यथेच्छम् **अपूजयत्** ॥१२॥

---

१. **'अभिनन्द्य'** इति प्र.व्या ।

२. अ) **'अन्वजानात् ततो रामो ब्रह्मादीनपि दैवतान्'** इति ब.गो ।
   आ) **'अन्वजानात् स्वपितरं ब्रह्मादीनितरानपि'** इति प्र.व्या ।

३. **'उपवासेन**=निराहारेण' इति एकवचनान्तः स्वीकृतः । दू.कृ.श्री ।

४. **'काम्यैश्च'** इति ब.गो.सं.पा ।

Rarest Archive

सुमेरुशिखराकारं नानारत्नविभूषितम्[१] ।

पुष्पकं प्रार्पयामास राघवाय विभीषणः ॥१३॥

विभीषणः सुमेरुशिखराकारं=हेमाद्रिशिखरसदृशं **नानारत्नविभूषितं**=नानारत्नैः अलङ्कृतं **पुष्पकं**=पुष्पकाख्यं विमानं **राघवाय**=रामाय **प्रार्पयामास**=समर्पितवान् । 'ऋ=गतौ' णिजन्तात् लिट् ॥१३॥

आरुह्य पुष्पकं दिव्यम् अङ्कमारोप्य[२] जानकीम् ।

रेजे रामो यथा मेघः सविद्युन्मन्दराचले ॥१४॥

रामः दिव्यं=लोकविमानविलक्षणं **पुष्पकम् आरुह्य, अङ्के**=उत्सङ्गे **जानकीम् आरोप्य**=स्थापयित्वा **मन्दराचले**=मन्दरपर्वते **सविद्युत्**=तटिता सहितः **मेघः यथा** तथा **रेजे** ॥१४॥

रामः सलक्ष्मणस्तत्र हनूमत्सूर्यजादिकान् ।

कपीन् विभीषणं चैनमारोपयत पुष्पकम् ॥१५॥

सलक्ष्मणः रामः तत्र=गमनसमये **हनूमत्सूर्यजादिकान्**=वायुसुतसुग्रीवप्रभृतीन् **कपीन् एनं विभीषणं पुष्पकमारोपयत**=आरुढानकरोत् । 'रुह=बीजजन्मनि प्रादुर्भावेच' णिजन्ता–त् लङ् ॥१५॥

हंससंहतियुक्तेन पुष्पकेणार्कवर्चसा ।

विमानेनासमानेन ययौ रामो निजां पुरीम् ॥१६॥

रामः हंससंहतियुक्तेन=हंसपक्षिसन्ततियुक्तेन **अर्कवर्चसा**=सूर्यकान्तिसदृशकान्तियुक्तेन **असमानेन**=असदृशेन व्योमयानेन, खे चारिण इति यावत् । **पुष्पकेण निजां पुरीम्**=अयोध्यां **ययौ** ॥१६॥

तत्र तत्रातिचित्राणि सिन्धुशैलवनानि सः ।

वर्णयन् दर्शयन् देव्यै ययौ देवो विहायसि[३] ॥१७॥

तत्र तत्र=नानास्थलेषु **अतिचित्राणि**=अत्यन्ताश्चार्यकराणि **सिन्धुशैलवनानि**=समुद्रपर्वत–काननानि **देव्यै**=सीतायै **वर्णयन्**=तत्स्वरूपं वदन्, **दर्शयन्**=दर्शनं कारयन् **सः**=रामः

---

१. **'नानारत्नमयं शुभम्'** इति मू.श्लो.पा । ब.गो च । २. **'अङ्क आरोप्य'** इति ब.गो.सं.पा । ३. **'विहायसा'** इति ब.गो ।

Rarest Archiver

विहायसि=आकाशे **ययौ** ॥१७॥

[1]वानरेन्द्रकलत्राणि किष्किन्धायाः स राघवः ।

आदायाऽरोप्य च[2] क्षिप्रं विमानेन ययौ पुनः ॥१८॥

स राघवः किष्किन्धां प्राप्य **किष्किन्धायाः** नगरात् **वानरेन्द्रकलत्राणि**=सुग्रीवादीनां दारान् **आदाय**=गृहीत्वा विमान**मारोप्य**=विमाने निक्षिप्य, **पुनः**=अनन्तरं **विमानेन क्षिप्रं ययौ**॥१८॥

पूर्णे चतुर्दशे वर्षे पञ्चम्यां पुरुषोत्तमः ।

भरद्वाजाश्रमं प्राप्य मुनेः पूजामुपाददे ॥१९॥

पुरुषोत्तमः=रामः **चतुर्दशवर्षे**=वत्सरे **पूर्णे**=समाप्ते सति **पञ्चम्यां**=तिथौ **भरद्वाजाश्रमं** =प्रयागक्षेत्रं **प्राप्य**=गत्वा **मुनेः**=भारद्वाजात् **पूजाम्**=अपचितिम् **उपाददे**=जग्राह ॥१९॥

हनूमन्तमुपान्तस्थम् उवाच मधुसूदनः ।

मारुते मामुपायान्तं भरताय वदेरिति ॥२०॥

मधुसूदनः=रामः **हे मारुते**=हनूमन् ! **भरताय वदेरिति उपायान्तं**=समीपे आगच्छन्तं **मां वदेः**=वद **इति उपान्तस्थं**=समीपे तिष्ठन्तं तं **हनूमन्तम् उवाच** ॥२०॥

ययौ रामनियोगेन मारुतिर्मारुतोपमः ।

मानुषं वेषमाश्रित्य पुरीं राघववल्लभाम् ॥२१॥

मारुतोपमः=वायुसदृशः **मारुतिः**=हनूमान् **रामनियोगेन**=रामाज्ञया **मानुषं**=मनुष्यसम्बन्धि–नं वेषं=रूपम् **आश्रित्य**=गृहीत्वा **राघववल्लभां**=रामप्रियां, रामस्वामिनीं वा **पुरीम्**= अयोध्यां **ययौ** ॥२१॥

[3]जटिनं चीरिणं वीरम् उपवासकृशं मृदुम् ।

मलिनं तीव्रतपसं रामरामेति वादिनम् ॥२२॥

---

१. इतः पूर्वं श्लोकद्वयमधिकं प्र.व्या.सं.पाठे पठ्यते । तद्यथा –

स शनैर्वानरेन्द्रस्य पुरीं गत्वा सुशोभनाम् । हनुमद्दर्शनसुग्रीवसख्यादीनुक्तवान् प्रियाम् ॥

तत्र तैराप्तसर्वाथो शबर्यादिविमोक्षणम् । गृध्रराजस्य वृत्तान्तमुक्त्वा देव्यै ययौ पुनः ॥

२. **'आदायारोपयत्क्षिप्रम्'** इति मू.श्लो.पा ।

३. अ) **'जटिलम्'**इति वा.वे । ब.गो च । आ) **'जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्षितम्'** इति वा.रा.यु.का.२७.अ.१२३.श्लो ।

Rarest Archiver

पादुके देवदेवस्य वन्दमानं पुनः पुनः ।

रामोक्ते समये प्राप्ते [1]रामदर्शनविक्लवम् ॥२३॥

देदीप्यमानमनलं प्रवेष्टुं [2]ध्रुवमुद्यतम् ।

भरताग्रजदूतोऽसौ भरतं क्षिप्रमैक्षत ॥२४॥

'जटिनम्' इत्यादि श्लोकत्रयम् एकान्वयं 'कुलम्' इत्याहुः– **भरताग्रजदूतः**=रामदूतः **असौ**=हनुमान् **जटिनं**=जटायुक्तं व्रीह्यादित्वादिनिः **चीरिणं=**चीरवस्त्रधारिणं **वीरमुपवास –कृशं मृदुं=**मृदुतरं[3] **मलिनं=**देहमलयुक्तं **तीव्रतपसं**=तीक्ष्णतपः[4] कुर्वाणं **रामरामेति वादिनं** वदन्तं **भरतम् ऐक्षत**=अपश्यत् ॥२२॥

असौ हनूमान् **देवदेवस्य=**देवश्रेष्ठरामस्य **पादुके**=पादपीठे कर्म **पुनः पुनः**=मुहुर्मुहुः **वन्दमानं=**नमन्तं **रामोक्ते**=रामेणोक्ते **समये=**काले **प्राप्ते सति रामदर्शनविक्लवं**=राम–दर्शनं मम कथं भविष्यति? इति मनःखेदयुक्तं भरतम् ऐक्षत ॥२३॥

भरताग्रजदूतः असौ देदीप्यमानं=जाज्वल्यमानम् **अनलम्**=अग्निं **प्रवेष्टुम्=**अनलं प्रवेशं कर्तुं **ध्रुवं**=निश्चितं यथा तथा **उद्यतं**=प्रयत्नं कुर्वाणं **भरतं क्षिप्रमैक्षत** ॥२४॥

मा वीर साहसं कार्षीः व्यक्तं भक्तोऽसि पूर्वजे ।

इत्युक्त्वा भरतं प्रोचे मतिमान् हनुमान् पुनः ॥२५॥

मतिमान्=आगमिविषयकज्ञानवान् **हनुमान् पुनः=**भरतदर्शनानन्तरं **हे वीर ! भरतं साहसं** सहसा=सहनशक्त्या क्रियमाणाग्निप्रवेशं **मा कार्षीः**=न कुरु । 'माङि लुङ्'[5] इति लोडर्थे लुङ् । 'न माङ्योगे'[6] इत्यडभावः । त्वं **पूर्वजे**=अग्रजे रामे **व्यक्तं**=स्पष्टं यथा तथा **भक्तः**=सुधृढस्नेहयुक्तः **असि इत्युक्त्वा पुनः**=अनन्तरं **भरतं प्रोचे** ॥२५॥

सीतापतिः ससीतस्त्वां ससौमित्रिरमित्रहन्[7] ।

रामो रामानुजं प्राप्तः[8] कुशलं सौम्य पृच्छति ॥२६॥

---

१. **'रामादर्शनविक्लवम्'** इति मू.श्लो.पा । ब.गो । प्र.व्या च ।
२. **'धृष्टमुद्यतम्'** इति प्र.व्या । ब.गो च ।
३. **'मृदुचित्तम्'** इति दू.कृ.श्री ।
४. **'तीव्रतपः'** इति वा.वे ।
५. अष्टाध्यायी ३।३।१७५.पा.सूत्रम् । ६.अष्टाध्यायी ६।४।७४.पा.सूत्रम् । ७.**'ससौमित्रिरमित्रजित्'** इति मू.श्लो.पा.ब.गो च ।
८. अ) **'रामानुज प्रीतः'** इति मू.श्लो.पा । आ) **'रामानुज प्राप्तः'** इति ब.गो ।

Rarest Archiver

हे अमित्रहन्=शत्रुहन्, शत्रुसंहारक ! **हे सौम्य=**शान्त्यादिगुणयुक्त भरत ! **ससौमित्रिः सीतापतिः रामः प्राप्तः=**अयोध्यां समीपं प्राप्तः सन् **रामानुजं**=स्वभ्रातरं **त्वां कुशलं=**क्षेमं दूतमुखेन **पृच्छति**=ज्ञातुमिच्छति ।'प्रच्छ=ज्ञीप्सायां' दुह्यादित्वाद् द्विकर्मत्वम् ॥२६॥

इति प्रियं ब्रुवाणाय तस्मै मारुतये तदा ।

तुभ्यं किं [1]प्रददानीति ब्रुवाणः प्रणनाम सः ॥२७॥

सः=भरतः **इति=**पूर्वोक्तप्रकारेण **प्रियं=**प्रीतिकरं वचनं **ब्रुवाणाय**=वदते **तुभ्यं किं प्रददानि**=किं प्रदद्याम्? **इति ब्रुवाणः**=वदन् सन् **तदा तस्मै**=प्रियवचनवक्त्रे **मारुतये**=हनुमते **प्रणनाम=**साष्टाङ्गनमस्कारम् अकरोत् ॥२७॥

प्रहृष्टो रोमहर्षश्च वर्षो हर्षाश्रुसन्ततेः ।

चित्ते गात्रे च नेत्रे च भरतस्याभवन् समम्[2] ॥२८॥

भरतस्य चित्ते=हृदये **प्रहर्षः**=प्रकृष्टसन्तोषः **गात्रे**=शरीरे **रोमहर्षश्च**=रोमाञ्चनमपि **नेत्रे=**चक्षुषि **हर्षाश्रुसन्ततेः**=आनन्दबाष्पसमूहस्य **वर्षः**=वृष्टिश्चेत्येते **समं**=युगपत् **अभवन्**॥२८॥

महापुरुष कोऽसि त्वं त्वां मन्ये धन्यमात्मनाम् ।

कथां[3] कथय रामस्य तमित्थं भरतोऽब्रवीत् ॥२९॥

हे महापुरुष ! त्वं कोऽसि=किंलक्षणकः भवसि ? अहं **त्वाम् आत्मनां=**जीवानां मध्ये **धन्यं**=कृतकृत्यं **मन्ये=**जानामि । **रामस्य कथां**=वृत्तान्तं **कथय**=वद, **इत्थम्=**एवं-प्रकारेण **तं=**हनुमन्तं **भरतोऽब्रवीत्** ॥२९॥

हनुमान् कथयामास काकुत्स्थस्य कथां कविः[4] ।

आत्मानं चावदत् तेन मुमुदे भरतोऽधिकम् ॥३०॥

कविः=सर्वज्ञः **हनुमान् काकुत्स्थस्य**=रामस्य **कथां**=तत्प्रतिपदकवाक्यप्रबन्धं **कथ-यामास=**उवाच । 'कथ=वाक्यप्रबन्धे' लिट् । **आत्मानं च**=स्वरूपमपि **अवदत्=**कथ-यामास **तेन**=उभयवृत्तान्तकथनेन **भरतः अधिकं** यथा तथा **मुमोद**=तुतोष ॥३०॥

---

१. **'प्रददामीति'** इति मू.श्लो.पा । श्रीविश्व.ती च ।
२. **'भरतस्याभवत्समम्'** इति मू.श्लो.पा ।
३. **'कथाः कथय'** इति ब.गो ।
४. **'कथां कपिः'** इति प्र.व्या ।

Rarest Archiver

अनुजं प्रत्युवाचेदं भरतोऽथ सगद्गदम् ।

आयाति किल देवो नः पुरी संस्क्रियतामिति ॥३१॥

अथ=हनुमद्वाक्यश्रवणानन्तरं हे शत्रुघ्न ! **नः**=अस्माकं **देवः**=स्वामी रामः **आयाति किल**=आगच्छतीत्ययं वार्तां वदति । **पुरी**=अयोध्या **संस्क्रियताम्**=अलङ्क्रियताम् । 'डुकृञ्=करणे' कर्मणि लोट् । *'सम्पर्युपेभ्यः करोतौ भूषणे'*[१] इति सुडागमः । **इति इदं**=वचनम् **अनुजं प्रति**=शत्रुघ्नं प्रति **सगद्गदं** यथा तथा **उवाच** ॥३१॥

किङ्कराणां सहस्रैश्च शोधयामास तां पुरीम्[२] **।**

अप्यलङ्कारयामास शत्रुघ्नो भरताज्ञया ॥३२॥

शत्रुघ्नः भरताज्ञया किङ्कराणां=भृत्यानां **सहस्रैश्च**=सहस्रैरपि **तां पुरीम्**=अयोध्यां प्रथमं **शोधयामास**=निर्मलाम् अकरोत् । अनन्तरं **अलङ्कारयामास अपि**=अलङ्कृताम् अपि कारयामास ॥३२॥

[३]**स्वामी राम उपायाति**[४] **पश्यामैनं सुदुर्लभम् ।**

इति ब्रुवाणा आजग्मुः पौरा जानपदा अपि ॥३३॥

पुरे भवाः=**पौराः** जनपदेषु भवाः=**जानपदा अपि**=जनाः **स्वामी रामः उपायाति**= अयोध्यासमीपं प्राप्नोति । **सुदुर्लभम्**=अत्यन्तं लब्धुमशक्यम् **एनं**=रामं **पश्याम**= पश्येम । 'दृशेः' लोटि उत्तमपुरुषे बहुवचनम् । **इति ब्रुवाणाः**=वदन्तः सन्तः **आजग्मुः** =भरतं प्रापुः ॥३३॥

भरतो निर्ययौ[५] **गृह्णन् पादुके मन्त्रिभिर्वृतः**[६] **।**

सस्त्रीबालैः[७] **सर्ववर्णैः परीतो मातृभिश्च सः ॥३४॥**

---

१. अष्टाध्यायी ६।१।१३७. पा.सूत्रम् ।

२. अ)**'सहस्रैः स शोधयामास वै पुरीम्'** इति मू.श्लो.पा । आ)**'सहस्रैः स शोधयामास तां पुरीम्'** इति प्र.व्या । ब.गो च ।

३. इतः पूर्वं प्र.व्या.सं.पा पाठेऽर्धं पद्यमधिकं पठ्यते– **'रामो गङ्गामथ प्राप्य तताराऽशु सकिङ्करः'** ।

४. **'उपयातः पश्याम'** इति मू.श्लो.पा । प्र.व्या । ब.गो च ।

५. **'भरतोऽभिययौ'** इति ब.गो ।

६. **'मन्त्रिभिर्युतः'** इति ब.गो ।

७. **'सस्त्रीबालः'** इति प्र.व्या ।

Rarest Archiver

मन्त्रिभिः=सचिवैः **वृतः**=परिवृतः **सस्त्रीबालैः सर्ववर्णैः**=ब्राह्माणादिभिः **मातृभिश्च**= कौसल्यादिभिरपि **परीतः**=परिवारितः रामस्य **पादुके गृह्णन्**=उपाददानः **सः भरतः निर्ययौ**=रामं प्रत्युज्जगाम ॥३४॥

हनूमतो मुखं वीक्ष्य बाष्पाक्षो भरतोऽब्रवीत् ।

कच्चित् कपीन्द्र कापेयी नेयं चपलता तव ॥३५॥

बाष्पाक्षः=आनन्दाश्रुनेत्रः **भरतः हे कपीन्द्र**=हनुमन् ! **इयं**=रामः प्राप्त इति वाक् **कापेयी**=कपीनां विद्यमाना **तव चपलता**=चञ्चलता **न कच्चित्**=न भवति किम् ? इति **हनुमतो मुखं वीक्ष्य अब्रवीत्** । 'रामागमनाभावे' अपि 'राम आगत' इति कपीनां चाञ्चल्येन वदसि किम्?' इति भावः ॥३५॥

कच्चिदार्यस्य पादाब्जं सेविष्येऽद्य सुदर्लभम् ।

कच्चिन्मे सफलं जन्म कच्चिद् भूर्लप्स्यते पतिम् ॥३६॥

हे कपीन्द्र ! अहं **सुदुर्लभं**=अभक्तैः प्राप्तुमशक्यं **आर्यस्य**=रामस्य **पादाब्जं**=पाद–कमलम् **अद्य**=इदानीं **सेविष्ये**=कच्चित् नमस्यामि । 'षेवृ=सेवने' लृट् उत्तमपुरुषे एकवचनम् । **मे**=मम **जन्म**=उत्पत्तिः **सफलं**=सप्रयोजनं **कच्चिद्**=भविष्यति किं ? **भूः** =भूमिः **पतिं**=स्वामिनं **लप्स्यते कच्चित्**=यास्यति किं ? 'कच्चित् कामप्रवेदन'[१] इति अमरोक्तेः । किंशब्दार्थे कच्चिदित्यव्ययम् ॥३६॥

इत्युक्तो हनुमान् प्रोचे पश्येमान् पुष्पितान्[२] द्रुमान् ।

अकालेऽप्यधुना सौम्य सामीप्यात् तेऽग्रजन्मनः ॥३७॥

इति=पूर्वोक्तप्रकारेण भरतेनोक्तो **हनुमान् हे सौम्य**=भरत ! **अकालेऽपि**=पुष्पोत्पत्ति–कालाभावेऽपि **अधुना**=इदानीं **ते**=तव **अग्रजजन्मनः**=रामस्य **सामीप्यात्**=सान्निध्यात् निमित्तात् **पुष्पितान्**=सञ्जातपुष्पान् **इमान्**=पुरतःस्थितान् **द्रुमान्**=वृक्षान् **पश्य**=अव–लोकय । **इति प्रोचे** ॥३७॥

---

१. अमरकोशे नोपलभ्यते ।

२. अ) **'पुष्पितान्वने'** इति मू.श्लो.पा । आ) **'पुष्पितद्रुमान्'** इति प्र.व्या ।

Rarest Archiver

पांसु दाशरथेः[1] पश्य व्यश्नुवानं[2] दिशो दश ।

किङ्कराणां त्वदार्यस्य हरीणां रभसोत्थितम् ॥३८॥

हे भरत ! **त्वदार्यस्य**=तवाग्रस्य **दाशरथेः**=रामस्य **किङ्कराणां**=भृत्यानां **हरीणां**=कपीनां **रभसा**=वेगेन **उत्थितम्**=उत्पन्नं **दश दिशः** कर्म **व्यश्नुवानं**=व्याप्नुवानं, प्रसरन्तम् इति यावत् । **पांसुं**=रजः **पश्य** 'धूळिः पांसुर्ना न द्वयोः रजः'[3] इत्यमरः ॥३८॥

इमं किलकिलाशब्दं कपीनां कौतुकोद्भवम् ।

अवधारय वीर त्वं त्वज्ज्येष्ठस्याग्रगामिनाम्[4] ॥३९॥

हे वीर ! त्वं त्वज्ज्येष्ठस्य=रामस्य **अग्रगामिनां**=पुरत आगच्छतां **कपीनां कौतुकोद्भवं**= कुतूहलेन जन्यम् **इमं**=श्रवणप्रत्यक्षसिद्धं **किलकिलाशब्दं**=किलकिलेति ध्वनिं **अवधारय** =शृणु ॥३९॥

पुष्पकं पुष्करे पश्य पुष्करेक्षणवाहनम् ।

सफलीकुरु लोके[5] ते लोचने रामदर्शनात् ॥४०॥

हे वीर ! **पुष्करे**=अम्बरे 'व्योम पुष्करमम्बरम्'[6] इत्यमरः । **पुष्करेक्षणवाहनं**=कमल–नेत्रस्य रामस्य गमनसाधनं **पुष्पकं**=विमानं **पश्य** । **लोके**=जगति **रामदर्शनात्**=रामाव–लोकनात् **ते लोचने**=नेत्रे कर्म **सफलीकुरु**=फलसहिते कुरु ॥४०॥

आर्यस्याङ्के स्मितमुखीम् आर्यां किं सौम्य वीक्षसे[7] ।

आर्यापार्श्वे विनीतं तं लक्ष्मणं वीक्षसे नु किम् ॥४१॥

हे सौम्य=भरत ! **आर्यस्य**=तवाग्रजस्य रामस्य **अङ्के**=उत्सङ्गे स्थितां **स्मितमुखीं**=मन्द –हासयुक्तमुखीं **आर्याम्**=पूज्यां सीतां **वीक्षसे किं**=पश्यसि किं[8]? **आर्यापार्श्वे**=राम दक्षिणभागे **विनीतं**=नम्रं **तं**=प्रसिद्धं **लक्ष्मणं नु** ईदानीं **वीक्षसे किम्**=अवलोकयसि किम्? ॥४१॥

---

१. **'दाशरथे पश्य'** इति ब.गो । २. **'व्याप्नुवानम्'** इति मू.श्लो.पा । श्रीविश्व.ती च ।
३. अ.कोशे.२.का.क्षत्रियवर्गे.५६४.श्लोकः । ४. अ) **'अग्रयायिनाम्'** इति मू.श्लो.पा । आ)**'अग्रगामिनम्'** इति प्र.व्या ।
५. **'लोले ते'** इति मू.श्लो.पा । प्र.व्या । ब.गो च । ६. अ.कोशे.१.का.व्योमवर्गे.८२.श्लोकः ।
७. **'सौम्य पश्यसि'** इति ब.गो । ८. **'अवलोकयसि किम्?'** इति वा.वे ।

Rarest Archiver

कपीन्द्रराक्षसेन्द्रौ त्वं तौ सुग्रीवविभीषणौ ।

पश्य देवस्य पार्श्वस्थौ किङ्करौ सुप्रियङ्करौ ॥४२॥

हे भरत ! **त्वं सुप्रियङ्करौ**=सुष्टुप्रियङ्कुर्वाणौ **किङ्करौ=**भृत्यौ **देवस्य**=रामस्य **पार्श्वस्थौ**= सव्यदक्षिणभागयोः विद्यमानौ **कपीन्द्रराक्षसेन्द्रौ**=कपिराक्षसस्वामिनौ **तौ=**प्रसिद्धौ **सुग्रीव –विभीषणौ** कर्म **पश्य**=अवलोकय ॥४२॥

इति मारुतिवाक्येन वर्ण्यमानं स्वदैवतम् ।

गुरोरिवोपदेशेन ददर्श भरतो विभुम् ॥४३॥

भरतः इति=पूर्वोक्तप्रकारेणैव **मारुतिवाक्येन**=हनुमद्वाक्येन **वर्ण्यमानं**=प्रतिपाद्यमानं[१] रामं **गुरोः उपदेशेन=**वाक्येन **स्वदैवतमिव**=स्वप्रियं यथा तथा **विभुं**=रामं **ददर्श** ॥४३॥

श्यामलं कोमलं रामं विमलं कमलेक्षणम् ।

मन्दहासेन्दुमालक्ष्य ननाम भरतो भुवि ॥४४॥

भरतः श्यामलं=इन्द्रनीलश्यामवर्णं **कोमलं=**मृदुदेहं **विमलं**=दोषरहितं **कमलेक्षणं=** पद्मनेत्रं **मन्दहासेन्दुं=**मन्दस्मिताख्यचन्द्रयुक्तं **रामम् आलक्ष्य**=सम्यक् दृष्ट्वा **भुवि ननाम**=ववन्दे ॥४४॥

सीताकान्तं रावणारिं रामं पश्यत पश्यत ।

उत्थितं सर्वतो वाक्यम् इत्येवं विश्वमङ्गलम्[२] ॥४५॥

सीताकान्तं=सीतापतिं **रावणारिं=**रावणसंहारकं **रामं पश्यत पश्यत**=अवलोकयत अवलोकयत । **इत्येवं=**एवंप्रकारेण **विश्वमङ्गलकरं=**जगन्मङ्गलकरं **वाक्यं सर्वतः=**सर्वत्र **उत्थितम्**=उत्पन्नम् ॥४५॥

भासमानं विमानाग्रे नेमुः सर्वाः प्रजाः प्रभुम्[३] ।

तमांसि परिमुष्णन्तम् उदयाद्रौ रविं यथा ॥४६॥

---

१. **'प्रतिचोद्यमानम्'** इति दू.कृ.श्री ।
२. **'लोकमङ्गलम्'** इति मू.श्लो.पा ।
३. अ) **'प्रजाः शुभम्'** इति प्र.व्या । आ) **'प्रजाः विभुम्'** इति विश्व.ती ।

Rarest Archiver

सर्वाः प्रजाः तमांसि=अन्धकारान् **परिमुष्णन्तम्=**अपहरन्तम् **उदयाद्रौ=**उदयपर्वते भास –मानं **रविं यथा=**सूर्यं येन प्रकारेण नमन्ति तथा **विमानाग्रे भासमानं**=भ्राजमानं **प्रभुं** =रामं **नेमुः**=ववन्दिरे ॥४६॥

अवातरत् पुराभ्यासे पुराणपुरुषस्ततः ।

सोऽभवत् सर्वजगतां चित्तनेत्रमहोत्सवः[१] ॥४७॥

ततः=प्रजानमनानन्तरं **पुराणपुरुषः=**आदिपुरुषः **पुराभ्यासे**=अयोध्यासमीपे **अवातरत्=** अवततार । 'तॄ=प्लवनतरणयोः' लङ् । **सः**=रामः **सर्वजगतां**=सर्वजनानां **चित्तनेत्र–महोत्सवः**=मनोनयनमहोत्सवकरः **अभवत्** ॥४७॥

चरणावरुणाब्जाभौ ववन्दे विश्ववन्दितौ ।

रामानुजोऽथ रामस्य धन्योऽस्मीत्यनुचिन्तयन् ॥४८॥

अथ=भूमाववतारानन्तरम् अहं **धन्यः**=कृतकृत्यः **अस्मि**=भवामि **इति अनुचिन्तयन्**= सम्यक् स्मरन् **रामानुजः**=भरतः **विश्ववन्दितौ=**जगता नमस्कृतौ **अरुणाब्जाभौ=** रक्तकमलसदृशौ **रामस्य चरणौ** कर्म **ववन्दे**=ननाम ॥४८॥

आकृष्याश्लिष्यमाणस्य भरतस्य जगद्भृता ।

भावः कश्चिदपूर्वोऽभूत् लज्जासम्भ्रमभक्तिभिः[२] ॥४९॥

जगद्भृता=जगद्धारणपोषणयोः कर्त्रा रामेण **आकृष्य**=समीपं प्राप्य **आश्लिष्यमाणस्य**= परिरभ्यमाणस्य **भरतस्य लज्जा सम्भ्रमभक्तिभिः**=मात्रापराधजन्यह्रिया **सम्भ्रमेण**=आलि – ङ्गनजन्यसन्तोषेण, सुदृढस्नेहेन च **अपूर्वः**=पूर्वमनुत्पन्नः **कश्चित्**=कोऽपि **भावः=** अभिप्रायः, देहचेष्टा वा **अभूत्** ॥४९॥

सीताया लक्ष्मणस्यापि ववन्दे चरणावसौ ।

परिरेभे हरिश्रेष्ठान् ससुग्रीवविभीषणान् ॥५०॥

असौ=भरतः **सीतायाः चरणौ ववन्दे** । **लक्ष्मणस्य चरणावपि ववन्दे** । **ससुग्रीव–विभीषणान्=**सुग्रीवविभीषणसहितान् **हरिश्रेष्टान्**=कपिश्रेष्ठान् **परिरेभे=**आलिलिङ्गे ॥५०॥

---

१. **'नेत्रचित्तमहोत्सवः'** इति प्र.व्या । ब.गो च ।

२. **'सम्भ्रमभक्तितः'** इति मू.श्लो.पा ।

Rarest Archiver

शत्रुघ्नोऽप्येवमेवैतान् ववन्दे परया मुदा ।

स्वागतं रामदेवेति प्रोचुः प्राञ्जलयो जनाः[१] ॥५१॥

शत्रुघ्नोऽपि परया मुदा=श्रेष्ठसन्तोषेण **एवमेव** भरतो यथा तथा **एतान्**=रामादीन् **ववन्दे** । **प्राञ्जलयः जनाः हे रामदेव ! स्वागतं**=सुस्वागतम् **इति प्रोचुः** ॥५१॥

स्मितावलोकैः सम्पूज्य लोकांस्तांल्लोकनायकः ।

ससीतालक्ष्मणो मातॄः ववन्दे सकला अपि ॥५२॥

लोकनायकः=जगन्नाथो रामः **तान्=**प्राञ्जलीन् **लोकान्=**जनान् **स्मितावलोकैः=**स्मित –युक्तदर्शनैः **सम्पूज्य**=बहुमान्य **ससीतालक्ष्मणः**=सीतालक्ष्मणाभ्यां सहितः सन् **सकलाः**=समस्ताः **अपि मातॄः**=कौसल्यादिजननीः कर्म **ववन्दे=**ननाम ॥५२॥

पादुके पादयोः कृत्वा रामस्य भरतोऽब्रवीत्[२] ।

निवेदयामि देवेश त्वद्राज्यं पालितं मया ॥५३॥

भरतः रामस्य पादयोः 'सप्तमी द्विवचनं' । **पादुके** कर्म **कृत्वा**=निवेश्य **हे देवेश**= राम ! **त्वद्राज्यं मया पालितं=**रक्षितं **निवेदयामि**=विज्ञापयामि इति **अब्रवीत्** । 'विद= ज्ञाने' णिजन्तात् लट् ॥५३॥

कोशकोष्ठबलाद्यं[३] च धनं जीवधनंच ते ।

स्वामिंस्तव प्रसादेन कृतं शतगुणं[४] मया ॥५४॥

हे स्वामिन्=राम ! **ते**=तव सबन्धि **कोशकोष्ठबलाद्यं कोशः**=धननिक्षेपस्थलं **कोष्ठं=** गृहविशेषः **बलं**=सेना तान्येव आद्यानि यस्य तत् **धनं च**=द्रव्यमपि **जीवधनं च=** गवादिपशुसमूहश्च **तव प्रसादेन**=अनुग्रहेण तव गमनसमये स्थितकोशाद्यपेक्षया शतं गुणा आवृत्तयो यस्य तत् **शतगुणं**=शतावृत्त्योपेतं **मया कृतं=**सम्पादितम् ॥५४॥

तथा ब्रुवाणं तं दृष्ट्वा वानरा राक्षसाः परे ।

रुरुदुर्विक्लवास्तस्य[५] प्रावण्यार्जवभक्तिभिः ॥५५॥

---

१. **'प्राञ्जलयः प्रजाः'** इति मू.श्लो.पा । २. **'रामानुजोऽब्रवीत्'** इति ब.गो । ३. **'कोशराष्ट्रबलाद्यं'** इति मू.श्लो.पा । ४.**'दशगुणम्'** इति मू.श्लो.पा. प्र.व्या च । शतगुणं तु रामायणाननुगुणमिति ब.गो.मतम् ।५.**'तत्र लावण्यार्जव'** इति मू.श्लो.।

Rarest Archiver

वानराः=सुग्रीवाद्याः **राक्षसाः**=विभीषणाद्याः **परे**=अन्ये पौरा जानपदाश्च **तथा**=पूर्वोक्त–प्रकारेण **ब्रुवाणं**=वदन्तं भरतं **दृष्ट्वा**=निरीक्ष्य **तस्य**=भरतस्य **प्रावण्यं**=विनयावनतत्वम् **आर्जवं**=मनोवाक् कर्मसु एकप्रकारत्वं **भक्तिः**=माहात्म्यज्ञानपूर्वकसुदृढस्नेहः ताभिः **प्रावण्यार्जवभक्तिभिः विक्लवाः**=द्रवीभूतचित्ताः सन्तः **रुरुदुः**=आनन्दाश्रु मुमुचुः ॥५५॥

कृत्वा प्रसादं निर्व्याजं कैकेयीतनये प्रभुः ।

वसिष्ठं तं कुलगुरुम् [१]आर्चिचज्जगतां गुरुः ॥५६॥

जगतां=चतुर्दशभुवनानां **गुरुः**=हितोपदेष्टा **प्रभुः**=रामः **कैकेयीतनये**=भरते **निर्व्याजं**=निष्कपटं **प्रसादम्**=अनुग्रहं कृत्वा **कुलगुरुम्**=इक्ष्वाकुकुलस्य पुरोधसं **तं**=प्रसिद्धं **वसिष्ठम् आर्चिचत्**=अपूजयत् । 'अर्च=पूजायां' णिजन्तात् लुङ् ॥५६॥

धनदं प्रति याहीति पुष्पकं सन्नियुज्य[२] सः ।

सह सर्वैरयोध्याया बाह्योपवनमाययौ ॥५७॥

सः=रामः **पुष्पकं**=विमानं **धनदं प्रति**=कुबेरं प्रति **याहि**=गच्छ । **इति सन्नियुज्य**=सम्प्रेष्य **सर्वैः**=जनैः सह **अयोध्यायाः** नगर्याः **बाह्योपवनम् आययौ**=प्राप ॥५७॥

प्रार्थितो भरतेनेशः सर्वप्रकृतिभिस्तथा ।

सिंहासनमथाध्यास्त रामः साम्राज्यलक्षणम् ॥५८॥

अथ=वनप्राप्त्यनन्तरं **भरतेन तथा सर्वप्रकृतिभिः**=अमात्यादिभिः **प्रार्थितः**=याचितः **ईशः**=समर्थः **रामः साम्राज्यलक्षणं**=साम्राज्यचिह्नं **सिंहासनम् अध्यास्त**=सिंहासने उपविष्टः । *'अधिशीङ्स्थाऽऽसां कर्म'*[३] इति सिंहासनस्य कर्मत्वम् ॥५८॥

सर्वाङ्गसुन्दरं रूपं वानर्यो वानरा अपि ।

भेजुर्योगानुभावेन तस्मिन् जनसमागमे ॥५९॥

तस्मिन्=पूर्वोक्ते **जनसमागमे**=जनसमूहे **वानराः**=सुग्रीवाद्याः **वानर्यः**=वानरस्त्रियः **अपि** वानर**रूपं** त्यक्त्वा **योगानुभावेन**=अणिमाद्युपायेन सामर्थ्येन **सर्वाङ्गसुन्दरं**=सर्वावयवैः

---

१. **'आर्चयज्जगताम्'** इति मू.श्लो.पा । ब.गो च । चुरादेरर्चधातोर्लङि **'आर्चयत्'** इति रूपम् । लुङि 'आर्चिचत्' इति ।
२. **'सन्नियोज्य सः'** इति ब.गो ।
३. अष्टाध्यायी १।४।४६ पा.सूत्रम् ।

Rarest Archiver

मनोहरं **रूपं**=विग्रहं **भेजुः**=प्रापुः ॥५९॥

अलङ्कारांश्चकाराशु रामलक्ष्मणयोस्तदा ।

सशत्रुघ्नोऽथ भरतो हरीणां रक्षसामपि ॥६०॥

सशत्रुघ्नः भरतः तदा=तस्मिन् काले **रामलक्ष्मणयोः** अलङ्कारान् **आशु चकार** । **अथ**= अनन्तरं **हरीणां**=कपीनां **रक्षसां**=राक्षसानाम् **अपि अलङ्कारांश्चकार** ॥६०॥

जानकीं तामलञ्चक्रुः सर्वा दशरथस्त्रियः ।

कौसल्या भूषयामास स्वयं वानरवल्लभाः ॥६१॥

सर्वाः=समस्ताः **दशरथस्त्रियः**=दशरथपत्न्यः **जानकीं**=जनकसुतां **तां** सीताम् **अलञ्च –क्रुः=**अलङ्कारयुक्तामकुर्वन् । **कौसल्या**=राममाता **स्वयं वानरवल्लभाः**=वानरपत्नीः कर्म **भूषयामास=**अलञ्चकार ॥६१॥

स्नाताः सुवस्त्राभरणाः स्रग्विणश्चारुकुण्डलाः ।

विरेजुर्देवसङ्काशा वानर्यो वानरा अपि ॥६२॥

स्नाताः=कृताभिषेकाः **सुवस्त्राभरणाः**=शोभनवस्त्राभरणयुक्ताः **स्रग्विणः**=शिरसि धृत – पुष्पमालाः **चारुकुण्डलाः=**मनोहरकर्णाभरणाः **देवसङ्काशाः**=देवतुल्याः **वानराः विरेजुः** =व्यराजन् । तथा **सृग्विण्यः वानर्योऽपि**=वानरस्त्रियोऽपि **विरेजुः**=अन्यत्समानम् ॥६२॥

उपायनान्युपादाय सर्वाश्च नगराङ्गनाः ।

सीतां सुग्रीवपत्नीं च दृष्ट्वा मुमुदिरे मुहुः ॥६३॥

सर्वाः=समस्ताः **नगराङ्गनाश्च**=नगरस्त्रियोऽपि **उपायनानि** करान् **उपादाय=**गृहीत्वा **सीतां सुग्रीवपत्नीं=**रुमां तारां च **मुहुः=**पुनः पुनः **दृष्ट्वा**=अवलोक्य **मुमुदिरे**=तुतुषुः ॥६३॥

सुमन्त्रो मन्त्रयामास विशोकविजयान्वितः ।

अभिषेकाय रामस्य भरतेन प्रचोदितः ॥६४॥

भरतेन प्रचोदितः=प्रेरितः विशोकविजयनामकाभ्यां मन्त्रिभ्यामन्वितः **विशोकविजया – न्वितः सुमन्त्रः**=मन्त्री **रामस्य अभिषेकाय मन्त्रयामास=**विचारयामास ॥६४॥

Rarest Archiver

शत्रुघ्नेन समादिष्टः सुमन्त्रो रथमानयत् ।

रामस्य पुरतो दीप्तं[1] प्रोद्यत्प्रद्योतनप्रभम् ॥६५॥

शत्रुघ्नेन समादिष्टः=आज्ञप्तः **सुमन्त्रः प्रोद्यत्प्रोद्यतनप्रभं**=उद्यदादित्यकान्तिसदृशकान्तिं **दीप्तं**=प्रकाशमानं **रथं रामस्य पुरतः**=अग्रे **आनयत्**=आनिनाय ॥६५॥

आरुरोह रथं रामो रम्यया सीतया सह ।

शिखरं हेमशैलस्य विद्युतेव बलाहकः ॥६६॥

विद्युता=तटिता सह **बलाहकः**=मेघः **हेमशैलस्य**=मेरोः शिखरशृङ्गं यथा आरोहति तथा **रामः रमया**=रमास्वरूपया **सीतया सह रथम् आरुरोह**=आरूढः ॥६६॥

दिव्याकल्पाम्बरधरौ दीप्तकुण्डलमण्डितौ[2] ।

रामं मारुतिसुग्रीवौ अनुयातौ गजेन्द्रगौ ॥६७॥

दिव्याकल्पाम्बरधरौ=अनर्घ्याभरणवस्त्रधारिणौ **दीप्तकुण्डलमण्डितौ**=भ्राजमानकर्णाभर–णालङ्कृतौ **गजेन्द्रगौ**=गजेन्द्रारूढौ **मारुतिसुग्रीवौ रामम् अनुयातौ**=अनुजग्मुतुः ॥६७॥

गजाश्वादीनथारुह्य वानराः सपरिग्रहाः ।

विविशुर्नगरीं ते च राक्षसाः सविभीषणाः ॥६८॥

अथ सपरिग्रहाः=पत्नीभिः सहिताः **वानराः गजाश्वादीन् आरुह्य नगरीम्**=अयोध्यां **विवि–शुः । सविभीषणाः ते**=प्रसिद्धाः **राक्षसाश्च गजाश्वादीन् आरुह्य नगरीं विविशुः** ॥६८॥

तूर्यदुन्दुभिनिर्घोषाः[3] शङ्खशब्दविमिश्रिताः ।

जज्ञिरे जयशब्दाश्च पुरीं प्रविशति प्रभौ ॥६९॥

प्रभौ=समर्थे रामे **पुरीम्**=अयोध्यां **प्रविशति सति शङ्खशब्दविमिश्रिताः**=शङ्खस्वनयुक्ताः **तूर्यदुन्दुभिनिर्घोषाः**=तूर्यभेरीध्वनयः **जज्ञिरे**=उत्पन्नाः । **जयशब्दाश्च**=जय जयेति शब्दा अपि **जज्ञिरे** ॥६९॥

---

१. **'दिव्यम्'** इति मू.श्लो.पा । ब.गो च । २. **'कुण्डलधारिणौ'** इति ब.गो.सं.पा । ३. **'निर्घोषैः'** इति ब.गो.सं.पा ।

Rarest Archiver

तं सभार्यमुपायान्तं भ्रातृभिः परिवारितम् ।

प्रत्युद्ययुः प्रहृष्टास्ते पौरा मङ्गलपाणयः ॥७०॥

मङ्गलं=मङ्गलकरं द्रव्यं पाणिषु येषान्ते **मङ्गलपाणयः प्रहृष्टाः**=सन्तुष्टाः सन्तः पुरे भवाः =**पौराः ते**=प्रसिद्धा जनाः **भ्रातृभिः**=भरतादिभिः **परिवारितं**=परिवेष्टितं **सभार्यं**=स्त्रिया सहितम् **उपायान्तं**=समीपे आगच्छन्तं **तं**=रामं **प्रत्युद्ययुः**=प्रतिजग्मुः ॥७०॥

हर्म्यस्थाः पुररामास्तं रामं स्वरमणीयुतम् ।

अवेक्षमाणाः सुप्रीता लाजपुष्पाण्यवाकिरन् ॥७१॥

हर्म्यस्थाः=प्रासादे स्थिताः 'हर्म्यादिर्धनिनां वास'[1] इत्यमरः । **पुररामाः**=नगरस्त्रियः **स्वरमणीयुतं**=सीतया युक्तं **तं रामम् अवेक्षमाणाः**=पश्यन्तः **सुप्रीताः** सत्यः **लाज–पुष्पाणि**=लाजान् पुष्पाणि च **अवाकिरन्**=शिरसि निचिक्षिपुः ।'कॄ=विक्षेपे' लङ् ॥७१॥

सुग्रीवस्य च तत् सख्यं वीर्यं भक्तिं च मारुतेः ।

सकौतुकेभ्यो मन्त्रिभ्यो जगाद जगदीश्वरः ॥७२॥

जगदीश्वरः=रामः **सकौतुकेभ्यः**=कुतूहलसहितेभ्यः **मन्त्रिभ्यः**=सचिवेभ्यः चतुर्थीबहु – वचनम् । **सुग्रीवस्य तत्**=प्रसिद्धं **सख्यं**=सखित्वं **जगाद** । **मारुतेः**=हनुमतः **वीर्यम्**= अध्यवसायगामित्वं **भक्तिं च जगाद**=उवाच ॥७२॥

अन्तःपुरं स्वतातस्य पुरन्दरपुरोपमम् ।

हेमरत्नमयं दिव्यं प्रविश्य निषसाद सः ॥७३॥

सः=रामः **दिव्यम्**=अलौकिकं **हेमरत्नमयं**=सुवर्णरत्नप्रचुरं **पुरन्दरपुरोपमं**=इन्द्रपुरसदृशं **स्वतातस्य**=दशरथस्य **अन्तःपुरं**=अवरोधं **प्रविश्य,** आसने **निषसाद**=उपविवेश । 'षद्लृ =विशरणगत्यवसादनेषु' लिट् ॥७३॥

रामाज्ञयाऽथ सुग्रीवं भरतः प्रापयद् गृहम् ।

मुक्तावैडूर्यसङ्कीर्णम् अशोकवनिकान्तरे ॥७४॥

---

१. अ.कोशे.२.का.पुरवर्गे.३१.श्लोकः ।

Rarest Archive

अथ=अन्तःपुरप्रवेशानन्तरं **भरतः रामाज्ञया अशोकवनिकान्तरे**=अशोकवनमध्ये विद्य–मानं **मुक्तावैडूर्यसङ्कीर्णं**=मुक्तावैडूर्याख्यरत्नमयं **गृहं** कर्म **सुग्रीवं प्रापयत्**=प्रावेशयत् ॥७४

वसिष्ठस्तापसश्रेष्ठः सम्भारान् [१]समुपादिशत् ।

रामाभिषेकलोलानां प्रकृतीनां मते स्थितः ॥७५॥

तापसश्रेष्ठः=मुनिश्रेष्ठो **वसिष्ठः रामाभिषेकलोलानां**=रामाभिषेकसक्तानां **प्रकृतीनाम्**= अमात्यादीनां **मते**=सम्मते **स्थितः** सन् रामाभिषेकाय **सम्भारान्**=सामग्रीः **समुपादि – शत्**=उपदिदेश ॥७५॥

शुभान् व्रीहिमहाव्रीहिप्रियङ्गुयवसम्भवान् ।

[२]तोक्मभेदान् दधि मधु [३]सर्पींष्यन्यांश्च सर्वशः ॥७६॥

सम्भारानेवाह– **शुभानिति** । **शुभान्**=शोभनान् **व्रीहिमहाव्रीहिप्रियङ्गुयवसम्भवान् व्रीहिः** प्रसिद्धः **महाव्रीहिः**=धान्यविशेषः **प्रियङ्गुः**=नवणे* **यवः**=जवे **व्रीहि** महाव्रीहिप्रियङ्गुयवे–भ्यः उत्पन्नान् **तोक्मभेदान्**=त्वग्विशेषान् **दधिमधुसर्पींषि दधि** प्रसिद्धं **मधु**=मक्षिकं **सर्पि**=घृतं **दधिमधुसर्पींषि अन्यान् सर्वशः**=समस्तान् उपादिशत् ॥७६॥

अप आतपवर्ष्याश्च[४] नानातीर्थोदकानि च ।

न्यग्रोधौदुम्बराश्वत्थप्लक्ष[५]क्वाथाम्बु चोत्तमम् ॥७७॥

अपः कर्म **उदकानि आतपवर्ष्यान्**=आतपसहिते वर्षे विद्यमानान्, यद्वा **'अप'** इत्यस्य विशेषणम् **आतपवर्ष्याश्चेति** । आतपे सति यद्वर्षमागच्छति तत्सम्बन्धिनीरित्यर्थः । **नानाती –र्थोदकानि च न्यग्रोधौदुम्बराश्वत्थप्लक्षान् न्यग्रोधो**=वटः **औदुम्बरः**=अत्ति **प्लक्ष**= पर्कटिः **उत्तमं**=श्रेष्ठं **क्वाथाम्बु**=उष्णोदकं **च** एतत्सर्वं वसिष्ठः समुपादिशत् ॥७७॥

किङ्कराणां सहस्राणि तान् सम्भारान् समाहरन्[६] ।

[७]वीरा वारिधिवार्यर्थं सुग्रीवस्याऽज्ञया ययुः ॥७८॥

---

१. **'सम्भारानाशु चादिशत्'** इति मू.श्लो.पा । २. **'त्वक्प्रभेदान्'** इति मू.श्लो.पा । ३. **'सर्पिरन्यांश्च'** इति च मू.श्लो.पा । *. इत्यर्थः कर्णाटकभाषायामुक्तः । ४. **'आतपवर्षाच्च'** इति मू.श्लो.पा । ५.**'न्यग्रोधोदुम्बराप्लक्षाश्वत्थ-'** इति मू.श्लो.पा । ६. **'समानयन्'** इति ब.गो.सं.पा । ७. **'वानरा वार्धिवार्यर्थम्'** इति ब.गो । प्र.व्या च ।

Rarest Archive

किङ्कराणां=भृत्यानां **सहस्राणि** कर्तॄणि **तान्**=वसिष्ठोक्तान् **सम्भारान् समाहरन्**= उपानयन् । **वारिधिवार्यर्थं**=चतुर्णां समुद्राणां उदकमानेतुं **सुग्रीवस्याऽज्ञया वीराः**=समर्थाः चत्वारः कपयः **ययुः**=जग्मुः ॥७८॥

सुषेणो जलमानिन्ये पूर्वाब्धेर्गवयस्तथा ।

पश्चिमादृषभो याम्यात् नल उत्तरवारिधेः ॥७९॥

सुषेणः पूर्वाब्धेः=पूर्वसमुद्रात् **जलम् आनिन्ये**=आनीतवान् । **तथा गवयः पश्चिमात् अब्धेः जलमानिन्ये** । **ऋषभः याम्यात्**=दक्षिणसमुद्रात् **जलम् आनिन्ये** । **नलः उत्तर–वारिधेः**=उत्तरसमुद्रात् **जलम् आनिन्ये** ॥७९॥

शातकुम्भमयैः कुम्भैः मणिश्रेणिप्रदीपितैः ।

पल्लवावरणं वारि ते सहेल[१]**मुपानयन् ॥८०॥**

ते=सुषेणाद्याश्चत्वारः **मणिश्रेणिप्रदीपितैः**=रत्नसमूहप्रकाशितैः **शातकुम्भमयैः**=सुवर्ण–विकृतैः[२] **कुम्भैः**=कलशैः **पल्लवावरणं**=किसलैराच्छादितं[३] **वारि**=उदकं **सहेलं**=सलीलं यथा तथा **उपानयन्**=आनिन्युः ॥८०॥

[४]**अभिषेकोद्यमे रामः ससीतो जनसंसदि ।**

विरेजे तारकगणैः[५] **चन्द्रश्चन्द्रिकया यथा ॥८१॥**

अभिषेकोद्यमे=अभिषेकप्रयत्नकाले **ससीतः**=सीतया सहितः रामः **जनसंसदि**=जन–समूहे दिवि **तारकगणैः**=नक्षत्रसमूहैः **चन्द्रिकया**=कान्त्या सहितः **चन्द्रः** यथा तथा **विरेजे**=रराज ॥८१॥

[६]**कार्येऽतिदक्षः शत्रुघ्नो सुहृदोऽत्र न्यमन्त्रयत् ।**

अभिषेकोत्सवं कुर्वन् ऋत्विजश्च पुरोहितान् ॥८२॥

---

१. **‘सलोलमुपानयन्’** इति मू.श्लो.पा । २. **‘सुवर्णविकारैः’** इति दू.कृ.श्री । ३. **‘पल्लवैराच्छादितम्’** इति वा.वे ।
४. ‘इदं समग्रपद्यं कोशेषु न पठ्यते’ इति तु ब.गो मतम् । परन्तु उपलब्धासु मातृकासु इदं पद्यमस्ति । तच्चिन्त्यम् ।
५. **‘तारकगणे’** इति प्र.व्या । ब.गो च । ६. अ) **‘कार्ये दक्षः स शत्रुघ्नः’** इति प्र.व्या । आ) **‘कार्यदक्षोऽत्र’** इति ब.गो ।

Rarest Archiver

कार्ये=कर्तव्यविषये **अतिदक्षः**=अत्यन्तसमर्थः **अभिषेकोत्सवं कुर्वन्**=कारयन् **शत्रुघ्नः अत्र**=अभिषेकविषये **सुहृदः**=अनिमित्तोपकारिणः द्वितीया बहुवचनम् । **ऋत्विजश्च पुरोहितान् न्यमन्त्रयत्**=आह्वयामास ॥८२॥

वसिष्ठो वामदेवश्च जाबालिरुत काश्यपः[1] ।

कात्यायनः[2] सुयज्ञश्च तेऽभिषेकार्थमाययुः ॥८३॥

ते=प्रसिद्धाः शत्रुघ्नेन आहूताः **वसिष्ठादयः** सप्त **अभिषेकार्थमाययुः** ॥८३॥

रामोऽभिषिच्यते नाथ इत्युदन्ते प्रवर्तिते ।

पुरे जनपदे चाऽसीद्[3] अपूर्वोऽयं महोत्सवः ॥८४॥

नाथः=स्वामी **रामः अभिषिच्यते**=अभिषेकयुक्तः क्रियते **इति**=एवंप्रकारेण **उदन्ते**=वृत्तान्ते **प्रवर्तिते**=सर्वत्र व्याप्ते सति **पुरे जनपदे च अपूर्वः**=पूर्वमनुत्पन्नः **अयं**=प्रत्यक्ष–सिद्धः **महोत्सवः आसीत्** ॥८४॥

विश्लेषार्ता रामदेवस्य सर्वे प्रीयन्ते स्मास्याभिषेकप्रसङ्गे ।

घर्मेणाऽर्तास्तोयदर्ताविवाऽप्ते संसारार्ता यद्वदाप्ते विमोक्षे ॥८५॥

॥ इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे पञ्चदशः सर्गः ॥

घर्मेण=उष्णकालेन **आर्ताः**=दुःखिताः **तोयदर्ताविव**=वर्षऋतौ, वर्षाकाले **आप्ते**=प्राप्ते सति यथा **प्रीयन्ते, संसारार्ताः**=संसारेण दुःखिताः **विमोक्षे**=विशेषमोक्षे **आप्ते**=प्राप्ते सति **यद्वत्**=यथा **प्रीयन्ते** तथा पूर्वं **रामदेवस्य विश्लेषार्ताः**=वियोगेन दुःखिताः **सर्वे जनाः** इदानीं **अस्य**=रामदेवस्य **अभिषेकप्रसङ्गे आप्ते सति**=प्राप्ते सति **प्रीयन्ते स्म**=अप्रीयन्त ॥८५॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे पञ्चदशः सर्गः ॥

आरम्भतः श्लोकाः–७५७+८५=८४२

१. '**कश्यपः**' इति प्र.व्या । २. '**कार्त्यायनः**' इति ब.गो.सं.पा । ३. '**चास्मिन्**' इति मू.श्लो.पा ।

Rarest Archiver

Rarest Archiver

॥ अथ षोडशः सर्गः ॥

Rarest Archiver

॥ अथ षोडशः सर्गः ॥

अथाहिमांशावुदयं प्रयाते द्विजैः कृतस्वस्त्ययने समस्तैः ।

[१]महामुनीन्द्रैरुपक्लृप्तमत्र रामो महामण्टपमाप दिव्यम् ॥१॥

अथ परेद्युः **अहिमांशौ**=उष्णकिरणे सूर्ये **उदयम्**=आविर्भावं **प्रयाते**=प्राप्ते सति **समस्तैः** =सकलैः **द्विजैः स्वस्त्ययने**=मङ्गले, पुण्याहवाचने वा कृते सति **रामः अत्र**=अन्तःपुरे **महामुनीन्द्रैः**=वसिष्ठादिभिः **उपक्लृप्तं**=नियमितं **दिव्यम्**=अलौकिकं **महामण्टपं**=महा– शालाम् **आप**=प्राप । 'महामणीन्द्रैः' इति पाठे मणिश्रेष्ठैरुपक्लृप्तं निर्मितमित्यर्थः ॥१॥

[२]सन्मन्त्रतन्त्रान्तरकोविदैस्तैः वसिष्ठपूर्वैरुपकल्प्यमाने ।

[३]महार्घ्यमाणिक्यमहेन्द्रक्लृप्ते सिंहासने दैवतसिंह आस्ते ॥२॥

मण्टपप्राप्त्यनन्तरं **मन्त्राः**=वेदाः **तन्त्राणि**=उत्ताने, प्रोक्षणार्थे च इत्यादि हस्तकरणानि तेषाम् **अन्तराणि** विशेषाः तेषु **कोविदाः**=कुशलाः तैः **सन्मन्त्रतन्त्रान्तरकोविदैः तैः**= प्रसिद्धैः **वसिष्ठपूर्वैः**=ऋषिभिः **उपक्ल्प्यमाने**=नियमिते **महार्घ्यमाणिक्यमणीन्द्रक्लृप्ते**= अनर्घ्यमाणिक्यैः मणिश्रेष्ठैश्च निर्मिते **सिंहासने दैवतसिंहः**=देवोत्तमो रामः **आस्त**= उपाविशत । 'आस=उपवेशने' लङ् ॥२॥

सीता पदैस्तं ललितैरुपेत्य तस्थौ समन्दाक्षममन्दकान्तिः ।

[४]अनन्यलब्धे निजविष्टरार्धे न्यवीविशत् तां परिगृह्य रामः ॥३॥

अमन्दकान्तिः=पूर्णकान्तिः **सीता ललितैः**=कोमलैः **पदैः**=पादप्रक्षेपैः **तं**=रामम् **उपेत्य**= प्राप्य **समन्दाक्षं**=सलज्जं यथा तथा **तस्थौ**=स्थिता ।'मन्दाक्षं ह्रीस्त्रपा व्रीडा'[५] इत्यमरः। **रामः तां**=सीतां **परिगृह्य**=हस्तेन गृहीत्वा **अनन्यलब्धे**=सीताव्यतिरिक्तैः लब्धुमशक्ये[६] **निजविष्टरार्धे**=स्वसिंहासनार्धे **न्यवीविशत्**=उपवेशयामास । 'विश=प्रवे– शने' णिजन्तात् लुङ् । 'विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम्'[७] इत्यमरः ॥३॥

---

१. **'महामणीन्द्रैः'** इति मू.श्लो.पा । २. **'समन्त्रतन्त्रा-'** इति मू.श्लो.पा । ब.गो च । ३. **'महार्घमाणिक्य-'** इति ब.गो ।
४. **'अनन्यलभ्ये'** इति ब.गो । ५. अ.कोशे.१.का.नाट्यवर्गे.२२६.श्लोकः ।
६. **'प्राप्तुमशक्ये'** इति दू.कृ.श्री । ७. अ.कोशे.३.का.नानार्थवर्गे.३२५.श्लोकः ।

Rarest Archiver

भासेव भानुः शिखया शिखीव रेजे तया चन्द्रिकयेव चन्द्रः ।

आस्तां कवीनामिति वाक्प्रसारः श्रीश्रीकमित्रोरुपमा न काचित् ॥४॥

भानुः=सूर्यः **भासेव**=प्रभया यथा राजते **शिखी**=वह्निः **शिखयेव**=ज्वालया यथा राजते 'अर्चिर्हेतिः शिखा स्त्रियाम्'[1] इत्यमरः । **चन्द्रः चन्द्रिकयेव**=ज्योत्स्नया यथा राजते तथा **तया**=सीतया रामः **रेजे**=रराज । **कवीनाम्**=उत्प्रेक्षकाणां **वाक्प्रसारोऽपि**=वाक्– प्रवृत्तिरपि **आस्तां**=तिष्ठतु । किन्तु **श्रीश्रीकमित्रोः**=लक्ष्मीलक्ष्मीपत्योः 'कमिता कामुकः कान्त'[2] इत्यमरः । **काचित्**=काऽपि **उपमा**=सादृश्यं नास्तीति अहं मन्ये ॥४॥

उशीरगुग्गुल्वगरुप्रवृद्धो धूमो वितानेन निवार्यमाणः ।

रत्नप्रदीपैः खचितः सविद्युत् नवाम्बुदाडम्बरमाललम्बे ॥५॥

उशीरः=बालदबेरु **अगरु**=चन्दनकाष्ठविशेषः उशीरश्च गुग्गुलुश्च अगरुश्च तैः **प्रवृद्धः**= अभिवृद्धः **उशीरगुग्गुल्वगरुप्रवृद्धः वितानेन**=मण्टपस्योपरि बद्धवस्त्रेण **निवार्यमाणः**= निरुद्धः **रत्नप्रदीपैः**=रत्नमयदीपैः **खचितः**=मिश्रः **धूमः** विद्युता सह वर्तत इति **सविद्युत्** स चासौ नवाम्बुदश्च तस्य **आडम्बरं**=सादृश्यं **सविद्युन्नवाम्बुदाडम्बरम् आललम्बे**= आश्रितः ॥५॥

मृदङ्गभेरीपटहादिकानां सकांस्यशङ्खानकगोमुखानाम् ।

सवेणुवीणागणकाहलीनां[3] शब्दोऽथ शब्दान्तरमूर्णुनाव ॥६॥

'[4]**मृदङ्ग**=मद्दळे/मदलि कांस्य=कंसाले वेणु=कोळलु काहलि=काले/कोविनकालि' **अथ**=अनन्तरं **मृदङ्गादीनां शब्दः शब्दान्तरं**=जनध्वनिम् **उर्णुनाव**=आच्छादयामास, अतिशयश्चकारेति यावत् । 'ऊर्णुञ्=आच्छादने' लिट् ॥६॥

सम्मूर्च्छयन्तोऽपि विकासयन्तः सप्तस्वरांस्तान् नवतां नयन्तः ।

अग्राम्यका ग्रामविशेषदक्षा गन्धर्ववर्या जगुरत्र रामम् ॥७॥

सम्मूर्च्छयन्तः=प्रतिग्रामं च **स्वरान्**=एकविंशतिमूर्च्छनायुक्तान् कुर्वन्तः तद्यथा –

---

१. अ.कोशे.१.का.स्वर्गवर्गे.६४.श्लोकः ।
२. अ.कोशे.३.का.विशेष्यनिघ्नवर्गे.२४.श्लोकः ।
३. '**–काहळानाम्**' इति ब.गो
४. पदनाम् अर्थस्तु कर्णाटकभाषयाम् ।

Rarest Archiver

'आदावुत्तरमन्द्रा स्याद् रजनी चोत्तरा तथा । चतुर्थी शुद्धषड्जा तु पञ्चमी मत्सरी मता ॥

अश्वक्रान्ता तथा षष्ठा सप्तमी चाभिरुद्गता । षड्जग्रामाश्रिताद्येताः[१] विज्ञेया सप्त मूर्च्छनाः'[२] ॥

इत्युक्तप्रकारेण प्रतिस्वरमपि मूर्च्छनाविशेषाः सन्ति । तत्सहितान् कुर्वन्तीति यावत् । **विकासयन्तः**=सप्तस्वराणां श्रुतीः विकासं प्रापयन्तः । तत्र 'श्रुतयो' नाम– स्वराणां धर्मविशेषाः । श्रुतयश्च प्रतिस्वरं नियतसङ्ख्याः[३] । उक्तं च–

'तिस्रो द्वे च चतस्रश्च चतस्रः तिस्र एव च । द्वे च तिस्रश्च विज्ञेयाः षड्जादौ श्रुतयस्तथा'[४] ॥

इति । श्रुतीनां नामानि चोक्तानि– **'सिद्धिः प्रभावती[५] कान्ता सुप्रभा सन्नता शिवा'**[६] ॥ इत्यादीनि । श्रुतयश्च द्वितीयतृतीयचतुष्टयरूपेण सन्धीभूय प्रवर्तन्ते । तत्र समूहवाची मण्डलशब्दः । तत्र पुनः स्वरेषु श्रुतियोजनाप्रकारोऽप्युक्तः–

'षड्जश्चतुःश्रुतिर्ज्ञेय ऋषभः त्रिश्रुतिः स्मृतः[७] । त्रिश्रुतिश्चापि गान्धारो मध्यमश्च चतुःश्रुतिः ॥

पञ्चश्रुतिः पञ्चमः स्याद् धैवतस्त्रिश्रुतिः स्मृतः[७] । निषादो द्विश्रुतिश्चैव षड्जग्रामः स्वरान्तरम्'[८] ॥

इत्याद्युक्तप्रकारेण स्वरान् विकासयन्तः । सप्तस्वरान्–

'निषादर्षभ गान्धार षड्ज मध्यमदैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः'[९] ॥

इति प्रसिद्धान् **स्वरान् नवतां** पदे पदे गानचातुर्येण[१०] नूतनत्वं **नयन्तः**=प्रापयन्तः **अग्राम्यकाः**=ग्राम्यभोगेष्वनासक्ताः, क्षुद्रविषयभोगेष्वलम्पटाः **ग्रामविशेषदक्षाः ग्रामो** नाम – स्वरसमूहस्य स्थानम् । स च ग्रामः त्रिविधः– षड्जग्रामो, मध्यमग्रामो, गान्धारग्राम –श्चेति । सप्तस्वराणां मध्ये एकैकस्यापि स्वरस्य गानकरणे स्थानान्तरभेदो भवति । तत एव तद्द्वारेण ग्रामभेदो भवति । इत्याद्युक्तप्रकारेण ग्रामविशेषकरणे कुशलाः **गन्धर्ववर्याः अत्र**=अभिषेकसमये **रामं जगुः**=गानविषयं कृतवन्तः । 'गै=शब्दे'[११] लिट्*[१२] ॥७॥

---

१. **'–श्रिताश्चैताः'** इति ब.गो.सं.पा ।

२. ४. ६. ८.संख्याकाः श्लोकाः सङ्गीतशास्त्रे प्रसिद्धाः ।

३. **'नियतसञ्ज्ञाः'** इति दू.कृ.श्री ।

५. **'प्रभाविनी'** इति श्रीविश्व.ती ।

७. **'स्मृतिः'** इति वा.वे ।

९. अ.कोशे.१.का.नाट्यवर्गे.२०१.श्लोकः ।

१०. **'गायनचातुर्येण'** इति वा.वे ।

११. **'गा=गाने'** इति श्रीविश्व.ती ।

*१२. 'त्रिष्वपि व्याख्यानेषु प्राय एतान्येव वाक्यान्यविकलमुद्धृतान्यान्तम् । एकः प्रथमं व्याचख्यौ । अपरौ तम् अनुचक्राते चक्षुषी निमील्य । प्रायः प्रतना उद्धरणं नापहरणं मन्यन्ते स्म' । इति ब.गो मतम् । 'त्रिष्वपि' इत्यनेन एवं स्वीकर्तुं शक्यते। श्रीविश्व.तीर्थकृता भावार्थदीपिका टीका । श्रीवि.भू.तीर्थकृता टीका । श्रीका.श्री.आचार्येण कृता टीका च ॥

Rarest Archiver

तत्राऽगता अप्सरसोऽथ दृष्ट्वा रूपातिरिक्ताः पुरि वारकान्ताः ।

अस्पर्धमाना ननृतुः प्रजानां रामस्य पार्श्वे न हि दोषबुद्धिः ॥८॥

तत्र=अभिषेकोत्सवकाले **आगताः**=स्वर्गात्प्राप्ताः **अप्सरसः**=अप्सरसस्त्रियः कर्त्र्यः **अथ**=स्वागमनानन्तरं **पुरि**=अयोध्यायां स्थित्वा **रूपेण**=लावण्येन अतिरिक्ताः **रूपातिरिक्ताः**=अरूपलावण्यवतीः **वारकान्ताः**=वेश्याङ्गनाः कर्म **दृष्ट्वा अस्पर्धमानाः**=असूयारहिताः सत्यः **ननृतुः**=नृत्यं चक्रुः । 'नृती=गात्रविक्षेपे' लिट् । कुतः? इत्यत आह–**प्रजानामि**ति । **रामस्य पार्श्वे**=रामसमीपे स्थितानां **प्रजानां दोषबुद्धिः**=दोषदृष्टिः **हि**=यस्मात् नास्ति तस्मात् **अस्पर्धमानाः ननृतुः** ॥८॥

अग्रे [1]विधायाथ विधातृसूनुं ते वामदेवादिमहामुनीन्द्राः ।

रत्नोज्ज्वलैर्हेमघटैर्महेशं तमभ्यषिञ्चन् सलिलैः प्रशस्तैः ॥९॥

अथ=अभिषेकसामाग्रीसम्पादनानन्तरं **ते**=प्रसिद्धाः **वामदेवादिमहामुनीन्द्राः विधातृसूनुं** =वसिष्ठम् **अग्रे**=पुरतः **विधाय**=संस्थाप्य **रत्नोज्ज्वलैः**=रत्नदीप्तैः **हेमघटैः**=सुवर्णकलशैः, सुवर्णकलशस्थोदकैरिति यावत् । **प्रशस्तैः**=पवित्रैः **सलिलैः महेशं**=सर्वस्वामिनं **तं**=रामम् **अभिषिञ्चन्**=अभिषेकमकुर्वन् ॥९॥

सितातपत्रं तपनीयदण्डं दध्रे सुमित्रातनयो यवीयान् ।

[3]अचालयेतामथ चामरे द्वे देवस्य सुग्रीवविभीषणौ तौ ॥१०॥

अथ=अभिषेकानन्तरं **सुमित्रातनयः**=सुमित्रासूनुः **यवीयान्**=कनिष्ठः शत्रुघ्नः **तपनीयदण्डं**=सुवर्णदण्डं **सितातपत्रं**=श्वेतच्छत्रं **दध्रे**=दधार । 'धृञ्=धारणे' लिट् । **तौ**=प्रसिद्धौ **सुग्रीवविभीषणौ देवस्य**=रामस्य पार्श्वयोः **द्वे चामरे**=बालव्यजने कर्म **अचालयेताम्**=चालितवन्तौ । 'चल=सञ्चलने' लङ् ॥१०॥

न केवलं कोसलपालकोऽयं पाता भुवः सप्तसमुद्रकाञ्च्याः[4] ।

[5]इतीर्यमाणे मनुजैर्जगाम स्मितं त्रयाणां जगतां स नाथः ॥११॥

---

१. **'अग्रे निधायाथ'** इति ब.गो.सं.पा ।
२. **'सलिलैः समस्तैः'** इति ब.गो.सं.पा ।
३. अ) **'सञ्चालयेताम्-'** इति प्र.व्या ।
आ) **'आचालयेताम्'** इति ब.गो.सं.पा च ।
४. **'सप्तसमुद्रवत्याः'** इति ब.गो ।
५. **'इतीर्यमाणो'** इति मू.श्लो.पा । ब.गो च ।

Rarest Archiver

अयं=रामः **केवलं**=मुख्यं यथा तथा **कोसलपालकः**=कोसलदेशरक्षको **न** । किन्तु **सप्तसमुद्रकाञ्च्याः**=सप्तसमुद्रपर्यन्तायाः **भुवः**=भूमेः *'कर्मणि षष्ठी'* । **पाता**=रक्षकः **इति**=एवंप्रकारेण **मनुजैः ईर्यमाणे**=उच्यमाने सति **त्रयाणां जगतां नाथः**=स्वामी रामः **स्मितं**=मन्दहासं **जगाम** =प्राप **हि**=प्रसिद्धमेतत् ॥११॥

साधारणं भूषणभूष्यभावं मन्ये प्रभोस्तस्य च भूषणानाम् ।

परस्परालङ्क्रिययेति मिथ्या स भूषणं सर्वविभूषणानाम् ॥१२॥

प्रभोः=समर्थस्य **तस्य**=रामस्य **भूषणानां**=किरीटादिभूषणानामपि **परस्परालङ्क्रियया**= अन्योन्यालङ्कारेण **भूषणभूष्यभावम्**=अलङ्कारैरलङ्क्रियमाणत्वं **साधारणं**=तुल्यमित्येतत् **मिथ्या**=मृषा **इति मन्ये** । किन्तु **सः**=रामः **सर्वविभूषणानां**=सर्वालङ्काराणां **भूषणम्**= अलङ्कारः ॥१२॥

हेमाम्बुजानां रचितां शतेन मालां शुभां सौरभलोलभृङ्गाम्[१] ।

बभार रामः पवनेन दत्तां चन्द्रांशुगौरीमपि हारमालाम् ॥१३॥

रामः हेमाम्बुजानां=सुवर्णकमलानां **शतेन रचितां**=निर्मितां **शुभां**=मङ्गलरूपां **सौरभलोभभृङ्गां**=परिमलासक्तभ्रमरां **पवनेन**=मुख्यवायुना **दत्तां**=मालां **चन्द्राशुगौरीं**= चन्द्रकिरणवच्छवेतां **हारमालामपि**=मुक्तामालां च **बभार**=दध्रे ॥१३॥

गवां स लक्षाणि सुलक्षणानि[२] ददौ द्विजेभ्यो बहुलानि देवः ।

त्रिंशच्च कोटीर्वरहाटकानां[३] कामांश्च सर्वान् परिपूर्णकामः ॥१४॥

परिपूर्णकामः सः देवः=रामः **द्विजेभ्यः बहुलानि**=अनेकानि **सुलक्षणानि**=शोभनलक्षण युक्तानि **गवां**=धेनूनां **लक्षाणि ददौ** । **वरहाटकानाम्**=उत्तमसुवर्णानां, स्वमुद्राङ्कितनिष्का णां वा **त्रिंशत्**=त्रिंशत्संख्याकाः **कोटीश्च** द्विजेभ्यः **ददौ, सर्वानपि कामांश्च ददौ** ॥१४॥

रत्नान्यनर्घ्याणि वराम्बराणि हारान् परार्ध्यानि[४] विभूषणानि ।

ददौ स देवो जनकात्मजायै तेभ्यश्च कामान् कपिराक्षसेभ्यः ॥१५॥

---

१. **'सौरभलोलभृङ्गीम्'** इति ब.गो.सं.पा । २. अ) **'विलक्षणानाम्'** इति मू.श्लो.पा । आ) **'सुलक्षणानाम्'** इति ब.गो ।
३. **'शुभहाटकानाम्'** इति मू.श्लो.पा । ४. **'परार्ध्यांश्च'** इति प्र.व्या । ब.गो च ।

Rarest Archiver

देवः सः=रामः **जनकात्मजायै**=सीतायै अर्घम् अर्हन्तीति अर्घ्याणि तानि न भवन्तीति **अनर्घ्याणि**=अमूल्यानि च **रत्नानि वराम्बराणि**=श्रेष्ठवस्त्राणि **हारान्**=मुक्तसरान् **परार्ध्यानि** श्रेष्ठानि वि**भूषणानि=**आभरणानि **च ददौ** । **तेभ्यः**=आनीतेभ्यः, प्रसिद्धेभ्यो वा **कपिराक्षसेभ्यश्च कामान्**=अभीष्टानि **ददौ** ॥१५॥

विभूषणैस्तैश्च विभूषिताङ्गी[१] सीता वरिष्ठामथ[२] हारमालाम् ।

उन्मुच्य कण्ठादवलोकयन्ती ददर्श देवस्य मुखेन्दुबिम्बम् ॥१६॥

अथ तैः=रामदत्तैः **विभूषणैः**=आभरणैः **विभूषिताङ्गी**=अलङ्कृतशरीरा **सीता वरिष्ठाम्=** अत्युत्तमां **हारमालां**=मुक्तामालां **कण्ठात्=**गलात् **उन्मुच्य**=बहिः निष्कास्य, हस्ते गृहीत्वा इति यावत् । **हारमालाम् अवलोकयन्ती**=पश्यन्ती सती **देवस्य**=रामस्य **मुखेन्दुबिम्बं**= मुखचन्द्रमण्डलं **ददर्श** ॥१६॥

[३]मुहुर्मुकुन्दं निजमीक्षमाणां मुहुश्च [४]मुक्तास्रजमीक्षमाणाम् ।

शुचिस्मितां तां पतिरिङ्गितज्ञः पश्यन्नपाङ्गेन जगाद रामः ॥१७॥

मुहुः मुहुः=पुनः पुनः **निजं**=स्वसम्बन्धिनं **मुकुन्दं**=रामं **ईक्षमाणां**=पश्यन्तीं **मुहुश्च**= पुनरपि **मुक्तास्रजं**=मुक्तामालाम् **ईक्षमाणां शुचिस्मितां=**पवित्रमन्दहासां **तां**=सीताम् **अपाङ्गेन**=कटाक्षेण **पश्यन्**=अवलोकयन् **इङ्गितज्ञः**=हृद्गताभिप्रायं जानन्, 'इङ्गितं हृद्गतो भावो बहिराकाराकृतिः'[५] इत्यभिधानम् । **पतिः**=स्वामी **रामः जगाद** ॥१७॥

विद्याविशेषेषु विशिष्टमेकं सब्रह्मचर्यादिगुणेषु गूढम्[६] ।

यं मन्यसे धन्यतमं त्रिलोक्यां मुक्ताकलापं सति देहि तस्मै ॥१८॥

हे सति=पतिव्रते सीते ! **विद्याविशेषेषु**=ऋगादिविद्याभेदेषु **विशिष्टम्**=अतिशयितं, श्रेष्ठं वा **एकम्** असहायं **सब्रह्मचर्यादिगुणेषु**=ब्रह्मचर्यसहितज्ञानभक्त्यादिगुणेषु *'विषयसप्तमी'* **गूढम्**=आच्छादितं **त्रिलोक्यां धन्यतमम्**=अतिशयेन कृतकृत्यं **यं मन्यसे=**जानासि? **तस्मै=**पुरुषाय **मुक्ताकलापं**=मुक्तामालात्मकमाभरणं **देहि**=दिश ॥१८॥

---

१. अ) **'परिपूरिताङ्गी'** इति मू.श्लो.पा । आ) **'–स्तैः परिभूषिताङ्गी'** इति प्र.व्या । २.**'वरिष्ठा वरहारमालाम्'** इति प्र.व्या ।
३. **'मुहुर्मुखेन्दुम्'** इति मू.श्लो.पा । प्र.व्या । ब.गो च । ४. **'मुहुः सुमुक्तास्रज-'** इति मू.श्लो.पा ।
५. पुठसंख्या–??? । ६. अ) **'चर्यादिषु वानरेषु'** इति मू.श्लो.पा । आ) **'सब्रह्मचर्यादिषु वा गुणेषु'** इति प्र.व्या । ब.गो च ।

Rarest Archiver

अतिक्रमं यस्य पराक्रमाणां न कोऽपि कुर्यादुचितक्रमाणाम् ।

अतिक्रमी योऽन्यपराक्रमाणां तस्मै शुभे त्वं दिश वेतनार्थम् ॥१९॥

हे शुभे=मङ्गलरूपे सीते ! **उचितक्रमाणां**=योग्यक्रमाणाम्, अवसरोचितक्रमाणाम् इति यावत् । **यस्य**=पुरुषस्य **पराक्रमाणां**=शौर्याणां **अतिक्रमम्**=अतिलङ्घनम्, आधिक्यमिति यावत् । **कोऽपि**=कश्चिदपि **न कुर्यात् यश्च अन्यपराक्रमाणाम्**=इतरशौर्याणां *'कर्मणि षष्ठी'* **अतिक्रमी**=अतिक्रमवान् सर्वेषां **पराक्रमाणामपि** स्वयम् अतिशेते **तस्मै**=पुरुषाय **वेतनार्थं**=कृतस्य प्रतिकरणार्थं **दिश**=देहि ॥१९॥

मम प्रियं यं भुवनेषु वेत्थ तव [१]प्रियो योऽस्मदुपासकेषु ।

सर्वेष्वसङ्गो मयि योऽतिसङ्गी सम्प्रीतिदेयं सति[२] देहि तस्मै ॥२०॥

हे सति ! भुवनेषु=लोकेषु त्वं **यं**=पुरुषं **मम प्रियं**=प्रीतिविषयं **वेत्थ**=जानासि । 'विद=ज्ञाने' लट् । **अस्मदुपासकेषु**=अस्मत्सेवकेषु **यस्तव प्रियः**, **यः** तु **सर्वेषु** विषयेषु **असङ्गी**=सङ्गरहितः **अतिसङ्गी**=अत्यन्तसंयोगयुक्तः, अतिशयितभक्तिमानित्यर्थः । **तस्मै**= पुरुषाय **सम्प्रीतिदेयं**=समीचीनप्रीत्या दातुं योग्यं मुक्ताकलापं **देहि**=दिश ॥२०॥

एवं ब्रुवाणे जगदेकनाथे सीता हनूमन्तमवेक्ष्य हृष्टा ।

अनन्यलभ्यां स्वयमामुमोच तां हारमालाममलां[३] तदंसे ॥२१॥

जगदेकनाथे=जगन्मुख्यस्वामिनि रामे **एवं**='विद्याविशेषेषु'[४] इत्यादिप्रकारेण **ब्रुवाणे**= वदति सति उक्तगुणवन्तं **हनूमन्तम् अवेक्ष्य**=दृष्ट्वा **हृष्टा**=सन्तुष्टा **सीता अनन्यलभ्यां**= हनुमदितरैः प्राप्तुमशक्याम् **अमलां**=निर्मलां **तां**=हस्ते स्थितां **हारमालां**=मुक्ताकलापं **तदंसे**=हनूमदंसे **स्वयं**=साक्षात् **आमुमोच**=न्यस्तवती ॥२१॥

सुधासुधारासितया तयाऽलं सुवर्णवर्णोऽथ बभार[५] शोभाम् ।

हारस्रजाऽसौ हनुमान् महात्मा यथा महामेरुरमर्त्यनद्या ॥२२॥

---

१. **'–वेत्थ क्वचित्प्रियो'** इति मू.श्लो.पा ।
२. **'संप्रीतिदेयं प्रति देहि'** इति मू.श्लो.पा ।
३. **'हारमालामतुलाम्'** इति ब.गो ।
४. श्रीसं.रा.यु.का.१६.सर्गे.१८.श्लोकः ।
५. **'दधार शोभाम्'** इति ब.गो ।

Rarest Archiver

अथ=सीतया हारनिक्षेपानन्तरं **सुवर्णवर्णः**=हेमकान्तिः **महात्मा**=महामनस्वी **असौ हनुमान् महामेरुः अमर्त्यनद्या**=देवगङ्गया भागीरथ्या यथा **शोभां**=कान्तिं बिभर्ति तथा **सुधासुधारासितया सुधायाः**=अमृतस्य सुधारावत् सम्पातवात् 'धारासम्पात आसारः'[1] इत्यमरः । **सितया**=श्वेतया **तया**=कण्ठस्थितया **हारस्रजा**=हारमालया **अलम्**=अत्यन्तं **शोभां**=कान्तिं **बभारे**=दध्रे ॥२२॥

एषां गुणानामतिदुर्लभानां[2] पात्रं प्रियोऽयं[3] ननु देवदेव्योः ।

ब्रह्मैव नूनं भगवान् हनूमान् इत्येव वाणी ववृधे[4] त्रिलोक्याम् ॥२३॥

अतिदुर्लभानाम्=अन्यैर्लब्धुमशक्यानाम् **एषां**=पूर्वोक्तानां **गुणानां**=ज्ञानभक्त्यादिधर्माणां **पात्रं**=योग्यभूतः, 'योग्यभाजनयोः पात्रम्'[5] इत्यमरः । **देवदेव्योः**=सीतारामयोः **प्रियोऽयं भगवान् हनूमान् ब्रह्मैव ननु**=भाविचतुर्मुखः खलु **नूनं**=निश्चितम् । **इति वाणी**=वाक् **त्रिलोक्यां**=लोकत्रये **ववृधे**=प्रसृता, व्याप्तेति यावत् । 'वृतु=वर्तने' लिट् ॥२३॥

स राजराजः परिराजमानो रामोऽथ राजीवसमाननेत्रः ।

महामहाः सर्वमहाजनानां मनोदृशामेष महोत्सवोऽभूत् ॥२४॥

स राजराजः=राजश्रेष्ठः, चक्रवर्तीति यावत् । **परिराजमानः**=देदीप्यमानः **राजीवसमान – नेत्रः**=पद्मसमलोचनः **महामहाः**=अतिबहलकान्तिः **स एष रामः अथ**=अभिषेकानन्तरं **सर्वमहाजनानां**=सर्वसज्जनानां **मनोदृशां**=चित्तनेत्राणां **महोत्सवः**=उत्सवकरः **अभूत्**॥२४॥

कीर्तिं वदाम तव तां शृणुवाम राम ध्यायाम राम चरणौ च भजाम राम ।

अर्चाम राम जय राम नमाम राम दासा वयं सहचरास्तव राम क्लृप्ताः ॥२५॥

हे राम ! वयं तव सम्बन्धिनीं **तां**=प्रसिद्धां **कीर्तिं**=यशः **वदाम**=ब्रुवाम । वदानि वदाव वदाम । 'वद=व्यक्तायां वाचि' लोडुत्तमपुरुषे बहुवचनम् । एवमुत्तरत्रापि । **हे राम ! तव कीर्तिं शृणुवाम**=आकर्णयाम । शृणवानि शृणवाव शृणवाम ।'श्रु=श्रवणे' लोट् । **हे राम! तव चरणौ** वयं **ध्यायाम**=चिन्तयाम । ध्यायानि ध्यायाव ध्यायाम । 'ध्यै=चिन्तायां' लोट् ।

---

१. अ.कोशे.१.का.दिग्वर्गे.९६.श्लोकः ।

२. **'अपिदुर्लभानाम्'** इति मू.श्लो.पा ।

३. **'प्रियो यो ननु'** इति प्र.व्या ।

४. **'ववृधे त्रिलोक्याम्'** इति दु.कृ.श्री ।

५. अ.कोशे.३.का.नानार्थवर्गे.३३४.श्लोकः ।

Rarest Archiver

हे राम ! तव चरणौ वयं **भजाम च**=सेवाम । भजानि भजाव भजाम । 'भज=सेवायां' लोट् । **हे राम ! तव चरणौ वयं अर्चाम**=पूजयाम । अर्चानि अर्चाव अर्चाम । 'अर्च= पूजायां' लोट् । **हे राम ! तव चरणौ वयं नमाम**=वन्दामहे । नमामि नमाव नमाम । 'णमु=प्रह्वत्वे शब्दे च' लोट् । **हे राम ! वयं तव दासाः**=भृत्याः **सहचराः**=अनुवर्तिनः **कॢप्ताः**=नियताः **हे राम! जय**=उत्कृष्टो भव, तव जयं प्रकाशय इति वा । अनेन –

'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्'[१]॥

श्लोकोक्तभक्तकार्याणि दर्शितानि भवन्ति ॥२५॥

गदति जगति भद्रां भारतीमेवमेनां[२] नवविधगुणभाजा काममेकान्तभक्त्या ।

अरमत परमश्रीरामया रामदेवः स्वयमकृतकपूर्णानन्दसन्दोहदेहः ॥२६॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतश्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे षोडशः सर्गः ॥

जगति=लोके **नवविधगुणभाजा**=श्रवणादिनवविधगुणयुक्तया **एकान्तभक्त्या**=मुख्यभक्त्या **एवं**=कीर्तिं वदामेत्यादिप्रकारेण **भद्रां**=मङ्गलकरीं **एनां** प्रसिद्धां **भारतीं**=गिरं 'ब्राह्मी तु भारती भाषा'[३] इत्यमरः । **गदति**=वदति सति **स्वयम्**=अन्यापेक्षां विना **अकृतकपूर्णा-नन्दसन्दोहदेहः अकृतकः**=स्वाभाविकः, अकृत्रिम इति यावत् । **पूर्णः**=अपरिछिन्नः **आनन्दसन्दोहः** आनन्दसमूह एव देहो यस्य सः **रामदेवः परमश्रीरामया परमा** या **श्रीः**= लक्ष्मीः तया **रामया**=तद्रूपया सीतया **परमश्रीरामया अरमत्**=क्रीडाम् अकरोत् । 'रमु= क्रीडायां' लङ् । [४]'एवंविधोऽपि लक्ष्मीरूपायै सीतायै परमानुग्रहं कर्तुं लीलया स्वभावा -देव सीतया सह अरमतेत्यभिप्रायः' ॥२६॥

॥ इति सङ्ग्रहरामायणे श्रीकाशीश्रीनिवासाचार्यकृतायां टीकायां युद्धकाण्डे षोडशः सर्गः ॥

॥ इति सङ्ग्रहरामायणे युद्धकाण्डं समाप्तम् ॥

आरम्भतः श्लोकाः–८४२+२६=**८६८–आहत्य युद्धकाण्डीयश्लोकाः**

---

१. श्रीमद्भागवते.७.स्क.५.अ.२३.श्लोकः । २. **'भारतीमेवमेवम्'** इति प्र.व्या । ब.गो च ।
३. अ.कोशे.१.का.वाग्ववर्गे.१७३.श्लोकः । ४. 'स्वयं परिपूर्णानन्ददेहोऽपि श्रीमहालक्ष्मीस्वरूपसीतायां परमानुग्रहं कर्तुं लीलया सीतया सहारमतेति भावः' इति श्रीविश्व.ती.भा.दी ।

Rarest Archive

Rarest Archives

संशोधनार्थं परामृष्टाः ग्रन्थाः
(Bibliography)

१. ग्रन्थनाम– श्रीमद्वाल्मीकिरामायणम्
रचयिता– श्रीवाल्मीकिः
सम्पादकः– वाविळ्ळ रामस्वामिशास्त्रुलु (चेन्नै)
प्रकाशनम्– वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्, १९४७

२. ग्रन्थनाम– श्रीमद्वाल्मीकिरामायणम्
रचयिता– श्रीवाल्मीकिः
सम्पादकः– भारत–दर्शन–प्रकाशनम्
प्रकाशनम्– बेङ्गळूरु, १९९८

३. ग्रन्थनाम– श्रीमद्वाल्मीकिरामायणम्
रचयिता– श्रीवाल्मीकिः
सम्पादकः– पाण्डेयो रामनारायणदत्तशास्त्री
प्रकाशनम्– गीताप्रेस् , गोरखपुर् ,२००८

४. ग्रन्थनाम– श्रीमन्महाभारततात्पर्य्यनिर्ण्णयः **१–४ भागाः**
(कर्णाटकभाषायामनूदितम्)
रचयिता– श्रीमदानन्दतीर्थभगवत्पादाचार्यः
सम्पादकः– विद्वान् हयवदनपुराणिकः
प्रकाशनम्– अखिलभारतमाध्वमहामण्डलम्, बेङ्गळूरु. १९९९

५. ग्रन्थनाम– श्रीमन्महाभारततात्पर्य्यनिर्ण्णयः
रचयिता– श्रीमदानन्दतीर्थभगवत्पादाचार्यः
सम्पादकः– डा. व्यासनकेरे प्रभञ्जनाचार्यः
प्रकाशनम्– श्रीव्यासमध्वसंशोधनप्रतिष्ठानम्, बेङ्गळूरु.२००४

६. ग्रन्थनाम– श्रीमन्महाभारततात्पर्यनिर्णयः **१,२ भागौ**
रचयिता– श्रीमदानन्दतीर्थभगवत्पादाचार्यः
सम्पादकः– पं.श्रीनिवासतीर्थाचार्यः, पं.पुराणिकजयतीर्थाचार्यश्च

Rarest Archiver

प्रकाशनम्– विश्वमाध्वमहापरिषत्,श्रीउत्तरादिमठः, बेङ्गळूरु–०४.२००७

७. **ग्रन्थनाम–** श्रीमहाभारततात्पर्य्यनिर्ण्णयः **१,२ भागौ**
रचयिता– श्रीमदानन्दतीर्थभगवत्पादः
सम्पादकः– आचार्य्यगोविन्दो बन्नञ्जेपदोपाह्वः
प्रकाशनम्– तत्वसंशोधनसंसत्,श्रीहृषीकेशतीर्थसंस्थानम्, उडुपि.२००९

८. **ग्रन्थनाम–** सङ्ग्रहरामायणम् **१,२ भागौ**
रचयिता– श्रीनारायणपण्डिताचार्य्यः
सम्पादकः– डा.बन्नञ्जे गोविन्दाचार्यः
प्रकाशनम्– श्रीपेजावराधोक्षजमठः, उडुपि. २०१५

९. **ग्रन्थनाम–** सङ्ग्रहरामायणम् (मूलश्लोकयुतम्)
रचयिता– श्रीनारायणपण्डिताचार्य्यः
सम्पादकः– डा.एस्.आर्.पाण्डुरङ्गि
प्रकाशनम्– द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठानम्, बेङ्गळूरु–०४.२०१५

१०. **ग्रन्थनाम–** सङ्ग्रहरामायण (कर्णाटकभाषायामनूदितम्)
रचयिता– श्रीनारायणपण्डिताचार्य्यः
सम्पादकः– डा.व्यासनकेरे प्रभञ्जनाचार्यः
प्रकाशनम्– ऐतरेय प्रकाशनम्
व्यासनकेरे बेङ्गळूरु.२००४

११. **ग्रन्थनाम–** चम्पूरामायणम्
रचयिता– भोजराजसार्वभौमः,लक्ष्मणसूरिश्च
सम्पादनम् प्रकाशनञ्च– चौखाम्बा संस्कृत संस्थानम्, वाराणसी

१२. **ग्रन्थनाम–** चम्पूरामायणम् (सुन्दरकाण्डम्)
रचयिता– भोजराजसार्वभौमः
व्याख्याकारः– पण्डित रामनाथत्रिपाठी शास्त्री
प्रकाशनम्– चौखाम्बा अमरभारती प्रकाशनम्, वाराणसी १९७९

१३. **ग्रन्थनाम–** श्रीमद्भागवतम्

Rarest Archiver

रचयिता– भगवान् श्रीवेदव्यासः
सम्पादनम्– विद्वान्. पि.एस्.शेषगिरि आचार्यः
प्रकाशनञ्च– श्रीपेजावरमठः, पूर्णप्रज्ञसंशोधनामन्दिरम् बेङ्गळूरु

१४. **ग्रन्थनाम–** सर्वमूलग्रन्थाः **६,भागाः**
रचयिता– श्रीमदानन्दतीर्थभगवत्पादचार्यः
सम्पादकः– डा.व्यासनकेरे प्रभञ्जनाचार्यः
प्रकाशनम्– श्रीव्यासमध्वसंशोधनप्रतिष्ठानम् बेङ्गळूरु–१९. २००२

१५. **ग्रन्थनाम–** सुमध्वविजयः
रचयिता– श्रीनारायणपण्डिताचार्यः
सम्पादकः– डा. व्यासनकेरे प्रभञ्जनाचार्यः
प्रकाशनम्– श्रीव्यासमध्वसंशोधनप्रतिष्ठानम् बेङ्गळूरु. २०००

१६. **ग्रन्थनाम–** श्रीमध्वविजयः
रचयिता– श्रीनारायणपण्डिताचार्यः
सम्पादकः– बन्नञ्जे गोविन्दाचार्यः
प्रकाशनम्– ईशावास्यप्रतिष्ठानम्, बेङ्गळूरु. २००३

१७. **ग्रन्थनाम–** सुमध्वविजयः
रचयिता– श्रीनारायणपण्डिताचार्यः
अनुवादकाः– पि.पि.लक्ष्मीनारायण उपाध्याय, मागडि रङ्गनाथाचार्, एस्.वि.भीमभट्टः
प्रकाशनम्– श्रीगुरुसार्वभौमविद्यापीठम् श्रीराघवेन्द्रस्वामिनां मठः मन्त्रालय. २०१२

१८. **ग्रन्थनाम–** श्रीरामचारित्रमञ्जरी
रचयिता– श्रीराघवेन्द्रस्वामिनः
प्रकाशनम्– श्रीगुरुसार्वभौमविद्यापीठम् श्रीराघवेन्द्रस्वामिनां मठः मन्त्रालय १९९८

१९. **ग्रन्थनाम–** उत्तररामचरितम्

Rarest Archiver

रचयिता– श्रीभवभूतिः
अनुवादकः– डा. रमाकान्त तिरुपति
प्रकाशनम्– चौखाम्बा सुरभारति प्रकाशन. वाराणसी. २००३

२०. **ग्रन्थनाम–** श्रीमणिमञ्जरी (प्रतिपदार्थचन्दिका)
रचयिता– श्रीनारायणपण्डिताचार्यः
अनुवादकः– के सत्यनारायणाचार्यः
प्रकाशनम्– श्रीमन्माध्वसङ्घ (रि) बेङ्गळूरु–१०

२१. **ग्रन्थनाम–** श्रीनामलिङ्गानुशासनम् (अमरकोशः)
रचयिता– श्रीअमरसिंहः
सम्पादकः– लूयि रैस्
प्रकाशनम्– प्रसारांग, मैसूरुविश्वविद्यानिलय, मैसूरु

२२. **ग्रन्थनाम–** धातुरूपकोश–सविवरण (कर्नाटकभाषायां)
सम्पादकः– के.एस्. कण्णन्
प्रकाशनम्– भारतीप्रकाशन बेङ्गळूरु-४१. १९८३

२२. **ग्रन्थनाम–** मध्यम–धातुरूपावलिः
सम्पादकः– पण्डित टी.आर्. कृष्णाचार्यः
प्रकाशनम्– कुम्भकोणस्य मध्वविलास टी.के.वेङ्कोबाचार्येण ।
मुद्रितसंवत्सरः – १९३२

. २३. **ग्रन्थनाम–** वैयाकरणसिद्धान्तकौमुदी १,२,३ भागाः
रचयिता– श्रीमद्भट्टोजिदीक्षितः
सम्पादकौ– गिरिधरशर्मा, परमेश्वरानन्दशर्मा च
प्रकाशनम्– मोतीलाल बनारसीदास
प्रथममुद्रणम् – १९६१, २००१

२४. **ग्रन्थनाम–** लघुसिद्धान्तकौमुदी
रचयिता– श्रीवरदराजः

Rarest Archiver

सम्पादकः– श्रीधरानन्दशास्त्री
प्रकाशनम्– मोतीलाल बनारसीदास बेङ्गळूरु
प्रथममुद्रणम् – १९७७, २००३

२५. ग्रन्थनाम– श्रीशिवस्तुतिः
रचयिता– श्रीनारायणपण्डिताचार्यः
सम्पादकः– श्री.श्रीनिधिः श्रीनिवासश्च
प्रकाशनम्– २००९

२६. ग्रन्थनाम– श्रीमद्भागवतम्
रचयिता– भगवान् श्रीवेदव्यासः
प्रकाशनम्– गीताप्रेस् गोरखपुर्
२००३

२७. ग्रन्थनाम– श्रीमद्ब्रह्मसूत्राणि (श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं श्रीब्रह्मसूत्रभाष्यसहितम्)
रचयिता– भगवान् श्रीवेदव्यासः
सम्पादकः– मैसूरु वेदव्यासाचार्यः
मुद्रणम्– संस्कृत साहित्य सदन– कृष्णमूर्तिपुरम्
मैसूरु–५७०० ४.

२८. ग्रन्थनाम– कुवलयानन्द–कारिकाः
रचयिता– अप्पय्यदीक्षितः
सम्पादकः– पि.आर् सुब्रह्मण्य शर्मा
प्रकाशनम्– १९०३

****

Rarest Archiver

परामृष्टानि कर्णाटकभाषापुस्तकानि च

१. **ग्रन्थनाम–** द्वैतवेदान्तवाङ्मय हागू इतिहास १.२.भाग
रचयिता– मूल डा.बि.एन्.के.शर्मा
अनुवादकः– डा.एस्.के.भारतीरमणाचार्य
प्रकाशनम्– द्वैतवेदान्ताध्ययन मत्तु संशोधन प्रतिष्ठान बेङ्गळूरु, १९८६

२. **ग्रन्थनाम–** माध्ववाङ्मय तपस्विगळु
रचयिता– पं. पण्डरीनाथाचार्य गलगलि
प्रकाशनम्– तत्ववाद कार्यालय गदग, १९६९

३. **ग्रन्थनाम–** पूराणनाम चूडामणि
रचयिता– श्री बेनगल् रामराव् मत्तु पान्यं सुन्दरशास्त्रि
प्रकाशनम्– प्रसारांग मैसूरु विश्वविद्यानिलय मैसूरु, २००७

४. **ग्रन्थनाम–** रामायण मत्तु पात्रचित्रण
रचयिता– श्रीश्रीविश्वेशतीर्थरु (श्रीपेजावर मठ)
सङ्ग्राहकः– बे.ना.विजयीन्द्राचार्यः
प्रकाशनम्– आनन्दतीर्थ प्रतिष्ठान बेङ्गळूरु, २०१०

****

RELATED RAMAYANA BOOKS :-

1. Sanskrit Ramayana other than valmiki's the Adbhut, Adhyatma and Ananda Ramayanas
Author :- Dr.V. Raghavan
Publisher :- Dr. Raghavan center for Performing Arts. Chennai – 1998

2. Ramayana
Author :- C. Rajagopalachari
Publisher :- Bharathiya Vidya Bhavan. Mumbai. 2001

Rarest Archiver

प्रबन्धावलोकनानन्तरं किञ्चित्

महाकविरयं श्रीनारायणपण्डिताचार्यः सङ्ग्रहरामायणाख्यमहाकाव्यस्य विरचने कारण–द्वयं प्रतिभाति मे । स्वकुलस्य स्वरूपोद्धारकगुरुत्वेन अङ्गीकृतः श्रीमध्वाचार्यः । श्रीनारायणपण्डिताचार्यस्य तत्पितुः श्रीत्रिविक्रमपण्डिताचार्यस्य च महाकवित्वं परम्परा – यातमिव प्रतिभाति । असाधारणशास्त्रवैदुष्येन साकं काव्यसङ्कलनप्रतिभा च न बहुत्र दृष्टा । परं तु लिकुचवंशस्य इदमेव महद्वैशिष्ट्यं यदुभयत्र महती सिद्धिरिति । स्वकुलकमलवनविकसनभास्करायमाणानां श्रीमदानन्दतीर्थार्याणामनुग्रहादेव पाण्डित्यं कवित्वमुभयम् उपलब्धमिति मन्यमानः श्रीत्रिविक्रमपण्डिताचार्यः श्रीमध्वार्यैर्विरचितस्य श्रीमन्महाभारततात्पर्यनिर्णयग्रन्थस्याध्ययनादेव उषाहरणाख्यं महाभारतसम्बद्धं महाकाव्यं रचयामास । तत्पुत्रः नारायणपण्डिताचार्यश्च श्रीमध्वविरचितस्य ग्रन्थस्य प्रभावादेव महाभारतं विहाय, रामायणे दत्तप्रीतिः सङ्ग्रहरामायणाख्यं महाकाव्यं रचयाञ्चकार । एवञ्च लिकुचवंशात् रामायणमहाभारतसम्बद्धं महाकाव्यद्वयं सहृदयानामुपलब्धम् इत्यधिकतया सन्तोष्टव्यम् ॥

श्रीमध्वाचार्यैः मूलरामायणं तथा समग्रपुराणेतिहाससाहित्यं विमृश्य निर्णयरूपेण श्रीमहाभारततात्पर्यनिर्णयाख्यो ग्रन्थः व्यरचि । तत्र च तदवधि केनापि कविना शास्त्र–कारेण वा अनवलोकिताबोधितानामृष्टविशेषविचाराः सुष्टु सप्रमाणं निबोधिताः । तादृशग्रन्थस्यामूलाग्रमध्ययनं विधाय ग्रन्थकारैः तच्छिष्यैश्च साकं विमृश्य समुद्धृतं नवनवनीतप्रायं विषयविशेषं सज्जनवृन्दं प्रति प्रदेयमिति समाकलय्य महाकाव्यं सङ्ग्रह –रामायणाख्यं लिलेख कविः । सुकुमारमतयस्तु शास्त्रे प्रवृत्तिं सर्वथा न कुर्वन्ति, तथा सम्प्रदायपञ्जरबद्धाश्च परकीयग्रन्थावलोकनं सर्वथा न पुरस्कुर्वन्तीत्यालोच्य, महाकाव्ये पुनः काव्यकन्निकासौन्दर्यलुब्धाः सन्तः सहृदयाः सर्वे प्रवृत्तिं विधास्यन्ति इत्यालोच्य च सङ्ग्रहरामायणाख्यं महाकाव्यं विरचय्य तद्वारा अपूर्वविषयामृतधाराप्लावनपूतान् सर्वान् कल्पयामास कविः ॥

श्रीमन्महाभारततात्पर्यनिर्णयस्थान् विचारान् काव्येऽस्मिन् विविधालङ्कारपरिरम्भितान् विधाय काव्यसौन्दर्यातिशयं व्यदधात् । सन्ति च संस्कृतवाङ्मयेऽपि बहूनि रामायणा–धृतानि काव्यानि । तथापि कविरयं रामायणमाधारीकृत्य महाकाव्यं लिलेख ॥

Rarest Archiver

तदत्र कारणं– स्वीयमणिमञ्जर्याख्ये लघुकाव्ये रामायणकथाम् अत्यन्तं संक्षेपेण कथितवान् विस्तरलेखनमपेक्षितं कविना ॥

द्वितीयं कारणं– रामायणमत्यन्तप्रियतमं काव्यं कवेः विस्तारभूतस्य श्रीरामस्य निर्दुष्ट–चारित्र्यं, सर्वोत्तमत्वं च प्रतिपादयितुमभिलषितं तन्मानसम् ॥

तृतीयं कारणं– पिता चास्य त्रिविक्रमार्यः महाभारतमधिकृत्य महाकाव्यम् उषाहरणाख्यं ह्यलेखीत् । अतः स्वयं रामायणमवलम्ब्य काव्यं लेखितुमैछत् ॥

चतुर्थो हेतुरत्र– श्रीमन्मध्वाचार्यैः मूलरामायणमादृत्य श्रीमन्महाभारततात्पर्यनिर्णयाख्यो ग्रन्थः लिलेख । तत्र चापूर्वाः विषयाः सयुक्तिकं,सदृष्टान्तं, सप्रमाणं निरूपिताः । रामस्य दिव्याचिन्त्याद्भुतचरितस्य निर्दुष्टत्वस्य च रक्षणार्थं, समर्थनार्थं च तैः मूलरामायणमिदं प्रथमतोऽन्विष्य तदनुसारेण कथा सम्यक् निरूपिता । तद्ग्रन्थस्य परिचयः त्रिविक्रम–पण्डिताचार्याणामप्यासीत् इति तत्पुत्रः कविरयं ग्रन्थारम्भे निवेदयामास–

"सूक्तिरत्नाकरे रम्ये मूलरामायणार्णवे । विहरन्तो महीयांसः प्रीयन्तां गुरवो मम" ॥ इति

कवेरपि तद्ग्रन्थोऽत्यन्तं परिचितः, श्रीमध्वाचार्यैः स्वकीयग्रन्थे प्रदर्शितान् नूतनविषयान् मूलरामायणस्थान् सर्वानयं सङ्कलय्य महाकाव्येऽस्मिन् निबबन्ध । तदर्थं रामायण–सम्बद्धमेव काव्यम् अरचत् । उत्तरकाण्डे वाल्मीकिरामायणेऽकथितान् बहून् विषयान् आविष्कर्तुं च रामायणकाव्यमलेखीत् ॥

काव्यमिदं परमरमणीयम् इत्यत्र नोदाहरणम् अपेक्षते । प्रतिश्लोकम् उपमारूपकादिरल–ङ्कारवर्गः, अनुप्रासयमकादयश्च अहमहमिकया कविकण्ठादप्रयत्नेनैव निर्गलिताः । छन्दोगतिश्च प्रसङ्गानुसारिणी सती मनोहारिणी भाति । वैदर्भीप्रभृतयश्च रीतयः भार–त्याद्याः उपनागरिकाद्याश्च वृत्तयः रसानुगुणतया प्रवर्तिताः । चित्तद्रुतिदीप्तिप्रसन्नताख्यचि–त्तवृत्तिविशेषरूपाश्च रसधर्माः । माधुर्यादयश्च गुणाः यथाप्रसङ्गं श्लोकेषु सङ्कलिताः। युद्धकाण्डे च वीराद्भुतरौद्रभयानकरसाः विशिष्य सहृदयस्वान्तसुखस्वरूपाः सन्तः प्रतिभासन्ते काव्ये ॥

विषयाश्च केचन कथनार्हाः–

युद्धकाण्डमभिव्याप्य इदमुच्यते विशिष्य । श्रीमहाभारततात्पर्यनिर्णये यद्यपि सुराणकानां प्रसङ्गः सुष्टु निरुपितः वाल्मीकिरामायणे चोक्तम्– कविः तत्प्रसङ्गमेवात्र न लिलेख ।

Rarest Archiver

कारणं किं तत्र? इत्यत्र कविरेव प्रमाणम् । शम्बूकतपस्विनः वृत्तान्तः सर्वत्र निरूपितः । अत्र संक्षिप्योक्तम्– शम्बूक इति शब्दस्थाने 'जम्बूक' इति पदं न्यस्तम् । तपस्विवेषं धृत्वा जनानवञ्चयदसौ । लोकक्षयकाम्येन तपस्यन्तं तं लोकक्षेमचिन्तकः असौ श्रीरामः मारितवान् । नास्त्यत्र श्रीरामस्य दोषः । लोकवञ्चकः स इति मत्वा कविः तं "जम्बूक" इति प्रायः व्याजहार ॥

युद्धाकाण्डे चान्ते श्रीरामपट्टाभिषेकमहोत्सवः निरूपितः । तत्प्रसङ्गे गन्धर्वगानं प्रवृत्तमिति कथयन् सङ्गीतशास्त्रस्य विषयान् उल्लिलेख । व्याख्याकारः श्रीकाशीश्रीनि–वासाचार्यश्च विस्तरेण स्वराणां परिचितिं ददौ । वाल्मीकिरामायणे एतेंऽशाः स्फुटतया नोपलभ्यन्ते । पूर्वकथितकाण्डसारभागे विशेषांशाः प्रतिपादिताः । तत्र द्रष्टव्यम् ॥

सङ्ग्रहरामायणमहाकाव्यमधिकृत्य अनुसन्धानानन्तरम् इदं काव्यं महाकाव्यम् इत्यत्र मन्मनः प्रमाणम् । छन्दोगतिः शब्दसंघटना, अलङ्काराणां संयोजनं, माधुर्यादिगुणानां सङ्कलनम्, कथाकथनक्रमः, नवनवीनकथानां, घटनानामायोजनं, पात्राणां चित्रणम्, व्याकरणशास्त्रीयाः प्रयोगाः, नगरार्णवशैलऋतुकाननप्रभृतीनां वर्णनं, कपिबालादिचेष्टानां प्रदर्शनं, राक्षसप्रकृतीनां स्वभावाविष्करणं, श्रीरामहनुमान्सुग्रीवविभीषणलक्ष्मणप्रमुखानां स्वभावचित्रणम्, इत्यादयश्चामूल्यांशाः सप्रसङ्गं साधुनिरुपिताः । कविप्रतिभायाः पूर्णं दर्शनं सञ्जातमत्र । तत्र तत्र स्थितान् कथाभागानादृत्य एकाङ्करूपकाणां रचनमपि प्रतिभावतां शक्यमस्ति । महाकाव्यस्यास्य व्याख्यातारः सन्ति प्राक्तनाः बहवः । तद् व्याख्यानानि च बहूनि उपलभ्यन्ते । तानि स्वीकृत्य तद्वारा महाकाव्यस्य वैशिष्ट्यमपि वर्णयितुं शक्यते । विषयविशेषानाधृत्य च छात्राणामानुकूल्याय च अनेकप्रबन्धानां सङ्कलनमपि शक्यम् । तथा च– काव्यमिदं ज्ञानविस्तारकं, लोकोत्तरानन्दजनकं, लेखकानां वैदुष्यतासम्पादकं च भवतीति सदृढं भणामि ॥

श्रीकाशीश्रीनिवासाचार्यकृता सङ्ग्रहरामायणटीका इतः पूर्वम् अप्रकाशिता वर्तते । बह्वर्थगर्भिता एषा टीका सरला असदृशी च । युद्धकाण्डोऽयं संशोधनार्हः, सम्पादनार्हः इति च निश्चप्रचं वच्मि । अवश्यमिदं व्याख्यानं इतरव्याख्याविमर्शपर्यालोचनपुरस्सरं, पाठभेदादिविचारपूर्वकं, संशोधनीयं, सम्पादनीयमिति बुद्ध्या प्रवृत्तोऽहम् । भगवदनुग्रहेण सहृदयसाहाय्येन, मार्गदर्शकाणां प्रबोधनेन च पूर्तिं प्राप्नोदिति विश्वसित्ययं जनः ॥

Rarest Archiver

प्रबन्धावलोकनानन्तरं किञ्चित्

Rarest Archiver

श्रीनारयणपण्डिताचार्याणां प्रशस्तिः

१. श्रीवामनपण्डिताचार्यः स्वकीये **"आनन्दमाला"** इति नामके ग्रन्थे स्वपितरं गुरुंश्च श्रीनारायणपण्डिताचार्यम्, एवं पितामहं श्रीत्रिविक्रमपण्डिताचार्यं च एवमस्तौत्–

"अशेषवेदान्तकृतान्तसारव्याख्याविहारान् हरिभक्तिसिन्धून् ।
त्रिविक्रमार्यान् परमान् गुरून् मे नारायणार्यांश्च गुरुन्नमामि" ॥ आनन्दमाला

२. उडुपि श्रीसोदेमठीयैः श्रीवादिराजतीर्थगुरुसार्वभौमैः विरचिते स्वकीये **"श्रीमन्महा–भारततात्पर्यनिर्णयव्याख्याने"** श्रीनारायणपण्डिताचार्यवचनं सादरमेवम् उदाहरन्ति– **"प्राचां वचः"** प्राचीनानां वचनम् इति ॥

३. मन्त्रालयप्रभुभिः श्रीराघवेन्द्रगुरुसार्वभौमैः विरचितायां **"तत्त्वमञ्जरी"** नामिकायां कृतौ श्रीनारायणपण्डिताचार्यमेवं वर्णयन्ति– **"आनन्दतीर्थभगवत्पादोपसदः"** (श्रीआनन्द–तीर्थभगवत्पादासक्तः) इति ॥

४. श्रीवैश्वनाथिनारायणपण्डिताचार्यकृतशिवस्तुतिटीकायाम्–

"श्रीमत्प्राणाधिनायकतनुस्वानन्दतीर्थामल–
श्रीपादाम्बुजसेवनोदितमहाबुद्धिः कवीन्द्राग्रणीः ।
चक्रे रुद्रनुतिं त्रिविक्रमकवेः सूनुर्गभीरार्थकां
श्रीनारायणपण्डिताय महिताचार्याय तस्मै नमः" ॥ एवं स्तुवन्ति ॥

५. श्रीराघवेन्द्रस्वामिनां पूर्वाश्रमस्य सम्बन्धिना श्रीनारायणाचार्येण कृते ग्रन्थेऽस्मिन् श्रीनारायणपण्डिताचार्यस्तुतिः कृता । यथा–

"वाणीपाणितलासक्तवीणारवविडम्बिनी ।
नानाप्रबन्धचतुरा भाति नारायणार्यगीः ॥ (श्रीराघवेन्द्रविजये १.स.६.श्लोकः)

६. **"त्रिविक्रमाचार्य तनूजनुः कृतावनीच काव्यस्य पितुः समो मतिम् ।**
महीयसीं तत्र स मेऽमलीमसां ददातु नारायणपण्डिताग्रणिः" ॥
श्लोकोऽयं श्रीसत्यबोधविजयग्रन्थसम्बद्धः श्रीकञ्चीकृष्णाचार्यकृतः ॥

Rarest Archiver

७. “**कवी प्रवीणौ सुमनोज्ञकाव्यविलासहेतू इव रामसूनू ।**
स्वगोभिरानन्दितजानकीनौ श्रयाम्ययुग्विक्रमतत्तनूजौ” ॥

(श्रीसत्यसन्धविजयः.१.स.६.श्लोकः)

८. श्रीसुमध्वविजय,सङ्ग्रहरामायणमहाकाव्ययोः व्याख्याकाराः श्रीविश्वपतितीर्थाः स्व-व्याख्याने श्रीनारायणपण्डिताचार्यान् एवं स्तुवन्ति–**“अनुप्रासप्रचुरमिदं काव्यम्”** इति ॥

९. श्रीविद्याभूषणतीर्थाः सङ्ग्रहरामायणव्याख्यानावसरे श्रीनारायणपण्डिताचार्यान् एवम् अस्तौत्–

“ज्यायान् भूविक्रमार्यप्रवरसुतो यः स नारायणाख्यो
बालानां बोधनाय व्यतनुत हृदि सङ्गृह्य रामायणार्थम् ।
ग्रन्थं सन्निर्णयार्थं विवरणमहमेतस्य किञ्चित्करिष्ये
दृष्ट्वैतत्साधुचित्ता न हसत नितरां प्रीतिमेवातनुध्वम्” ॥

श्रीकाशीआचार्यकृताः सङ्ग्रहरामायणव्याख्यानस्य आद्यन्तश्लोकाः

आरम्भश्लोकः :–

“रामं दाशरथिं नत्वा पूर्णबोधगुरूनपि ।
सङ्ग्रहाख्यां रामकथां व्याकरिष्ये यथामति” ॥

अन्तिमश्लोकौ :–

“सीतारामप्रसादेन श्रीनिवासो यथामति ।
सङ्गृहाख्यस्य विवृतिमकार्षीच्छ्रीशतुष्टये” ॥

“सीतार्थं सेतुनिर्माणे शाखामूषकयोर्यथा ।
सङ्ग्रहस्य तथा सेवामकरोदिन्दिराश्रयः” ॥

Rarest Archive

युद्धकाण्डीयालङ्कारविशेषाः

काव्यं ग्राह्यं अलङ्कारात् सौन्दर्यमलङ्कार इति आलङ्कारिकस्य वामनस्य सूत्रे । तत्र वृत्तिः– अलङ्कृतिरलङ्कारः । करणव्युत्पत्या पुनरलङ्कारशब्दोऽयमुपमादिषु वर्तते इति । काव्यग्रहणहेतुत्वेन उपमालङ्कार उपन्यस्यते । अर्थात् शब्दार्थयुगलं काव्यमिति भवति । तदुपस्कारकत्वात् उपमादयः अनुप्रासादयश्च अलङ्करा इत्युच्यन्ते शरीरस्य कटकादिवत् । अलङ्क्रियते अनेन इति अलङ्कार उपमादिः । काव्यगतशब्दार्थयोः शोभावर्धकत्वात् अलङ्काराणामलङ्कारत्वं निर्विवादतया सिद्धम् ॥

ते चालङ्कराः शब्दालङ्कराः, अर्थालङ्कारा इति द्वैविध्यं भजन्ते । उपमा, रूपकादयः अर्थालङ्कराः । अनुप्रास, यमकादयश्च शब्दालङ्कराः काव्यशोभार्थम् अवश्यं कविः उभयविधमप्यलङ्कारं यथेष्टं सप्रसङ्गं सङ्कलयति । निराभरणा कामिनी सर्वाभरणैः भूषिता कामिनीव न सर्वजनमनोल्लासिनी भवति । काव्यसुन्दरी तु अवश्यं सर्वविघ्ना–लङ्कारान् अभिलषत्येव । अत एव महाकवयः प्रतिश्लोकमलङ्कारेण उपशोभितं विधास्यन्ति । महाकविरयं श्रीनारायणपण्डिताचार्यः अस्मिन् सङ्ग्रहरामायणाख्ये स्वकीय –महाकाव्ये प्रसङ्गानुगुणं बहुविधानर्थालङ्कारान् शब्दालङ्कारांश्च युयोजेति । अत्र च मदीयानुसन्धानस्य विषयस्तावद् युद्धकाण्डीयकाशीश्रीनिवासाचार्यस्य टिप्पणी । तस्मिन् व्याख्याने प्रायः शब्दालङ्काराः अर्थालङ्काराश्च न निरूपिताः । बालानां च काव्यार्थस्य सुलभावगाहनाय प्रतिपदं सम्यग् व्याख्यातः । व्याकरणविशेषाश्च प्रदर्शिताः । शब्दार्थ–निरूपणे कोशानामुलेखः कोशस्योद्धरणं च कृतम् । श्रीमन्महाभारततात्पर्यनिर्णयस्य भागवतादिपुराणानां च संवादः तत्र तत्र प्रदर्शितः । अथापि अत्र तन्न्यूनता न भवेदिति दृष्ट्या सङ्ग्रहरामायणस्य युद्धकाण्डीयश्लोकेषु विद्यमानानां शब्दार्थालङ्काराणां क्वचिदिवोल्लेखः क्रियतेऽत्र । युद्धकाण्डे च विशिष्य अनुप्रास, यमकयोः प्रयोगः भूरिशोपलभ्यते ॥

शब्दालङ्कारेषु च प्राधान्यं भजेते अनुप्रासयमकालङ्लारौ । सरूपवर्णविन्यासमनुप्रासं प्रचक्षते । अयं चानुप्रासः द्विविधः– छेकानुप्रासः, वृत्यनुप्रासः व्यञ्जनवर्णस्य सकृत् छेकः पूर्वः भवति चेत् छेकानुप्रासः । एकस्यानेककस्य वा व्यञ्जनस्य अनेकवारं

Rarest Archive

प्रयोगः वृत्यनुप्रासः प्रायः आवृत्यानुप्रासः । लाटानुप्रासस्तु– शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः ॥

यमकः– "अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः"। उपमादायस्तु अर्थालङ्काराः बहवः काव्यार्थशोभावर्धकाः । कविस्तु उभयविधालङ्काराणां प्रयोगे सिद्धहस्तः । समग्रं काव्यं प्रतिश्लोकं आलङ्कारैरलङ्कृतं सत् सहृदयानां मनो मुकरं विकासयति । विशेषतोऽस्मिन् अनुसन्धानकर्मणि युद्धकाण्डस्थेषु पद्येषु तत्र तत्र निबद्धानाम् अलङ्काराणां परिचयः किञ्चिदिव क्रियते । श्रीकाशीश्रीनिवासाचर्यैः अलङ्काराणाम् उल्लेखने विशेषतो आदरः न प्रकाशितः । अतो व्याप्यामनुसृत्य नेह प्रतन्यते । युद्धकाण्डे समुलब्धास्त्वेते अलङ्काराः वारं वारं प्रयुज्यन्ते । सहृदयैः सुलभवेदनीयास्ते अतो नेह प्रतन्यते ॥

एतेऽलङ्काराः सुप्रयुक्ताः तल्लक्षणं उदाहरणश्लोकाश्च केचन प्रदर्शिताः ॥

प्रथमः सर्गः–

१."समूलतूलं धक्ष्यामि रावणारण्यमुल्बणम् ।
उत्तराफल्गुनी ह्यद्य मध्याह्ने गमनं शुभम्" ॥ वृत्यनुप्रासालङ्कारः ॥
तल्लक्षणम्– "एकस्यानेकस्य वा व्यञ्जनस्य अनेकवारं प्रयोगः वृत्यनुप्रासः" ॥

२. "राम उक्त्वेति रविजम् आरुरोहाथ मारुतिम् ।
निशाचरध्वान्तभिदे सवितेवोदयाचलम्" ॥ रूपकम्, उत्प्रेक्षालङ्कारश्च ॥
रूपकलक्षणम्– "विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् ।
रूपकं तत्त्विधाधिक्यन्यूनत्वानुभयोक्तिभिः" ॥
उत्प्रेक्षालक्षणम्– "सम्भवानास्यादुत्प्रेक्षा वस्तुहेतुफलात्मना" ॥

३. "जीमूता इव गर्जन्तः सपक्षाः पर्वता इव ।
रामदासाः कपीन्द्रास्ते रेजिरे गमनोत्सवे" ॥ मालोपमालङ्कारः ॥
तल्लक्षणम्– "उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः" ॥

४. "रामाज्ञावेलया रुद्धः कपिसैन्यमहार्णवः ।
पुरग्रामव्रजादीनि क्षुभितोऽपि न चक्रमे" ॥ रूपकालङ्कारः ॥

Rarest Archive

५. **“वेलां विशालामापेदे माहेन्द्रादवरुह्य सः ।**
सेनायास्तत्र सेनान्या रामो वासमकल्पयत्” ॥ यमकालङ्कारः ॥
तल्लक्षणम्– “अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः” ॥

६. **“अशेतानन्तशयनो वेलायां दर्भसंस्तरे ।**
भुजं भुजङ्गभोगाभम् उपधायाथ दक्षिणम्” ॥ वृत्त्यनुप्रासः, यमकालङ्कारश्च ॥

७. **“वानराः किं नराहारान् अस्मान् कुर्युः फलाशिनः ।**
कथञ्चिज्जीवता यातं कपिना तेन भूयसा” ॥ यमकः, अनुप्रासालङ्कारश्च ॥

८. **“भवभयवनवह्निभर्जितानां निरुपधिभक्तिरसामृताब्धिभाजाम् ।**
शरणमशरणो व्रजामि रामं शरणमहं करुणाकरं मुकुन्दम्”॥ रूपक,यमक,अनुप्रासाः ॥

<u>द्वितीयः सर्गः</u>–

९. **“हेयभागाच्च गृह्णन्ति सारं सारविदो जनाः ।**
सानुरागमवित्रस्तं मणिं फणिकुलादिव” ॥ उपमालङ्कारः ॥

१०. **“अपरीक्ष्यापरिचितं सारं गृह्णाति सारवित् ।**
तत्रोदाहरणं गृह्णन् पौष्पं मधुकरो मधु” ॥ निदर्शनालङ्कारः ॥
तल्लक्षणम्– “वाक्यार्थयास्सदृशयोरैक्यारोपो निदर्शना” ॥

<u>तृतीयः सर्गः</u>–

११. **“पारेऽस्मिन् परपारे च सेतावद्रौ वने जले ।**
शयितानासितान् यातान् ऐक्षतां तौ कपिव्रजान्” ॥ यमकालङ्कारः ॥

१२. **“प्राकारगृहहर्म्याढ्यां सर्वसम्पत्समन्विताम् ।**
तां दृष्ट्वा विस्मयं भेजे पुरन्दरपुरीमिव” ॥ उपमालङ्कारः ॥

१३. **“मरकतमणिवर्णं मत्तमातङ्गलीलं मधुकरपरिघुष्टां वैजयन्तीं वहन्तम् ।**
हरिपरिषदि रामं सस्मितं वीक्षमाणं हरिपतिरथ नत्वा चोदयामास सेनाम् ॥
श्लोकेऽस्मिन्– यमकः,अनुप्रासालङ्कारश्च ॥

Rarest Archiver

चतुर्थः सर्गः–

१४. **"प्रासादभङ्गादथ रावणस्य प्रसादभङ्गो नितरां बभूव ।**
प्रसादभङ्गाद् द्विषतो मुकुन्दप्रसादमुन्मेषितवान् हरीन्द्रः" ॥ कारणमालालङ्कारः ॥
तल्लक्षणम्– "गुम्फः कारणमाला स्याद्यथाप्राक्प्रान्तकारणैः" ॥

१५. **"केचिद्गजानां शततुल्यवीर्याः सहस्रवीर्या अपि लक्षवीर्याः ।**
समुद्रवीर्याश्च महौघवीर्याः केचिन्महान्तोऽपरिमेयवीर्याः" ॥ सारालङ्कारः ॥
तल्लक्षणम्– "उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते" ॥

१६. **"यन्त्राण्यकृन्तन् परिखा अपूरयन् वप्राण्यभिन्दंश्च वनान्यखण्डयन् ।**
प्रासादमालाः सकला असादयन् युद्धोद्धताः कोसलनाथकिङ्कराः" ॥
श्लोकेऽस्मिन् समुच्चयालङ्कारः ॥
तल्लक्षणम्– "बहूनां युगपद्भावभाजां गुम्फः समुच्चयः" ॥

१७. **"अन्योन्यतः पाणिपुटावपीडयन्नताडयन् स्वोरुमथ प्लवङ्गमाः ।**
साटोपमास्फोट्य गभीरनिस्वना उच्चैरुदारामपि गामुदाहरन्"॥ समुच्चयालङ्कारः॥

पञ्चमः सर्गः–

१८. **"रामरावणभृत्यानां द्वन्द्वयुद्धमभून्मिथः ।**
तीव्राणां पुण्यपापानां यथैव पुरसन्निधौ" ॥ दीपकालङ्कारः ॥
तल्लक्षणम्– "वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः" ॥

१९. **"तेजसाऽङ्गदचन्द्रस्य विष्णोःपदमुपेयुषः ।**
ध्वस्तं नक्तञ्चरतमः कपिचक्राब्धिरुद्धतः" ॥ रूपकालङ्कारः ॥

२०. **"बालानामबलानां च प्रबलानां च रक्षसाम् ।**
सीताहेलनदोषेण विनाशोऽभूदचिन्तितः" ॥ हेत्वलङ्कारः ॥
तल्लक्षणम्– सहोक्तिरैक्यं हेतुस्स्याद्धेतु–हेतुमतोर्द्वयोः ॥

षष्टः सर्गः–

Rarest Archiver

२१. "ततो निकुम्भः कुम्भश्च कुम्भकर्णसुतावुभौ ।
वानरानुल्मकधरान् प्रापतुः रावणाज्ञया" ॥ यमकालङ्कारः ॥

२२. "सुषेणो जाम्बवान् नीलो नलस्तारादयस्तथा ।
अभ्यद्रवन् शिलाहस्ताः कुम्भस्तानजयच्छरैः" ॥ दीपकालङ्कारः ॥

२३. "शीर्यमाणान् रिपुशरैः शिलावृक्षान् विलोक्य सः ।
कुम्भस्य धनुराच्छिद्य चिच्छेदेक्षुमिव द्विपः" ॥ उपमालङ्कारः ॥

२४. "परिघं प्रतिघोन्नद्धः सुरवारणदारणम् ।
अबिभ्रमन्निकुम्भोऽथ दण्डं दण्डधरो यथा" ॥ यमकः, अनुप्रासालङ्कारश्च ॥

सप्तमः सर्गः–

२५. "विपक्षवक्षो नावेक्षे मच्छरा नैव पृष्ठगाः ।
निवर्तिष्ये निराशोऽहम् इत्यूचे रावणात्मजः" ॥ अनुप्रासालङ्कारः ॥

२६. "रणं द्रष्टुं नभो भेजुः तयोर्वीरकुमारयोः ।
पक्षपाते परिक्षिप्ता उभयेऽपि सुरासुराः" ॥ तुल्ययोगितालङ्कारः ॥
तल्लक्षणम्– "वर्ण्यानामेतरेषां वा धर्मैक्यं तुल्ययोगिता" ॥

२७. "चिक्षेप राक्षसः शूलं रामश्चिच्छेद तच्छरैः ।
चिच्छेद च शरेणास्य शिरः कुण्डलमण्डितम्" ॥ तुल्ययोगितालङ्कारः ॥

अष्टमः सर्गः–

२८. "गजो गवाक्षो गवयो वृषश्च सगन्धमादाः सह कत्थनेन ।
रक्षश्चमूं जघ्नुरिमे कपीन्द्राः षड्भिः शरैस्तानतुदद् दशास्यः" ॥
श्लोकेऽस्मिन् तुल्ययोगितालङ्कारः ॥

२९. "भुजं भुजङ्गाभमथोन्नमय्य तं रावणं ताडितवान् हनूमान् ।
सर्वाननेभ्योऽथ जगाल रक्तं धातुद्रवोऽद्रेरिव कन्दरेभ्यः"॥ यमकः,दृष्टान्तालङ्कारश्च ॥
दृष्टान्तालङ्करस्य लक्षणम्– "चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः" ॥

Rarest Archive

३०. **“मत्तोऽसि मत्तोऽपि गृहाण वीर मुष्टिप्रहारं त्वमथेत्युदीर्य ।**
सर्वौजसा सर्वजयी दशास्यः सन्ताडयामास समीरसूनुम्” ॥ यमकालङ्कारः ॥

नवमः सर्गः–

३१. **“कवलत्रितयार्थं स्यात् कथञ्चिद् भुवनत्रयम् ।**
सप्ताब्धयोऽनुपानार्थम् इत्युक्त्वा स ययौ युधे” ॥ अधिकालङ्कारः ॥
तल्लक्षणम्– “अधिकं पृथुलाधारादाधेयाधिक्यवर्णनम्” ॥

३२. **“बहुयोजनविस्तीर्णं ततश्चाभ्यधिकोच्छ्रयम् ।**
कालाम्बुदप्रभतनुं कालन्तक यमोपमम्” ॥ उपमालङ्कारः ॥

३३. **“पादाभ्यामतिभीमाभ्यां दारयन्तमिवावनिम् ।**
वृत्ताभ्यां ताम्रनेत्राभ्यां विसृजन्तं महानलम्” ॥ उत्प्रेक्षालङ्कारः ॥

३४. **“ग्रसन्तमिव लोकांस्त्रीन् भूरिसंरम्भसम्भ्रमम् ।**
महाट्टहासप्रक्ष्वेलं घनाघनघनस्वनम्” ॥ अनुप्रासालङ्कारः ॥

३५. **“सेतुमत्यगमन् केचित् केचित् सेतुमुपागमन् ।**
केचिन्निलीना वृक्षेषु पतिताः केचन क्षितौ” ॥ यमकालङ्कारः ॥

३६. **“ते कौम्भकर्णा भुवि हस्तपादा लोठन्त उच्चैः कठिनाद्रितुल्याः ।**
अनीकिनीं तां कपिराक्षसानाम् अक्षोभयन्नम्बुनिधिं पुरं च” ॥ सहोक्त्यलङ्कारः ॥
तल्लक्षणम्– “सहोक्तिस्सहभावश्चेद्भासते जनरञ्जनः” ॥

दशमः सर्गः–

३७. **“स द्वितीय इवाऽदित्य आदित्यपथमेयिवान् ।**
अतिदीर्घमथाऽकाशं हनूमानत्यवर्तत” ॥ उत्प्रेक्षालङ्कारः ॥

३८. **“लीलयोल्लोलयन्नद्रिं कराग्रे कन्दुकायितम् ।**
विरराज वियत्येष वीरराजो जगत्त्रये” ॥ अनुप्रासालङ्कारः ॥

Rarest Archive

३९. **“स देवतानामभयङ्करात्मा भयङ्करो दैवतशात्रवाणाम् ।**
बभौ गिरिं बिभ्रदहो हनूमान् त्रिविक्रमश्चक्रधरो यथा प्राक्” ॥ उपमालङ्कारः ॥

एकादशः सर्गः–

४०. **“रक्तास्यनयनः क्रुद्धो भिन्नाञ्जनचयोपमः ।**
कपीनद्रावयद् बाणैः दण्डपाणिरिवापरः” ॥ उत्प्रेक्षालङ्कारः ॥

४१. **“बाहुभ्यामथ बाणैर्वा मायया वाऽप्यमायया ।**
मद्वेगं सहसे चेत् त्वं कीर्तिं पूर्वामवाप्स्यसि” ॥ विकल्पालङ्कारः ॥
तल्लक्षणम्– “विरोधे तुल्यबलयोर्विकल्पालङ्कृतिर्मता” ॥

४२. **“विभीषणस्यानुचरा विभीषण उत स्वयम् ।**
भीषणं विदधुर्युद्धं भीषणैरिन्द्रजिद्भटैः” ॥ यमकालङ्कारः ॥

द्वादशः सर्गः–

४३. **“भूयानभूद् राघवसैनिकानां मोदश्च मोदप्रभवश्च रावः ।**
ततोऽपि भूयान् पुरि राक्षसानां शोकश्च शोकप्रभवश्च रावः” ॥ यमकालङ्कारः ॥

४४. **“त्रिंशत्सहस्राणि महौघकानाम् अक्षौहिणीनामपि षट्सहस्रम् ।**
समादिदेशाऽशु रणाय यास्यन् स राक्षसान् राक्षसयूथनाथः” ॥ अनुज्ञालङ्कारः ॥
तल्लक्षणम्– “दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्” ॥

४५. **“जाज्वल्यमानोज्ज्वलहेतिलीलो धूमायमानोद्धतधूलिधूम्रः ।**
विसृत्वरः सैन्यमहौघसङ्घः सांवर्तको वह्निरिवोददीपि” ॥ उत्प्रेक्षालङ्कारः ॥

४६. **“वराद् विरिञ्चस्य परैरजेयां सर्वैरवध्यां च चमूं प्रयुध्य ।**
तरङ्गिणीतुङ्गतरङ्गलोलपलाण्डुवन्नस्थिरतां ययुस्ते” ॥ दृष्टान्तालङ्कारः ॥

४७. **“अपाङ्गमात्रेण जगन्नियन्ता नन्वेकरूपोऽपि रिपून् निहन्यात् ।**
स्वैश्वर्यमेवं च निदर्शयन् हि स विश्वरूपोऽकृत विश्वरूपम्” ॥ यमकालङ्कारः ॥

Rarest Archive

त्रयोदशः सर्गः–

४८. "महाबलेन रामेण श्रुत्वा मूलबलं हतम् ।
जीविताशां सुखाशां च क्षणात् तत्याज रावणः ॥ सहोक्त्यलङ्कारः ॥

४९. "स एव कुम्भकर्णोऽयं हन्तुं नः पुनरागतः ।
इति विक्रुश्य हरयो पलायन्त दिशो दश" ॥ भ्रान्तिमदलङ्कारः ॥
तल्लक्षणम्– "सादृश्यात् तस्मिन् तद्ग्रहो भ्रान्तिः" ॥

५०. "शरपञ्जरबद्धोऽथ रक्षोभ्यां वालिनन्दनः ।
न शशाक प्रचलितुं व्याघ्रः पञ्जरगो यथा" ॥ उपमालङ्कारः ॥

५१. "तेन हर्यक्षराजस्य वक्षो रक्षोधिपो बली ।
निर्बिभेदाथ सुग्रीवो मूर्च्छितो न्यपतद् भुवि" ॥ अनुप्रासालङ्कारः ॥

५२. "दारयिष्यामि हृदयं दारुणं तव रावण ।
साधूनां धर्ममार्गस्य कवाटमिव रोधकम्" ॥ उपमालङ्कारः ॥

चतुर्दशः सर्गः–

५४. "विदारणं दारुणदानवानाम् अदारणीयं कुलिशादिभिश्च ।
विराविणं भीमतरं नितान्तं स रावणायाथ मुमोच बाणम्" ॥ यमकः अनुप्रासश्च ॥

५५. "श्रीरामनामाक्षरलक्षणोऽयं विलक्षणः सर्वजगत्सु जिष्णुः ।
स मार्गणः श्रीरमणेन मुक्तो मुख्यः स्वयं भक्त इवाज्वलत् खे" ॥ उपमालङ्कारः ॥

५६. "ते राक्षसा रावणभृत्यभूता हतावशिष्टाः पतिते दशास्ये ।
पराद्रवन् प्राणपरीप्सयाऽथ वृक्षे विपन्ने पतगा इव द्राक्" ॥ दृष्टान्तालङ्कारः ॥

५७. "पद्मापतिं पद्मभवोऽथ देवो बद्धाञ्जलिर्बद्धमहानुबन्धः ।
तुष्टाव तुष्टात्ममतिर्वचोभिः गुह्यैः स वेदान्तकृतान्तसारैः" ॥ यमकालङ्कारः ॥

५८. "अर्चिष्मतोऽर्चींषि रवेर्मयूखाः वेगाश्च वायोः सरितो यथाऽऽपः ।
निर्यान्ति संयान्ति च सन्ततं हि त्वत्तो वयं चेश तथा समस्ताः" ॥ सहोक्त्यलङ्कारः ॥

Rarest Archiver

पञ्चदशः सर्गः–

५९. "लक्ष्मणं च परिष्वज्य लक्ष्मणाग्रजमब्रवीत् ।
त्वया भवाब्धिमतरं विश्वनन्दन नन्दन" ॥ रूपकालङ्कारः ॥

६०. "रामः सलक्ष्मणस्तत्र हनूमत्सूर्यजादिकान् ।
कपीन् विभीषणं चैनमारोपयत पुष्पकम्" ॥ दीपकालङ्कारः ॥

षोडशः सर्गः–

६२. "सितातपत्रं तपनीयदण्डं दध्रे सुमित्रातनयो यवीयान् ।
अचालयेतामथ चामरे द्वे देवस्य सुग्रीवविभीषणौ तौ" ॥ समुच्चयालङ्कारः ॥

६३. "अतिक्रमं यस्य पराक्रमाणां न कोऽपि कुर्यादुचितक्रमाणाम् ।
अतिक्रमी योऽन्यपराक्रमाणां तस्मै शुभे त्वं दिश वेतनार्थम्" ॥ यमकालङ्कारः ॥

६४. "सुधासुधारासितया तयाऽलं सुवर्णवर्णोऽथ बभार शोभाम् ।
हारस्रजाऽसौ हनुमान् महात्मा यथा महामेरुरमर्त्यनद्या" ॥ यमकालङ्कारः ॥

श्रीमन्महाभारततात्पर्यनिर्णये श्रीमन्मध्वाचार्यैः
श्रीरामायणपारायणश्रवणादिफलमेवम् उल्लिखितम्–

इतीरिता रामकथा परा मया

समस्तशास्त्रानुसृतेर्भवापहा ।

पठेदिमां यः शृणुयादथापि वा

विमुक्तबन्धश्चरणं हरेर्व्रजेत् ॥ (९.अ.१३७.श्लो)

Rarest Archive

छन्दोगतिः युद्धकाण्डपद्येषु

श्रीनारायणपण्डिताचार्याणां महाकवित्वविषये न विमतिराविर्भवति कस्यापि सहृदयस्य । महाकाव्यस्य यानि प्रथितानि दण्डिप्रभृतिभिरुल्लेखितानि तानि सर्वाण्यपि पूर्णरूपेण अत्रातितरां विलसन्ति । कविर्वदनतुहिनाद्रेः सरभसं निर्गलन्ती काव्यरसगङ्गावगाहितान् समस्तान् पुनात्येव रसामृतदानेन च निर्वर्त्यंयत्येव । एवमलौकिकानन्दजनने तदैव शक्तं भवति । काव्यं यदैव रसभरितानर्थान् तत्तद्रसाविष्करणयोग्यरीतीनां छन्दोगतीनामालम्बनेन च भवति । अयं च सहजकविताकामिनी परिरम्भितः श्रीनारायणपण्डिताचार्यः स्वप्रति –भोद्भासितान् अर्थविशेषान् प्रकाशयितुं विविधछन्दोबद्धान् श्लोकान् निबबन्ध ॥

अपृथगतलेनैव कविः शब्दालङ्कारान् अर्थालङ्कारांश्च यथा सन्निवेशं संयोजयामास । अपि च छन्दोगतिषु चतुरगतिरयं छन्दोवैचित्र्यं च स्वेच्छया आकलयन् कविताभामिनीं भ्रमयामास । तदत्र युद्धकाण्डीयश्लोकेषु विरचितां छन्दोगतिं स्थूलदृष्ट्यावलोकयामः ॥

प्रथमः सर्गः–

- अनुष्टुप् छन्दः १.श्लोकतः ५४.श्लोकपर्यन्तम् ।
  अनुष्टुप्छन्दो लक्षणम्–
  **"पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
  गुरुः षष्टं च पादानां चतुर्णां स्यादनुष्टभि"** ॥

- ५५.श्लोकः शक्वरीछन्दः । वसन्ततिलकावृत्तम् ।
  तल्लक्षणम्– **"उक्तावसन्ततिलका तभजजगौगः** ।

द्वितीयः सर्गः–

- अनुष्टुप् छन्दः १.श्लोकतः ६८.श्लोकपर्यन्तम् ।
- ६९.श्लोकस्तु वसन्ततिलकावृत्तम् ॥

तृतीयः सर्गः–

- १.श्लोकतः ५३.श्लोकाः अनुष्टुप् छन्दसि ।
- ५४.श्लोकस्तु अतिशक्वरीछन्दः । मालिनीवृत्तम् ।

Rarest Archiver

तल्लक्षणं च– **“ननमयययुतेयं मालिनीभिगिलोकैः”** ॥

चतुर्थः सर्गः–

- त्रिष्टुप् छन्दः– १.श्लोकतः ३०.श्लोकपर्यन्तम् । उपजातिवृत्तं च ।
  उपजातिलक्षणम्– **“अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्त्रः”** ।
  इन्द्रवज्राउपेन्द्रवज्रयोर्मेलने उपजातिवृत्तम् भवति ॥
  इन्द्रवज्रालक्षणम्– **“स्यादिन्द्रवज्रा यदि तौ जगौ गः”** ।
  उपेन्द्रवज्रालक्षणम्– **“उपेन्द्रवज्राजतजास्ततो गौ”** ।

- ३१.श्लोकस्तु मालिनीवृत्तम् ॥

पञ्चमः सर्गः–

- अनुष्टुप् छन्दः १.श्लोकतः ४९.श्लोकपर्यन्तम् ।

- ५०.श्लोकस्तु मालिनीवृत्तम् ॥

षष्टः सर्गः–

- अनुष्टुप् छन्दः १.श्लोकतः ६२.श्लोकपर्यन्तम् ।

- ६३.श्लोकस्तु मालिनीवृत्तम् ॥

सप्तमः सर्गः–

- अनुष्टुप् छन्दः १.श्लोकतः ३१.श्लोकपर्यन्तम् ।

- ३२.श्लोकस्तु वसन्ततिलकावृत्तम् ॥

अष्टमः सर्गः–

- त्रिष्टुप् छन्दः, उपेन्द्रवज्रावृत्तञ्च १.श्लोकतः ४२.श्लोकपर्यन्तम् ।

- ४३.श्लोकस्तु जगतीछन्दः ।
  तल्लक्षणम्– **“जतौ तु वशंस्थमुदीरितं जरौ”** । (इति वशंस्थवृत्तस्य लक्षणम्)

नवमः सर्गः–

- अनुष्टुप् छन्दः १.श्लोकतः ८०.श्लोकपर्यन्तम् ।
- ८१.श्लोकस्तु मालिनीवृत्तम् ॥

Rarest Archiver

दशमः सर्गः–

- अनुष्टुप् छन्दः १.श्लोकतः ५०.श्लोकपर्यन्तम् ।
- ५१.श्लोकः त्रिष्टुप् छन्दः उपेन्द्रवज्रावृत्तम् ।
- ५२.श्लोक इन्द्रवंशावृत्तम् । तल्लक्षणम्– **“स्यादिन्द्रवंशा ततजैरसंयुतैः”** ।
- ५३.श्लोकस्तु मालिनीवृत्तम् ॥

एकादशः सर्गः–

- अनुष्टुप् छन्दः १.श्लोकतः ५७.श्लोकपर्यन्तम् ।
- ५८.इतः ७२.पर्यन्तं त्रिष्टुप्, उपेन्द्रवज्रा ।
- ७३.श्लोकस्तु शालिनीवृत्तम् ।
  तल्लक्षणम्– **“शालिन्युक्ता ग्तौ तरौ गोग्धिलोकैः”** ॥

द्वादशः सर्गः–

- त्रिष्टुप् छन्दः १.श्लोकतः ३३.श्लोकपर्यन्तम् इन्द्रवज्रा च ।
- ३४.श्लोकस्तु मालिनीवृत्तम् ॥

त्रयोदशः सर्गः–

- अनुष्टुप् छन्दः १.श्लोकतः ८०.श्लोकपर्यन्तम् ।
- ८१.श्लोकस्तु वसन्ततिलकावृत्तम् ॥

चतुर्दशः सर्गः–

- त्रिष्टुप् छन्दः १.श्लोकतः ४८.श्लोकपर्यन्तम् उपेन्द्रवज्रा च ।
- ४९.श्लोकः वसन्ततिलकावृत्तम् ।
- ५०.श्लोकस्तु स्रग्धरा ।
  तल्लक्षणम्– **“म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्”** ॥

  सप्ताक्षरानन्तरं यतिः । यतिर्विच्छेदसंज्ञकः । त्रिवारं सप्ताक्षरानन्तरं यतिः ॥

Rarest Archiver

पञ्चदशः सर्गः–

- अनुष्टुप् छन्दः १.श्लोकतः ८४.श्लोकपर्यन्तम् ।
- ८५.श्लोकस्तु शालिनीवृत्तम् ॥

षोडशः सर्गः–

- त्रिष्टुप् छन्दः १.श्लोकतः २४.श्लोकपर्यन्तम् उपेन्द्रवज्रा च ।
- २५.श्लोकः वसन्ततिलकावृत्तम् ।
- २६.श्लोकस्तु मालिनीवृत्तम् ॥

–: एकश्लोकी रामायणम् :–

आदौ रामतपोवनाभिगमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम् ।
वालीनिर्दलनं समुद्रतरणं लङ्कापुरीदाहनं
पश्चाद्रावणकुम्भकर्णहननं एतद्धि रामायणम् ॥

Rarest Archiver

सप्तर्षिरामायणम्

(सङ्क्षिप्तरामायणम्)

१.कश्यप उवाच :-

जातः श्रीरघुनायको दशरथान्मुन्याज्ञया ताटकां
हत्वा रक्षितकौशिकक्रतुवरः कृत्वाऽप्यहल्यां शुभाम् ।
भङ्क्त्वा रुद्रशरासनं जनकजामुद्वाह्य रामस्ततो
जित्वा चाध्वनि भार्गवं पुनरगात् सीतासमेतः पुरीम् ॥१॥

२. अत्रिरुवाच :-

दास्या मन्थरया दयारहितया दुर्बोधिता कैकयी
श्रीरामप्रथमाभिषेकसमये माताऽप्ययाचद्वरौ ।
भर्तारं भरतः प्रशास्तु धरणीं रामो वनं गच्छतात्
इत्याकर्ण्य स चोत्तरं न हि ददौ दुःखेन मूर्च्छां गतः ॥२॥

३. भरद्वाज उवाच :-

श्रीरामः पितृशासनाद्वनमगात् सौमित्रिसीतान्वितो
गङ्गां प्राप्य जटां निवध्य सगुहः सच्चित्रकूटे वसन् ।
कृत्वा तत्र पितृक्रियां सभरतो दत्त्वाऽभयं दण्डके
प्राप्यागस्त्यमुनीश्वरं तदुदितं धृत्वा धनुश्चाक्षयम् ॥३॥

४. विश्वामित्र उवाच :-

गत्वा पञ्चवटीमगस्त्यवचनाद् दत्त्वाऽभयं मौनिनां
छित्त्वा शूर्पणखास्यकर्णयुगलं त्रातुं समस्तान् मुनीन् ।
हत्वा तं च खरं सुवर्णहरिणं भित्त्वा तथा वालिनं
तारारत्नमवैरिराज्यमकरोत् सर्वं च सुग्रीवसात् ॥४॥

५. गौतम उवाच :-

दूतो दाशरथेः सलीलमुदधिं तीर्त्वा हनूमान् महान्
दृष्ट्वाऽशोकवने स्थितां जनकजां दत्त्वाऽङ्गुलेर्मुद्रिकाम् ।

Rarest Archiver

अक्षादीनसुरान् निहत्य महतीं लङ्कां च दग्ध्वा पुनः
श्रीरामं च समेत्य देव जननी दृष्टा मयेत्यब्रवीत् ॥५॥

६. जमदग्निरुवाच :–

रामो बद्धपयोनिधिः कपिवरैर्वीरैर्नलाद्यैर्वृतो
लङ्कां प्राप्य सकुम्भकर्णतनुजं हत्वा रणे रावणम् ।
तस्यां न्यस्य विभीषणं पुनरसौ सीतापतिः पुष्पका–
रूढः सन् पुरमागतः सभरतः सिंहासनस्थो बभौ ॥६॥

७. वसिष्ठ उवाच :–

श्रीरामो हयमेधमुख्यमखकृत् सम्यक् प्रजाः पालयन्
कृत्वा राज्यमथानुजैश्च सुचिरं भूरिस्वधर्मान्वितः ।
पुत्रौ भ्रातृसुतान्वितौ कुशलवौ संस्थाप्य भूमण्डले
सोऽयोध्यापुरवासिभिश्च सरयूस्नातः प्रपेदे दिवम् ॥७॥

८. सप्तऋषय ऊचुः :–

श्रीरामस्य कथासुधातिमधुरान् श्लोकानिमानुत्तमान्
ये शृण्वन्ति पठन्ति च प्रतिदिनं पापौघविध्वंसिनः ।
श्रीमन्तो बहुपुत्रपौत्रसहिता भुक्त्वेह भोगान् चिरं
भोगान्ते तु सदाऽर्चितं सुरगणैर्विष्णोर्लभन्ते पदम् ॥८॥

॥ इति सप्तर्षिरामायणम् समाप्तम् ॥

Rarest Archiver

श्रीनारायणपण्डिताचार्यविरचितायां मणिमञ्जर्यां श्रीरामकथा

नारायणपण्डिताचार्यैः मणिमञ्जरीनामकं लघुकाव्यं विरचितम् । तत्र प्रथमद्वितीयसर्गयोः श्रीरामकथा संक्षेपेण निरूपिता दृश्यते । तदयं सङ्ग्रहः–

॥ अथ प्रथमः सर्गः ॥

वन्दे गोविन्दमानन्दज्ञानदेहं पतिं श्रियः ।
श्रीमदानन्दतीर्थार्यवल्लभं परमक्षरम् ॥१॥

ससर्ज भगवानादौ त्रीन् गुणान् प्रकृतेः परः ।
महत्तत्वं ततो विष्णुः सृष्टवान् ब्रह्मणस्तनुम् ॥२॥

महत्तत्त्वादहङ्कारं ससर्ज शिवविग्रहम् ।
दैवान् देहान् मनः खानि खं च स त्रिविधात्ततः ॥३॥

आकाशादसृजद्वायुं वायुस्तेजो व्यजीजनत् ।
तेजसः सलिलं तस्मात् पृथिवीमसृजद्विभुः ॥४॥

ततः कूटस्थमसृजद्विधिं ब्रह्माण्डविग्रहम् ।
तस्मिंस्तु भगवान् भूयो भुवनानि चतुर्दश ॥५॥

तात्त्विकानथ देवान् को वैराजः पुरुषोऽसृजत् ।
तथैव परमान् हंसान् सनकादींश्च योगिनः ॥६॥

असुरान् दोषरूपानपि अविद्यां पाञ्चपर्वणीम् ।
वर्णाश्रमविशेषांश्च धर्मक्लृप्तिं च सोऽसृजत् ॥७॥

मरीच्यत्र्यादयः पुत्रा अभूवन् परमेष्ठिनः ।
मरीचेः कश्यपो जज्ञे वामनस्य पिता वटोः ॥८॥

प्रजाः सिसृक्षुर्विविधा अवहत् कश्यपो दितिम् ।
अदितिं च दनुं कद्रूं कीकसां विनतामपि ॥९॥

Rarest Archiver

दित्यां ततोऽभवन् दैत्या अदित्यां च सुराः पुनः ।
दनौ तु दानवाः कद्रूवां नागा नानाविषोल्बणाः ॥१०॥

कीकसायां यातुधाना विनतायां तु पक्षिणः ।
महावीर्यास्सुता आसन् कश्यपस्य महात्मनः ॥११॥

मानवानां पिता जज्ञे आदित्यात् कश्यपात्मजात् ।
मनुर्नाम महाप्राज्ञ एतन्मन्वन्तरेश्वरः ॥१२॥

तस्य घ्राणादभूच्छ्रीमानिक्ष्वाकुः क्षुवतो मनोः ।
तपस्तप्त्वा विरिञ्चात्स लेभे रङ्गेश्वरं हरिम् ॥१३॥

विकुक्षिस्समभूतस्य पुरञ्जयपुरोगमाः ।
तदन्वये व्यजायन्त शूरा राजर्षयः परे ॥१४॥

तस्मिन् वंशे दशरथो बभूवात्यन्तभाग्यवान् ।
सोऽर्चन् वैमानिकं विष्णुं ररक्ष महतीं महीम् ॥१५॥

तस्मिन् काले सुरास्सर्वे महाराक्षसपीडिताः ।
दुग्धाब्धिशायिनं विष्णुं शरण्यं शरणं ययुः ॥१६॥

त आदिष्टाः श्रियः पत्या जज्ञिरे क्षितिमण्डले ।
शाखामृगादिभावेन हनुमान् मारुतोऽभवत् ॥१७॥

अभयाय सतां हत्यै राक्षसानां ततो हरिः ।
रामनामा दशरथात् कौसल्यायामजायत ॥१८॥

ततो लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतुः ।
कैकेय्यां भरतो जज्ञे सदा शुभरतो नृपात् ॥१९॥

अभ्यवर्धन्त सम्यञ्चः कुमाराः सुकुमारकाः ।
चतुर्भिश्चतुरैः पुत्रैः पितार्थैरिव निर्बभौ ॥२०॥

Rarest Archiver

विश्वामित्रस्ततो यज्ञनिघ्नतो राक्षसेश्वरान् ।
निहन्तुमनयन्नाथं रामदेवं सलक्ष्मणम् ॥२१॥

अटव्यां ताटकां हत्वा स सिद्धाश्रममेयिवान् ।
विधूय यज्ञविघ्नांश्च विदेहविषयं ययौ ॥२२॥

राजाद्यैः पूजितस्सोऽथ विभज्य धनुरैश्वरम् ।
जानकीमलभिष्टोच्चैः स्तूयमानसुरेश्वरैः ॥२३॥

गच्छन् देव्या सहायोध्यां सवसिष्ठस्सलक्ष्मणः ।
कविकाव्ययुतज्योत्स्ना कान्तवत् स व्यरोचत ॥२४॥

प्रविश्य नगरीं तत्र प्रवन्द्य पितरं तथा ।
मातृश्च पूजितः पौरैः स रेमे सुखचित्तनुः ॥२५॥

रामराज्याभिषेकाय दध्रे दशरथो मनः ।
निजघ्ने स तु कैकेय्या मत्सुतो गामवेदिति ॥२६॥

रामदेवस्ततस्सीतालक्ष्मणाभ्यां समन्वितः ।
वनं प्रति ययौ हन्तुमशेषानपि राक्षसान् ॥२७॥

ध्वस्तकर्णां विघोणां च कारयामास राक्षसीम् ।
लङ्केशभगिनीं रामो लक्ष्मणेनानुजन्मना ॥२८॥

रामविप्रकृतः क्रव्यात् प्रतिकर्मचिकीर्षया ।
आजगाम सहानीकः खरो दूषणसंयुतः ॥२९॥

तान् जघान रमानाथो रामो राजीवलोचनः ।
लीलयैव परानन्दस्सुरकार्यार्थसिद्धये ॥३०॥

रामः पुरस्तात् परतोऽपि रामो रामः परं दिक्षु विदिक्षु रामः ।
रामैरनन्तैरिति विश्वरूपो निघ्नन्नरातीन् विरराज रामः ॥३१॥

॥ इति श्रीनारायणपण्डिताचार्यविरचितायां मणिमञ्जर्यां प्रथमस्सर्गः ॥

Rarest Archiver

॥ अथ द्वितीयः सर्गः ॥

ततो दूरं गते रामे रावणस्सहलक्ष्मणे ।
सीतेयं नीयत इति मत्वा निन्ये तदाकृतिम् ॥१॥

रामान्तिके स्थिता देवी न मन्दैः समदृश्यत ।
रूपान्तरेण कैलासं गता नित्यावियोगिनी ॥२॥

नित्यं पश्यन् निजां देवीं पूर्णसन्तोषसम्भृतः ।
रामो न दृश्यते देवीत्यभूत् सङ्कटवानिव ॥३॥

प्रभञ्जनः सुतः श्रीमान् आञ्जनेयो निरञ्जनः ।
ननाम भक्तिसम्पूर्णो रामं राजिवलोचनम् ॥४॥

राम स्वामिन् नमस्तुभ्यं दुष्टान् जहि निजानव ।
निर्दुःखानन्दलीलात्मन् इत्यस्तौत् स निजं गुरुम् ॥५॥

स वनान्तरमासाद्य रामस्सुग्रीवमैक्षत ।
तेन सख्यं समासाद्य निजघान तदग्रजम् ॥६॥

ततस्सुग्रीवसन्दिष्टा वानरा दिक्षु सर्वशः ।
प्रसस्रुर्निपुणा वीरास्सीतामार्गणतत्पराः ॥७॥

दक्षिणां ककुभं गत्वा हनुमानम्भसा निधिम् ।
अतिलङ्घ्य गतो लङ्कां सीताकृतिमवैक्षत ॥८॥

रामाङ्गुलीयकं देव्यै दत्वा चूडामणिं ततः ।
सङ्गृह्य जानकीं भक्त्या नत्वाऽसावारुहत्तरुम् ॥९॥

वनं विशकलय्योच्चै राक्षसानक्षपूर्वकान् ।
निहत्य मारुतिर्लङ्काम् अदहत् पुच्छवह्निना ॥१०॥

ततो रत्नाकरं तीर्त्वा वानरेन्द्रैस्सभाजितः ।
दत्वा चूडामणिं धन्यः प्राप्य रामाय सोऽनमत् ॥११॥

Rarest Archiver

रामो हनूमता सार्धं लक्ष्मणेन च धीमता ।
सुग्रीवेण ससैन्येन कीनाशहरितं ययौ ॥१२॥

स सेतुं दक्षिणाम्भोधौ बन्धयामास मर्कटैः ।
ससैन्यो वर्त्मना तेन नक्तञ्चरपुरं ययौ ॥१३॥

निजघ्नू राक्षसानीकं वानरास्सहलक्ष्मणाः ।
हनुमान् भगवत्प्रीत्यै जघानातिबलान् रिपून् ॥१४॥

सोऽजीवयन्महारक्षो मोहितान् सर्ववानरान् ।
गन्धमादनमानीय तद्गतागदवायुना ॥१५॥

असङ्ख्यान् राक्षसान् हत्वा कुम्भकर्णं च रावणम् ।
रामो विभीषणं रक्षस्साम्राज्ये सोऽभ्यषेचयत् ॥१६॥

अशोकमूलमासाद्य दर्शयामास जानकीम् ।
नित्यावियोगिनीं देवीं रामो मन्ददृशामपि ॥१७॥

हनुमत्प्रमुखैस्सार्धं देव्या च पुरुषोत्तमः ।
आरुह्य पुष्पकं रामो जगाम नगरीं निजाम् ॥१८॥

भरतो भक्तिभरितो राममभ्येत्य निर्वृतः ।
पपात पादयोस्तस्य कृष्णस्येव श्वफल्कजः ॥१९॥

तमुत्थाप्य परिष्वज्य राघवोऽन्तःपुरं गतः ।
सम्पूजितो जनैस्सर्वैः जननीमभ्यवन्दत ॥२०॥

रामो राज्याभिषिक्तस्सन् शशास जगतीं प्रभुः ।
धर्मानशिक्षयत् पूर्णो बुभुजे सम्पदस्सुखी ॥२१॥

सनकादींश्च तद्वंश्यान् मुनीनन्यांश्च मारुतिः ।
रामान्तिके श्रुतिव्याख्याविशेषान् समशिक्षयत् ॥२२॥

Rarest Archiver

सुराणकांस्तमो नेतुं तत्याजेव स जानकीम् ।
व्याप्तत्वान्निरवद्यत्वात् तस्यास्त्यागः कथं भवेत् ॥२३॥

स्वात्मानं यज्ञपुरुषं यज्ञेनायजताथ सः ।
तत्रागता सती सीता वेद्यामन्तर्दधे किल ॥२४॥

धर्मं साङ्ख्यं च योगं च वर्तयामास राघवः ।
प्रावोचन्मरुतस्सूनुस्सम्पदो ननृतुस्तदा ॥२५॥

प्रकृत्या परमा हंसा ब्रह्मणो मानसास्सुताः ।
सनकाद्यास्ततः श्रुत्वा व्याचख्युस्तत्त्वमञ्जसा ॥२६॥

नमो रामाय रामाय राम राम नमोऽस्तुते ।
रामस्स्वामी गती राम इति लोका विचुक्रुशुः ॥२७॥

देवो जिगमिषुर्धाम स्वीयमभ्यर्थितस्सुरैः ।
दुग्धाब्धिं प्रययौ शेषो लक्ष्मणो रामचोदितः ॥२८॥

समायत समायत ये ये मोक्षपदेच्छवः ।
एवमाघोषयद्रामो दूतैर्दिक्षु समस्तशः ॥२९॥

अथोत्तरां दिशं देवः प्रतस्थे सह सीतया ।
वानराद्यैर्नराद्यैरप्यनन्तैर्जन्तुभिर्वृतः ॥३०॥

तेषां मोक्षपदं दत्वाऽभ्यनुज्ञाप्य मरुत्सुतम् ।
राघवस्सीतया सार्धं विवेश स्वं परं पदम् ॥३१॥

सत्येन भक्त्या च विरक्तिमत्या मत्या च धृत्या तपस्यया च ।
हा राम रामेति सदोपगायन् प्राभञ्जनिः किम्पुरुषेषु रेमे ॥३२॥

॥ इति श्रीनारायणपण्डिताचार्यविरचितायां मणिमञ्जर्यां द्वितीयस्सर्गः ॥

Rarest Archiver

श्रीनारायणपण्डिताचार्यविरचितं श्रीरामगीत्यष्टकम्

श्रीनारायणपण्डिताचार्यविरचितं श्रीरामगीत्यष्टकमिदं श्रीरामवैभवकथया सङ्कलितम् । गीत्यष्टककारः सभक्तिश्रद्धापूर्वकं श्रीराममस्तौषीत् । सर्वेषु श्लोकेष्वपि अन्तिमपादे तु **'राम राम रमापते रमतां मनस्त्वयि मे सदा'** इतीयमुक्तिः विजृम्भिता सती मनसि आह्लादमातनोति ॥

नाकिनायकयाचनाञ्चनमाचरन् किल केवलं
भास्करान्वयभास्करो भगवानभूः शुभसम्पदे ।
यज्ञपूरुष यज्ञपालक यज्ञसंज्ञ नमोऽस्तु ते
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥१॥

जानकीं जननीं जनस्य पुरेन्दिरामतिसुन्दरीं
रञ्जयन् भुवनं जयन् स्वगुणैर्नयैर्विनयैरपि ।
राजराज रमां त्यजन् तृणवद्वनेऽरमयो मुनीन्
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥२॥

नाथ मोहयता खलानखिलांस्त्वया खलु मैथिली
नैव नैव वियोगिनी स्थिरयोगिनी गुरुयोगिनी ।
उज्जगाविदमब्जभूः शपथेन ते कथयन् कथा
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥३॥

वीरमारुतविक्रमार्चित भानुनन्दननन्दन
भ्रूविलासविशेषभीषितवारिधे गुणवारिधे ।
विश्वभूषण शत्रुभीषण हे विभीषणसख्यवन्
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥४॥

रावणं जनरावणं सुरवारणप्रतिवारणे
सिंहमुग्रबलं शरैर्ननु लीलया निगृहीतवान् ।

Rarest Archiver

सज्जनान् करुणाकरानुगृहीतवान् भगवान् भवान्
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥५॥

श्यामले शबले महामणिहेमभूषणभानुभिः
कोमलेऽशनिसन्निभैरकृतव्रणे रिपुसायकैः ।
नाथ नूतनयौवनेऽपि पुराणपुरुषविग्रहे
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥६॥

उल्लसत्तिलके जगत्तिलके सरोजविलोचने
पूर्णचन्द्रनिभानने मितभाषणे स्मितशोभने ।
दीर्घदोष्षि विशालवक्षसि कुञ्जरेंन्द्रगते गतौ
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥७॥

लक्ष्मणाग्रज लक्षयेन्मम वीक्षणं तव वल्लभं
कोसलेन्द्र कथामलं कथयीत ते मम भारती ।
राघव श्रवणं शृणोतु पराक्रमांस्तव विक्रमान्
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥८॥

रामगीतिमिमां शुभां पठते जनाय महादराद्
रामसद्गुणरत्नराजसुराजिराजितमालिकाम् ।
राम एव रमापती रतिमात्मनः पदपद्मयोः
राति राति परां गतिं करुणामृताम्बुधिरीशिता ॥९॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारयणपण्डिताचार्यविरचितं
श्रीरामगीत्यष्टकं समाप्तम् ॥

Rarest Archive

श्रीनारायणपण्डिताचार्यविरचितं श्रीदाशरथ्यष्टकम्

श्रीदाशरथ्यष्टकं श्रीनारायणपण्डिताचार्यविरचितम् अष्टकरूपं श्रीरामकृष्णात्मकं भगवतः रूपद्वयं प्रशंसति ॥

क्षीरसागरवारिमध्यमहाहिभोगनिवासिनं
नारदादिमुनीन्द्रवन्दितचारुपादसरोरुहम् ।
वारिजामलपत्रलोचनमब्धिजारमणं विभुं
नारसिंहतनुं हरिं प्रणमामि दाशरथिं सदा ॥१॥

पाकशासनवन्दितामलपादयुग्मसरोरुहं
शोकनाशनमीशमीशमशेषदोषविवर्जितम् ।
लोकसम्भवसंहृतिस्थितिहेतुभूतगुणोदयं
नाकवासिजनप्रियं प्रणमामि दाशरथिं सदा ॥२॥

अण्डजाधिपवाहनं शशिमण्डलाभमुखं महा–
दण्डकावनसेवितं वरकुण्डलाङ्गदभूषणम् ।
चण्डविक्रमखण्डितासुरमण्डलं मधुसूदनं
पाण्डवप्रियसारथिं प्रणमामि दाशरथिं सदा ॥३॥

तर्कनिश्चितचित्तवृत्तिभिरप्रतर्क्यगुणोदयं
शत्रुवर्गविदारणं धृतचक्रमक्रमवर्जितम् ।
अर्कमण्डलमध्यवर्तिनमक्षयं पुरुषोत्तमं
शुक्रनेत्रहरं हरिं प्रणमामि दाशरथिं सदा ॥४॥

बालकेलिमशेषदानवनाशनं प्रणवात्मकं
स्थूलसूक्ष्मतनुं विभुं गुणकारणात्मगुणोदयम् ।
लीलया धृतभूदरं परिपालिताखिलगोकुलं
नीलकुञ्चितमूर्धजं प्रणमामि दाशरथिं सदा ॥५॥

Rarest Archiver

मन्दराचलधारिणं दशकन्धरादिविनाशनं
नन्दनाङ्गमुमापतेः प्रियमिन्दिरावरमच्युतम् ।
कञ्जजासनसेवितं सुरवृन्दवन्दितविग्रहं
नन्दगोपसुतं हरिं प्रणमामि दाशरथिं सदा ॥६॥

कंसमुष्टिकदुष्टधेनुकपूतनादिविनाशनं
हंसकेशिनिषूदनं दमघोषसूनुविदारणम् ।
अंसमध्यलसन्महामणिकौस्तुभादिविराजितं
हिंसकासुरभेदकं प्रणमामि दाशरथिं सदा ॥७॥

गोपिमण्डलमध्यगं सुरवैरिमण्डलदारिणं
पाण्डवप्रियमिन्द्रपूर्वसुरौघवन्द्यपदाम्बुजम् ।
इन्दिरारमणं गुणार्णवमम्बुजाक्षममानुषं
नारसिंहतनुं हरिं प्रणमामि दाशरथिं सदा ॥८॥

भक्तिपूर्वकमेतदष्टकमिष्टसिद्धिदमादराद्
यस्तु कीर्तयते शृणोत्यखिलापदार्णवतारकम् ।
सर्वदेववरार्चितं नृहरेः पदं परमक्षयं
याति दाशरथेरनुग्रहविग्रहोऽखिलवल्लभः ॥९॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारयणपण्डिताचार्यविरचितं
श्रीदाशरथ्यष्टकं समाप्तम् ॥

Rarest Archiver

सङ्ग्रहरामायणकथासङ्ग्रहरूपा

श्रीराघवेन्द्रयतिरचिता श्रीरामचारित्रमञ्जरी

श्रीमान् पूर्वं प्रजातो दशरथनृपते रामनामाऽथ नीतो
विश्वामित्रेण मन्त्राहृदनुजसहितस्ताटकाघातुकोऽस्त्रम् ।
ब्रह्माद्यं प्राप्य हत्वा निशिचरनिकरं यज्ञपालो विमोच्या-
हल्यां शापाच्च भुङ्क्त्वा शिवधनुरूपयन् जानकीं नः प्रसीदेत् ॥१॥

आयान् रामः सभार्योऽध्वनि निजसहजैर्भार्गवेष्वासरोपात्
तद्गं हत्वा सुरारिं पुरग उत नुतस्तापसैर्भूपपृष्टैः ।
कल्याणानन्तधर्मोऽगुणलवरहितः प्राणिनामन्तरात्मे-
त्याद्युक्तः स्वाभिषेके पुरजनमहितो मह्यतां मे वचोभिः ॥२॥

कैकेयीप्रीतिहेतोः ससहजनृपजो वल्कली यानरण्यं
गङ्गातारी गुहार्च्यः कृतरुचिरजटो गीष्पतेः पुत्रमान्यः ।
तीर्त्वा कृष्णां प्रयातोऽवतु निजममलं चित्रकूटं प्रपन्नं
स्वाम्बाभिर्भ्रातरं तं श्रुतजनकगतिः सान्त्वयन् व्युप्ततीर्थः ॥३॥

दत्वाऽस्मै पादुके स्वे क्षिरिभरणकृतौ प्रेष्य तं काकनेत्रं
व्यस्याराध्योऽत्रिनाम्ना वनमथ समितो दण्डकं तापसेष्टम् ।
कुर्वन् हत्वा विराधं खलकुलदमनं याचितस्तापसाग्रैः
तेषां दत्वाऽभयं स्वानसिधनुरिषुधीन् यानगस्त्यात् सपायात् ॥४॥

आसीनः पञ्चवट्यामकुरुत विकृतां राक्षसीं यो द्विसप्त-
क्रव्यादानामप्यनेकानथ खरमवधीद् दूषणं च त्रिशीर्षम् ।
मारीचं मार्गरूपं दशवदनहृतामाकृतिं भूमिजाया
अन्विष्यन्नार्तगृध्रं स्वगतिमथ नयन् मामवेत् घ्नन् कबन्धम् ॥५॥

पम्पातीरं स गच्छन्निह कृतवसतिर्भक्तितुष्टः शबर्यै
दत्वा मुक्तिं प्रकुर्वन् हनुमत उदितं प्राप्तसुग्रीवसख्यम् ।

Rarest Archiver

सप्त च्छित्वाऽथ तालान् विधिवरबलिनो वालिभित् सूर्यसूनुं
कुर्वाणो राज्यपालं समवतु निवसन् माल्यवत्कन्दरेऽसौ ॥६॥

नीत्वा मासान् कपीशानिह दश हरितः प्रेष्य सीतां विचित्या–
यातश्रीमद्धनूमद्गिरमथ समनुश्रुत्य गच्छन् कपीन्द्रैः ।
सुग्रीवाद्यैरसङ्ख्यैर्दशमुखसहजं मानयन्नब्धिवाचा
दैत्यघ्नः सेतुकारी रिपुपुररुदवेद्वानरैर्वैरिघाती ॥७॥

भग्नं कृत्वा दशास्यं गुरुतरवपुषं कुम्भकर्णं निहत्य
प्रध्वस्ताशेषनागं पदकमलनतं ताक्ष्र्यमानन्द्य रामः ।
सर्वानुज्जीवयन्तं गिरिधरमनघश्चाञ्जनेयात् कपीन् स्वान्
विज्ञानास्त्रेण रक्षन् समवतु दमयन् लक्ष्मणाच्छक्रशत्रुम् ॥८॥

क्रव्यादान् घ्नन्नसङ्ख्यानपि दशवदनं ब्रह्मपूर्वैः सुरेशैः
पुष्पैराकीर्यमाणो हुतवहविमलामाप्य सीतां विधाय ।
रक्षोनाथं स्वभक्तं स्वपुरमथ गतः पुष्पकस्थैः समस्तैः
साम्राज्ये चाभिषिक्तो निजजनमखिलं मानयन् मे पतिः स्यात् ॥९॥

रक्षन् क्षोणीं समृद्धां नुत उत मुनिभिर्मानयन् वायुसूनुं
प्रेष्यादित्यात्मजादीन् व्यतनुत भरतं यौवराज्येऽनुमान्य ।
कार्ये सौमित्रिमार्तश्वगदितकृदरिघ्नोऽथ शत्रुघ्नतो यो
हत्वाऽसौ दुष्टशूद्रं द्विजसुतगुबवेत् कुम्भजान्मालभारी ॥१०॥

यज्ञं तन्वन् त्रिकोटीन् व्यतुदत भरताद्योऽसुरानीशवाक्याद्
यास्यन् धामात्रिपुत्रं भुजिमथ स नयन् आत्मसूनू स्वराज्ये ।
कृत्वा श्रीह्रीहनूमद्धृतविमलचलच्चामरच्छत्रशोभी
ब्रह्माद्यैः स्तूयमानो निजपुरविलसत्पादपद्मोऽवतान्माम् ॥११॥

इति श्रीरामचारित्रमञ्जरी लेशतः कृता ।
राघवेन्द्रेण यतिना भूयाद् रामप्रसाददा ॥१२॥

॥ इति श्रीराघवेन्द्रतीर्थयतिकृता श्रीरामचारित्रमञ्जरी समाप्ता ॥

Rarest Archiver

श्रीसङ्ग्रहरामायणे युद्धकाण्डस्थाः सूक्तयः

१. विश्वेश्वरोऽपि भगवान् मार्दवं धर्ममाश्रितः । (१.स.१७.श्लो)

२. अतार्किकान् अशास्त्रज्ञान् अवृद्धोपासकान् खलान् ।
मुखरान् केवलं मूर्खान् वर्जयेन्मन्त्रमण्टपे ॥ (१.स.३६.श्लो)

३. विनीतान् नीतिसम्पनान् धर्माधर्मविचक्षणान् ।
पूर्वापरज्ञान् पुरुषान् मन्त्रिणः प्रति मन्त्रयेत् ॥ (१.स.३७.श्लो)

४. सिद्ध्युपायगुणाङ्गानि न ये शक्त्युदयान् विदुः ।
न तैर्मन्त्रविधिं कुर्यात् षण्ढैरिव रतिं बुधः ॥ (१.स.३८.श्लो)

५. परदारपरामर्शं न कुर्याः लोकनिन्दितम् । (१.स.३९.श्लो)

६. रामप्रसादप्रसरः सर्वासां सम्पदां पदम् । (१.स.४४.श्लो)

७. स्नेहवान्श्चापरिचितः परिक्ष्यो नाऽशु गृह्यताम् । (२.स.०६.श्लो)

८. देशकालस्वजातीनां दोषाच्छङ्क्यो हि राक्षसः । (२.स.०७.श्लो)

९. आकरैरिङ्गितैर्वाक्यैः सोऽश्रद्धेयः परीक्ष्यताम् । (२.स.०८.श्लो)

१०. हेयभागाच्च गृह्णन्ति सारं सारविदो जनाः ।
सानुरागमवित्रस्तं मणिं फणिकुलादिव ॥ (२.स.१०.श्लो)

११. अपरीक्ष्यापरिचितं सारं गृह्णाति सारवित् ।
तत्रोदाहरणं गृह्णन् पौष्पं मधुकरो मधु ॥ (२.स.११.श्लो)

१२. देशकालादिदुष्टोऽपि सारः सारेण शुध्यति ।
नानामलेन मलिनं शुद्धं हेमेव वह्निना ॥ (२.स.१२.श्लो)

१३. अतिमात्रपरीक्षाभिः प्रसन्नः कलुषीभवेत् ।
प्रकृतिं च त्यजेत् यद्वत् विमलः कमलाकरः ॥ (२.स.१३.श्लो)

Rarest Archives

१४. मन्यते क्षमिणं क्षामं नीचो दण्डेन तृप्यति । (२.स.३७.श्लो)

१५. कोपो विश्वस्य विपदे प्रसादः सम्पदे तव । (२.स.४१.श्लो)

१६. धर्मपक्षस्थिता देवा वयं चाधर्मपक्षिणः ।
पुरा जयो ह्यधर्मस्य धर्मो विजयतेऽधुना ॥ (३.स४०.श्लो)

१७. गुरुद्रोहो ब्राह्मणसूदनस्य व्रतच्छिदः सत्यकुलाङ्गनानाम् ।
देवद्विषस्ते फलति प्रवृद्धो नूनं महापातकपादपोऽयम् ॥ (४.स.०९.श्लो)

१८. रामेण युद्धं विपदे सन्धानं सम्पदे प्रभो । (५.स.१७.श्लो)

१९. नन्दितं नाकिलोकेऽभूत् क्रन्दितं रक्षसां पुरे । (६.स.३७.श्लो)

२०. बालस्य किमवद्यं मे बालो हि प्राक् त्रिविक्रमः । (७.स.०७.श्लो)

२१. बलिना सन्धिरल्पस्य बलिनोऽल्पेन विग्रहः ।
औदासीन्यं समेन स्याद् इति शास्त्रविनिश्चयः ॥ (९.स.१४.श्लो)

२२. ज्येष्ठं गुरुं कथं त्वं मामवजानासि मूर्खवत् । (९.स १७.श्लो)

२३. भिन्ना न वह्नेः पृथगीक्षिताश्च जाता यथा दीपत एव दीपाः ।

न विश्वमूर्तेर्ननु जातु भिन्ना जातास्तथा रामत एव रामाः ॥ (१२.स.३०श्लो)

२४. वर्त्याद्युपाधेर्ननु तारतम्याद् दीपेषु दृष्टं गुणतारतम्यम् । (१२.स.३१श्लो)

२५. भासेव भानुः शिखया शिखीव रेजे तया चन्द्रिकयेव चन्द्रः ।
आस्तां कवीनामिति वाक्प्रसारः श्रीश्रीकमित्रोरुपमा न काचित् ॥(१६.स.४.श्लो)

Rarest Archive

आदित्यहृदयस्तोत्रम्

॥ वाल्मीकिरामायणान्तर्गतम् अगस्त्यमहर्षिणा प्रोक्तम् ॥

ॐ॥ ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥१॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपागम्याब्रवीत् रामम् अगस्त्यो भगवानृषिः ॥२॥

राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसि ॥३॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्यम् अक्षय्यं परमं शिवम् ॥४॥

सर्वमङ्गलमङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनम् आयुर्वर्द्धनमुत्तमम् ॥५॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥६॥

अथ स्तोत्रम् :-

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः ॥७॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः ॥८॥

पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाप्राण ऋतुकर्त्ता प्रभाकरः ॥९॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुः हिरण्यरेता दिवाकरः ॥१०॥

Rarest Archiver

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्ड अंशुमान् ॥११॥

हिरण्यगर्भः शिशिरः तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥१२॥

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ।
घनवृष्टिरपामित्रो विन्ध्यवीथीप्लवङ्गमः ॥१३॥

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥१४॥

नक्षत्रग्रहताराणाम् अधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ॥१५॥

नमः पूर्वाय गिरये पश्चिमे गिरये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥१६॥

जयाय जयभद्राय हर्यश्वाय नमोनमः ।
नमोनमः सहस्रांशो आदित्याय नमोनमः ॥१७॥

नम उग्राय वीराय सारङ्गाय नमोनमः ।
नमः पद्मप्रबोधाय मार्ताण्डाय नमोनमः ॥१८॥

ब्रह्मेशानाच्युतेशाय सूर्यायाऽदित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥१९॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥२०॥

तप्तचामीरकराभाय वह्नये विश्वकर्मणे ।
नमस्तमोभिनिघ्नाय घृणये लोकसाक्षिणे ॥२१॥

नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥२२॥

Rarest Archiver

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष एवाग्निहोत्रं च फलं चैवाग्नोहोत्रिणाम् ॥२३॥

वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥२४॥

फलश्रुतिः :–

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चित् नावसीदति राघव ॥२५॥

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥२६॥

अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि ।
एवमुक्त्वा तदाऽगस्त्यो जगाम च यथाऽऽगतम् ॥२७॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत् तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥२८॥

आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥२९॥

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥३०॥

अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसङ्क्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति॥३१॥

॥ इति श्रीमद्वाल्मीकिरामायणे युद्धकाण्डे सप्तोत्तरशततमः सर्गः॥

॥ इति आदित्यहृदयस्तोत्रं समाप्तम् ॥

Rarest Archives

सङ्ग्रहरामायणोल्लिखितानां देवनां महर्षिणां चावतारविशेषपरिचयः

१.	अगस्त्यः	दक्षिणापथवासी महर्षिः ।
२.	अङ्गदः	वालिना तारायां जातः कपिः। चन्द्रावतारभूतश्च ।
३.	अञ्जना	केसरीपत्नी । हनूमन्माता । पुञ्जकस्थली नामिकाप्सरा
४.	अहल्या	गौतमपत्नी । श्रीरामदर्शनात् पूता ।
५.	कत्थनः	कुबेरावतारः कपिः ।
६.	कुमुदः	जयन्तावतारः कपिः ।
७.	कुशः	रामसुतः । इन्द्रावतारभूतश्च ।
८.	केसरी	मरुत्सु प्रवरः, अञ्जनापतिः हनूमत्पिता च कपिः ।
९.	कैकेयी	दशरथपत्नी । भरतजननी च।
१०.	कौसल्या	दशरथपत्नी ।श्रीरामस्य माता
११.	गजः	प्राणात्मा कपिः । कुबेरजः ।
१२.	गन्धमादनः	समानवायोरंशः कपिः कुबेरजः ।
१३.	गवयः	व्यानात्मा कपिः । कुबेरजः।
१४	गवाक्षः	अपानात्मा कपिः । कुबेरजः
१५.	गाधी	चन्द्रवंशीयो राजा । इन्द्राव–तारः विश्वामित्रस्य जनकः ।
१६.	गुहः	रामभक्तो व्याधः ।
१७.	गौतमः	श्रेष्ठमहर्षिः । अहल्यापतिः । शतानन्दपिता च ।
१८.	जटायुः	सूर्यसूतस्यारुणस्य तनयः । सीतारक्षणे रावणेन हतः ।
१९.	जयन्तः	इन्द्रसुतः वायसरूपी कुरङ्गासुरेणाविष्टः। रामेण निगृहीतो नष्टासुरावेशः	
२०.	जाम्बवान्	यमावतारः ब्रह्मण आनन समुद्भवः। ऋक्षःरोहिणी, जाम्बवतीपिता ।
२१.	तारः	ताराभ्राता कपिः । बृहस्पतेरवतारः ।
२२.	तारा	वालिपत्नी, शच्यावतारभूता ।
२३.	तुम्बुरुः	स्थूणाकर्णापरनामा गन्धर्वः ।
२४	दशरथः	सूर्यवंशजो राजा ।श्रीरामस्य पिता । स्वायुम्भुवमनोरंशः ।
२५.	दुर्मुखः	निरृतेरवतारभूतः कपिः ।
२६.	दुर्वासः	रुद्रावतारभूतः श्रेष्ठमुनिः ।
२७	नळः	देवशिल्पी विश्वकर्मावतारः । सेतुनिर्माता कपिः ।
२८	नीलः	अग्नेरवतारभूतः कपिः ।
२९.	परशुरामः	जमदग्निमहर्षेः पुत्रतयाऽव–तीर्णःश्रीहरिःक्षत्रकुलान्तकः
३०.	पनसः	वस्वंशभूतः कपिः ।
३१.	बलिः	प्रह्लादजस्य विरोचनस्य पुत्रः, भाविमन्वन्तरस्येन्द्रः	
३२.	भरतः	कैकेयीपुत्रःरामलक्ष्मणानुजः प्रद्युम्नरूपि हरिणाऽऽविष्टः । चक्राभिमानी ।
३३.	मैनाकः	पक्षवान् पर्वतः। मेनातनयः । गिरिजायाः सोदरःवायुरक्षितः
३४	मैन्दविविदौ	कपी अश्विनौ, कृष्णावतारे स्वं धाम गतौ । विविदः इन्द्रावेशी ।
३५.	रामः	दशरथकौसल्ययोः पुत्रतया साक्षान्नारायणः अवततार । सीतापतिः । रावणहन्ता च ।
३६.	लवः	श्रीरामसुतः,अग्न्यावतारभूतः
३७	लक्ष्मणः	दाशरथिः । सुमित्रातनयः । ऊर्मिळापतिः। शेषावतारभूतः सङ्कर्षणस्यश्रीहरेरावेशवान्

Rarest Archiver

३८	वसिष्ठः	श्रेष्ठमहर्षिः । सूर्यवंशस्य कुलगुरुः । वेदव्यासस्य प्रपितामहः । शक्तेः पिता ।
३९.	वाली	इन्द्रावतारभूतः । तारापतिः । सुग्रीवाग्रजः। श्रीरामेण हतः।
४०	विभीषणः	रामभक्तःधार्मिको रावणसोदरः । कण्वमुनिः । कल्पान्तजीवी ।
४१	विदेहः	सीतायाः जनकः । सीरध्वजनामा विदेहभूपतिः।
४२	विराधः	तुम्बुरुनामा गन्धर्वः । विराधत्वेन जातः शापात् ।
४३	विश्वकर्मा	देवशिल्पी । लङ्काद्वारका दिनिर्माता च ।
४४	विश्वामित्रः	कुशिकपौत्रः । गाधेः पुत्रः । तपसा ब्रह्मर्षिः अभवत् ।
४५	वृषः	उदानात्मा कपिः । कुबेरजः।
४६	शतबलिः	वस्वंशभूतः कपिः ।
४७	शत्रुघ्नः	दशरथसूनुः भरताग्रजः । मधुरापुरीशासकः । पाञ्च–जन्यशङ्खाभिमानी, अनिरुद्धरूपहरिणाऽविष्टः ।
४८	शबरी	शच्या शप्ता अप्सरा ।
४९	शरभङ्गः	हरिभक्तो दण्डकारण्यवासी मुनिः रामपुरतस्तनुं त्यक्त्वा मुक्तिमाप ।
५०.	श्वेतः	मरुत्स्वन्यतमः कपिः ।
५१.	श्वेतः	वैदर्भो राजा । रामानुग्रहेण स्वार्तिमतिक्रान्तः ।
५२.	समुद्रः	महाभिषक् । शन्तनुश्च, ब्रह्मणा शप्तः । गङ्गापतिः ।
५३.	सम्पातिः	जटायोरग्रजः पतगः,
		अरुणपुत्रः ।
५४	सम्पाती	मरुत्स्वन्यतमा कपिः ।
५५.	सीता	महालक्ष्मी स्वरूपिणी, अयोनिजा जनकपालिता । श्रीरामपत्नी
५६	सुग्रीवः	सूर्यावतारः कपिराज वालिसोदरः ।
५७	सुपार्श्वः	सम्पातिसुतः । पतगः ।
५८	सुमित्रा	दशरथभार्या । लक्ष्मणशत्रुघ्न –योर्जननी ।
५९.	सुरसा	नागमाता । काश्यपजाया ।
६०.	सुषेणः	वरुणावतारः कपिः ।
६१.	हनूमान्	अञ्जनाकेसरीद्म्पत्योः तनयः। वायोः प्रथमावतारः । महाबलः श्रीरामभक्तश्च ।

Rarest Archiver

सङ्ग्रहरामायणोल्लिखितानां राक्षसानामवतारविशेषपरिचयः

१.	अकम्पनः	रुद्रवरगुप्तः रावणभृत्यो राक्षसः ।
२.	अतिकायः	रावणात् गन्धर्विकायां जातः कुम्भकर्ण इति नामान्तरम् ।
३.	अतुलः	ब्रह्मशिववरबलोऽसुरः । तपोमयः। रामेण हतः ।
४.	अक्षः	रावणस्य तनयः। इन्द्रजिद –नुजः। हनुमता हतः ।
५.	इन्द्रजित्	मेघनाद इति ख्यातः। रावणस्य ज्येष्ठः पुत्रः ।
६.	कबन्धः	त्रिजटासुतः । दनुनामा गन्धर्वः वज्रायुधेन भग्नकायः
७.	किङ्कराः	रावणभृत्याः, राक्षसाश्च ।
८.	कुमुदिनः	अब्जजवाक्यरक्षा असुराः, रामेण हताः ।
९.	कुम्भकर्णः	श्रीहरेःद्वारपालकेन विजये –नाऽविष्टः, हिरण्याक्षश्च ।
१०.	कुम्भः	कुम्भकर्णसुतः सुग्रीवहतः।
११.	कुरङ्गः	काकनेत्रावासः राक्षसः । रामेण हतश्च ।
१२.	खरः	रावणानुजो भृत्यः । दण्डके रावणप्रतिनिधिः
१३.	जङ्घः	शम्बूकनामा शूद्रतापसो जातः पार्वतीवरदर्पितः। रामहतः।
१४	ताटका	सुन्दोपसुन्दयोर्भार्याराक्षसी रामेण निहता च ।
१५.	त्रिशिराः	खरसहचरः । रामेण हतः।
१६.	त्रिशिराः	ब्रह्मवरगुप्तो रावणतनयः ।
१७.	दूषणः	खरसहचरो राक्षसः ।
१८.	देवतापनः	ब्रह्मवरदृप्तो रावणसचिवः।
१९.	देवान्तकः	रावणपुत्रः नरान्तकभ्राता । गन्धर्वकन्यायां जातः । हनुमता हतः ।
२०.	धूम्रनेत्रः	रुद्रवरादवध्यो रावणभृत्यः। हनुमता हतः ।
२१.	नरान्तकः	रावणतनयः । गन्धर्वकन्या –यां जातः। अङ्गदेन हतः
२२.	निकुम्भः	कुम्भकर्णतनयः हनुमता हतः ।
२३.	निकृतिः	कैकेयीं प्रविष्टा राक्षसी ।
२४.	प्रमाथी	ब्रह्मवरगुप्तो रावणसचिवो राक्षसः । रामेण हतः ।
२५.	प्रहस्तः	रावणमन्त्री कृष्णावतारे दुर्योधनसचिवः पुरोचनो बभूव ।
२६	मकराक्षः	खरासुरस्य पुत्रःरामेण हतः
२७	मण्डोदरी	मयसुता । रावणभार्या ।
२८.	मत्तः	रावणमातृष्वस्रीयः पार्वती– वरदर्पितः । हनुमता हतः।
२९.	मन्थरा	अलक्ष्मी कलिभार्या । ब्रह्मनिदेशाद् भूमौ जाता ।
३०.	मयः	दानवशिल्पी, मण्डोदरिपिता
३१.	महापार्श्वः	रावणमन्त्री। सुग्रीवेण हतश्च
३२.	महोदरः	रावणमन्त्री। सुग्रीवेण हतश्च
३३.	मारीचः	ताटकायाः सुन्देन जातः । रावणेरितो मृगरूपधारी ।
३४.	यज्ञकोपः	ब्रह्मलब्धवरो रावणानुगो राक्षसः। माल्यवतस्तनयः। रामेण हतः ।

Rarest Archiver

३५.	युद्धोन्मत्तः	पार्वतीवरदर्पितो रावणस्य मातृष्वस्रीयः । हनुमताहतः
३६.	यूपनेत्रः	रावणमन्त्री । सुग्रीवेण हतः
३७.	रावणः	वैकुण्ठपालेन जयेनाऽविष्टः, हिरण्यक शिपुर्द्वितीयजन्मनि रावणोबभूव पुलस्त्यपुत्रश्च।
३८.	लवणः	मधुपुत्रोऽसुरःशत्रुघ्नेन हतः।
३९.	वज्रदंष्ट्रः	रावणसेनापतिः अङ्गदहतः
४०.	विद्युज्जिंह्वः	रावणसचिवोराक्षसः रामेण हतः ।
४१.	विरूपनेत्रः	रावणमन्त्री । सुग्रीवेन हतः।
४२.	शकुनिः	रावणस्य सचिवः। रामहतः

४३.	शुकः	रावणस्य स्पशः। रामहतः।
४४.	शूर्पणखा	रावणभगिनी। कालकेयस्य विद्युज्जिह्वाख्यस्य प्रमाद –वशाद् हतस्य भार्या । लक्ष्मणेन ध्वस्तकर्णा विघोणां च ।
४५.	सारणः	रावणस्य स्पशःरामेण हतः
४६.	सिंहिका	छायाग्राहा राक्षसी,राहोर्माता
४७.	सुप्तघ्नः	माल्यवतस्तनयः,रामेण हतः
४८.	सुबाहुः	उपसुन्दतनयः । रामेण हतः
४९.	सुराणकाः	सीतापवादहेतवो राक्षसाः । ब्रह्मवरगुप्ताः ।

Rarest Archiver

सङ्ग्रहरामायणस्य युद्धकाण्डसम्बद्धा

श्लोकार्द्धानुक्रमणिका

(तन्त्रशास्त्रोक्तक्रमानुसारेण वर्णानुक्रमोऽनुसृतः । अतोऽत्र क्षकारोऽन्ते निर्दिष्टः ।)

श्लोकार्द्धारम्भः	सर्गः	श्लोकः/पादश्च
–अ–	––	––
अकम्पनः कपिवरान्	५	४३/३
अकालेऽप्यधुना सौम्य	१५	३७/३
अग्नेस्तनूजः स्वयमग्नि	८	२०/१
अग्रजेनैवमुक्तः स	९	१८/१
अगामहं चेन्मनसाऽपि	१४	४६/१
अग्राम्यका ग्रामविशेष	१६	७/३
अग्रे विधायाथ विधातृ	१६	९/१
अङ्गदःखड्गमाच्छिद्य	६	७/१
अङ्गदः सहसोत्थाय	५	३७/१
अङ्गदस्तमभिद्रुत्य	१३	१८/१
अङ्गदस्याभिपतितो	६	१८/१
अङ्गदादीन् प्लवङ्गे–	६	६१/१
अङ्गदो गदया गुर्व्या	६	४/१
अङ्गदो जाम्बवांश्चैनं	९	४८/३
अङ्गदो वज्रदंष्ट्रेऽथ	५	३२/१
अङ्गदो वारयामास	६	८/३
अङ्गदोरसि स प्रासः	६	४८/१
अङ्गवन्तो वयं बाणै–	३	११/३
अङ्गे तुङ्गाद्रिसङ्काशे	९	४/१
अचालयेतामथ चामरे	१६	१०/३
अचिन्तयंस्तस्य परं	९	५९/१
अचिन्तयंस्तान् जग्राह	१३	१५/३
अचिन्तयंस्तान् प्रययौ	९	६४/३
अचिरान्मरणायात्र	९	१३/३
अचूचुरस्त्वं महिषीमसार	४	१०/१
अचूर्णयद् रक्षसोऽस्य	६	६/३
अजिघांसुः स्वयं रामः	११	१८/३

श्लोकार्द्धारम्भः	सर्गः	श्लोकः/पादश्च
अञ्जना सुप्रजा येन	१०	३२/१
अतार्किकानशस्त्रज्ञान–	१	३५/१
अतिक्रमं यस्य परा–	१६	१९/१
अतिक्रमी योऽन्यपरा–	१६	१९/३
अतिदीर्घमथाऽकाशं	१०	४४/३
अतिमात्रपरीक्षाभिः	२	१३/१
अतुच्छं पुच्छमाविद्ध्य	१०	४०/१
अत्र प्रहर ते हेतिम्	६	३२/३
अथ खड्गिनमायान्तं	६	५८/१
अथ तिग्मांशुतनयः	६	५४/१
अथ पर्वतमुत्पाट्य	९	४७/१
अथ रात्रिचरैस्तेषां	५	१५/१
अथ रामाज्ञया सर्वान्	१५	१२/१
अथर्ष्टिभिः पट्टसभिण्डि	१२	११/१
अथाऽपतन्तं मैन्दं च	६	१६/१
अथाऽसुरास्त्रं सुरशत्रु	११	६७/१
अथाङ्गदो वह्निरिव –	४	६/१
अथाङ्गदोऽङ्गीकृतगण्ड	८	१०/१
अथाब्रवीद् ब्रह्मसुतो	१०	३६/१
अथाभिनन्द्य स्वचमूं–	१३	४५/१
अथाष्टघण्टारणिता	१३	३४/१
अथाहिमांशावुदयं प्रयाते	१६	१/१
अदन्तः फलमूलानि	१	१२/१
अदर्शयन् दशामेतां	१०	१५/३
अदारयदुदारात्मा	११	४१/३
अदृश्यो रथमद्ध्यास्य	१०	२४/३
अद्राक्षीन्मामयं रामो–	११	७/१
अद्रावयन् कपीन् क्रूराः	५	२०/१

Rarest Archiver

अद्रिकायोऽतिकायोऽथ	७	१/१
अनङ्गबाणक्षुभितम्	३	११/१
अनन्यलभ्यां स्वयम्	१६	२१/३
अनन्यलभ्ये निजविष्ट–	१६	३/३
अनन्यसाध्येन तथाऽपि	१४	३२/१
अनयं त्वं समाश्रित्य	९	१५/१
अनलानिलसम्पाति–	३	४७/१
अनादृत्याङ्गदो वेधं	६	६/१
अनाद्यनन्तः परमः	१४	२८/१
अनीकिनीं तां कपि–	९	७४/३
अनुजं प्रत्युवाचेदं	१५	३१/१
अनुज्ञया मे पुरमज्ञ	८	३९/३
अनुयास्याम्यहं च त्वां	१०	२/३
अनुरक्ताय दासाय	२	१७/३
अन्तःपुरं स्वतातस्य	१५	७३/१
अन्धकारेण सान्द्रेण	१३	५४/३
अन्यं चेत् त्वादृशं	१	४९/३
अन्यत्र चित्राङ्गदवान्	४	२६/३
अन्यानि दृष्ट्वा पुनरु–	१४	११/१
अन्ये पराक्रम्य नदन्ति	१२	२६/३
अन्येऽवकाशनवलोक्य	४	२२/३
अन्यैश्च वानरैर्वीरै–	५	१४/१
अन्योन्यतः पाणिपुटाव–	४	२९/१
अन्योन्यमतिशिश्याते	११	४९/३
अन्योन्यमाबद्धकरा –	१२	२८/३
अन्वजानात् स पितरं	१५	९/३
अप आतपवर्ष्याश्च	१५	७७/१
अपक्रम्याभिमुखतः	११	३०/३
अपरीक्ष्यापरिचितं	२	११/१
अपरे कपयस्तस्य	१३	१०/३
अपरोक्षं परोक्षं वा	२	१९/१
अपश्यन्नुत्थितं कञ्चिद्	१०	२८/१
अपाङ्गमात्रेण जगान्–	१२	२२/१
अपातयत् तान् सहसा	१२	१६/३
अपासर्पद् वज्रदंष्ट्रो–	५	३३/३

अप्यप्रमत्तः कुरु सर्व–	८	४०/३
अप्यलङ्कारयामास	१५	३२/३
अप्यात्ममुक्तेष् विदारितेषु	८	१७/१
अप्यौषधानां गन्धेन	१३	४०/१
अबिभ्रमन्निकुम्भोऽथ	६	२८/३
अभिदुद्राव सङ्गृह्य	६	५४/३
अभिधावन् शरेणाऽशु	६	१५/३
अभिषेकाय रामस्य	१५	६४/३
अभिषेकोत्सवं कुर्वन्	१५	८२/३
अभिषेकोद्यमे रामः	१५	८१/१
अभीरो वीर किं कृत्यं	६	३२/१
अभ्यद्रवच्छक्रजितं	११	३२/१
अभ्यद्रवद् वानरेन्द्रान्	१३	११/३
अभ्यद्रवद् हनूमन्तं	११	२५/३
अभ्यद्रवन् शिलाहस्ताः	६	२०/३
अभ्यधावदभिक्रुद्धो–	९	४५/३
अभ्यधावन्नावतिक्रुद्धा	५	२०/३
अभ्यापतत् तं ग्रसितुं	९	७५/३
अभ्यापतन् राक्षसराज–	४	४/३
अभ्यापतन्ती प्रययौ	१२	१७/३
अभ्यापतितदर्शं स	९	४०/१
अमराणां कपिनां च	६	५९/३
अमोघं परिघं घोरम्	६	३३/१
अमोघं शूलमशनैः	९	५६/१
अम्भोधिशोषणमशेष–	२	६१/१
अयुध्यतामस्त्रशस्त्रै–	११	५०/३
अरमत परमश्रीरामया	१६	२६/३
अर्चाम राम जय राम	१६	२५/३
अर्चिष्मतोऽर्चींषि रवेर्म–	१४	२९/१
अर्णवात् तूर्णमुत्पत्य	६	२५/१
अर्द्धप्रभग्नदशवक्त्रतमाः	१३	८१/३
अर्द्धप्रहर्षितसुराम्बुरहस्त	१३	८१/१
अर्हणं शिरसा बिभ्रद्	२	४२/३
अलं राजन् वीरोधेन	३	२८/३
अलं विरोधो रामेण	१	४२/१

Rarest Archiver

अलङ्कारांश्चकाराऽशु	१५	६०/१
अलङ्घनीयां विमलां	१२	१७/१
अलातं भ्रामयन्तौ तौ	१०	२९/३
अवगच्छामि च स्वच्छं	२	२१/१
अवतीर्य रथं दिव्यं	१३	४९/१
अवद्ध्यः शङ्करवराद्	६	३०/१
अवधारय वीर त्वं	१५	३९/३
अवातरत् पुराभ्यासे	१५	४७/१
अवानरनरामुर्वी	१३	३/३
अवाप्य सञ्ज्ञामवलम्ब्य	८	३१/१
अविद्ध्यत्पञ्चविंशद्भिः	११	३७/१
अविनीतिमतां नीतिं	२	१४/१
अविस्मितंसुस्मितमानना	१२	२९/३
अविस्मितः स स्मितवान्	८	३२/३
अवेद्ध्यानामवद्ध्यानां	३	२३/१
अवेक्षमाणः सुप्रीता	१५	७१/३
अशेतानन्तशयनो	१	१८/१
अश्रद्दधानस्तद्वाक्यं	२	१/३
अश्रूयन्तात्र दग्धानां	५	४९/३
अश्वकर्णेन सन्ताड्य	६	१०/१
अष्टभिर्भोगिभिः पुष्टैः	१०	१८/३
असङ्ख्यान् अतिकायश्च	७	१३/३
असङ्ख्यान् तदिषून्	७	१३/१
असङ्ग एकपातेन	१०	४५/३
अस्त्रबद्धवदास्ते स्म	११	६/३
अस्त्रमोक्षं विनिश्चित्य	१०	२३/३
अस्पर्धमाना ननृतुः	१६	८/३
अस्मान् महेन्द्रजयिनो–	१	४७/३
अस्मिन् हते हतं सर्वं	११	५१/१
अहं विश्वेशदासः स्यात्	११	३४/३
अहं शिवः शक्र इनादयः	१४	२८/३
अहिर्विहङ्गेन्द्रमिवाभियु	८	४२/३
अक्षतः प्रोत्थितो वीरः	१३	४०/३
–आ–	––	––
आ जानुतः स्वर्णवर्ण	१०	१७/१

आ दक्षिणेदरप्रान्तादा	१३	२०/१
आकर्णपूर्णमाकृष्य	७	१०/१
आकर्ण्य कपिसिंहानां	१०	२३/१
आकर्षतो राघवस्य	२	३८/१
आकारैरिङ्गितैर्वाक्यैः	२	८/१
आकृष्याऽश्लिष्यमाणस्य	१५	४९/१
आक्तौ रक्तेन महता	११	५०/१
आक्रम्यमाणानगरी स्थिरा	४	१६/३
आखण्डलारातिशिरः	११	७०/१
आग्नेयमस्त्रंमुमुचेसुरारिः	११	६६/३
आग्नेयमस्त्रम् असृजत्	७	१४/३
आग्नेयास्त्रेण भगवान्	१३	६२/१
आच्छन्नः शरवर्षाभ्यां	१३	२१/३
अहमस्मीति हनुमान्	१०	२९/१
अहस्तपादोऽपि विवृत्य	९	७५/१
आजह्रुः कपियूथानि	२	५०/३
आत्मानं चावदत् तेन	१५	३०/३
आथर्वणविधानेन	१०	२४/१
आदाय कार्तस्वरभास्वरं	१२	१३/१
आदायाऽरोप्य च क्षिप्रं	१५	१८/३
आदिदेश नलं देवः	२	४९/३
आदिदेश हरीन्द्रांश्च	११	१७/३
आनिनाय महातेजा	१३	३९/३
आपूरयन् परे वृक्षै–	२	५१/३
आभिरजन्मनो दैत्या–	२	४७/३
आयाति किल देवो नः	१५	३१/३
आयासनिशवासपरं पुरं	४	१५/३
आयुधानि नगे न्यस्य	२	२२/१
आयुधैर्वानरांस्तेऽपि	६	३/३
आरुरोह महाबाहुः	१३	४/३
आरुरोह रथं रामो	१५	६६/१
आरुरोहाथ सौमित्रिः	१	७/१
आरुह्य पुष्पकं दिव्यम्	१५	१४/१
आर्य जीवाम्यहमीति	१०	३५/१
आर्यस्याङ्केस्मितमुखीम्	१५	४१/१

Rarest Archiver

आर्यापार्श्वे विनीतं तं	१५	४१/३
आलोक्य तां लोकपतिः	१४	४२/१
आविध्य तस्य कवचं	११	४७/३
आश्वस्तस्तं हनूमन्तं	६	३४/३
आश्वासयन् जाम्बवन्त–	१०	३१/१
आश्वास्य निर्ययुः योद्धुं	६	४१/३
आश्वास्य रावणिर्वीरो–	७	११/१
आश्वेव सोऽश्वकर्णेन	५	६/३
आसिच्यमानः सुग्रीवः	९	५३/३
आस्तां कविनामिति वाक्	१६	४/३
आस्तांहि मन्त्रो योत्स्याम	५	१७/३
आस्फोटयन्तमित्युक्त्वा	९	३०/३
–इ–	––	––
इतस्ततो गणयितुं	३	४/३
इति तन्मारुतेर्वाक्यं	२	१८/१
इति तेनोदितं श्रुत्वा	३	४२/३
इति देवस्तदाऽस्तावि	११	८/३
इति प्रियं ब्रुवाणाय	१५	२७/१
इति ब्रुवन्त्यां तनुमद्ध्य–	१४	३९/३
इति ब्रुवाणा आजग्मुः	१५	३३/३
इति ब्रुवाणं तं दृष्ट्वा	२	३२/१
इति ब्रुवाणं पितरम्	१५	९/१
इति ब्रुवाणमालोक्य	३	४६/१
इति ब्रुवाणे पौलस्त्ये	२	१/१
इति ब्रुवाणो भगवानुदारो	९	६७/३
इति मत्वा महेन्द्रोऽस्मै	१३	४८/३
इति मारुतिवाक्येन	१५	४३/१
इति विक्रुश्य हरयो	१३	१२/३
इति संरम्भसम्भिन्न–	३	५३/३
इतीर्यमाणे मनुजैर्जगाम	१६	११/३
इत्थं ब्रुवाणो धनदानुजो	८	१९/३
इत्थं विकत्थनं श्रुत्वा	१	३४/१
इत्यङ्गदस्य ब्रुवतः	६	४७/३
इत्यङ्गदोदितं श्रुत्वा	९	३५/१
इत्यब्रवीदिन्द्ररिपुः	११	३३/३
इत्यर्थितः सागरेण	२	४७/१
इत्यादयोऽपराधास्ते	१३	७६/३
इत्युक्त ईशो मुनिना	१४	४/१
इत्युक्त ऊचे पौलस्त्यः	१०	३३/१
इत्युक्त ऊचे भगवान्	३	९/१
इत्युक्ते रावणेनोचे	१	२२/१
इत्युक्तो ब्रह्मजः प्रोचे	१०	३४/१
इत्युक्तो हनुमान् नत्वा	१०	३९/१
इत्युक्तो हनुमान् प्रोचे	१५	३७/१
इत्युक्तौ राक्षसावेतौ	३	१४/१
इत्युक्त्वा जगृहे राजा	६	२३/३
इत्युक्त्वा तातमापृच्छय	१०	६/१
इत्युक्त्वा भरतं प्रोचे	१५	२५/३
इत्युक्त्वा मन्युरक्ताक्षो	७	२३/१
इत्युक्त्वा वानरैरेनम्	२	२१/३
इत्युक्त्वा सह सम्मन्त्र्य	१	३/१
इत्युक्त्वा स्थापयामास	१३	१३/३
इत्युक्त्वाऽऽदत्त भगवान्	२	३७/३
इत्युदाहृत्य भगवान्	१३	७९/१
इत्यूचे नीतिसम्पन्नो	११	४२/३
इदं च वचनं वाच्यं	३	१२/३
इदं विभीषिकामात्रं	१३	१३/१
इदमत्यद्भुतं द्रष्टुं–	२	५२/३
इदमन्तरमिन्द्रारेः	११	४२/१
इन्द्रसूनुसुतो वीरो–	१३	१४/१
इन्द्रादिदेवा वरपुष्पवर्षम्	११	७२/३
इमं किलकिलाशब्दं	१५	३९/१
–उ–	––	––
उक्तं निशाम्येति निशा–	४	१२/१
उक्तं श्रुत्वा हनुमता	१	४/३
उग्रंदशग्रीवमथाभ्यरौत्सी	८	११/१
उग्रा तदग्रगा सेना	६	४३/१
उच्चावचा ये हरयो	१५	२/१
उच्चावचाः प्रगर्जन्त	५	४६/३
उच्चैरास्फोट्य गर्जन्तो	१	२५/३

Rarest Archiver

उत्कार्मुकौ काञ्चनवर्म	१४	७/१
उत्तरा फल्गुनी ह्यद्य	१	५/३
उत्तस्थुरुन्नदन्तस्ते	११	१०/१
उत्थितं सर्वतो वाक्यम्	१५	४५/३
उत्थितैरुद्धतैर्वीरै–	११	१/१
उत्पाट्य पाटवेनाऽशु	१३	२४/१
उत्पाट्योत्पाट्य विक्षिप्ता	६	९/१
उत्पातान् मृतिदान् पश्यन्	५	१८/३
उत्पातान् वीक्षमाणोऽपि	१३	६/३
उदतिष्ठन् कपिगणाः	१०	४९/३
उदारविक्रमेणाऽजौ	६	४०/३
उदारवीर्यः प्रविदार्य	८	१०/३
उदारो दारयामास	७	२९/३
उदितं पुरि वृत्तान्तं	३	४७/३
उद्गर्जन्तोऽभिद्रवतः परस्य	९	७३/१
उद्दीप्तनेत्रं कटुदंष्ट्रमस्य	९	७६/३
उद्घणं बाणमादाय	१३	२६/३
उद्यच्छतो मुद्गरमुग्रमूर्तेः	९	७१/१
उन्मुखान् दुर्मुखमुखान्	९	४२/३
उन्मुच्य कण्ठादवलोक–	१६	१६/३
उन्मूलयन्ती सकलांश्च	१२	७/१
उन्मूल्य सालं विपुलं	९	७२/१
उपमानपदं नाऽऽसीद्	२	५४/३
उपवासकृशं दीनं	१५	११/१
उपसृत्य तमस्प्राक्षीत्	१०	३५/३
उपायनान्युपादाय	१५	६३/१
उपासत सुवेलाग्रे	३	४९/३
उरस्याहत्य तं दोर्भ्यां	६	१२/३
उवाच परुषं वाक्यं	११	३८/३
उवाचाथ धनुर्धुन्वन्	११	३५/३
उशीरगुग्गुल्वगरुप्रवृद्धो–	१६	५/१
–ऋ–	––	––
ऋजुः परपरित्यक्तो–	२	१५/१
ऋक्षवानरवीराणां	११	२०/१
ऋक्षाश्च रूक्षा बहुकोटयो	४	२५/१

–ए–	––	––
एक एव क्षिपेद् रामं	३	४४/१
एकं त्रीन् पञ्च सप्तेति	७	११/३
एकं पञ्च च चिक्षेप	७	९/१
एकाकिना न गन्तव्यं	९	२१/१
एकीचकाराथ स राम–	१२	३३/३
एकैकशस्तांश्चगुणाननन्त	१२	२४/३
एकैकशोऽप्येवमुतान्यथा	१४	२७/३
एको हनूमान् नो नूनं –	३	२६/३
एतस्मिन्नन्तरे प्राह	११	३१/१
एतस्मिन्नन्तरे हन्त	१३	३७/१
एवं ब्रुवाणं तमुवाच देवो	१४	२२/३
एवं ब्रुवाणं भुवनप्रभुं तं	८	३४/१
एवं ब्रुवाणे जगदेकनाथे	१६	२१/१
एवं ब्रुवाणे बहुधाजनेस्वे	१४	२१/१
एवं रामेण गदिते	३	१२/१
एवमुक्ता सरमया	३	३८/१
एषां गुणानामतिदुर्लभानां	१६	२३/१
एह्येहि किं ते कपिकाल	९	६७/१
एह्येहि मारुतिकरात्	११	२८/३
–ओ–	––	––
ओमित्यथोक्त्वा पुरुषः	८	३५/१
–औ–	––	––
औदासीन्यं समेन स्याद्	९	१४/३
औषधानि निलीनानि	१०	४६/१
औषधान्यानयेत्याशु	१३	३८/३
औषधीनां प्रभावेन	१३	४२/३
औषधैरामयो यद्वद्	२	८/३
–क–	––	––
क ईश्वरः को विजयी	१	२४/१
कङ्कान् सन्तर्पयिष्यामि	१३	७८/३
कच्चित् कपीन्द्र कापेयी	१५	३५/३
कच्चिदार्यस्य पादाब्जं	१५	३६/१
कच्चिद् बहून् जेष्यति	१२	१२/१
कच्चिन्मे सफलं जन्म	१५	३६/३

Rarest Archiver

कण्ठेषु घण्टाघटितेषु	१२	१५/१
कथं तापसपत्नीं त्वं	१	२८/३
कथञ्चिज्जीवता यातं	१	२७/३
कथाः कथय रामस्य	१५	२९/३
कपयो विविदाद्यास्तान्	९	३६/३
कपिकुलकमलप्रोजृम्भणे	५	५०/१
कपिकोटिमहौघेभ्यो–	३	२६/१
कपिकोटिसहस्राणि	२	५७/३
कपिभिः कोपितस्तत्र	११	२२/१
कपिभिर्मुष्टिपिष्टाङ्गो–	३	२/१
कपिराजेन सम्पृष्टो–	२	२६/१
कपिराजोदितं श्रुत्वा	२	३/१
कपिरूपधरौ चारौ	३	४/१
कपिसप्तशतान्येकः	६	४५/३
कपीनकम्प्यो विगतानु–	९	६१/३
कपीनद्रावयद् बाणैः	११	२३/३
कपीनां कालनं दृष्ट्वा	११	२४/१
कपीनां लङ्घनोपायं	१	३/३
कपीन् विभीषणं चैनम्	१५	१५/३
कपीन्द्रराक्षसेन्द्रौ त्वं	१५	४२/१
करटकटककालं भीषणं	९	७९/१
करिष्यते निजैर्मांसै–	७	२७/३
करिष्ये निष्क्रियामित्थं	७	२६/३
करुणं विलपन्तीं तां	३	३३/३
करौ च परिघाकारौ	९	२६/३
कर्णिशल्यविपागांश्च	६	५/३
कर्तव्यमूढा अपरे	१०	४३/३
कवळत्रितयार्थं स्यात्	९	२०/१
कल्लोलकल्पैः करिभिः	१२	५/१
कात्यायनः सुयज्ञश्च	१५	८३/३
कार्यदक्षोऽत्र शत्रघ्नः	१५	८२/१
कार्ष्णायससस्रुवश्छागं	१०	७/३
कालदण्डप्रचण्डाभं	९	५६/३
कालदण्डोपमां शक्तिं	१३	३३/३
कालयन् नागपूतं तं	१०	१९/३

कालानलस्येव न यस्य	८	६/३
कालाम्बुदप्रभतनुं	९	२५/३
काल्यमानां कपिवरैः	६	१५/१
कालिताः काद्रवेयास्ते	१०	२१/१
किं जीवसीत्युवाचाऽरात्	१०	३१/३
किं पौरुषं तत् पुरुषाद–	८	६/१
किं वर्णयामो रामस्य	१	२०/३
किं विश्वमूर्तेः कपिभिस्तु	१२	२९/१
किङ्कराणां त्वदार्यस्य	१५	३८/३
किङ्कराणां सहस्राणि	१५	७८/१
किङ्कराणां सहस्रैश्च	१५	३२/१
किञ्चित् प्रहृष्टं वित्रस्तं	१३	५६/१
किमस्त्यविदितं देव	२	४/१
कीर्तिं वदाम तव तां –	१६	२५/१
कुबेरदत्तं प्रमुमोच बाणं	११	६५/१
कुमुदं विविदं मैन्दं	७	३/१
कुम्भं तं निहतं दृष्ट्वा	६	२६/१
कुम्भकर्णं तथा दृष्ट्वा	९	३१/१
कुम्भकर्णगिरं श्रुत्वा	९	१६/१
कुम्भकर्णस्य कर्णौ–	९	५४/१
कुम्भकर्णाग्रजः क्रुद्धः	९	१/१
कुम्भकर्णाङ्गसङ्गाः ते	९	३७/३
कुम्भकर्णात्मजे तस्मिन्	६	३७/१
कुम्भकर्णानुगस्तूर्णं	९	३६/१
कुम्भकर्णेन्द्रजित्पूर्वे–	१	३३/१
कुम्भकर्णो बभाषे तं	९	१२/३
कुम्भमम्भोनिधौ प्रास्यत्	६	२४/३
कुम्भस्य धनुराच्छिद्य	६	२२/३
कुम्भो वृक्षं शरैश्छित्वा	६	१९/१
कुर्वन् प्रासादसामग्रीं	१	१/३
कुलभूषणभूतो नः	१०	३/१
कुलाङ्गनायां परिवेश्म–	१४	४३/१
कुसुमास्त्रमिमं देवं	१	४०/३
कृतकार्यं महावीर्यं	१०	२६/३
कृतप्रतिकृतोदारौ	११	४८/३

Rarest Archiver

कृतहोमो ह्यवद्ध्यः –	११	१६/३
कृत्वा प्रसादं निर्व्याजं	१५	५६/१
केचित् केशान् परे	९	५/१
केचित् सूत्राणि जगृहुः	२	५१/१
केचिद् गजानां शततुल्य	४	२४/१
केचिन्निलीना वृक्षेषु	९	३२/३
केसर्याख्यं शतबलिं	३	१७/३
कैलासशैलात् पुनराग–	१४	४८/३
कोऽत्राविपन्न इत्युच्चैः	१०	२८/३
कोटिं च खर्वं च तथा	१२	२१/३
कोट्योऽथ षट्त्रिंशदति–	४	२१/१
कोपं प्रकाशयामास	१३	६८/१
कोपाटोपं कपीन्द्राणां	५	१/१
कोपो विश्वस्य विपदे	२	४१/१
कोशकोष्टबलाद्यं च	१५	५४/१
कोसलेन्द्रः सुवेलाद्रिं	२	५९/१
कौसल्या भूषयामास	१५	६१/३
क्रुद्धो हि द्रुमवर्षेण	६	२१/३
क्रुद्धोऽविनिष्पत्य मरूत्–	८	२८/१
क्लीब तिष्ठ क्षणमिति	११	३६/३
क्व दृता वानराः क्षुद्राः	९	३०/१
–ख–	––	––
खड्गमाच्छिद्य तेनैनम्	६	५१/३
खण्डयन् निजघानैनम्	१३	२१/३
खमुत्पत्य निपात्याधः	२	३२/३
खरैः सिंहमुखैर्युक्ते	५	३९/३
खर्वलक्षं महाखर्वं	३	२१/१
खर्वार्बुदाधिपत्यं च	३	१८/१
खलस्य खड्गमाच्छिद्य	१३	१९/१
–ग–	––	––
गगनं गगनाकारं	१३	६६/३
गङ्गादिभिर्वृतो दारै–	२	४३/३
गच्छ तिष्ट मुमूर्षुश्चेत्–	७	६/३
गच्छन् गगनमार्गेण	१०	८/३
गच्छेद् यमपुरीमित्थं	२	३५/३

गजं गवाक्षं गवयं	९	४४/१
गजाश्वादीनथाऽरुह्य	१५	६८/१
गजो गवाक्षो गवयो –	८	८/१
गजोऽद्रिशृङ्गमुष्टिभ्यां	५	८/३
गदति जगति भद्रां भार–	१६	२६/१
गदया ताडितस्तेन	५	१३/३
गदया ताडितस्तेन	५	४२/१
गदाखड्गशरैराशु	६	९/३
गदापाणिमसम्भ्रान्तं	५	३४/१
गदासिभिस्तोमरसायकोघै	१२	११/३
गर्ववान् शर्ववरतो–	५	४३/१
गर्वी पर्वतपातेन	१३	३६/१
गवां स लक्षाणि सुल–	१६	१४/१
गायन्तो राघवगुणान्	१	१२/३
गिरेरानयनात् पश्चाद्	१५	१/१
गिरिमेवोज्जहारैनं	१०	४६/३
गिरिशृङ्गेण धूम्राक्षं	५	४२/३
गिरिस्तनीसप्तसमुद्रवस्त्रा	८	२६/३
गुणां नैकं च पश्यामि	१	३८/३
गुरुद्रुहो ब्राह्मणसूदनस्य	४	९/१
गुरोरिवोपदेशेन	१५	४३/३
गुल्मे सुषेणं विन्यस्य	१३	२३/३
गृहीतो विषवद्धन्यात्–	२	६/३
ग्रसन्तमिव लोकांस्त्रीन्	९	२९/१
–घ–	––	––
घर्मेणऽर्तास्तोयदर्ताविवा–	१५	८५/३
–च–	––	––
चकर्त कार्तस्वरभास्वरं	८	३८/३
चकार रुद्रदेवत्यम्	१०	६/३
चचाल चेतो न दशानन	१४	५/३
चतुर्णामौषधानां ते	१०	५०/३
चतुर्भिः चतुरैः सार्द्धं	१	५१/१
चतुर्भिश्चतुरो वाहान्	११	५५/१
चरणावरुणब्जाभौ	१५	४८/१
चरन्तौ चक्रतुश्चित्रं	१३	५३/३

Rarest Archive

चापहस्त प्रहस्त त्वं	५	१६/१
चापहस्तः प्रहस्तोऽथ	५	२३/१
चापेन रोपं प्रतिसन्दधाने	१४	३४/१
चारा वानरनिष्पिष्टाः	३	३६/१
चारा विभीषणस्याथ	३	४६/३
चिच्छेद च शरेणास्य	७	३०/३
चिच्छेद तच्छिरो बाणै–	७	१५/३
चिच्छेद तच्छीघ्रमतुच्छ–	९	६५/३
चिच्छेद तांश्च सौमित्रिः	७	१२/१
चिच्छेद तानि चाङ्गानि	७	१६/३
चिच्छेद तुच्छेतरमौलि–	१४	१०/३
चिच्छेद रामावरजः शरेण	११	५८/३
चिच्छेद रामावरजः शरैः	८	२२/३
चिच्छेद सौमित्रिरमोघ	११	६४/१
चित्ते गात्रे च नेत्रे च	१५	२८/३
चिरं चित्रं युयुधतुः तौ	११	४०/३
चिरं चित्रं रणं कृत्वा	५	३६/३
चिक्षेप घण्टाघटितं	१३	७१/३
चिक्षेप तद्राक्षसदेहमब्धौ	९	७८/१
चिक्षेप राक्षसः शूलं	७	३०/१
चुक्रोधानभियाताय	२	३६/३
चूर्णयित्वा धनुश्चास्य	६	५७/३
चूर्णीबभूवतुस्तूर्णम्	१३	२५/१
चूर्णीबभूवुस्तेऽस्याङ्गे	९	४६/३
चेलुरङ्गानि वामानि	१३	७/३
–छ–	––	––
छित्त्वैव तांस्तस्य चमूं च	११	६०/३
छित्त्वा तरुं तस्य विदार्य	८	११/३
छिन्नप्ररोहिणश्चैव	१३	४२/१
छिन्नेषु भिन्नेषु निपानितेषु	१२	८/१
–ज–	––	––
जघान गिरिशृङ्गेण	६	४/३
जघान मुष्टिघातेन	६	६०/३
जघानाकम्पनं तेन	५	४५/३
जघास कांश्चिन्निजघान	९	६१/१
जज्ञिरे जयशब्दाश्च	१५	६९/३
जटिनं चीरिणं वीर–	१५	२२/१
जडीकृतस्तेन स रावणो	८	१८/३
जनोऽविवेकी च विवेक	१२	२०/३
जय देव त्रिलोकैक–	११	८/१
जयति जगति रामो रावण	४	३०/१
जयति जगदधीशस्यानु–	४	३०/३
जयो ध्रुवस्ते न पराजयः	१४	२६/१
जाज्वल्यते स्म तस्मिन्	६	३०/३
जाज्वल्यमानं तच्छूलं	१३	७१/१
जाज्वल्यमानं कोपेन	११	२५/१
जाज्वल्यमानः कोपेन	१३	३/१
जाज्वल्यमानज्वलनै–	५	४७/१
जाज्वल्यमानोज्वलहेति–	१२	६/१
जातं सपदि हासान्तं	६	३५/३
जानकीं तामलञ्चक्रुः	१५	६१/१
जानन् विरिञ्चस्य वरं	१४	११/३
जानुनि न्यस्य तच्छित्वा	९	५७/३
जाम्बवत्पूर्वकाः सर्वे	६	५२/३
जिघांसतां वानरवाहिनीं	१२	२७/१
जिज्ञासुः पुरि वृत्तान्तं	१०	२७/१
जितकाशी भवान्	६	२३/१
जितवान् किल दिक्चक्रं	१३	७४/३
जीमूता इव गर्जन्तः	१	११/१
जीवनं छिन्नसन्धानं	१०	५०/१
जीवन् कथञ्चिद् वृत्तान्तं	३	२/३
जीविताशां सुखाशां च	१३	१/३
जेता किं मानवो रामः	३	४३/३
ज्ञातीन् सन्त्यज्य नीचान्	११	३३/१
ज्ञात्वा तं नीलदुर्द्धर्षं	५	२७/१
ज्ञात्वा विभीषणः प्रोचे	३	६/१
ज्ञानास्त्रेण ज्ञानमूर्तिः	११	९/३
ज्येष्ठं गुरुं कथं त्वं	९	१७/३
ज्येष्ठेन प्रेषितः प्रायात्	९	९/३
–––––––––––––	––	––

Rarest Archiver

–त–	––	––
तं गिरिं काञ्चनमयं	१०	४७/१
तं निकुम्भपशुं कृत्वा	६	३६/३
तं निर्विषाशीविषवद् –	८	३९/१
तं प्रहस्तप्रभृतयः	१	२५/१
तं रावणं राममभिद्रवन्तं	८	२०/३
तं वायुवाजं रविवह्नि–	१४	१२/१
तं विषण्णं विवर्णस्यं	७	१७/३
तं सभार्यमुपायान्तं –	१५	७०/१
तं सूक्ष्ममक्षिकारूपी	९	५०/३
तच्छित्त्वाऽऽदाय हस्तेन	११	२७/३
तत आमन्त्रयामास	१५	१०/१
ततः क्रुद्धः कुम्भकर्णो–	९	५८/१
ततः शतबलिं श्वेतं	९	४२/१
ततः शरशतेनाऽशु	११	४१/१
ततो निकुम्भः कुम्भश्च	६	१/१
ततो विरूपनेत्रेण	१३	२१/१
ततोऽपि भूयान् पुरि	१२	१/३
तत्र प्रासादशिखरे	३	५२/१
तत्र तत्रातिचित्राणि	१५	१७/१
तत्र युद्धमभूच्चित्रं	१३	२९/१
तत्राऽगता अप्सरसोऽथ	१६	८/१
तत्रोदाहरणं गृह्णन्	२	११/३
तथा ब्रुवाणं तं दृष्ट्वा	१५	५५/१
तद् दिव्यं वचनं श्रुत्वा	७	१८/३
तद्दर्शनस्पर्शनाभ्यां	१०	२१/३
तदा राजा दशरथो–	१५	३/१
तन्मन्दिरं सुन्दरमावसन्तं	४	६/३
तन्मुष्टिपिष्टः स पपात	९	५९/३
तन्मुष्टिपीडितः क्रुद्धो–	६	५१/१
तन्मृष्यते त्वं प्रतिदाय	४	१०/३
तपनस्य सुते तस्मिन्	९	४८/१
तमन्वच्छन्नरिमर्दनाय	४	३/१
तमन्वयुः राक्षसेन्द्राः	९	२४/३
तमांसि परिमुष्णन्तम्	१५	४६/३

तमाह्वास्ताहवायाश्	६	५६/३
तमुग्रवेगा जगृहुर्न्नराशाः	४	१३/१
तमेवाद्रिं कपीन्द्राय	९	४७/३
तरङ्गिणीतुङ्गतरङ्गलोल	१२	९/३
तरसा पातयामास	१३	२४/३
तरुणाऽताडयन्नीलः	५	२६/३
तलताडनमात्रेण	९	४९/१
तलेन तरसा तारो–	५	२२/३
तस्थुर्विहाय सङ्ग्रामं	१३	५५/३
तस्मात् ते विग्रहो माभूत्	२	३१/३
तस्मादधर्मं निर्द्धूय	१	४३/३
तस्मादानीयतां शीघ्रं	१०	३७/३
तस्मिन् जीवति जीवामो	१०	३२/३
तस्मिन् हते तेन हताव–	११	७१/१
तस्मै रामाय जयिने	१	२३/३
तस्मै लोकैकनाथाय	१	४४/३
तस्मै सालशिलाशैलान्	९	३७/१
तस्याऽतपत्रं सितचामरे –	८	२/३
तस्यापतत एवाशु	६	५७/१
तस्येत्युच्चैर्ब्रुवाणस्य	११	३०/१
तस्यैव रथचक्रेण	५	११/३
तां दृष्ट्वा विस्मयं भेजे	३	५१/३
ताडितादश्ववदनात्	६	४९/१
तादृशं हनुमद्वीर्यं	१	१९/१
ताननन्तोऽन्तरेणैव	१३	५२/१
तानप्राप्तान् शरैस्तीक्ष्णै–	७	९/३
तान् रावणश्चाच्छिनदाशु	८	२३/१
ताभ्यां तदा राघवरावणा–	१४	८/१
तामापतन्तीं चिच्छेद	१३	३१/१
तारं धूम्रं जाम्बवन्तं	३	१७/१
तारके इव मेघाग्रात्	६	४९/३
तारनीलनलान् योद्धून्	९	४४/३
तारेयस्तरसा तस्य	६	४८/३
तिमिरमहरदेवं रामभानुः	९	७९/३
तिरस्करिण्यामपवाहितायां	१४	४१/१

Rarest Archiver

तिष्ठ किं प्राकृतैरेतैः	६	४७/१
तीव्राणां पुण्यपापानां	५	४/३
तुङ्गं गिरेः शृङ्गमथ	९	६०/३
तुङ्गे शृङ्गे त्रिकूटस्य	३	५०/३
तुच्छेतरं पुच्छमथोत्क्षिप	४	२७/३
तुभ्यं किं प्रददानीति	१५	२७/३
तुष्टाव तुष्टात्ममतिर्वचोभिः	१४	२५/३
तूर्णं शरशतं तस्मै	११	४४/३
तूर्यदुन्दुभिनिर्घोषाः	१५	६९/१
ते कौम्भकर्णा भुवि	९	७४/१
ते तेन मुक्ता भुवि पेतु–	४	१३/३
ते भक्ष्यमाणा हरयो नि–	९	६२/१
ते मत्तयुद्धोन्मत्ताभ्यां	६	४२/३
ते राक्षसा रावणभृत्यभूता	१४	१७/१
ते वानरास्तत्र नराशिनाथं	८	३/१
ते विभीषणसौमित्र्योः	११	२१/१
ते सत्यमैक्यं प्रययुस्ततो	४	३/३
ते सन्नादैश्च युगपन्न	९	२/३
तेजसाऽङ्गदचन्द्रस्य	५	३८/१
तेन तर्क्यं तयोर्वीर्यं	३	२७/३
तेन रावणमासाद्य	२	४५/३
तेन स्थूलेन शैलेन	१३	२५/३
तेन हर्यृक्षराजस्य	१३	२७/१
तेनैव सिंहनादोग्रः	६	७/३
तेषां कोटिमहौघेन	३	२५/१
तोक्मभेदान् दधिमधु–	१५	७६/३
तौ कुम्भकर्णस्य करावु–	९	६९/१
त्रयाणां कतमं लोकं	९	१०/३
त्रिंशच्च कोटीर्वरहाट–	१६	१४/३
त्रिंशत्सहस्राणि महौघ–	१२	४/१
त्रिगुणैस्त्रिजगन्ति त्वं	२	४४/३
त्रिमूर्धानममूर्धानं	६	६२/३
त्रिलक्ष्मानः खलु योज–	९	७७/१
त्रिशिखं शूलमुद्धुन्वन्	९	१८/३
त्रिशिरा अतिकायश्च	६	४२/१
त्रीन् बाणानुल्बणान् तस्मै	११	३९/३
त्वद्भ्रूविभ्रममात्रेण	१	२८/१
त्वया भवाब्धिमतरं	१५	४/३
त्वरध्वं हरयो योद्धुम्	११	५१/३
त्वां नन्वहं शेणितपङ्क–	८	१४/३
त्वादृशैर्बन्धुभिर्युक्ता	९	१६/३
–द–	––	––
दंशिता रथमारुह्य	१३	५/३
दंष्ट्राकटूनां मुखकोटराणां	८	५/१
दंष्ट्राभ्यां क्षुरधाराभ्यां	९	२८/१
ददौ स देवो जनकात्म–	१६	१५/३
दन्तान् नखानप्यशनिप्रका	४	२७/१
दन्तैर्नखैश्च वृक्षैश्च	११	५२/३
दयितहनुमदंससक्तहस्तो	२	६०/३
दर्शयामास दुःखादीन्	११	१३/३
दर्शयामास पापानां	१०	१४/३
दशमुखनगरीं विलोक्य	२	६०/१
दशमुखविशिखैः शिखि–	८	४३/१
दशयोजनविस्तीर्णं	२	५६/१
दशाननं वन्दमानः	९	१०/१
दशाननं स्वेन वरेण गुप्तं	१४	३३/१
दशाननस्य क्रतुभिः	१४	२३/१
दशाननस्याथधनूरथाश्वान्	८	१७/३
दशाननस्याथ शिरांसि	१४	१०/१
दशामिमां प्राप्य गतोऽसि	१४	२०/३
दशास्यो दशभिश्चाऽस्यैः	१३	३६/३
दक्षिणः स दिशं गच्छन्	१	१४/१
दारयिष्यामि हृदयं	१३	७७/१
दारापहाराद्भवतोऽद्यपापो	१४	२२/१
दारापहारोद्भवदुर्यशो मे	१४	४२/३
दास्यं ते दुर्लभं प्राप्तं	२	२४/१
दिदृक्षमाणः प्रक्षीणा	१०	१०/१
दिनैस्त्रिभिस्तत्र दिवानिशं	११	७२/१
दिव्यं पुरासादितदैत्यचक्रं	११	६९/१
दिव्याकल्पाम्बरधरौ	१५	६७/१

Rarest Archiver

दिशो दश शरव्रातैः	११	४८/१
दिशो दश शरैः शूरौ	१३	५४/१
दिष्ट्याऽसि दृष्टो विगता–	८	२१/१
दीनं दूनं कुमारेण	६	४६/१
दुःखज्ञानविहीनोऽपि	११	१३/१
दुद्रुवुः कपिसङ्घास्ते	९	३१/३
दुष्टधीः पातयामास	६	५०/१
दृष्टं हि तस्य वीरस्य	१	२०/१
दृष्ट्वा कपीन्द्रसैन्यं	२	२७/१
दृष्ट्वा मुहूर्तं दद्ध्यौ स	५	१/३
दृष्ट्वाऽन्यांश्चोपययतुः	१०	३०/३
देदीप्यमानमनलं	१५	२४/१
देदीप्यमानानलसन्निकाशः	९	७०/१
देवगुह्यमनुसृत्य समर्था	१०	१३/३
देवद्विषस्ते फलति प्रवृद्धो	४	९/३
देवान्तकाय चिक्षेप	६	५३/१
देवो ववर्ष रुधिरं	१३	७/१
देवोपदेवमुनयो मुदिता	२	६१/३
देवोपदेवमुनयो मुदिता	७	३२/३
देवोपदेवमुनयो युद्धं	१३	४७/३
देवोपदेवा देवीभिः	२	५२/१
देशकालस्वजातीनां	२	७/१
देशकालादिदुष्टोऽपि	२	१२/१
दैवगान्धर्वपूर्वाणि	१३	६३/१
दैवगान्धर्वपूर्वैः स	१३	६३/३
दोषेषु तत्र प्रतिजृम्भितेषु	४	१५/१
द्वारेष्ववर्तन्त सुषेणपूर्वाः	४	२०/३
द्विगुणास्योऽभवत् सोऽथ	७	१७/१
द्विशिराः स चतुर्बाहुः –	७	१६/१
द्विसहस्रकरीरेषु पूर्णा	९	९/१
–ध–	––	––
धनदं प्रति याहीति	१५	५७/१
धनुःशतमितं देशं	६	२७/१
धनुर्धराणां प्रवरौ धरण्यां	८	२३/३
धन्या सा खलु कौसल्या	१५	६/१
धरासमप्ताब्धिधराधराऽपि	१४	८/३
धराधरमवष्टभ्य	१०	४०/३
धराधरेन्द्रं दधतं तमार्च–	१०	५२/३
धरायां धन्विनां श्रेष्ठौ	११	४०/१
धर्मपक्षस्थिता देवा	३	४०/१
धूम्राक्षः क्रोधधूम्राक्षो–	५	४०/३
धूम्राक्षः पश्चिमद्वारात्	५	३९/१
धूलिलक्षं महाधूलिं	३	२१/३
धूलीविधूम्रं रुधिरौघसिक्तं	१४	१९/१
धृष्टयोः स्पष्टमनयोः	५	३५/३
धैर्यमालम्ब्य सङ्क्रुद्ध–	५	२/१
ध्यात्वा मुहूर्तं निश्वस्य	२	२८/१
ध्वजं रथं छत्रमुतातिचित्रं	८	३७/३
ध्वस्तं नक्तञ्चरतमः	५	३८/३
–न–	––	––
न केवलं कोसलपालको	१६	११/१
न चान्यथा स्यादयमीरितो	१४	२६/३
न तैर्मन्त्रविधिं कुर्यात्	१	३७/३
न त्वां मुञ्चति रम्भोरु	३	३७/३
न दूतश्चोर एवायं	२	३४/१
न दोषलेशोऽपि तवेश–	१४	३०/१
न नूनं वेत्ति रामोऽसौ	१	३२/३
न पौरुषे स्यात् पुरुषो–	८	१३/३
न भयं लोकपालैर्नो	९	११/१
न भयान्न च कार्पण्यात्	१	४६/१
न भवति बहुभावो भेद–	१२	३४/१
न भेत्तुमीशः कवचं	११	६१/३
न मे दोर्दण्डकण्डूतिं	१	३३/३
न मे भयं राक्षसतो–	२	२०/१
न मे मित्रममित्रोऽयं	२	३५/१
न मोक्ष्यसेराक्षस सर्वथा	८	३३/३
न लक्ष्मणं न सुग्रीवं	१०	३३/३
न विश्वमूर्तेर्नन्नु जातु	१२	३०/३
न वेदाहं जडमति–	२	४४/१
न शशाक प्रचलितुं	१३	२२/३

Rarest Archiver

नखदन्तायुधैर्भग्नाः	५	१४/३
नखैर्मुखं परिक्षिण्वन्	६	१४/१
नगानादाय पततां	२	५३/१
नटवत् कपटीभूतान्	१३	७५/१
ननाम रामपादाब्जे	२	२२/३
ननु बालोऽसि सौमित्रे	७	६/१
नन्दितं नाकिलोकेऽभूत्	६	३७/३
नमोनमो राम नमोनमस्ते	१४	३२/३
नयन्तं कपियूथेशं	९	५०/१
नरराजसुताद् भीतो–	१०	५/१
नरान्तकं प्रतिययौ	६	४६/३
नरान्तिके निपतिते	६	५२/१
नरान्तकोऽन्तकनिभः	६	४५/१
नरेन्द्रस्याहरं भार्यां	२	३०/१
नलः प्रतपनस्योग्रः	५	८/१
नाऽदिर्न नाशस्तव सद्गुणा	१४	२७/१
नागभोगैर्दृढं बध्वा	१०	२५/३
नादृष्ट्वा पुरि मे वास	१५	११/३
नानामलेन मलिनं	२	१२/३
नानायुधधरा वीरा	९	२४/१
नानायुधधरा वीरा	५	३/१
नानायुधाढ्याःपरिवारयन्तो	८	७/३
नानाविधायुधान् सङ्ख्ये	७	२४/३
नानाहेतिमतीं दीप्तां	६	४३/३
नानारूप इति त्यक्तः	३	४३/१
नामोचयन् नागबन्धाद्	१०	१३/१
नारा च मालाममुचद्	१३	५७/१
नासत्यसूनू स च शम्भु	८	९/१
नासिकां चाऽशु दशनैः	९	५४/३
नास्मन्नाथः क्षितौ तिष्ठेद्	१३	४८/१
नास्म्यन्यसक्तेति मुहुः	१४	४४/१
नाहं विरोधो न खरो–	९	६८/१
निकरा राक्षसानां ते	७	३१/१
निकुम्भाग्रत आप्लुत्य	६	३१/३
निकुम्भादीन् हताञ्छुत्वा	६	४१/१

निकुम्भेन शरैर्विद्धो–	५	११/१
निकृत्तकरकर्णाङ्घ्रि–	१३	९/१
निगद्य विस्तरेणैव	३	१८/३
निजघ्नू रक्षसां सैन्यं	११	१९/३
निद्रावशो भुजेनैव	९	७/१
निन्ये निमिषमात्रेण	१०	४९/१
निन्ये हनूमान् परमोप–	८	२९/३
नियुद्धं वीरयोरासीच्चिरं	६	२४/१
निरास रामो बहुबाणवर्षै–	१२	१८/३
निरीक्ष्य तं राक्षसराट्	८	१८/१
निर्गम्य नगरात् तस्मात्	९	२३/३
निर्बिभेदाथ सुग्रीवो–	१३	२७/३
निर्ययुः कौम्भकर्णाभ्यां	६	२/३
निर्ययौ नगराद् राजा	१३	६/१
निर्ययौ रथमद्ध्यास्य	११	२/३
निर्यान्ति संयान्ति च	१४	२९/३
निवर्तिष्ये निराशोऽहम्	७	४/३
निवेदयामि देवेश	१५	५३/३
निशम्य सम्यङ्मकराक्ष–	८	१/१
निशाचरचमूं भीमां	५	२९/१
निशाचरध्वान्तभिदे	१	६/३
निशाचराणां निशितैः	१२	२७/३
निशिचरचयसत्रध्वंसने	५	५०/३
निसर्गनीचस्त्वमिति	१३	७५/३
निसर्गरक्तो नेत्रान्तो–	२	३८/३
निसूदयेदयं देव	२	४६/३
निहत्य मत्पितृरिपुं	७	२२/३
निहत्य वैरिणं वीरो–	७	२०/१
नीते हनूमत्यारब्धं	६	३५/१
नीलः शिलां प्रहस्ताय	५	२७/३
नीलः सेनापतिः सेनाम्	१	८/१
नीलकेशो लसन्माल्यः	१०	१८/१
नीलतारादिभिर्नीत्या	२	९/१
नीलाङ्गदनलश्वेत–	३	१६/१
नीलाङ्गदादीन् सुग्रीवं	७	२५/१

Rarest Archiver

नीलादीन् द्रवतः प्रोचे	९	३३/३
नीलानुगामी विविदः	४	१९/१
नीलो निमीलिताक्षोऽरेः	५	२५/१
नो चेत् पुनश्च सङ्ख्येयं	३	१०/३
नो चेत्प्रियार्थानुपभुङ्क्ष्व	४	११/१
न्यग्रोधोदुम्बरश्वत्थ–	१५	७७/३
न्यस्तमापद्धनमिव	१३	७०/३
–प–	––	––
पतिं परेतं परिरभ्य दीना	१४	१९/३
पतितं लक्ष्मणं वीक्ष्य	१३	३५/१
पतिव्रते ते पतिरेष हत्वा	१४	३८/३
पत्यपत्यार्तिजं रोदं	१३	२/३
पत्युःपुनःपार्श्वमुपाजगाम	१४	१६/३
पत्राभ्यां चित्रवर्णाभ्यां	१०	१९/१
पत्रिभिः पातयामास	१३	९/३
पदातिपङ्क्तिद्रुतमापतन्तीं	१२	१८/१
पद्मलक्षं महापद्मं	३	२०/३
पद्मापतिं पद्मभवोऽथदेवो	१४	२५/१
पद्मापतेराशु स पादपद्मे	१४	३५/१
पनसं शरभं रम्भं	३	१६/३
पनसाद्या वानरेन्द्रा	१	१०/१
परदारपरामर्शं न	१	३९/३
परमपरमहिष्टं मानयन्तं	६	६३/१
परश्वधान् पट्टिसांश्च	११	२६/१
परस्परं स्पर्धयेव	२	५५/१
परस्परालङ्क्रियेति	१६	१२/३
पराक्रमं क्रूरतरं विधाय	१२	१०/१
परादवत् तद्बलज्ञो–	५	५/३
परद्रवन् पराभूताः	१३	१०/१
पराद्रवन् प्राणपरीप्सयाऽथ	१४	१७/३
परादुतं नीचवृत्तिं	११	१८/१
परिगृह्य स्वपाणिभ्यां	९	३९/३
परिघं प्रतिघोन्नद्धः	६	२८/१
परिघभ्रामणेनास्य	६	२९/१
परिघापातपुरुषैः	१३	१६/३
परिरेभे सुतं प्रीत्या	१५	३/३
परिरेभे हरिश्रेष्ठान्	१५	५०/३
परेण घोरेण शरेणा रामः	९	७६/१
परेताः कपिभिः शैलैः	७	३१/३
पर्यगुश्चक्रवच्चक्रं	१	१०/३
पर्वतादभ्रकायोऽथ	५	४४/१
पलायितः प्राणभयाद्	११	७/३
पल्लवावरणं वारि	१५	८०/३
पश्चिमादृषभो याम्यात्	१५	७९/३
पश्य देवस्य पार्श्वस्थौ	१५	४२/३
पश्य राजन्निमांसङ्ख्याम्	३	२२/३
पश्यन् निकुम्भसंरम्भं	६	२७/३
पश्यामि राम देव त्वां	७	२६/१
पक्षपाते परिक्षिप्ता	७	८/३
पांसुं दाशरथेः पश्य	१५	३८/१
पातयित्वा धरापृष्टे	१३	१९/३
पातितान्दारितान् कांश्चिद्	५	३१/१
पादाभ्यामतिभीमाभ्यां	९	२७/१
पादारविन्दं देवस्य	१३	३७/३
पादुके देवदेवस्य	१५	२३/१
पादुके पादयोः कृत्वा	१५	५३/१
पारेऽस्मिन् परपारे च	३	५/१
पार्श्वयोर्यूथनाथौ च–	१	८/३
पाल्योऽहं हि त्वया वत्स	९	१७/१
पावमानिरथोत्पाट्य	५	४५/१
पालितो धर्मपक्षोऽयं	३	४१/१
पितामहो लोकहितं	१	३०/३
पिपेष च पुनः पृथ्व्यां	९	५५/३
पिपेष शोणिताक्षं तं	६	१४/३
पुत्र यूयं नरकिणां	११	३४/१
पुनः शरशतेनाऽशु	११	३८/१
पुनः शरशतेनाऽशु	११	४५/१
पुनरेवाऽयुधैर्घोरै–	९	६/३
पुनश्च च्छिद्यमानाङ्गः	९	७/३
पुनश्च प्रेषितास्तेन	३	३०/१

Rarest Archive

पुनश्च शोकं द्विगुणां	१२	३/१
पुनस्त्रिकूटाद्रितटेषु पूर्णः	४	२३/१
पुरग्रामव्रजादीनि	१	१३/३
पुरा जयो ह्यधर्मस्य	३	४०/३
पुरुषादाधिपस्यास्य	१३	८/१
पुरे जनपदे चाऽसीद्	१५	८४/३
पुलस्त्यस्यान्वये जात–	१	३९/१
पुष्पकं पुष्करे पश्य	१५	४०/१
पुष्पकं प्रार्पयामास	१५	१३/३
पूजयद्भिः कुम्भकर्णं	९	५३/१
पूर्णानन्दे मुकुन्देऽस्मिन्	१३	६८/३
पूर्णे चतुर्दशे वर्षे	१५	१९/१
पूर्ववत् पर्वतश्रेष्ठं	१३	३९/१
पूर्वापरज्ञान् पुरुषान्	१	३६/३
पृथक् पृथक्पर्वतसन्नि–	४	२५/३
पृथ्वीप्रकम्पेन पपातशर्वः	१४	३४/३
पौरुषे पुरुषः कोऽन्यो–	१	२/१
पौलस्त्यपुत्रस्य परं च	९	७२/३
पौलस्त्यमष्टादशभिः	११	३७/३
प्रकाशमान आकाशे	१	५२/१
प्रकृतिं च त्यजेद् यद्वद्	२	१३/३
प्रक्रीडितस्तत्र दशाननेन	१४	६/३
प्रगृह्यातामाशु निगृह्यातां	४	१२/३
प्रचण्डो गण्डशैलेन	११	१४/३
प्रजङ्घयूपाक्षयुतः	६	८/१
प्रजङ्घस्य करात् खड्गं	६	१०/३
प्रजङ्घो मुष्टिघातेन	६	११/१
प्रणतं प्रणयेनेशः	७	२०/३
प्रतिगृह्य पपाताथ	१०	४७/३
प्रतिभाजृम्भितं वाक्यं	२	९/३
प्रतीक्षमाणो भगवान्	२	३६/१
प्रत्यनीकमिवापश्यद्	१	१५/३
प्रत्युद्ययुः प्रहृष्टास्ते	१५	७०/३
प्रत्येकं प्रत्यगच्छंस्ते	५	३/३
प्रबलं राक्षसबलं	५	२/३

प्रभाकरे निष्प्रभतां प्रयाते	१४	९/१
प्रभुः प्रतीच्यां दिशि योध	४	१८/१
प्रभुरमृतमयैरपाङ्गपातैः	८	४३/३
प्रयाणाभिमुखं प्रेक्ष्य	७	२१/३
प्रशस्यमानः सकलैः स	१४	१६/१
प्रसन्नो मारुतिं प्रेक्ष्य	१३	४१/३
प्रसादभङ्गाद् द्विषतो	४	१४/३
प्रसादयेयं राजंस्त्वां	९	१९/३
प्रसीद लोकनाथेति	२	४०/३
प्रहस्तं सप्तपर्णेन	५	१०/१
प्रहस्ते निहते तस्मिन्	५	२८/१
प्रहस्तेन शरैर्विद्धः	५	२४/३
प्रहस्तो रथमारुह्य	५	१८/१
प्रहस्य रामः प्रदरप्रवेकैः	८	३७/१
प्रहस्य लक्ष्मणो वीरो–	११	४६/१
प्रहृष्टै राक्षसगणैः	९	५२/३
प्रहृष्टो रोमहर्षश्च	१५	२८/१
प्रक्षीणकर्माणमिवाथ	१४	१८/१
प्रक्षीणान् राक्षसान्	१३	११/१
प्राकारगृहहर्म्याढ्यां	३	५१/१
प्राकारमद्ध्यारुरुहुः कपी	४	२२/१
प्राच्यां च नीलं दिशि	४	१८/३
प्राच्यां प्रहस्तं दिशि वज्र	४	१७/३
प्राज्यं राक्षसराज्यं ते	२	२३/३
प्राप्ता निकुम्भिलोपान्तं	११	१९/१
प्राप्तं त्रिशिरसं तस्य	६	६१/३
प्राप्य होतुं हुतवहं	११	१५/३
प्राप्येन्दिरां नृपसुतामति–	१४	४९/१
प्रार्थयत् किल पन्थानं	१	१७/१
प्रार्थितो भरतेनेशः	१५	५८/१
प्रासादभङ्गादथरावणस्य	४	१४/१
प्रासादमालाः सकला	४	२८/३
प्रासादशिखरादीनि	१०	४२/१
प्रासादशिखरारूढं	३	१४/३
प्राह स्म प्रहसन् वाक्य	१	३४/३

प्राहुर्लक्षशतं कोटिं	३	१९/१
प्रेषिता रावणेनाऽजौ	६	३८/३
प्रोचुः प्रभुं प्राञ्जलयः	१४	९/३
–ब–	––	––
बद्धोऽञ्जलिरयं राम	३	८/३
बध्नतां चान्तरं तेषां	२	५३/३
बध्वाऽऽशीविषपाशैस्ता–	१०	१२/१
बबन्ध नागैरिन्द्रारि–	११	३/३
बभार रामः पवनेन दत्तां	१६	१३/३
बभौ गिरिं बिभ्रदहो	१०	५१/३
बलमप्रतिमं वीक्ष्य	६	५६/१
बलाच्चेद् भोक्ष्यसे	१	३१/१
बलिना सन्धिरल्पस्य	९	१४/१
बलिष्ठं हतभूयिष्ठं	५	१९/३
बहुयोजनविस्तीर्णं	९	२५/१
बाणबर्हिः परिस्तीर्णे	३	१३/१
बाणान् बहून् बहुविधान्	१३	५१/१
बाणासने बाणगणानगण्या	१२	१४/३
बाध्यते चेदयं राजा	९	५१/१
बान्धवाः सन्त्यजेयुस्त्वाम्	१	४३/१
बालस्य किमवद्यं मे	७	७/१
बालानामबलानां च	५	४८/१
बालिशैः प्रोच्यते किं न	१	२४/३
बालोऽयं बालिशो राजन्	१	४८/१
बाष्पेक्षणो लक्ष्मण आशु	१४	४५/३
बाहुभ्यामथ बाणैर्वा	११	२९/१
बाहू इमौ पश्य महेन्द्र–	९	६८/३
बिभेति लोको न विदन्	१४	२/३
बिभेद चोल्बणैर्बाणै–	१३	७२/३
ब्रह्म ब्रह्मादिकानां शिशु–	१४	५०/१
ब्रह्मणो वरदृप्तोऽसौ	७	२/१
ब्रह्महत्या गुरुद्रोहो–	१३	७६/१
ब्रह्मादयो राममथाभ्यधुस्ते	१४	४७/३
ब्रह्मेन्द्रपशुपत्याद्या	१३	६१/१
ब्रह्मरुद्रादयो देवा यस्य	१	२३/१

ब्रह्मैव नूनं भगवान् हनू–	१६	२३/३
ब्राह्मेणास्त्रेण वद्ध्योऽयं	७	१८/१
ब्रुवन्तु सचिवाः सर्वे	२	३/३
ब्रुवाणो जय रामेति	१०	२०/१
–भ–	––	––
भगवांश्च प्रतिद्वारं	३	४८/१
भग्नदर्पो हनुमता	११	१५/१
भयाददृश्ये ब्रह्मास्त्रं	११	५/१
भरताग्रजदूतोऽसौ	१५	२४/३
भरतो निर्ययौ गृह्णन्	१५	३४/१
भरद्वाजाश्रमं प्राप्य	१५	१९/३
भवभयवनवह्निभर्जितानां	१	५४/१
भवस्तदा तामसभावमा–	१४	३३/३
भवान् मे भ्रातृदेशीयो–	२	३०/३
भावः कश्चिदपूर्वोऽभूत्	१५	४९/३
भासमानं विमानाग्रे	१५	४६/१
भासेव भानुः शिखया	१६	४/१
भिन्नान वह्नेःपृथगीक्षिताः	१२	३०/१
भिन्नाखिलाङ्गाविषुभिः	११	६२/३
भियाऽपयाताःसहसोपयात	९	६९/३
भीषणं विदधुर्युद्धं	११	५३/३
भुजं भुजङ्गभोगाभ–	१	१७/३
भुजं भुजङ्गाभमथोन्नम	८	१२/१
भुजांश्च विंशद् भुजगप्र–	८	४/३
भुजैरेकोनविंशद्भिः	३	४४/३
भुजावास्फोट्य युद्धार्थी	९	४३/३
भुवनानां प्रभौ रामे	९	३४/१
भूमण्डलंसर्षपकल्पमल्पं	८	२७/१
भूम्ना नियुक्तः पवनस्य	१४	३८/१
भूयानभूद्राघवसैनिकानां	१२	१/१
भेजुर्योगानुभावेन	१५	५९/३
भेदं विनैवापि विशेषमात्रा	१२	३३/१
भेरीशङ्खादिवाद्यानां	९	२/१
भोगानशेषाननुभुङ्क्ष्व	८	४०/१
भोगीन्द्रभोगप्रतिमंप्रदीप्तं	८	३२/१

Rarest Archiver

भ्रातरं मोचयन् वीरो–	६	१३/१
भ्रातुः परेतस्य कुरुष्व	१४	२१/३
भ्रातृजं पतितं दृष्ट्वा	६	२१/१
भ्रातृव्यं भ्रातारं हत्वा	२	१७/१
भ्रुकुटीमल्ललाटेन	१३	६९/१
भ्रूम्यां च भावगर्भाभ्यां	१३	६९/३
भ्रूविभ्रमस्तम्भितवारिराशेः	४	८/१
भ्रूविभ्रमेणैव जगन्तिहन्तुं	१४	३१/१
–म–	––	––
मण्डलानि विचित्राणि	१३	५३/१
मण्डलीकृतकोदण्डः	१३	४६/३
मण्डलीकृतकोदण्डो–	११	३२/३
मण्डोदरीसुतश्चण्डो–	११	५७/१
मत्कङ्कपत्रैर्निहतः	७	२७/१
मत्तोऽसि मत्तोऽपि गृहाण	८	१५/१
मदङ्गुलिं चालयितुं	२	२०/३
मदप्रमादप्रतिमुष्टदृष्टिः–	८	३१/३
मदोत्कटानापततः क्षुरप्रैः	१२	१५/३
मद्बन्धुनिधनस्याघ	९	१९/१
मद्बाहुवननिर्यातान्	१	३२/१
मद्वेगं सहसे चेत् त्वं	११	२९/३
मध्यस्थो भगवान् नूनं	२	५५/३
मन्त्रिणोः मरणं वीक्ष्य	१३	२६/१
मन्त्रिणां वाक्यमाकर्ण्य	१	२९/१
मन्त्रिदोषाअशेषाश्च राजन्	१	३८/१
मन्त्रैरलमलं हन्त	३	४५/१
मन्दहासेन्दुमालक्ष्य	१५	४४/३
मन्मतप्रतिबिम्बं यत्	२	१८/३
मन्यते क्षमिणं क्षामं	२	३७/१
मन्ये परीक्ष्य एवेति	२	७/३
मन्ये विष्णुमिमं जातं	३	४१/३
मम कुक्षौ दुकूलाख्ये	२	४६/१
मम प्रियं यं भुवनेषु	१६	२०/१
मया कामात्मना त्यक्तः	१०	३/३
मया बलेनोपभुक्ता	१	३०/१

मयाय ब्रह्मणा दत्तां	१३	३३/१
मयेदमुदितं राजंस्तव	१	४६/३
मरतकमणिवर्णं मत्त–	३	५४/१
मरुत्सुते विह्वलवन्निषण्णे	८	१६/१
मर्षितं परुषं वाक्यं	१	५०/१
मलिनं तीव्रतपसं	१५	२२/३
महाकटककोटीर–	९	२६/१
महागुहावद् भवदनं	९	२८/३
महाट्टहासप्रक्ष्वेलं	९	२९/३
महापद्मसहस्रेण	३	२४/३
महापार्श्वोऽपि कुपितः	१३	१८/३
महापुरुष कोऽसि त्वं	१५	२९/१
महाबलेन रामेण	१३	१/१
महाबलैर्हन्यमानो	३	७/१
महामणीन्द्रैरुपक्लृप्तमत्र	१६	१/३
महामहाः सर्वमहाजनानां	१६	२४/३
महारथानांमधुजिच्छिरांसि	१२	१९/३
महार्घमाणिक्यमहेन्द्र–	१६	२/३
महावृन्दसहस्रेण	३	२४/१
महाशिलाशैलनगायुधानां	४	१६/१
महाशङ्खमखे तस्मिन्	६	३६/१
महीयसीं व्याप महीं स	९	७१/३
महेन्द्रपूर्वैः सह लोक–	१४	२४/३
महेन्द्रवन्द्यो माहेन्द्रम्	१	१५/१
महेन्द्रारिं जिघांसुं तं	११	१७/१
महेश्वरास्त्रेण महामनस्वी	११	६७/३
महोदरं महीपृष्ठे	१३	१६/१
महोदरं विनिर्भत्स्य	९	२२/१
महोदरं हतं दृष्ट्वा	१३	१७/१
महोदरो वालिसुते	१३	१५/१
मा गाः कपे कौतुकमात्म	८	१९/१
मा घानि दूतम्मन्योऽसा	२	३४/३
मा भयं रामभृत्येभ्यो–	३	९/३
मा भूदित्थं परीवादो–	१०	५/३
मा वीर साहसं कार्षीः	१५	२५/१

Rarest Archiver

मां वालिनः सूनुमवैहि	४	७/३
मांसराशीन् सरुधिरान्	९	८/३
माणिक्यशोण आ कर्णाद्	१०	१७/३
मातामहो माल्यवांस्तं	३	३९/१
मातुलौ मोहितौ दृष्ट्वा	६	१६/३
मानवौ सूदयेत्यूचे	५	१६/३
मानुषं वेषमाश्रित्य	१५	२१/३
मानेनासहमानेन	७	५/१
माययाऽप्यकृतार्त्थेऽथ	३	३३/१
मा याया रक्षसां भद्रे	३	३५/१
मायासीतां भक्तियुक्ता	३	३४/३
मायासीतामुपादाय	१०	१५/१
मायिनां रक्षसामेनां	२	२/३
मायी स रावणस्तन्वीं	३	३१/३
मारतेः पातरभसा त्रिकूटे	१०	४२/३
मारुते मामुपायान्तं	१५	२०/३
मारुतेर्मुष्टिपिष्टोऽथ	६	३४/१
मार्ताण्डसन्मण्डलमध्य–	१४	३/१
मित्रघ्नेन शरैर्विद्धः	५	९/१
मित्रवेषममित्रं त्वां	१	४९/१
मुक्तावैडुर्यसङ्कीर्णम्	१५	७४/३
मुखरान् केवलं मूर्खान्	१	३५/३
मुखेन्दुना चारुवचोऽमृतेन	१४	३६/३
मुख्यप्राणसुतो मुख्यो–	५	५/१
मुनिमांसेन पुष्टस्य	१३	७८/१
मुमोच च स्वयं बाणान्	१३	५२/३
मुमोच ब्राह्ममस्त्रं तत्	७	१९/१
मुमोच रावणः शक्तिं	१३	३०/३
मुमोच रावणिर्याम्यं	७	१५/१
मुमोच लोहजां शक्तिं	५	७/१
मुमोच स दृढं विद्धो–	११	४३/३
मुहुर्मुकुन्दुं नीजमीक्ष–	१६	१७/१
मुहूर्तं मूर्च्छितः प्राप्य	१०	१/३
मुहुर्तेनाम्बरचरो राम–	१	५१/३
मूर्च्छितं द्रुतमादाय	९	४९/३
मूर्च्छितः प्राप सञ्ज्ञां	६	५०/३
मृतं कपिकुलं रक्ष	१०	३६/३
मृतं निशम्येन्द्रजितं सुतं	१२	२/१
मृतकोपममालोक्य	११	९/१
मृतसञ्जीवनी मुख्या	१०	३८/१
मृताः केचित् परे मुग्धा	१०	४३/१
मृत्युर्नक्तञ्चराणां जगति	१४	५०/३
मृदङ्गभेरीपटहादिकानां	१६	६/१
मेघगम्भीरनिर्घोषो–	१	५२/३
मेघगम्भीरया वाचा	१३	७३/३
मेघनादो जगादोच्चैः	१०	४/३
मैन्दस्य मुष्टिनिष्पिष्टो–	५	१०/३
–य–	––	––
यं मन्यसे धन्यतमं त्रि–	१६	१८/३
यत् परैर्दुष्करं लोके	१३	६५/१
यत्र सुस्रुवुरत्युष्णा–	५	१५/३
यतस्व हन्तुमिन्द्रारिं	११	३१/३
यथेष्टमत्र व्यभजत् कपि	४	१/३
यदि त्रैलोक्यजैत्रं	१	४०/१
यद्यच्चक्रे दशास्योऽयं	१३	६५/३
यद्यदायुधमत्युग्रं	११	२७/१
यद्याखण्डलशत्रुस्त्वं	११	२८/१
यन्त्राण्यकृन्तन् परिखा	४	२८/१
यमक्षयं निनायास्य	५	३७/३
यमशत्रुश्च दुर्द्धर्षो–	६	३९/१
यमेन दत्तं प्रमुमोच बाणं	११	६४/३
ययौ रामनियोगेन	१५	२१/१
यशःसमुद्रसेतुस्ते	२	४५/१
यान्याग्नेयादिनामानि	१३	६०/३
यावत् स तावत् स्मरति	८	२५/३
यावन्न रामसूर्यस्य	१	४५/१
युगपत् प्रतिनिष्पिष्य	९	३८/३
युद्धं प्रवृद्धमत्राऽसीद्	५	१९/१
युद्धनाट्यप्रसङ्गाय	१३	४५/३
युद्धे समृद्धेकृतविक्रमाणं	१२	१९/१

Rarest Archiver

युद्धोन्मत्तं च मत्तं च	६	६०/१
युवराजयुतो राजा	९	४५/१
युवराजोऽङ्गदो दृष्ट्वा	५	३१/३
युवराजोऽङ्गदो दृष्ट्वा	९	३३/१
यूथान्विता वानरयूथनाथाः	४	२०/१
यूपाक्षं विविदोऽरौत्सीद्	६	१२/१
यूपाक्षः शोणिताक्षश्च	६	२/१
ये तवानुभवेयुस्तम्	१५	६/३
योजनानामर्धलक्षम्	१०	४५/१
योत्स्यामि राक्षसैः सार्धं	२	२४/३
–र–	––	––
रक्तास्यनयनः क्रुद्धो–	११	२३/१
रघुप्रवीरंविभयोऽभिधावन्	९	६३/३
रणं द्रष्टुं नभो भेजुः	७	८/१
रणभूमिं तदा प्राप्तो–	१०	२७/३
रणरङ्गानुपातं च	९	४०/३
रणक्वणरणिकायांवर्त्तमानो	६	६३/३
रत्नप्रदीपैः खचितःसवि–	१६	५/३
रत्नान्यनर्घ्याणि वराम्बराणि	१६	१५/१
रत्नैः सुवर्णैः कामैश्च	१५	१२/३
रत्नोज्ज्वलैर्हेमघटैर्महेशं	१६	९/३
रथं सारथिमप्यश्वान्	१३	६७/१
रथं स्वयम्भुवा दत्त–	७	१/३
रथमारुह्य सन्नद्धः	११	५७/३
रथाख्ययादोभरितोऽभिपेदे	१२	५/३
रथादवप्लुत्यसरावणोऽपि	८	२५/१
रथै रथान् राक्षसांश्च	६	४४/३
रथोदयाद्रिमारूढो–	१३	५०/१
रक्षणाय नियुक्ताऽपि	३	३४/१
रक्षश्चमूंजघ्नुरिमेकपीन्द्राः	८	८/३
रक्षसां विक्रमं वीक्ष्य	११	५४/१
रक्षसामयुतं भीमम्	९	१/३
रक्षोवधो नाद्भूतमत्र यद्वत्	१४	३१/३
राघवो रावणस्याङ्गं	१३	७९/३
राघवो रावणास्त्राणि	१३	६०/१

राघवोऽपि सुवेलाद्रेः	३	१५/१
राघवौ च ससुग्रीवौ	२	५८/३
राघवौ वानरांस्तांश्च	१०	९/३
राजन् नियोजनीयोऽहं	७	२२/१
राजन् बद्धोऽञ्जलिस्तुभ्यं	१	४२/३
राजभोगैर्वस स्वामिन्	१५	१०/३
राम उक्त्वेति रविजम्	१	६/१
रामं मारुतिसुग्रीवौ–	१५	६७/३
रामं ययौ रावणवाहिनी	१२	१०/३
रामं समेत्य परमं मुमुदे	१४	४९/३
रामः किल भयस्थानं	१	२६/३
रामः शरोघैःप्रबिभेद शूर	९	७०/३
रामः सलक्ष्मणस्तत्र	१५	१५/१
रामः सलक्ष्मणो वद्ध्यः	९	११/३
रामः स्मितमुखो बाणैः	७	२९/१
रामदासाः कपीन्द्रास्ते	१	११/३
रामप्रसादप्रसरः	१	४४/१
रामबाणैर्विभिनाङ्गो–	१३	८०/१
रामभक्त इति त्यक्तं	१	५३/३
राममभ्यद्रववत् क्रुद्धो–	१३	२८/३
रामरावणभृत्यानां	५	४/१
रामरावणयोर्युद्धं	१३	६६/१
रामसुग्रीवयोर्वाक्यात्	१	७/३
रामसेनां गणयितुं	३	३/३
रामस्त्रिलोकीं संहर्तुम्	३	२८/१
रामस्य तद् बलौदार्यं	३	३६/३
रामस्य पुरतो दिप्तं	१५	६५/३
रामस्य रूपेषुतथा गुणानां	१२	३१/३
रामस्येदं शिर इति	३	३२/३
रामाज्ञया मृतास्तेन	१३	४३/३
रामाज्ञया ततो लङ्काम्	५	४६/१
रामाज्ञया तत्र विभीषणः–	१४	४०/१
रामाज्ञयाऽथ सुग्रीवं	१५	७४/१
रामाज्ञावेलया रुद्धः	१	१३/१
रामाननन्तानवलोकयन्तः	१२	२४/१

Rarest Archiver

रामानुजो रामनियोगतो–	१४	३७/१
रामानुजो रामनियोगतोऽथ	४	१/१
रामानुजो लक्ष्मणोऽयं	३	२७/१
रामानुजोऽथ रामस्य	१५	४८/३
रामानुजोऽब्रवीद् रामं	११	४/१
रामान् विरामान् रिपु–	१२	२५/३
रामापाङ्गानलज्वाल–	२	३९/१
रामाभिषेकलोलानां	१५	७५/
रामायानन्तवीर्याय	१	२२/३
रामेण युद्धं विपदे	५	१७/१
रामेणामोघवीर्येण	९	१३/१
रामैरगण्यैरिति वद्ध्यमानां	१२	२८/१
रामो गरुडमारुत्योः	११	६/१
रामो धरण्यां गगने च	१२	२३/१
रामो रामानुजं प्राप्तः	१५	२६/१
रामो विपक्षे स्वबले च	१२	२३/३
रामो विभीषणसखः	३	२५/३
रामोऽथ बाणासनबाणपा–	४	२/१
रामोऽभिरामो जयती–	११	६९/३
रामोऽभिषिच्यते नाथ	१५	८४/१
रामोक्ते समये प्राप्ते	१५	२३/३
रावणं पुत्रशोकार्तं	७	२१/१
रावणं प्रैक्षत कपिः	३	५२/३
रावणं यस्तृणीचक्रे	१	२/३
रावणं सगणं हत्वा	२	२३/१
रावणः पतितं श्रुत्वा	१०	१/१
रावणस्ताडयामास	१३	६७/३
रावणस्य चरावावां	३	८/१
रावणस्य चरो गत्वा	२	२७/३
रावणस्य नियोगेन	११	२/१
रावणस्य नियोगेन	११	११/१
रावणस्यानुजं प्राप्तं	१	५३/१
रावणस्यानुजो नाथ	२	२/१
रावणाख्यपशोर्होमो–	३	१३/३
रावणिः द्रावयामास	१०	११/३
रावणेन समादिष्टो	७	२३/३
रावणे बोद्ध्यमानोऽपि	३	३७/१
रावणोऽतिविषण्णोऽपि	३	२९/३
रावणोऽथास्त्रवीर्येण	१३	६४/१
राक्षसान् प्राक्षिपन्नब्धौ	१३	४३/१
राक्षसान् मकराक्षस्य	७	२४/१
राक्षसान् वानरैर्भग्नान्	५	४०/१
राक्षसीमक्षिणोत् सेनां	११	२४/३
राक्षसेन्द्रो महेन्द्रारिम्	१०	२६/१
रुधिरव्याकुलाक्षोऽपि	६	१८/३
रुरुदुर्विक्लवास्तस्य	१५	५५/३
रेजे रामो यथा मेघः	१५	१४/३
–ल–	––	––
लङ्काधिनाथोऽयमिति	१४	३७/३
लङ्काधिपतिरित्युच्चै–	२	२५/३
लङ्कापुरस्य दुर्गत्वं	१	४/१
लङ्कामलङ्कारवतीमवा	४	२/३
लङ्कायाःसङ्कटंकुर्यात्	१	२१/३
लब्धसञ्ज्ञो निशिचरः	५	३५/१
लब्धसञ्ज्ञो मुहूर्तेन	६	११/३
लब्धान्तरोऽस्मीति ययौ	८	१६/३
ललाटं पाटयामास	७	१०/३
ललाटं पाटयामास	१३	५८/१
लक्षार्धयोजनाध्वानं	१३	४४/१
लक्ष्मण त्वं बलश्लाघी	१३	३२/१
लक्ष्मण त्वं मुमूर्षुश्चेत्	११	३५/१
लक्ष्मणं च परिष्वज्य	१५	४/१
लक्ष्मणस्य क्षणाद् वक्षो	१३	३४/३
लक्ष्मणस्य शरैश्चोग्रै–	११	२०/३
लक्ष्मणेनाऽहृतेनाथ	२	२५/१
लक्ष्मणेषूरगणयन्	७	२५/३
लीलयोत्तोलयन्नद्रिं	१०	४८/१
लीलाप्रहरोऽयमरे नराश	८	१४/१
लीलाभिरेताभिरलं महेश	१४	२/१
लोकपालान्सलोकांस्त्वां	१	२६/१

Rarest Archiver

लोकैकशत्रो निहते दशा	१४	२४/१
लोड्यमानो धरापृष्ठे	२	३३/१
लोलाहिजिह्वादशकं	८	५/३
–व–	––	––
वज्रदंष्ट्रो महाकायः	६	३९/३
वज्रदंष्ट्रो ययौ योद्धुं	५	२८/३
वज्रदंष्ट्रोऽधिकं क्रुद्धो–	५	३०/१
वज्रोपमैर्बाणगणैरगण्यैः	९	६४/१
वनं तदभवत् पुण्यं	२	४८/३
वपुरवयवधर्मा वर्णाचेष्टाः	१२	३४/३
वमंश्च रक्तं शतमन्युशत्रुः	११	६०/१
वयं तु सर्वत्र च सङ्ग–	१४	४३/३
वराद् विरिञ्चस्य परैरजे	१२	९/१
वर्णयन् दर्शयन् देव्यै	१५	१७/३
वर्त्याद्युपाधेर्न्नतारतम्याद्	१२	३१/१
ववन्दे परमानन्दं	१०	२०/३
ववर्ष बाणान् दृप्तोऽसौ	७	२८/१
ववर्ष रामश्च शरान्	७	२८/३
ववर्ष च शरान् घोरान्	१३	१७/३
ववर्षाथ शिलासालान्	६	१७/३
ववर्षाथोल्बणान् बाणान्	११	५६/१
ववृधे पर्वताग्रस्थो–	१०	३९/३
वसिष्ठं तं कुलगुरुम्	१५	५६/३
वसिष्ठस्तापसश्रेष्ठः	१५	७५/१
वसिष्ठो वामदेवश्च	१५	८२/१
वक्षो विपक्षस्य बिभेद	११	५९/३
वक्ष्यामोऽथ नियोगात्	२	४/३
वाचा मायाविनां वीर्यं	११	३६/१
वाणीं श्रुत्वा हनुमतो–	१	१/१
वाणीमुदारामिति राघवस्य	८	४१/१
वानरा राक्षसान् जघ्नुः	६	३/१
वानरा राक्षसाश्चेमे	१३	५५/१
वानरा वारणैर्भग्नै–	६	४४/१
वानरा वारयामासुः	१३	८/३
वार्षकेण शरान् घोरान्	७	५/३
वानरांश्च नराशेन्द्रः	११	४५/३
वानराः किं नराहारान–	१	२७/१
वानराः षण्ढतिलवत्	९	३४/३
वानरानुल्मुकधरान्	६	१/३
वानरान् स नराहार	९	४१/३
वानरेन्द्रकलत्राणि	१५	१८/१
वानरैः पीडिता मुक्ताः	३	३०/३
वानरो वृक्षमादत्त	५	३६/१
विंशद् दशास्यस्यविलो–	८	४/१
विंशद्भिरप्यात्मभुजैः	८	२६/१
विकत्थनपरः पापो–	३	३/१
विकिरन्तं बहून् बाणान्	१३	७३/१
विकीर्यमाणैः कपिभिः	५	४७/३
विक्रमस्व पुरा मृत्योः	७	७/३
विक्रान्तकान्तकरकाशित–	७	३२/१
विचित्ररूपं त्रैलोक्यं	१३	५६/३
विजयस्व जगन्नाथ	१३	४९/३
विजित्याङ्गदसुग्रीवौ	७	३/३
विज्ञाय वीर्यंरघुवंशकेतोः	१४	५/१
विदग्धो विविदस्तत्र	५	१२/३
विदारणं दारुणदानवानाम्	१४	१३/१
विदारणं दारुणरामबाणैः	४	११/३
विदारयामास स रावणेरो	१४	१५/१
विद्धवद् बद्धवद् रामो–	१०	१४/१
विद्याविशिषेशुविशिष्टमेकं	१६	१८/१
विद्युज्जिह्वोऽथ मायावी	३	३२/१
विद्युन्मुखांश्च सूर्यास्त्रैः	१३	६२/३
विधाय व्यूहविस्तारं	३	१/१
विधाय संस्कारमथापराश्च	१४	२३/३
विधूय वानरान् बाणै–	१३	२८/१
विध्यमानः शरैस्तीक्ष्णै–	६	१७/१
विनाऽपि सूतं वहतोऽस्य	११	६१/१
विनीतान् नीतिसम्पन्नान्	१	३६/१
विनेदुर्वानरा हृष्टा–	१३	३१/३
विन्ध्यं सह्यं चाभ्यगच्छन्	१	१४/३

Rarest Archive

विपक्षवक्षो नावेक्षे	७	४/१
विपक्षवर्गनिर्मुक्ताः	२	५/१
विभीषणस्य वचनात्	११	५२/१
विभीषणस्यानुचरा	११	५३/
विभीषणस्यानुमतेन दूतं	४	५/३
विभीषणायैष मुमोच	११	६३/१
विभीषणेनैवमुक्ते	१	४७/१
विभीषणो गदापाणिः	१३	३०/१
विभीषणो गदापाणिः	२	५८/१
विभीषणोऽब्रवीद् रामं	११	१६/१
विभीषणोऽलं विललाप	१४	१८/३
विभीषणोऽश्वान् न्यहनत्	११	६३/३
विभूषणैस्तैश्च विभूषिता–	१६	१६/१
विमानयानैर्विबुधैर्द्विजैश्च	१४	१/१
विमाने भासमानः स	१३	४६/१
विमानेनासमानेन	१५	१६/३
विरराज वियत्येष	१०	४८/३
विराविणं भीमतरं नितान्तं	१४	१३/३
विरूपाक्षश्च यूपाक्षो–	१३	५/१
विरेजुर्देवसङ्काशा	१५	६२/३
विरेजे तारकगणैः	१५	८१/३
विलपन्तं विषण्णं तम्–	१०	४/१
विवक्षतो रूक्षमुखस्य	४	७/१
विविदो गिरिशृङ्गेण	५	२१/१
विविशुर्नगरीं ते च	१५	६८/३
विवेश बिभ्रत् सुग्रीवं	९	५२/१
विश्लेषार्ता रामदेवस्य	१५	८५/१
विश्वकर्मसुतं वीरं	२	४९/१
विश्वग्रासिदशग्रीव–	१३	५०/३
विश्वेशितुः कार्मुकबाण–	४	२६/१
विश्वेश्वरः क्रीडति सेनया	१२	१२/३
विश्वेश्वरोऽपि भगवान्	१	१७/३
विशालं शैलमादाय	१३	३५/३
विशाले प्रजहारोच्चैः	९	५८/३
विषसाद लये यद्वत्	६	२९/३

विषादं वीक्ष्य हनुमान्	६	३१/१
विष्फारयन् महच्चापं	७	२/३
विष्फारयन्ति स्म धनूंषि	१२	२६/१
विष्फारशब्देनसुरासुराणाम्	१२	१३/३
विसृत्वरःसैन्यमहौघसङ्घ	१२	६/३
वीरा वारिधिवार्यर्थं	१५	७८/३
वीर्योदार्यं तव ज्ञात्वा	२	१६/१
वृत्ताभ्यां ताम्रनेत्राभ्यां	९	२७/३
वृन्दलक्षं महावृन्दं	३	२०/१
वृन्दारकैरिन्द्रपुरःसरैश्च	१४	३६/१
वेलां विशलामापेदे	१	१६/१
वैडूर्यमणिसङ्काशो–	२	४३/१
व्यक्तं सुपार्श्वेननिवारितो	१२	३/३
व्यक्तेन्द्रचापावचिरांशुचरू	१४	७/३
व्यापादयामास च तं	१४	१५/३
व्याप्ता महाब्धेश्च तटे	४	२३/३
व्यालीं करालीं तां	१	४१/३
व्योम्नोऽवतीर्योपगतो–	१४	१/३
व्रजाम शरणं राम–	१	४८/३
–श–	––	––
शक्तश्चेत् पालयाऽत्मान–	१३	३२/३
शक्रशत्रुःपुरीं प्राप्य मुमुदे	१०	१२/३
शक्रारिणा शर्वबलात्	१०	१६/१
शङ्कुलक्षं महाशङ्कुं	३	१९/३
शतकुम्भैरथाम्भांसि	९	५/३
शतशत्रोः रिपुजनान्	११	१४/१
शतानि सप्त चाष्टौ च	९	३८/१
शत्रुं मित्रमथान्यं वा	२	१९/३
शत्रुघ्नेन समादिष्टः	१५	६५/१
शत्रुघ्नोऽप्येवमेवैतान्	१५	५१/१
शत्रौ रथस्थे सति नाथ	८	३४/३
शम्भुशर्वौ पुरस्कृत्य	१३	४७/१
शम्भुशर्ववराद् गर्वी–	१०	२५/१
शयितानासितान् यातान्	३	५/३
शर एको दहेद् यस्य	९	१५/३

Rarest Archiver

शरं महामेरुगुरुं स्वचापे	१४	१२/३
शरणमशरणो व्रजामि	१	५४/३
शरपञ्जरबद्धोऽथ	१३	२२/१
शरबर्हिः शोणवासा	१०	७/१
शरवर्षं सुबहुलं	१३	२९/३
शरा इव निकृन्तेयु–	२	५/३
शरानशनिसङ्काशान्	५	१२/१
शरवर्षं विरूपाक्षं	५	९/३
शरीरपातादुदगन्महाब्धिः–	९	७८/३
शरीराणि कपीन्द्राणाम्	५	२३/३
शरेण तेन भिन्नोरा	७	१२/३
शरेण विध्वा विवशं	८	३८/१
शरैः शरीरान्तकरैः	५	३०/३
शरैः स शैलाञ्छकली–	८	९/३
शरैरशनिकल्पैस्तं	११	५६/३
शरैराशीविषाकरैः	१०	११/१
शरैर्निशाचरेशस्य	१३	५८/३
शरैर्विदारयामास	११	४६/३
शरैर्विव्याध सौमित्रिः	११	५५/३
शरैस्तं शकलीचक्रे	५	३२/३
शरौ ज्वलन्तौ ज्वलन–	११	६५/३
शर्वशम्भुवराद् गर्वी–	११	३/१
शाखेव शाखिनः स्निग्धा	१०	४१/३
शातकुम्भमयैः कुम्भै–	१५	८०/१
शापोऽयं ननु सीतायाः	१	३१/३
शिखरं हेमशैलस्य	१५	६६/३
शिलयाऽथो विपुलया	५	४१/३
शिरीषमालामृदुलां	१	४१/१
शिरो बिभेद नीलस्य	५	२६/१
शिरः पादेन निष्पिष्य	६	५८/३
शिरः शैलेन तस्याथ	५	३४/३
शीर्यमाणान् रिपुशरैः	६	२२/१
शुकं दूतं कपीन्द्राय	२	२८/३
शुकमेव मुमोचाथ	३	१/३
शुकालपालक्ष्मणमाललाप	१४	४४/३
शुको विहङ्गमो भूत्वा	२	२९/१
शुचिस्मितां तां पतिरिङ्गि	१६	१७/३
शुभान् व्रीहिमहाव्रीहि–	१५	७६/१
शुश्राव रामसैन्यानां	३	३८/३
शुश्रूषां गरुडः कृत्वा	१०	२२/१
शुष्यत्यम्भोनिधौ मङ्क्षु	२	४०/१
शूरः शरसहस्रेण	११	४७/१
शूरा न गर्जन्ति निशाचरे	८	२१/३
शृणु वत्स हितं वाक्यं	३	३९/३
शैलमुत्पाट्य चिक्षेप	५	३३/१
शैलेन्द्रान् गण्डशैलांश्च	२	५०/१
शैलैः खड्गाद्यायुधैश्च	९	३/३
शैलैः सालैर्नखैश्चोग्रा–	५	२९/३
शोणिताक्षोऽथ विविदं	६	१३/३
शोषयन् स्तम्भयन् वाऽपि	१	२१/१
श्यामलं कोमलं रामं	१५	४४/१
श्यामलाङ्गं शबलयन्	१३	४१/१
श्रवणं दर्शनं वा ते	१५	५/३
श्रियाप्रदीप्तानविषादिनोऽत्र	१२	१६/१
श्रीमता सेतुना तेन	२	५७/१
श्रीरामनामाक्षरलक्षणोऽयं	१४	१४/१
श्रुत्वा तयोरिदं वाक्यं	३	२९/१
श्रेणीं शराणां विदधाति	४	८/३
श्वः प्रभाते रणमिति	३	४८/३
श्वासवेगैः पतन्तोऽस्य	९	३/१
–ष–	––	––
षोडशष्टौ च दश च	९	३९/१
–स–	––	––
स एव कुम्भकर्णोऽयं	१३	१२/१
स कुण्डली भूषणभूषिता	८	२/१
स जृम्भमाणः सहसा	९	८/१
स तांश्छित्वा शरेणाऽशु	६	५३/३
स देवतानामभयङ्करात्मा	१०	५१/१
स द्वितीय इवाऽदित्य	१०	४४/१
स पञ्चयोजनोत्सेधं	९	२३/१

Rarest Archiver

स मार्गणः श्रीरमणेन	१४	१४/३	सन्धीयतां राघवेण	३	४२/१
स मूर्च्छितस्तत्रमुहूर्तमुग्रः	८	१३/१	सन्नह्यतां प्रतिद्वारं	३	४५/३
स यौगपद्येन शतं सहस्रं	१२	२१/१	सन्नाहयन्नाहवशोभिनीं	८	१/३
स रक्तगन्धेन विवृद्धदर्पः	९	६३/१	सन्मण्डितं कुण्डलमण्ड	११	७०/३
स राजधर्मं भुवनैकराजो	४	५/१	सप्तद्वीपवती पृथ्वी	१०	४१/१
स राजराजः परिराजमानो	१६	२४/१	सप्तद्वीपवतीं भूमिं	१०	१६/३
स रामबाणैरथ भिन्नवर्मा	९	६६/१	सप्ताब्धयोऽनुपानार्थम्	९	२०/३
स रावणिर्बाणगणैः–	११	५८/१	सप्तार्चिराभानथ सप्त	८	२२/१
स रावणो राघवमाप्य	८	३५/३	सफलीकुरु लोके ते	१५	४०/३
स राहुमुक्तेन्दुरिवाऽर्ति	८	३०/३	सबलस्ते सुवेलाद्रौ	३	३५/३
स लक्ष्मणस्यादलयल्ल–	८	२४/३	सबाणबाणासनमुल्बणास्य	८	३/३
स लक्ष्मणोऽमुञ्चत	११	६६/१	सभायां मन्त्रिणां मध्ये	१	१९/३
स वायसो हंसमिवाति–	८	४२/१	समधिकपरिरब्धो राम–	१०	५३/१
स शरैरशनिप्रख्यै–	१०	९/१	समन्तात् परिधावन्तो–	९	४/३
स शैलं शकलीकृत्य	६	५५/१	समन्त्रतन्त्रान्तरकोविदैः	१६	२/१
स सौमित्रिरमित्राय	११	४३/३	समरभुवि स तिष्ठन्क्षेप–	१०	५३/१
स हुत्वाऽऽथर्वणैर्मन्त्रै–	१०	८/१	समादिदेशाऽशु रणाय	१२	४/३
संरम्भं तं भगवतो	१३	७०/१	समादिदेशथ दिशिप्रती–	४	१७/१
संरम्भसम्भिन्नमना दशा	८	३६/१	समीपे मेरुशैलस्य	१०	३७/१
संरम्भारुणताम्राक्षो–	६	२६/३	समुद्रतरणोपायं	२	२६/३
संसेव्यदिव्यस्तुतिभिर्जनो	१४	३/३	समुद्रलक्षं कवयो–	३	२२/१
सकलं कलहस्याथ	९	१२/	समुद्रवीर्याश्च महौघवीर्याः	४	२४/३
सकोपमाटोपमुपाजगाम	९	६६/३	समुन्नतेन वृक्षेण	५	२१/३
सकौतुकेभ्यो मन्त्रिभ्यो–	१५	७२/३	समूलतूलं धक्ष्यामि	१	५/१
सङ्कल्पात् सत्यसङ्क–	१५	२/३	सम्पातिने प्रजङ्घोऽथ	५	६/१
सङ्कोचमाप्तो नगरीं	९	७७/३	सम्पूजितो रावणेन	९	२२/३
सङ्ख्यातं चेदिदं सैन्यं	३	१०/१	सम्पूर्णचन्द्राभमुखोऽर्ध–	९	७३/३
सङ्ग्रामः समजन्युग्रे–	१३	१४/३	सम्प्राप्य सञ्ज्ञामनवाप्य	१४	४/३
सचिवानाममीषां ते	२	१४/३	सम्प्रेक्षको वायुसुतं प्रमा	४	१९/३
सञ्छिद्य चापखड्गौ च	६	६२/१	सम्भ्रान्तःकुम्भकर्णोऽथ–	९	५५/१
सञ्ज्ञामवाप्याथ च कुम्भ	९	६०/१	सम्भ्राम्यन्नक्रचक्रादिः	२	४२/१
सञ्ज्ञामवाप्येन्द्ररिपुः	११	४४/१	सम्मन्त्र्य मन्त्रिभिःसार्द्धम्	३	३१/१
सत्ताशक्त्यादिमन्तः	१३	६१/३	सम्मूर्च्छयन्तोऽपि विकास	१६	७/१
सत्यमेवमिदं किं तु	१	२९/३	सर्पिः कलशदेशीयो–	२	३९/३
सन्धानमाकर्षमिषोर्विमोक्षं	१२	२०/१	सर्वदिव्यायुधोपेतं	१३	४/१

Rarest Archiver

सर्वलोकशरण्येन	२	१५/१
सर्वशक्तिरिमां शक्तिम्	१३	३८/१
सर्वशक्तिस्ततः शक्त्या	१३	७२/१
सर्वाङ्गसुन्दरं रूपं	१५	५९/१
सर्वाननेभ्योऽथ जगाल	८	१२/३
सर्वेऽपि ते श्याममणीन्द्र	१२	३२/१
सर्वेऽपितेसर्वगुणाभिरामाः	१२	३२/३
सर्वेष्वसङ्गो मयि योऽति	१६	२०/३
सर्वैर्मुखैः शोणितमुद्गिरन्	८	२८/३
सर्वौजसा सर्वजयी दशा	८	१५/३
सवर्णकरणी चैव	१०	३८/३
सवेणुवीणागणकाहलीनां	१६	६/३
सशत्रुघ्नोऽथ भरतो–	१५	६०/३
ससर्ज विविधान् बाण–	१३	५९/१
ससीतालक्ष्मणो मात्रृः–	१५	५२/३
ससुग्रीवौ राघवौ तौ	३	४९/१
ससुप्तघ्नो यज्ञकोपो	६	३८/१
ससूताश्वरथं तूर्णम्	७	१९/३
ससैन्यः पश्चिमद्वारे	११	११/३
ससैन्या रावणादिष्टा	६	४०/१
सस्त्रीबालैः सर्ववर्णैः	१५	३४/३
सह सर्वैरयोध्याया	१५	५७/३
सहस्रमूर्ध्नोऽस्य बतैक–	८	२७/३
सहस्रशः साहसिनः पुनः	९	६२/३
सा नीलोत्पलमालेव	१३	५७/३
सा वाहिनी वानरवाहिनीं	१२	७/३
साक्षान्नारायणं रामं या	१५	७/३
साटोपमास्फोट्य गभीर–	४	२९/३
साधारणं भूषणभूष्यभावं	१६	१२/१
साधूनां धर्ममार्गस्य	१३	७७/३
सानुजो मुदितः सार्धम्	३	१५/३
सानुरागमवित्रस्तं	२	१०/३
सान्द्रानन्दो मन्दहासी	११	७३/३
साम्यं नसहमानोऽथ	७	१४/१
साम्राज्यं भोक्तुमाप्तोऽयं	२	१६/३
सालजालादथोत्पत्य	११	२२/३
सालशैलशिलावर्षं	९	४६/१
सालशैलशिलाहस्ता	१०	२२/३
सालशैलशिलाहस्ताः	९	३५/३
सालेन तान् जघानोग्रान्	११	५४/३
सालेनास्य जघानाश्वान्	५	२५/३
सिंहनादः कृतो घोरः	११	१/३
सिंहव्याघ्रादिकमुखान्	१३	५९/३
सिंहासनमथाध्यास्त	१५	५८/३
सितातपत्रं तपनीयदण्डं	१६	१०/१
सिद्ध्युपायगुणाङ्गानि	१	३७/१
सीता पदैस्तंलळितैरुपेत्य	१६	३/१
सीता विलोभ्या मायाभिः	९	२१/३
सीतां सुग्रीवपत्नीं च	१५	६३/३
सीताकान्तं रावणारिं	१५	४५/१
सीताकान्तप्रसादेन	२	४८/१
सीताकृतिं दिव्यपरीक्षण–	१४	४८/१
सीतापतिः ससीतस्त्वां	१५	२६/१
सीताया लक्ष्मणस्यापि	१५	५०/१
सीताहेलनदोषेण	५	४८/३
सीते सीमन्तिनीनां त्वां	१५	७/१
सुग्रीवः सहितः प्रात–	३	५०/१
सुग्रीवमारात् परिवार्य	४	२१/३
सुग्रीवमुख्येष्वथ वानरेषु	१४	४५/१
सुग्रीवसौमित्रियुतः	१	९/३
सुग्रीवस्य च तत् सख्यं	१५	७२/१
सुग्रीवाङ्गदनीलादीन्	१०	३०/१
सुमेरुशिखराकारं	१५	१३/१
सुराः पुरस्कृत्य पुरन्दरं	११	६८/१
सुरासुरैरप्रधृष्या	२	३१/१
सुवर्णपुङ्खानतितीव्रधारा	१२	१४/१
सुवर्णसुन्दरैरेष	६	५९/१
सुवृत्ताविव दुर्वृत्तौ	३	६/३
सुषेणजाम्बवत्पूर्वा	१	९/१
सुषेणो जलमानिन्ये	१५	७९/१

Rarest Archiver

सुषेणो जाम्बवान् नीलो	६	२०/१
सुषेणोऽथ रथं भित्त्वा	५	१३/१
सूदयामास शिलया	५	२२/१
सूदयिष्यामि शक्रारिं	११	४/३
सृष्ट्वा स्वमायया सीता	११	१२/३
सेति ब्रुवाणा प्रणिपत्य	१४	४६/३
सेतुं पञ्चाहतश्चक्रे	२	५६/३
सेतुमत्यगमन् केचित्	९	३२/१
सेनानीरथ सेनान्यं	५	२४/१
सेनान्य एनंबहुसैन्यवन्तो	८	७/१
सेनाया विश्रमं चक्रे	२	५९/३
सेनायास्तत्र सेनान्या	१	१६/३
सैन्येषु सैन्यप्रभवोऽभ्ययु	१२	८/३
सोऽभवत् सर्वजगतां	१५	४७/३
सौमित्रिः पञ्च नाराचान्	११	३९/१
सौमित्रिमार्तं पतितं विलो	८	२९/१
सौमित्रिसुग्रीवविधातृ	१०	५२/१
सौमित्रे कृतकृत्योऽसि	१५	८/१
सौष्ठवे लाघवे वीर्ये	११	४९/१
स्थितो वियति सुग्रीवं	२	२९/३
स्नाताः सुवस्त्राभरणाः	१५	६२/१
स्नुषाणामथ भार्याणां	१३	२/१
स्नेहवांश्चापरिचितः	२	६/१
स्पृष्ट्वा कराभ्यां करुणा	८	३०/१
स्मरन्नसह्यान्रघुनाथबाणा	८	४१/३
स्मितावलोकैः सम्पूज्य	१५	५२/१
स्रस्तगात्रो विवृत्ताक्षो–	१३	८०/३
स्वतेजसा पालयेन्नो–	१०	३४/३
स्वपार्षदानां प्रवरेण तेन	१४	६/१
स्वयं चेन्मोचयेच्छ्रेय	९	५१/३
स्वयंवरे च व्यसने च	१४	४०/३
स्वयम्भुवं वा भुवनाभि–	८	३३/१
स्वयम्भुवा दत्तममोघमुग्रं	८	२४/१
स्वरूपभूताश्च वपुर्गुणाद्या	१४	३०/३
स्वर्गादप्यपवर्गाच्च	१५	५/१

स्वर्णपुङ्खान्स्फुरत्पक्षान्	१३	५१/३
स्वस्ति तेऽस्तु गमिष्या–	१	५०/३
स्वस्त्यस्तु रामानुज ते –	११	६८/३
स्वस्त्यस्तु वत्स प्रिया–	१४	३९/१
स्वां चमूंचञ्चलां दृष्ट्वा	५	४१/१
स्वागतं रामदेवेति	१५	५१/३
स्वामिंस्तव प्रसादेन	१५	५४/३
स्वामिनो दारचोरो मे	३	५३/१
स्वामी राम उपायाति	१५	३३/१
स्वेष्वेव गात्रेषु निलीय	१४	४१/३
स्वैश्वर्यमेवं च निदर्शयन्	१२	२२/३
–ह–	––	––
हंससंहतियुक्तेन	१५	१६/१
हनुमान् कथयामास	१५	३०/१
हनूमति स मोघोऽभूत्	६	३३/३
हनूमतो मुखं वीक्ष्य	१५	३५/१
हनूमतोऽवर्धत तैःस्वतेजः	८	३६/३
हनूमत्तलचूर्णाङ्गो–	५	७/३
हनूमन्तं पुरस्कृत्य	११	१०/३
हनूमन्तमुपान्तस्थम्	१५	२०/१
हनूमानाक्षिपत् तस्मै	५	४४/३
हन्त कोटिसहस्रेण	३	२३/३
हन्यां शरेण शक्रारि–	११	५/३
हन्यू रक्षस्तमस्तावद्	१	४५/३
हरयो हरिसङ्काशाः	११	१२/१
हरिन्मणिश्यामलकोमला	१२	२५/१
हरिपरिषदि रामं सस्मितं	३	५४/३
हरिप्रबर्हा हनुमत्पुरोगाः	४	४/१
हरिप्रबर्हा हनुमत्पुरोगाः	११	७१/३
हरींस्तान् निरुजश्चक्रे	१५	१/३
हर्म्यस्थाः पुररामास्तं	१५	७१/१
हा पुत्र मातस्तातेति	५	४९/१
हारस्रजाऽसौ हनुमान्	१६	२२/३
हा राम राजधर्मज्ञ	२	३३/३
हा रामकान्तामपहृत्य	१४	२०/१

Rarest Archiver

हा वत्स कुम्भकर्ण	१०	२/१
हा वत्स नौ त्वं पितरौ	१२	२/३
हाहाकारो महानासीत्	६	१९/३
हाहाकृतं वानरराक्षसैस्तैः	१४	४७/१
हृदि विध्वा शरं घोरं	६	५५/३
हेमरत्नमयं दिव्यं	१५	७३/३
हेमाम्बुजानां रचितांशतेन	१६	१३/१
हेयभागाच्च गृह्णन्ति	२	१०/१
होमविघ्नं स्फुटं चक्रुः	११	२१/३
------------	--	---
-------------	--	---
-------------	--	---

–क्ष–	--	--
क्षणमात्रेण चिक्षेप	११	२६/३
क्षणात् पिपेष पाणिभ्यां	९	४३/१
क्षणेन चापान्तरमाददे	११	५९/१
क्षमस्व लक्ष्मीरमणापराधं	१४	३५/३
क्षमस्वाऽर्येति धनुषि	२	४१/३
क्षिप भक्षय पिङ्क्षोर्व्यां	९	४१/१
क्षिप्रं प्रचिक्षेप स रा–	९	६५/१
क्षीणप्राणावथाऽक्रन्दं	३	७/३
क्षुभ्यतः कपिसैन्यस्य	२	५४/१
क्षुरार्धचन्द्रनाराचान्	६	५/१
क्षोभयन्तोऽपि गगनं	१०	१०/३

Rarest Archive



इति पवनसुताय श्रेष्ठभक्ताय रामो हसितसितगुबन्धून् प्रेमपीयूषसिन्धून् ।
भुवनजननरक्षाभङ्गलीलाप्रसङ्गान् वितरति कमलायै दत्तशेषानपाङ्गान् ॥

॥ श्रीरामचन्द्रार्पणमस्तु ॥

रामो रक्षतु मां चराचरगुरुः रामं नमस्याम्यहं
रामेणामरशत्रवो विनिहताः रामाय तस्मै नमः ।
रामादेव समुत्थितं जगदिदं रामस्य दासोस्म्यहं
रामे भक्तिरचञ्चलास्तु भगवन् हे राम! तुभ्यं नमः ॥

॥ इति शम् ॥

Rarest Archiver